અમદાવાદ શ્રી નરનારાયણદેવ દેશ ગાદીના પ.પૂ.ધ.ધુ. આચાર્ય
૧૦૦૮ શ્રી કોશલેન્દ્રપ્રસાદજી મહારાજશ્રીની આજ્ઞાથી

# ॥ સ્ત્રોત્ર રત્ન સિંધુ ॥



પ્રકાશક : શ્રી સ્વામિનારાયણ મંદિર કાલુપુર, અમદાવાદ
તથા
શ્રી સ્વામિનારાયણ મંદિર, ઇટાસ્કા, શિકાગો, અમેરિકા

॥ श्री स्वामिनारायणो विजयतेतराम् ॥

**શ્રીનરનારાયણદેવ પીઠાધિપતિ પ.પૂ.ધ.ધુ. આચાર્ય મહારાજશ્રી**

**૧૦૦૮ શ્રી કોશલેન્દ્રપ્રસાદજી મહારાજશ્રીની આજ્ઞાથી**

# स्तोत्र रत्नसिंधु


**: સંપાદક :**

મહંત સ્વામી શાસ્ત્રી નિર્ગુણદાસજી (વેદાન્તાચાર્ય, કાશી)



**: પ્રકાશક :**

શ્રી સ્વામિનારાયણ મંદિર, કાલુપુર, અમદાવાદ-૩૮૦ ૦૦૧. તથા

શ્રી સ્વામિનારાયણ મંદિર, ઈટાસ્કા શિકાગો (ISSO) અમેરિકા

**: પ્રકાશન તિથિ :**

પ.પૂ.ધ.ધુ. આચાર્ય ૧૦૦૮ શ્રી કોશલેન્દ્રપ્રસાદજી મહારાજશ્રીની ૪૮ મી પ્રાગટ્ય તિથિ

સં. ૨૦૭૬ આસો સુદ-૧૦ વિજયા દશમી તા. ૨૫-૧૦-૨૦૨૦

**આવૃત્તિ : પ્રથમ**
**પ્રત :** ૫૦૦
**કિંમત :** રૂા. ૫૦/- (રાહત દરે)
© સર્વ હક્ક પ્રકાશક સંસ્થાને સ્વાધીન
પ્રકાશક :
**પ.પૂ.ધ.ધુ. આચાર્ય મહારાજશ્રી ૧૦૦૮ શ્રી કોશલેન્દ્રપ્રસાદજી મહારાજશ્રીની આજ્ઞાથી**
ટ્રસ્ટ બોર્ડ, શ્રી સ્વામિનારાયણ મંદિર, અમદાવાદ વતી
**મહંત સ્વામી શાસ્ત્રી નિર્ગુણદાસજી (વેદાન્તાચાર્ય, કાશી)**
**સહયોગ દાતા યજમાનશ્રીઓ :** મિડવેસ્ટ શ્રી સ્વામિનારાયણ મંદિર (ISSO) શિકાગો અમેરિકા
સંત મંડળ (૧) મહંત સ્વામી સ.ગુ. શાસ્ત્રી ભક્તિનંદનદાસજી (૨) પૂજારી સ.ગુ. બ્રહ્મચારી શ્રી કે.પી. સ્વામી (૧) અ.નિ. શાંતાબેન રમણભાઈ પટેલ - હસ્તે હરિ અને શિલ પટેલ (૨) અ.નિ. શકુંતલાબેન બળવંતરાય કવિ - હસ્તે ઘનુભાઈ અને ધ્રુવ કવિ (૩) અ.નિ. કુસુમબેન ભરતભાઈ અમીન - હસ્તે હિતેન અને ભાવેશ અમીન (૪) અ.નિ. પશીબેન વેણાંભાઈ પટેલ - હસ્તે વિઠ્ઠલભાઈ અને કમળાબેન પટેલ (૫) ગં.સ્વ. ડાહીબેન રામદાસ પટેલ વડુ - હસ્તે પંકજભાઈ - મહેન્દ્રભાઈ પટેલ
**પુસ્તક પ્રાપ્તિ સ્થાન :**
શ્રી સ્વામિનારાયણ મંદિર, કાલુપુર, અમદાવાદ-૩૮૦ ૦૦૧. તથા
મિડવેસ્ટ શ્રી સ્વામિનારાયણ મંદિર, (ISSO) શિકાગો
**ટાઈપ સેટીંગ અને મુદ્રક :**
શ્રી સ્વામિનારાયણ પ્રિન્ટીંગ પ્રેસ, શ્રી સ્વામિનારાયણ મંદિર, કાલુપુર, અમદાવાદ-૩૮૦ ૦૦૧.

*His Holiness Acharya Maharaj*
*Shri Koshalendraprasadji Pande*

॥ શ્રી સ્વામિનારાયણ નમઃ ॥

Per.Sec./15/20-21 Dt : 25/09/2020

## આજ્ઞા પત્ર

પ્રતિ
મહંત શાસ્ત્રી સ્વામી નિર્ગુણદાસજી
શ્રી સ્વામિનારાયણ મંદિર
કાલુપુર, અમદાવાદ-૩૮૦૦૦૧

સર્વાવતારી ભગવાન શ્રી સ્વામિનારાયણના ગુણગાન કરવા એ આપણા સૌના માટે એક મહત્વનો અને અમૂલ્ય અવસર છે. નંદ સંતો હંમેશા શ્રીહરિના સ્વરૂપનું ચિંતન તેમના ગુણ ઐશ્વર્યનું ગાન કરવામાં જ વિતાવતા હતા. તેનું પ્રત્યક્ષ પ્રમાણ તે મહાન સંતોના કીર્તનના પદોમાં વ્યક્ત થતો ધ્વનિ છે. તેવીજ રીતે સંસ્કૃત ભાષાના વિદ્વાનો, સંતો, મહાનુભાવોએ પણ પોતાના સ્તોત્રો અને મોટા ગ્રંથોમાં એવા જ ભાવ શ્રધ્ધા વ્યક્ત કરેલાં છે. તેને સમજવા માટે આ સ્તોત્ર રત્નાસિંધુ નામની પુસ્તિકા સૌ સંતો, ભક્તોને સહાયક થશે તેવી ભગવાન શ્રી નરનારાયણદેવના શ્રીચરણોમાં પ્રાર્થના સાથે શુભાશીર્વાદ સહ જયશ્રી સ્વામિનારાયણ.

ઉંડા આશીર્વાદ સહ

આજ્ઞાથી,

પર્સનલ સેક્રેટરી
પ.પૂ.ધ.ધુ. આચાર્ય મહારાજ શ્રી
શ્રી સ્વામિનારાયણ મંદિર,
કાલુપુર-અમદાવાદ.

Shree Swaminarayan Mandir,
Ahmedabad-1
Tel: 079 2212 3835

Shree Swaminarayan Bagh,
Ahmedabad-52
Tel: 079 2747 8070

# શુભાશંસા

ગુજરાતી ભાષામાં રચાયેલાં કીર્તનોનો જેમ મહિમા છે તેમ સંસ્કૃત ભાષામાં રચાયેલાં સ્તોત્રોનો મહિમા પણ અપાર છે. કારણ કે આ સ્તોત્રોમાં સર્વોપરી શ્રીહરિના સ્વરૂપ ગુણ માહાત્મ્ય ઐશ્વર્ય ધ્યાન પ્રાર્થના વગેરેનું વિશદ્ નિરૂપણ કરાયું છે.

સંસ્કૃત ભાષામાં સાહિત્યની દૃષ્ટિએ ઉચ્ચકોટીનાં તેમજ જુદા જુદા છંદો તથા શાસ્ત્રીય રાગોમાં રચાયેલાં જ્ઞાન સભર ભક્તિ અને શરણાગતિમૂલક એવાં સ્તોત્રોની સંખ્યા તો ઘણી છે. પરંતુ એમાંથી મહંત સ્વામીશ્રી શાસ્ત્રી નિર્ગુણદાસજીએ સાઈઠ સ્તોત્રોનો આ સંગ્રહ શબ્દાનુવાદ ભાવાનુવાદ સાથે પ્રસિદ્ધ કરીને શ્રદ્ધાવાન સત્સંગીજનો માટે મોટું કાર્ય કર્યું છે.

ભક્તજનોને જાણીને નવાઈ લાગશે કે પૂજ્યપાદ આચાર્ય મહારાજશ્રીની આજ્ઞાથી દેશવિદેશમાં કથા પારાયણની સેવા ઉપરાંત હાલમાં આપણા અમદાવાદ મંદિરના મહંત પદે રહી સત્સંગની સેવા નિભાવવાની સાથે આ પુસ્તકમાંના સાઈઠ સ્તોત્રો મહંત સ્વામીએ મુખાગ્ર કર્યા છે. અને દરરોજ શ્રીહરિની સમક્ષ આ સ્તોત્રોનો મુખપાઠ કરે છે.

આ સ્તોત્રોમાં સમાયેલું ગહન જ્ઞાન જે વિદ્વદ્ ગમ્ય હતું તે જ્ઞાન સર્વજન સુલભ કરી આપ્યું છે. આ સ્તોત્રસંગ્રહ સત્સંગ પરાયણ ભગવદ્ ભક્તો માટે ભક્તિ અને જ્ઞાનનું કાયમી ભાથું બની રહેશે. કારણ કે આ સ્તોત્રો ઉપાસનાના અંગભુત છે.

મહંત સ્વામી દ્વારા આવાં સત્સંગ સાહિત્ય સેવાનાં અનુપમ કાર્યો થતા રહે એવી શ્રી નરનારાયણદેવના ચરણ કમળમાં પ્રાર્થના સાથે ધન્યવાદ.

*- હરિકેશવદાસ શાસ્ત્રી, શ્રી સ્વામિનારાયણ મંદિર, સેકટર-૨૩, ગાંધીનગર.*

## બે શબ્દો

સનાતન હિન્દુ સંસ્કૃતિની એક વિશેષતા એ છે કે આપણા સનાતન ધર્મ ગ્રંથો અને સિદ્ધાંતો દેવાભાષા સંસ્કૃતમાં રચાયેલાં છે. પરમાત્માના દિવ્ય મંગલ વિગ્રહના ગુણગાનની રચના પણ આપણા ઋષિમુનિઓએ અને સંતોએ સંસ્કૃત ભાષામાં જ કરી છે. માટે સંસ્કૃત કાવ્ય દ્વારા પરમાત્માના ગુણોનું ગાન જેટલું ઉત્તમ પ્રકારે કરી શકાય તેટલું કદાચ અન્ય ભાષાઓ વડે અશક્ય પણ બને.

ભગવાન શ્રી સ્વામિનારાયણના નંદ સંતો અને વિદ્વાન હરિભક્તોએ સંસ્કૃત ભાષામાં પરમાત્માને પ્રસન્ન કરવાના સાધનરૂપ પરમાત્માના દિવ્ય ગુણોનું વર્ણન કરતા સ્તોત્રોની રચના કરી છે.

સંપ્રદાયની મુળ પ્રણાલિકા અનુસાર દરરોજ ક્રમશઃ નિશ્ચિત કરેલાં અલગ અલગ સ્તોત્રોનું ગાન થાય છે. પરંતુ સંતો ભક્તો ગુજરાતી અર્થાનુસંધાન સાથે ગાન કરે તો ભગવાન પ્રત્યે ભક્તોને વિશેષ ભાવ થાય તેમજ પરમાત્માની વિશેષ પ્રસન્નતા થાય. એ હેતુથી પ.પૂ.ધ.ધુ.

૧૦૦૮ આચાર્ય મહારાજશ્રીની આજ્ઞા આશીર્વાદથી આ સ્તોત્રોનું ગુજરાતી ભાષામાં ભાષાંતર કાલુપુર શ્રી સ્વામિનારાયણ મંદિરના મહંત સ.ગુ. શાસ્ત્રી સ્વામી નિર્ગુણદાસજી (વેદાન્તાચાર્ય - કાશી) (અસારવા ગુરુકુળ) એ ખૂબજ મહેનત કરી સર્વ હરિભક્તો સંતો સરળ રીતે અર્થ સમજી શકે તેમ આ પુસ્તક તૈયાર કરી સાર્થ સ્તોત્ર નામથી પ્રકાશન કરી સત્સંગ સમાજને ભેટ આપતા ખૂબજ આનંદની હર્ષની લાગણી અનુભવીએ છીએ. આ પુસ્તકના માધ્યમથી શ્રી સ્વામિનારાયણ ભગવાનના સ્વરૂપમાં મૂર્તિમાં મનને જોડી રાખવા ખૂબજ ઉપયોગી નીવડશે.

આ પુસ્તક પ્રકાશનમાં શિકાગો મંદિરના સેવાભાવી હરિભક્તોએ સૌજન્ય સેવા કરી છે તે ખૂબ પ્રશંસનીય છે. તેમને શ્રીહરિ આવીને આવી સેવા કરવાનું બળ આપે તેવી શ્રી નરનારાયણદેવના ચરણોમાં પ્રાર્થના.

- મહંત સ્વામીશ્રી ભક્તિનંદનદાસજી,
પૂજારી બ્ર. સ્વામીશ્રી કે.પી. સ્વામી
શિકાગો મંદિર

# નિવેદન

ભગવાનને પ્રસન્ન કરવાના સાધનોમાં નવધા ભક્તિ સર્વ શ્રેષ્ઠ સાધન છે. તે સૌ કોઈ સરળતાથી કરી શકે છે. તેમાં શ્રવણ ભક્તિ પછી તરત જ બીજું સ્થાન કીર્તન ભક્તિને મળેલ છે. મોટા મોટા મહાપુરુષો પરમભાગવત્ ભક્તો દેવર્ષિ નારદદાદિ ઋષિમુનિઓ ભક્તો સૌએ કીર્તન ભક્તિ કરીને શ્રીહરિને અતિ પ્રસન્ન કરેલાં છે. ભગવાન શ્રી સ્વામિનારાયણને પ્રસન્ન કરવા તેમની સાથે કવિઓનો મોટો સમુદાય હમેશાં સાથે રહેતો. તેમાં મુક્તાનંદમુનિ, પ્રેમાનંદમુનિ, બ્રહ્માનંદમુનિ, દેવાનંદમુનિ, નિષ્કુળાનંદમુનિ, મંજુકેશાનંદમુનિ, અવિનાશાનંદમુનિ, ભૂમાનંદમુનિ, પૂર્ણાનંદમુનિ, દયાનંદમુનિ વિગેરે મુખ્ય હતાં. તે સૌ પ્રાકૃત ભાષા એટલે કે ગુજરાતી, હિન્દી, વૃજભાષામાં પદો કીર્તનો અને મોટા ગ્રંથોની રચના દ્વારા જનસમુદાયને ઉદ્ધવસંપ્રદાયની ઓળખ અને શ્રીહરિનો મહિમા માહાત્મ્યનું ગાન કરતાં. તેવી જ રીતે સંસ્કૃત ભાષાના વિદ્વાન સંતો શ્રીહરિની આજ્ઞાથી સમગ્ર જગતના પંડિતો અને વિદ્વાનોને પણ શ્રીહરિનો યથાર્થ મહિમા સ્પષ્ટ રૂપે સ્વીકાર્ય થાય તેવી રચનાઓ મોટા સત્શાસ્ત્રો રૂપે અને સ્તોત્રો જેને આપણે અષ્ટકોના નામથી જાણીએ છીએ તેમની શ્રેષ્ઠ સંસ્કૃત ભાષામાં રચના કરતાં હતાં. જેને સાંભળી વાંચીને કેટલીક વખત શ્રીહરિ

સ્વયં અતિ પ્રસન્ન થઈને અનેક પ્રકારના વરદાનો તે વિદ્વાન સંતોને આપતા હતાં. જેમ કે શ્રી શતાનંદમુનિ અને શ્રી વાસુદેવાનંદ વર્ણિકૃત શ્રી સત્સંગિજીવન કે સત્સંગિભૂષણની જે શ્રધ્ધા ભક્તિથી સપ્તાહ પારાયણ સાંભળે કે કરે તેને પોતે પ્રત્યક્ષ પ્રગટ પ્રમાણ દર્શન આપવાનું વરદાન આપેલ છે. તેમના અષ્ટકોને પણ તેવી જ રીતે સાંભળીને પ્રસન્ન થઈને આવા જ શુભ વરદાનો આપેલાં છે. જેમાં પ્રાકૃત ભાષાનાં અનેક કવિ વિદ્વાનો શ્રીહરિ સાથે હતાં તેમજ સંસ્કૃત ભાષાના મહાન વિદ્વાનો પણ શ્રીહરિની સાથે હંમેશા રહેતાં. તેમાં શ્રી શતાનંદમુનિ, શ્રી વાસુદેવાનંદમુનિ, શ્રી ગોપાળાનંદમુનિ, શ્રી નિત્યાનંદમુનિ, અચિંત્યાનંદમુનિ, નિષ્કામાનંદમુનિ, મુક્તાનંદમુનિ, બ્રહ્માનંદમુનિ, શ્રી શુકાનંદમુનિ, શ્રીમહાનુભાવાનંદમુનિ અને દીનાનાથ ભટ્ટ આદિ મુખ્ય હતાં. તેમની સંસ્કૃત રચનાઓમાં એક વાત ખાસ જોવા મળી છે તે એ છે કે આ સૌ વિદ્વાન સંતોએ ભગવાન શ્રી સ્વામિનારાયણને જ સાક્ષાત્ પરંબ્રહ્મ પરમાત્મા પુરૂષોત્તમનારાયણ સર્વોપરી સર્વાવતારી છે તેવું પ્રતિપાદન કરેલ છે. તેવા ભાવથી સ્તુતિ પ્રાર્થના કરી છે. તેના અર્થને સમજવાનું અને ભાષાની જેને સાધારણ સમજણ હોય તો પણ તે સ્તુતિ અષ્ટકો ગાવાનો અને સાંભળવાનો કંઈક દિવ્ય અલૌકિક જ આનંદ પ્રાપ્ત થાય છે. તેવો આનંદ સરળતાથી સૌ નાના મોટા ભક્તોને મળે તેવા શુભ આશયથી આ પુસ્તિકામાં કેટલાક પ્રસિદ્ધ ગવાતા અને અર્થ સભર એવા અષ્ટકોનો

શબ્દાર્થ ભાવાર્થ સંગ્રહિત કરવાનો પ્રયત્ન સાર્થ સ્તોત્ર પુસ્તિકામાં કરવામાં આવ્યો હતો. પરંતુ તે પુસ્તિકામાં કેટલાંક ચુંટેલા ૬૦ ની સંખ્યામાં જ સ્તોત્રો સંગ્રહિત કરી શકાયા હતાં. તે સિવાય અન્ય અસંખ્ય સ્તોત્રો પણ સંપ્રદાયમાં પ્રસિદ્ધ છે. તેમાંથી જેટલાં મળી શક્યા છે. તે સર્વ સંસ્કૃત સ્તોત્રોનો સંગ્રહ સંસ્કૃત ભાષાના રસવાળા અને જાણકાર માટે અને વિદ્યાર્થી સંતો તથા બ્રાહ્મણ બટુકોને ઉપયોગી થશે તેવા ભાવથી આ “स्तोत्र रत्नसिन्धु” ના નામથી પ્રકાશિત કરવાનો નિર્ણય કરેલ છે. જે આપ સૌના સમક્ષ પ્રસ્તુત કરેલ છે. જેનું છાપકામ કરવામાં સહયોગ દાતા યજમાનશ્રીઓને પ્રેરણા શ્રી મિડવેસ્ટ સ્વામિનારાયણ મંદિર (ISSO) શિકાગોના મહંત સ્વામી સ. શાસ્ત્રી ભક્તિનંદનદાસજી તથા પૂજારી સ. બ્રહ્મચારી શ્રી કે.પી. સ્વામી તથા મંદિરના કમીટીના સર્વ સભ્યોએ કરેલ છે. જેનો વિદ્વદ જનો નિરક્ષીર ન્યાય ગ્રહણ કરીને રાજી થાય એજ સૌના ચરણમાં નમ્ર વિનંતી છે.

- શાસ્ત્રી સ્વામી નિર્ગુણદાસજી

# अनुक्रमणिका


| अ.नं. | स्तोत्र | श्लोक | रचयिता | राग-छन्दः | पेज |
|---|---|---|---|---|---|
| १ | अथ मनसि शनैः | १४ | सत्संगिजीवन २/२५ | पुष्पिताग्रा | १ |
| २ | महातेजः पुंजस्फुरदमल | ८ | सत्संगिजीवन ३/१४ | शिखरिणी | २ |
| ३ | त्वद्रूपे निश्चला मे मतिरति | ९ | योगानन्द मुनि | स्रग्धरा | ३ |
| ४ | अवतीर्य निजाक्षरात्परादिह | ८ | नित्यानन्द मुनि | | ५ |
| ५ | श्रीनरनारायणमृषिराजं सुखदमहो | ८ | ब्रह्मानंद मुनि | पीलुराग | ६ |
| ६ | श्रीवासुदेवइहभारतजीवलोक | ८ | सत्संगिजीवन १/२ | वसन्ततिलका | ६ |
| ७ | सुरराजराज तव दर्शनं विना | ९ | योगानन्द मुनि | मञ्जुभाषिणि | ७ |
| ८ | अतिमनोहरं सर्वसुन्दरं | ८ | सत्संगिजीवन ३/४३ | ललितच्छदः | ९ |
| ९ | मुक्तानां सदसि सदा विराजमानं | ८ | अचिन्त्यानन्द वर्णि | प्रबर्षिणी | १० |
| १० | ब्राह्मेमुहूर्ते शयनं विहाय | ९ | दीनानाथ भट्ट | उपजाती | ११ |
| ११ | श्रीनीलकंठ हरिकृष्ण हरे दयालो | ८ | अचिन्त्यानन्द वर्णि | वसन्ततिलका | १२ |
| १२ | सद्धर्मरक्षात्तजने सदीश प्रतापनिर्मूल | ८ | मुकुन्दानन्द वर्णि | स्रग्विणिवृत्त | १४ |
| १३ | ब्रह्मधामाधिपं पुंप्रकृत्याक्षिप्तं | ९ | वासुदेवानन्द वर्णि | स्रग्विणिवृत्त | १४ |
| १४ | स्वामिनारायणदेवं शरणं | ५ | निष्कामानन्द मुनि | वसन्ततिलका | १६ |
| १५ | वरवरकरूणासागर कृष्ण सतांनाथ | ९ | वासुदेवानन्द वर्णि | अष्टपदी | १६ |

| अ.नं. | स्तोत्र | श्लोक | रचयिता | राग-छन्दः | पेज |
|---|---|---|---|---|---|
| १६ | नवमेघमेचकविग्रहं धृतपुष्पहारमनोहरं | ८ | वासुदेवानन्द वर्णि | हरिगीतच्छन्दः | १८ |
| १७ | मानस चिन्तय चारुचरित्रं | ९ | निष्कामानन्द मुनि | पालुराग | १९ |
| १८ | नित्यं शुद्धमंजं भुवनेश्वरमीशेशं | ८ | निष्कामानन्द मुनि | अष्टपदी | २० |
| १९ | विहरति योऽक्षरेक्षरपदाक्षरमुक्तपतिः | ८ | योगानन्द मुनि | कोकिलक | २१ |
| २० | तरुणं लोकयचातिकरुणं | ८ | वासुेदवानन्द वर्णि | अष्टपदी | २२ |
| २१ | हरिकृष्णं मानस लोककमनियमे | ९ | वासुेदवानन्द वर्णि | अष्टपदी | २३ |
| २२ | अथेकदा दिव्यतपास्तपंस्तस्विनां | ८ | योगानन्द मुनि | वंशस्थवृत्त | २३ |
| २३ | भवसंभवभीतिभेदनं सुखसम्पत्क | ९ | दीनानाथ भट्ट | वियोगीनिवृत्त | २५ |
| २४ | श्रीवासुदेव विमलामृतधामवासं | ११ | सत्संगिजीवन ५/६६ | वसन्ततिलका | २६ |
| २५ | जय जय सुखदवरं कमलाननलोभं | ८ | ब्रह्मानन्द मुनि | मालवराग | २८ |
| २६ | श्रीधर्मसद्मन्यवतीर्य विष्णुर्यो | ९ | गोपालानन्द मुनि | इन्द्रवज्रा | २८ |
| २७ | गोविन्द नारायण वासुदेव श्रीकृष्ण | ९ | सत्संगिजीवन ३/२६ | उपजाती | ३० |
| २८ | जलधरसुन्दर मदनमनोहर | ८ | योगानन्द मुनि | अष्टपदी | ३१ |
| २९ | परमाद्भुतदिव्यवपु रुचिरं | १९ | नित्यानन्द मुनि | तोटकवृत्तं | ३२ |
| ३० | केशवतापं हर हर मे ब्रह्मवन्तं | ८ | वासुदेवानन्द वर्णि | मालवराग | ३५ |
| ३१ | एहि दयालो हृदय शयालो दर्शय | ८ | दीनानाथ भट्ट | गुर्जरराग | ३५ |
| ३२ | नीतिप्रविण निगमागमशास्त्रबुद्धे | ८ | सत्संगिजीवन १/१७ | वसन्ततिलका | ३७ |

| अ.नं. | स्तोत्र | श्लोक | रचयिता | राग-छन्दः | पेज |
|---|---|---|---|---|---|
| ३३ | नवीनजीमुतसमानवर्णं | ८ | सत्संगिजीवन ४/८३ | उपजाति | ३८ |
| ३४ | हर हर गोपीनाथ मम | ९ | निष्कामानन्द मुनि | ठुमरी | ३९ |
| ३५ | भजमानस त्वं श्रीहरिं | ९ | निष्कामानन्द मुनि | ठुमरी | ४० |
| ३६ | सजलजलदसुन्दरं समांगं | ८ | योगानन्द मुनि | पुष्पीताग्रावृत्त | ४१ |
| ३७ | मात्स्यं रूपमलौकिकं भुवि दधत्क | ११ | सत्संगिजीवन २/२६ | शार्दूलविक्रीडितं | ४२ |
| ३८ | हे नीलकंठ शरणागतजीवपालं | ९ | अखण्डानन्द वर्णि | वसन्ततिलका | ४३ |
| ३९ | हे धर्मपुत्र हरिकृष्ण तपः प्रियाद्य | ११ | अखण्डानन्द वर्णि | वसन्ततिलका | ४५ |
| ४० | वदनं दर्शय मंदहसनं भक्तप्रिय | ८ | अखण्डानन्द वर्णि | ठुमरी | ४६ |
| ४१ | विघ्नेश विघ्नचयखण्डन | ८ | सत्संगिजीवन १/४२ | वसन्ततिलका | ४७ |
| ४२ | स्वामिन्परात्पर विभो पुरुषोत्तमाद्य | १० | शुकानन्द मुनि | वसन्ततिलका | ४८ |
| ४३ | जय जय दीनानाथ हरिकृष्ण | ८ | वासुदेवानन्द वर्णि | अष्टपदी | ४९ |
| ४४ | धर्मस्तज्जनको हरेश्चतनयो | १० | वासुदेवानन्द वर्णि | शुर्दूलविक्रीडितं | ५० |
| ४५ | धर्मधुरंधर दैत्यभयंकर | ८ | नित्यानन्द मुनि | अष्टपदी | ५२ |
| ४६ | त्वयितुहरेचेतो रमताम् | ९ | वासुदेवानन्द वर्णि | अष्टपदी | ५३ |
| ४७ | देवाभयदं नारायण देवाभयदं | ८ | वासुदेवानन्द वर्णि | अष्टपदी | ५४ |
| ४८ | प्रथमतः शकुलाकृतिरादधे श्रुति | ८ | दीनानाथ भट्ट | द्रुतविलम्बित | ५४ |
| ४९ | रमतां सततं सततमखे त्वयि | ६ | सत्संगिजीवन ३/६३ | | ५६ |

| अ.नं. | स्तोत्र | श्लोक | रचयिता | राग-छन्दः | पेज |
|---|---|---|---|---|---|
| ५० | सिताम्बरं नैष्ठिकवर्णिवेषं | ८ | सत्संगिजीवन २/३१ | उपजाती | ५७ |
| ५१ | दयार्जवादिसागरंनिरन्तर | ८ | मञ्जुकेशानन्द मुनि | पञ्चचामर | ५८ |
| ५२ | श्रीमत्प्रदीपालविरोचमाने | १२ | त्यागानन्द वर्णि | उपजाती | ५९ |
| ५३ | विशालभालं कलिजाकरालं | ८ | अचिन्त्यानन्द वर्णि | उपजाती | ६१ |
| ५४ | भुविसदंगणे सर्वसद्‌गुणे | ८ | दीनानाथ भट्ट | ललित | ६२ |
| ५५ | प्रातः स्मरामिवृषपुत्रपदार्विन्दं | ९ | गिरीजाशंकर शास्त्री | ललित | ६३ |
| ५६ | प्रातः स्मरामि भवभीतिमहा | ८ | सत्संगिजीवन ५/१८ | वसन्ततिलका | ६४ |
| ५७ | स्वीये धाम्नि सदाऽक्षरे | १२ | शुकानन्द मुनि विगेरे | शार्दूलविक्रिडीत | ६५ |
| ५८ | अखिलभुवनजन्मस्थेम | १२ | ऋषिमुनिओ | | ६७ |
| ५९ | आदौ प्रेमवतिवृषांगजननं | १२ | मंगलाचरण श्लोको | | ६९ |
| ६० | पातुं धर्ममधर्ममुत्खनयितुं | १२ | परमहंसो | | ७० |
| ६१ | हरिकृष्णविहारी नरतनुधारी | ८ | ब्रह्मानन्द मुनि | अष्टपदी | ७२ |
| ६२ | शंकुरू श्री घनश्याम नारायण | ८ | पुराणी नन्दकिशोरदासजी स्वामी | अष्टपदी | ७३ |
| ६३ | सज्जन संवर धर्मकुमार | ८ | ब्रह्मानन्द मुनि | अष्टपदी | ७४ |
| ६४ | ब्रह्माभिदे निजपदे परिपूर्णरूपम् | १३ | ब्रह्मानन्द मुनि | अष्टपदी | ७५ |
| ६५ | जय जय धर्मधुरंधर नवधनसुन्दर | ८ | ब्रह्मानन्द मुनि | अष्टपदी | ७७ |
| ६६ | हरिकृष्णनाम तुल्यं नहि विद्यते | १० | गिरिजाशंकर शास्त्री | अनष्टुप | ७८ |

| अ.नं. | स्तोत्र | श्लोक | रचयिता | राग-छन्दः | पेज |
|---|---|---|---|---|---|
| ६७ | प्रलयाम्बुधेः तुल्यं नहि विद्यते | १२ | अचिन्त्यानन्द वर्णि | उद्गतावृत्तं | ७९ |
| ६८ | वरनरनाटनेनपरभावमनन्यतुलं | १३ | अचिन्त्यानन्द वर्णि | नर्कुटकं वृत्तं | ८१ |
| ६९ | अगाधशुद्ध बोधनं वृषारिसर्ग | १३ | अचिन्त्यानन्द वर्णि | पञ्चचामरच्छदः | ८३ |
| ७० | दिव्ये अनन्ते शर्मचये धाम | २२ | अचिन्त्यानन्द वर्णि | मत्तमयूरवृत्तं | ८५ |
| ७१ | कुटिलकलिकरालं श्रीहरिं | १० | अचिन्त्यानन्द वर्णि | मालिनीवृत्तं | ८८ |
| ७२ | चारुदीर्घपृथुनेत्रपंकजं | २२ | अचिन्त्यानन्द वर्णि | रथोद्धृतावृत्तं | ९० |
| ७३ | प्रियगिरितटिनिवनाधिवासो | १८ | अचिन्त्यानन्द वर्णि | पुष्पिताग्रा | ९१ |
| ७४ | भगवंस्तव दर्शनं विना | १६ | अचिन्त्यानन्द वर्णि | वियोगिनी | ९४ |
| ७५ | सदानन्दामन्दान्तररिपुविनि | ८ | दीनानाथ भट्ट | शिखरिणी | ९५ |
| ७६ | मारमारणरणेरटनीयं भक्ति | ८ | दीनानाथ भट्ट | स्वागता | ९६ |
| ७७ | सितसान्द्रसद्वसनालिनं | १० | अचिन्त्यानन्द वर्णि | हरिगीतच्छदः | ९७ |
| ७८ | ब्रह्मधामाधिपं मुक्तवृन्दाधितं | १० | भगवत्प्रसादाचार्य | स्त्रग्विणी | ९८ |
| ७९ | धर्मस्यबालं मदनस्यकालं | ८ | दीनानाथ भट्ट | उपजाती | १०० |
| ८० | यथोदिताचारविनाशके कलौ | २४ | नित्यानन्द मुनि | वंशस्थवृत्तं | १०१ |
| ८१ | श्रीवरंश्रीकरंश्रीधरंश्रीश्वरं | १६ | नित्यानन्द मुनि | स्त्रग्वीणी | १०४ |
| ८२ | हसितमुत्तमं श्रीहरेः सितं | २१ | | ललितवृत्तं | १०७ |
| ८३ | वरशुभ्रसान्द्रतरभास्वराम्बरं | १३ | अचिन्त्यानन्द वर्णि | मञ्जुभाषइणी | १०८ |

| अ.नं. | स्तोत्र | श्लोक | रचयिता | राग-छन्दः | पेज |
|---|---|---|---|---|---|
| ८४ | महादिव्येलोके सदावीतशोके | १२ | योगानन्द मुनि | भुजंगप्रयाता | ११० |
| ८५ | कृपया परयैव यस्य | १ | आत्मानन्द मुनि | वियोगिनी | ११३ |
| | अधर्महेतुभेदनं | १ | आत्मानन्द मुनि | पञ्चचामर | ११४ |
| | निखिलभक्तजनैरभितो | १ | आनन्दानन्द मुनि | द्रुतविलम्बित | ११२ |
| | निजानन्दं मंदस्मितमधुर | १ | गुणातीतानन्द मुनि | शिखरिणी | ११५ |
| | जयश्रीमद्धास्वच्च्वयरूचि | १ | गोपालानन्द मुनि | शिकरिणी | ११२ |
| | निदधे हृदये हृदयेश | १ | चैन्यानन्द मुनि | तोटक | ११४ |
| | किसलयमृदुले | १ | नित्यानन्द मुनि | मत्तमयुर | ११२ |
| | अशेषदुःखभञ्जनं | १ | परमचैतन्यानन्द मुनि | पञ्चचामर | ११४ |
| | विशदकुसुममालं | १ | पूर्णानन्द मुनि | मालिनी | ११४ |
| | त्वदीयं मनोहारिरूपं | १ | ब्रह्मानन्द मुनि | भुजंगप्रयाता | ११२ |
| | केवलं ते कथामेव | १ | महानुभावानन्द मुनि | स्त्रग्विणी | ११३ |
| | कौसुमशेखरराजिविराजितभाल | १ | मुक्तानन्द मुनि | मत्तगयन्दच्छदः | ११२ |
| | सकलमुनि जनेशं | १ | वासुदेवानन्द वर्णि | मालिनी | ११४ |
| | नारायण तव चरणं शरणं | १ | शिवानन्द मुनि | पथ्यार्या | ११४ |
| | नित्यं यो अक्षरधाम्नि | २ | शुकानन्द मुनि | शार्दूलविक्रीडित | ११३ |
| | मत्स्यं कूर्म वराहं कपि | १ | सर्व मुनिओ सत्संगिजीवन ३/१७ | सत्संगिजीवन | ११२ |

| अ.नं. | स्तोत्र | श्लोक | रचयिता | राग-छन्दः | पेज |
|---|---|---|---|---|---|
| ८६ | जयतितेधिकंजन्मनाव्रजः | १९ | गोपीगीत (भागवत) | ललितवृत्तं | ११५ |
| ८७ | जयजयजह्यजामजित | २८ | वेद स्तुति (भागवत) | नर्कुटकं | ११७ |
| ८८ | मुनिवर्यकृताभिवन्दनं बहुज | १० | अचिन्त्यानन्द वर्णि | वियोगिनी | १२१ |
| ८९ | धर्मात्मजे भगवत प्रातल | १८ | योगानन्द मुनि | वसन्कतिलका | १२१ |
| ९० | महोत्सवे निजजनवृन्दं | ११ | अचिन्त्यानन्द वर्णि | अतिरूचिरावृत्तं | १२४ |
| ९१ | दयायाह्युवनी नरनाट्यकरं | ८ | त्यागानन्द वर्णि | तोटक | १२६ |
| ९२ | जनपातकहारिणीं हरे | ८ | योगानन्द मुनि | वैतालीय | १२७ |
| ९३ | मदनखण्डने धर्ममण्डने | ८ | योगानन्द मुनि | ललितच्छदः | १२८ |
| ९४ | अथैकदा धर्मधुरंधरो | ८ | अचिन्त्यानन्द वर्णि | वंशस्थ | १२८ |
| ९५ | श्रीरूक्मिणीरमणरम्य | ११ | सत्संगिजीवन ४/५१ | वसन्ततिलका | १२९ |
| ९६ | श्रीधर्मनन्दनदयालयदिनबन्धो | ८ | योगानन्द मुनि | वसन्ततिलका | १३१ |
| ९७ | जीवलोककरूणामहोदये सर्व | ८ | दीनानाथ भट्ट | रथोद्धृता | १३२ |
| ९८ | जलदसुन्दरे वासनाहरे | ८ | योगानन्द मुनि | ललितच्छदः | १३३ |
| ९९ | स्वीयेधाम्रिसदा अक्षरे परतरे | १८ | शुकानन्द मुनि | | १३४ |
| १०० | शुभतपोजनेदूषणक्षते | ८ | अचिन्त्यानन्द वर्णि | ललितवृतत् | १३५ |
| १०१ | सदाप्रशान्ताकृतिशोभनीय | ८ | मञ्जुकेशानन्द मुनि | उपजाति | १३६ |
| १०२ | वृषकुलभूषण सुरकुलभूषण | ८ | नित्यानन्द मुनि | अष्टपदी | १३७ |

| अ.नं. | स्तोत्र | श्लोक | रचयिता | राग-छन्दः | पेज |
|---|---|---|---|---|---|
| १०३ | परं तीर्थस्थानं ध्वजयव | ८ | योगानन्द मुनि | शिखरिणी | १३८ |
| १०४ | कृष्णकेशव हरे हरिकृष्ण | ८ | योगानन्द मुनि | स्वागतावृत्तं | १३९ |
| १०५ | सदासदानन्दपदारविन्द | ९ | दीनानाथ भट्ट | उपजाती | १४० |
| १०६ | सुखदायिनं मुनिगणस्य | ९ | अचिन्त्यानन्द वर्णि | उद्गता | १४१ |
| १०७ | कामलोभभयमाननाशनं | ८ | मञ्जुकेशानन्द मुनि | रथोद्धृता | १४१ |
| १०८ | शोभाननं कलनेत्रमधर्मखण्डं | ८ | सगुणानन्द मुनि | वसन्ततिलका | १४२ |
| १०९ | विलसतियो अव्ययेप्रकृति | ९ | दीनानाथ भट्ट | नर्कुटकं | १४३ |
| ११० | भजहरिकृष्ण भजहरिकृष्णं | २३ | अचिन्त्यानन्द वर्णि | चरपटमञ्जरी | १४५ |
| १११ | गोविन्दमाधवदयाल दीनबन्धो | ८ | सत्संगिजीवन ३/३३ | वसन्तिलका | १४८ |
| ११२ | यो वीक्षापापहारी सदय | ८ | अचिन्त्यानन्द वर्णि | स्त्रग्धरा | १४९ |
| ११३ | मायातीते ब्रह्मपुराख्येनिजधाम्रि | ८ | अखण्डानन्द वर्णि | मत्तमयूर | १५० |
| ११४ | साधूनां सदसि महासनोपविष्टं | ८ | अचिन्त्यानन्द वर्णि | प्रहर्षणी | १५२ |
| ११५ | शमधाम तमोदमनं शमनं | १२ | अचिन्त्यानन्द वर्णि | तोटक | १५३ |
| ११६ | पुरुवारिनीरधरसाररूचि | ८ | अचिन्त्यानन्द वर्णि | उद्गता | १५४ |
| ११७ | विमलनीलमणिस्थरभास्वरे | ८ | अचिन्त्यानन्द वर्णि | द्रुतविलम्बित | १५४ |
| ११८ | जयजयजनजातमुक्तिदाता | ८ | अचिन्त्यानन्द वर्णि | पुष्पिताग्रा | १५५ |
| ११९ | धृतनयं तनयं तपसो | १७ | अचिन्त्यानन्द वर्णि | द्रुतविलम्बित | १५६ |

| अ.नं. | स्तोत्र | श्लोक | रचयिता | राग-छन्दः | पेज |
|---|---|---|---|---|---|
| १२० | कलशाम्बरगोपदांकुशध्वजरेखा | ८ | अचिन्त्यानन्द वर्णि | वियोगिनी | १५९ |
| १२१ | निजधाम्नि परे अक्षरे अतिदिव्ये | ८ | अचिन्त्यानन्द वर्णि | औपच्छन्दसिकं | १५९ |
| १२२ | नवीननीरदासितं निजैः | ८ | योगानन्द मुनि | पञ्चचामर | १६० |
| १२३ | श्रुतवेदिशिल्पिवरवृन्दनिर्मितो | ९ | अचिन्त्यानन्द वर्णि | मञ्जुभाषिणी | १६१ |
| १२४ | कुसुमकंकणं दिव्यभूषणं | ८ | मञ्जुकेशानन्द मुनि | ललितच्छन्दः | १६३ |
| १२५ | नवसलिलधरालिकान्तमूर्त | ८ | उत्तमचरणदास मुनि | पुष्पिताग्रा | १६३ |
| १२६ | अष्टकोणयवजम्बवरेखास्वस्तिकेतु | ८ | अचिन्त्यानन्द वर्णि | स्वागतावृत्तं | १६५ |
| १२७ | जातं श्रीधर्मदेवादपरिमितदया | ८ | अचिन्त्यानन्द वर्णि | स्रग्धरा | १६५ |
| १२८ | स्वयमखिलेश्वरो अक्षरपरो | ८ | अचिन्त्यानन्द वर्णि | नर्कुटकं | १३७ |
| १२९ | सतां पतिमुक्तिमतां मुनिनां | ८ | योगानन्द मुनि | उपजाती | १६८ |
| १३० | धर्मकर्ता धर्मवक्ता धर्मात्मा | ८ | सत्संगिजीवन ५/४८ | अनुष्टुप | १६९ |
| १३१ | वदनतर्जितरम्यहिमांशुके | ८ | अचिन्त्यानन्द वर्णि | द्रुतविलम्बित | १६९ |
| १३२ | मदनमनोहरे प्रणतपापविनाशकरे | ८ | अचिन्त्यानन्द वर्णि | नर्कुटकं | १७० |
| १३३ | असुरगुरुविनाशनातिदक्षं नखविधु | ८ | अचिन्त्यानन्द वर्णि | पुष्पिताग्रा | १७१ |
| १३४ | अधर्मसर्गमर्द्दनं सुखप्रदं | ८ | अचिन्त्यानन्द वर्णि | पञ्चचामर | १७२ |
| १३५ | नीरजाननं मुक्तमाननं धर्मभावनं | ८ | अचिन्त्यानन्द वर्णि | ललित | १७४ |
| १३६ | ललितचन्दने मुक्तवन्दने | ८ | अचिन्त्यानन्द वर्णि | ललित | १७४ |

| अ.नं. | स्तोत्र | श्लोक | रचयिता | राग-छन्दः | पेज |
|---|---|---|---|---|---|
| १३७ | श्रीमन्नवीनजलदासितसुन्दरांगं | ८ | अचिन्त्यानन्द वर्णि | वसन्ततिलका | १७५ |
| १३८ | निजेदिव्यस्थाने अक्षरमुनिगणै | ८ | अचिन्त्यानन्द वर्णि | शिखरिणी | १७६ |
| १३९ | प्रचण्डं पाखण्डं क्षयमुपनयन्तं | ८ | अचिन्त्यानन्द वर्णि | शिखरिणी | १७७ |
| १४० | सुखदविहारे भवभयहारे | ८ | अचिन्त्यानन्द वर्णि | गुर्जरीराग | १७९ |
| १४१ | शुभशान्तमनोहराकृति | ८ | अचिन्त्यानन्द वर्णि | वियोगिनी | १७९ |
| १४२ | सद्भक्तिबालं निजभक्तपालं | ८ | योगानन्द मुनि | उपजाती | १८० |
| १४३ | ध्येयं सदापरिभवघ्नमभीष्टदोहं | ८ | श्रीकृष्णस्तुति | वसन्ततिलका | १८१ |
| १४४ | सकलजनविमोचनैकहेतुर्भुवनगुरूः | ५ | दीनानाथ भट्ट | पुष्पिताग्रा | १८२ |
| १४५ | स्वामिंस्त्वदाननसुधाकर | ५ | दीनानाथ भट्ट | वसन्ततिलका | १८३ |
| १४६ | परेधाम्नि दिव्ये अक्षरे राजमानं | ८ | अचिन्त्यानन्द वर्णि | भुजंगप्रयाता | १८३ |
| १४७ | स्वधाम्नि रूचिरेक्षरे अगणितसुर्य | ८ | अचिन्त्यानन्द वर्णि | पृथ्वीवृत्तं | १८५ |
| १४८ | नमदीशमौलिपरिघृष्टवरचरण | ८ | अचिन्त्यानन्द वर्णि | उद्गता | १८६ |
| १४९ | श्रीमन्मंगलमूर्तिमार्तिनाशनं | २१ | अचिन्त्यानन्द वर्णि | शार्दूलविक्रिडीतं | १८७ |
| १५० | विबुधविभासित सलिलधरासित | ९ | उत्तमचरणदास मुनि | अष्टपदी | १९० |
| १५१ | यो अनेकाण्डकलापकारणहामाया | ८ | योगानन्दमुनि | शार्दूलविक्रिडीतं | १९१ |
| १५२ | स्वामिन् भक्त्या भक्तजनाति | ८ | योगानन्दमुनि | मत्तमयूर | १९२ |
| १५३ | सकलमंगलमंगवमीश्वरं | ९ | उत्तमचरणदास मुनि | द्रुतविम्बित | १९४ |

| अ.नं. | स्तोत्र | श्लोक | रचयिता | राग–छन्दः | पेज |
|---|---|---|---|---|---|
| १५४ | नारायणदेव जय जय वामं | २४ | निष्कामानन्द मुनि | अष्टपदी | १९४ |
| १५५ | वृषकुलकञ्जविकासनं | ८ | शुकानन्द मुनि | गुर्जरराग | १९६ |
| १५६ | धृतनवविशदवसन वनमाली | ८ | अचिन्त्यानन्द मुनि | देशाखराग | १९७ |
| १५७ | निवसतु शन्दे सहजानन्दे | ९ | अचिन्त्यानन्द मुनि | गुर्जरीराग | १९७ |
| १५८ | नलिनयुगलमवलज्जयदलि | ९ | अचिन्त्यानन्द मुनि | कर्णाटकीराग | १९८ |
| १५९ | वसितविशदवसनं चरणानतभूपं | ८ | अचिन्त्यानन्द मुनि | मालवराग | १९९ |
| १६० | मदनविमर्द्दनं कदनवितर्द्दनं | ८ | अचिन्त्यानन्द मुनि | अष्टपदी | २०० |
| १६१ | मदनविमोहन निजसुखदोहन | ८ | अचिन्त्यानन्द मुनि | अष्टपदी | २०१ |
| १६२ | शुचिरूचिकांचनसूत्रमयानि | ९ | अचिन्त्यानन्द मुनि | कर्णाटकीराग | २०२ |
| १६३ | जितसकलासुरमण्डल धृतकुंडल | ८ | अचिन्त्यानन्द मुनि | गुर्जरीराग | २०३ |
| १६४ | व्रजवपुषाहृतमदनमदेन | ९ | अचिन्त्यानन्द मुनि | देशाखराग | २०४ |
| १६५ | मम सुखकन्दे सहजानन्दे | ८ | उत्तमचरणदास मुनि | गुर्जरीराग | २०४ |
| १६६ | गुणवरूणालय मदकदनेन | ९ | उत्तमचरणदास मुनि | देशाखराग | २०५ |
| १६७ | भजनीयं केशवरूपमवनी मे | ९ | निष्कामानानन्द मुनि | ठुमरी | २०६ |
| १६८ | परवरद हरे केशवकान्त | ८ | निष्कामानानन्द मुनि | अष्टपदी | २०७ |
| १६९ | मानस देवं भज भज धर्मकुमारं | ८ | निष्कामानानन्द मुनि | मालवराग | २०७ |
| १७० | वरदतनो वृषनन्दन जनवन्दन | ९ | योगानन्द मुनि | गुर्जरराग | २०८ |

| अ.नं. | स्तोत्र | श्लोक | रचयिता | राग-छन्दः | पेज |
|---|---|---|---|---|---|
| १७१ | मुनिजनमण्डलमणडन स्मरखण्डन | ९ | मञ्जुकेशानन्द मुनि | गुर्जरराग | २०९ |
| १७२ | पावन परमोत्तमाद्य कृपानिधे | ८ | भगवत्प्रसादाचार्य | अष्टपदी | २१० |
| १७३ | सततमिदं वपुस्तव हरे ममास्तु | ८ | अखण्डानन्द वर्णि | रामकरी | २११ |
| १७४ | जयदेव २ जयमंगलमूर्ते २ नारायण | ५ | दीनानाथ भट्ट | आरती | २१२ |
| १७५ | जयदेव जयदेव जय निजसुखदायिन् | ८ | दीनानाथ भट्ट | आरती | २१३ |
| १७६ | वृषकुलकमलरवे शनकैर्भगवंस्त्वं | ८ | अखण्डानन्द वर्णि | | २१४ |
| १७७ | कनकमयोज्ज्वलागणितभोजन | ९ | अखण्डानन्द वर्णि | कोकिलकं | २१५ |
| १७८ | प्रभोभुंक्ष्वकामं २ गच्छसि किमु | ८ | सत्संगिजीवन ३/१९ | विराडीराग | २१६ |
| १७९ | या नित्यं भक्तभर्तुर्धृतनरवपुषो | ९ | सत्संगिजीवन ३/१३ | स्त्रग्धरा | २१८ |
| १८० | यस्यां हरिर्धर्मजनिर्मुनीन्द्रैर्वृत | ९ | अचिन्त्यानन्द वर्णि | उपजाती | २१९ |
| १८१ | सुवर्णवर्णपर्ण सत्सरोजराजि | ९ | अचिन्त्यानन्द वर्णि | पञ्चचामरवृत्तम् | २२० |
| १८२ | या शुभ्रलोलसलिलातिललाम | १३ | अचिन्त्यानन्द वर्णि | वसन्ततिलका | २२१ |
| १८३ | परस्मान्मायया निजशुभतमा | ८ | विहारीलालाचार्य | शिखरिणि | २२३ |
| १८४ | वन्दामहे अंध्रिकमलं शरणागतानां | ८ | विहारीलालाचार्य | वसन्ततिलका | २२५ |
| १८५ | स्वामिन्परात्परतरे अक्षरधाम्नि | ८ | हरिप्रसादानन्द वर्णि | वसन्ततिलका | २२६ |
| १८६ | तपो अदभ्रं तप्तं विजनविपिने | ८ | हरिप्रसादानन्द वर्णि | शिखरिणी | २२७ |
| १८७ | स्वस्ति श्रीमदनेकसद्गुणगणैर्नित्यं | २६ | मुक्तानन्द मुनि | शिक्षापत्री | २२८ |

| अ.नं. | स्तोत्र | श्लोक | रचयिता | राग-छन्दः | पेज |
|---|---|---|---|---|---|
| १८८ | श्रीवृत्तालयसन्निधौ कलिमल | ११ | अचिन्त्यानन्द वर्णि | शार्दूलविक्रिडीतं | २३२ |
| १८९ | नमस्ते आंजनेयाय वायुपुत्राय | १६ | सत्संगिजीवन १/१७ | अनुष्टुपच्छन्दः | २३३ |
| १९० | श्रीमद्धर्मागजातांघ्रिकमल | १४ | निष्कामानन्द मुनि | स्रग्धरावृत्तम् | २३५ |
| १९१ | श्रीहरेर्वल्लभां सर्वार्थादुर्ल्लभा | ८ | अखण्डानन्द वर्णि | अष्टपदी | २३७ |
| १९२ | कृष्णात्प्रार्थय मेदिनीं धनपते | ५ | | शार्दूलविक्रिडीतं | २३७ |
| १९३ | इति मतिरूपकल्पिता वितृष्णा | ११ | भीष्मस्तुति | पुष्पिताग्रावृत्तम् | २३९ |
| १९४ | वामबाहुकृतवामकपोलो | २४ | गोपीभिरूक्तं युगलगीत | स्वागतावृत्तम् | २४१ |
| १९५ | अक्षण्वतां फलमिदं न परं | १३ | गोपिभिरूक्तं वेणुगीत | वसन्ततिलका | २४१ |
| १९६ | मधुप कितवबन्धो मा | १० | भ्रमरगीत भागवत | मालिनीवृत्तम् | २४३ |
| १९७ | जयश्रीमहाराजमाराजसर्गा | ५५ | स्तुतिो | कविओ | २४६ |
| १९८ | जय जय श्रीघनश्याम दया निधे | ८ | बालकृष्णानन्द वर्णि | | २५३ |
| १९९ | धरातलस्योद्धरणाय कौलीं | २७ | वासुदेवानन्द वर्णि | अवतार स्तोत्र | २५४ |
| २०० | अक्षराधिपति दिव्यं षडैश्वर्य | ३१ | गोपालानन्द मुनि | अनुष्टुप | २५६ |
| २०१ | सितश्याममनोज्ञरम्यमूर्ते निज | ८ | गीरीजाशंकर शास्त्री | | २५९ |
| २०२ | वन्दे श्रीधर्मपुत्रं सकलसुखनिधिं | २ | गीरीजाशंकर शास्त्री | स्रग्धरावृत्तम् | २६० |
| २०३ | मंगलमूलीगतंगुणवन्तं | ८ | पुराणी नन्दकीशोरदासजी स्वामी | लावणी | २६१ |
| २०४ | ध्येयं वदन्ति शिवमेव हि | ८ | | वसन्ततिलका | २६२ |

| अ.नं. | स्तोत्र | श्लोक | रचयिता | राग-छन्दः | पेज |
|---|---|---|---|---|---|
| २०५ | दिव्याकारं शान्तिदं दासकानां | ९ | | | २६३ |
| २०६ | जनानां या दात्री प्रचुरपुरुषार्थस्य | ११ | वासुदेवानन्द वर्णि | | २६४ |
| २०७ | मदननाशनेभक्तभासने | ८ | योगानन्द मुनि | | २६६ |
| २०८ | पदपंकजेरूचिरं चक्रमणेत्वं | १० | | | २६७ |
| २०९ | श्रीधर्मनन्दनदयालदीनबन्धो | ८ | योगानन्द मुनि | | २६८ |
| २१० | योबाल्ये अप्यखिलर्द्धिवैभवै | १६ | सत्संगिजीवन १/४ | शार्दूलविक्रिडीतं | २६९ |
| २११ | प्रलयपयोधिजले धृतवानसि | ११ | जयदेव कवि | | २७१ |
| २१२ | गर्भेमातुः स्थितस्यापिनर | ९ | वासुदेवानन्द वर्णि | | २७२ |
| २१३ | आदावुद्धवमाह नैज | २१ | रामानन्द मुनि | | २७५ |
| २१४ | उत्फुल्लहृन्निरजकर्णिकायां तेजोमहा | ८ | दीनानाथ भट्ट | उपजाती | २७६ |
| २१५ | वज्राम्बुजध्वजघटाभ्रयवोर्ध्वरेखा | ११ | अचिन्त्यानन्द वर्णि | वसन्ततिलका | २७७ |
| २१६ | शीतेग्रीष्मे गृहान्तर्ह्युपवनभवने | ९ | अचिन्त्यानन्द वर्णि | स्त्रग्धरा | २७९ |
| २१७ | ध्यात्वासौधोर्द्धभूम्यां जलधरसमये | ९ | अचिन्त्यानन्द वर्णि | स्त्रग्धरा | २८० |
| २१८ | श्रीभक्तिधर्मतनयं मुनिचिन्तनीयं | १९ | अचिन्त्यानन्द वर्णि | वसन्ततिलका | २८३ |
| २१९ | प्रगट भगवतः पतितेप्रसिद्धे यः | ९ | लक्ष्मीप्रसादाचार्य | उपजाती | २८५ |
| २२० | स्वीयाचार्यपदं दिदेश | ५ | नारायण दत्त | शार्दूलविक्रीडितं | २८७ |
| २२१ | श्रीकोसलान्तः पतितेप्रसिद्धे यः | ९ | लक्ष्मीप्रसादाचार्य | उपजाती | २८७ |


| अ.नं. | स्तोत्र | श्लोक | रचयिता | राग-छन्दः | पेज |
|---|---|---|---|---|---|
| २२२ | जय भगवती वाणी | ७ | कृष्णानन्द वर्णि | आरती | २८८ |
| २२३ | विष्णु गायत्री मन्त्र | ५ | भगवानश्री वेदव्यास | गायत्री | २८९ |
| २२४ | श्रीजनमंगल स्तोत्रम् | २८ | श्रीशतानन्द मुनि | अनुष्टुप | २९३ |
| २२५ | श्रीसर्वमंगल स्तोत्रम् | २१४ | श्रीशतानन्द मुनि | अनुष्टुप | २९६ |
| २२६ | श्रीनारायण कवच | २३ | भगवान श्रीवेदव्यास | अनुष्टुप | ३११ |
| २२७ | श्रीविष्णुसहस्रनाम स्तोत्रम् | १५८ | भगवान श्रीवेदव्यास | अनुष्टुप | ३१३ |
| २२८ | श्रीमहापूजा विधि | | अखण्डानन्द वर्णि | | ३२७ |
| २२९ | श्रीयज्ञोपवित धारण विधि | | | | ३८३ |
| २३० | श्रीजनमंगल नामावलिः | १०८ | श्रीशतानन्द मुनि | | ३९० |
| २३१ | श्रीसर्वमंगल नामावलिः | १००० | श्रीशतानन्द मुनि | | ३९४ |
| २३२ | श्रीविष्णुसहस्र नामावलिः | १००० | भगवान श्रीवेदव्यास | | ४२९ |
| २३३ | श्रीशिक्षापत्री | २१२ | भगवान श्रीस्वामिनारायण | अनुष्टुप | ४६३ |
| २३४ | श्रीमद्भगवद्गीता | ७०० | भगवान श्रीकृष्ण | | ४७८ |
| २३५ | आरती (संस्कृत) | | सत्संगिजीवन ३/५-२६ | | ५३५ |
| २३६ | आरती (संस्कृत) | | सत्संगिजीवन ४/२३-२९ | | ५३६ |




સર્વોપરિ શ્રી નરનારાયણ દેવ- અમદાવાદ



શ્રી ઘનશ્યામ મહારાજ - રંગ મહોલ, કાલુપુર મંદિર



પ.પૂ.મોટા મહારાજ શ્રી તેજેન્દ્રપ્રસાદજી
પ.પૂ.ધ.ધુ.આચાર્ય ૧૦૦૮ શ્રી કોશલેન્દ્રપ્રસાદજી મહારાજશ્રી
પ.પૂ.ભાવિ આચાર્ય ૧૦૮ શ્રી વ્રજેન્દ્રપ્રસાદજી મહારાજશ્રી



શ્રી રાધાકૃષ્ણદેવ શ્રી હરિકૃષ્ણ મહારાજ - શિકાગો

## १ ● ॥ पुष्पिताग्रावृत्तम् ॥

अथ मनसि शनैः स्थिरत्वमाप्ते भगवति मानुषमूर्तिवासुदेवे ।।
निजहृदि पृथगेकमेकमंगं चरणतलादि विचिन्त्यमस्य पुंसां ।।१।।
निजहृदि दृशि गोचरे तदीये ह्यवह्यव एकक एकके पृथकच्च ।।
चपलमपि मनः स्थिरं विधेयं व्रजति लयं खलु तेन तन्मलौघः ।।२।।
ध्वजकमलयवांकुशोर्ध्वरेखाप्रमुखसुलक्षणलक्षिते च रम्ये ।।
अतिशयमृदुले च यावकाभे चरणतले मनसास्यचिन्तनीये ।।३।।
अरुणनखशशांकराजिकान्त्या हृतनिजचिन्तकहृतमोंघ्रियुग्मं ।।
क्रमलघुसमकोमलांगुलीभिर्हृतनवपल्लवकान्ति चास्य चिन्त्यम् ।।४।।
निजजनमनसः प्रहर्षणार्थं परिधृतनूपुरशिंचितातिरम्यम् ।।
स्वगतनिजजनाक्षिवृत्तिचोरं चरणयुगं हृदि चिन्तनीयमस्य ।।५।।
किसलयमृदुले सुवृत्तजंघे क्रमपृथुलेऽथ सुवर्तुलौ च जानूं ।।
करिकरसदृशं समं च पीनं निजहृदि सक्थियुगं च चिन्त्यमस्य ।।६।।
मृदुघनसितमुक्ष्मदीर्घवासः परिदधदुत्तमहैमकाञ्चिनद्धम् ।।
पृथुलकटियुगं च चिन्तनीयं निजहृदये चिरमस्य भक्त भर्तुः ।।७।।

उदरमपि लसद्वलित्रयान्तर्गतशुभसभ्रमनिम्ननाभिकूपम् ॥
हृदयमुरुसुगन्धिपुष्पहारं समविततं हृदि चिन्त्यमस्य तुंगम् ॥८॥
कनककटकश्रृंखलोर्मिकाभिर्लसदरुणाब्जनिभं करद्वयं च ॥
दृढतरमतिरम्यबाहुयुग्मं निजहृदयेऽस्य विचिन्त्यमंगदाढ्यम् ॥९॥
विविधमणिविशुद्धहेमसूत्रग्रथितसुमौक्तिकहारहारिकण्ठः ॥
विगतशशकलंक आस्यचन्द्रः स्थिरमनसास्य चिरं च चिन्तनीयः ॥१०॥
मितहसितविसर्पिदन्तकान्तिप्रथनसमुज्जवलगण्डयुग्ममस्य ॥
नवनलिनदलायतं विचिन्त्यं निजहृदिचंचललोचनद्वयं च ॥११॥
श्रवणयुगलमस्य कुंडलश्रीबहुविधपुष्पमयावतंसरम्यम् ॥
तरदलघुविशालभालराजत्सतिलककुंकुमचन्द्रकश्च चिन्त्यः ॥१२॥
असिततिलकलक्ष्म दक्षगण्डे तिलकुसुमोत्तमनासिकान्तिकेऽस्ति ॥
विलसितबिन्दुरस्य वामे श्रवणपुटे भवतीति चिन्तनीयः ॥१३॥
विविधकुसुमशेखरालिराजत्पटमुकुटं च शिरोऽस्य चिन्तयित्वा ॥
वदनकमळमेव चिन्तकेन स्मितमधुरं चिरकालमस्य चिन्त्यम् ॥१४॥

## २ ● ॥ शिखरिणीवृत्तम् ॥

महातेजः पुंजस्फुरदमलसिंहासनवरे स्थितं सर्वाधिशं नखकिरणविद्योतित सभम् ॥
सितच्छत्रं पार्श्वस्फुरदमलसच्चामरयुगं भृशं धन्यो लब्ध्वा नयनपथि नारायणमहम् ॥१॥
हसद्वक्राम्भोजं चपलनयनालोकितजनं लसन्मुक्ताहारंविविधकुसुमापीडमुकुटम् ॥
प्रचंचत्प्रावारं चरणविलसन्नूपुरमिदं हरेः रुपं नित्यं मम मनसि सम्यक् स्फुरतु ते ॥२॥
दृढं विश्वासो मे तव चरणपद्माश्रितजनोः भवाम्भोधेः पारं व्रजति सहसा त्वत्करुणया ॥
त्वमेवैकः स्वामी सकलजगतामित्यपि हरे विदित्वा पादौ ते दृढतरमहं ह्याश्रयमिमौ ॥३॥
नजाने शास्त्राणां विविधमतसन्निर्णयमहं पुराणव्रतानामपि च बहुकल्पाश्रितकथाः ॥
नवा देवर्षिणां पृथगिह मनोरंजनविधिं परं जाने स्वामिन् भ्रमहरणं तेऽत्र शरणम् ॥४॥
तपोनोग्रं तप्तं व्रतनियमदानानि च मया न चेष्टापूर्तं वा श्रवणमननाभ्यासदृढता ॥
न चीर्णान्याप्तुं त्वामिह तदपि यस्त्वं दृशिगतो न जाने तद्धेतुं त्वदतितरकारुण्यत ऋतेः ॥५॥
भृशं पापव्रातैर्मदनमदमानादिभिरपि प्रभो ग्रस्तस्यालं तव चरणपद्मेक्षणंमिदम् ॥
कथंकारं मे स्याद्यदि न पुरुकारुण्यपदवीं श्रयेथा नाथत्वं त्वयि हि तदिदं केवलमहो ॥६॥
बलं नो मे बुद्धेर्न च सुदृढवैराग्यविलसन्नि जात्मज्ञानस्य प्रचुर नियमानापि हरेः ॥
विमोक्तु संसारन्निरतिशयमेकं हि बिरुदं विलोक्य स्वीयं मां भवजलनिधेरुद्धरनिजम् ॥७॥

न जानेधर्माणामतिगहनकर्तव्यसरणिं न शास्त्र मन्त्राणां न च विविधतन्त्रागमविधिम् ॥
न वा भक्तैः कृत्यं तव चरणपद्मार्चनविधिं ततो वन्दे दीनस्तव पदयुगं दण्डवदहम् ॥८॥

*॥ इति श्रीसत्संगिजीवने दीनानाथकृतं नारायणस्तवनाष्टकम् ॥*

## ३ ● ॥ श्रीहरिप्रार्थनाष्टकम् ॥

त्वद्रूपे निश्चला मे मतिरतिरसिका स्यात्सदा भक्तिरूपा, त्वत्सौख्येन सौख्यी सततमतितरां स्यां न चान्येन जातु ॥
मायाजाता अनित्यास्त्वदितरतनवोऽत्यन्ततुच्छा भवन्तु, हे नाथ प्रार्थये त्वां मुहुरिति सहजानंद तद्देहि मे त्वम् ॥१॥
भक्तिर्माहात्म्ययुक्ता त्वयि वृषतनये स्याच्च धर्मादियुक्ता, प्रत्यूहाद्रक्षणं मे कुरु मदनमुखाधर्मसर्गात्तु तस्याम् ॥
ज्ञानादौ तत्सहाये भवतु दृढतरा च स्थितिर्धर्मवंशे, हे नाथ प्रार्थये त्वां मुहुरिति सहजानंद तद्देहि मे त्वम् ॥२॥
साधूनां ते प्रियाणां भवतु मम सदा संग एकान्तिकानाम्, कुंडानां नास्तिकानां विटकुलमतिमत्संगतिः क्वपि न स्यात् ॥
दासत्वे दोषलेषोऽपि भवत इह मे नावशिष्येत कश्चित्, हे नाथ प्रार्थये त्वां मुहुरिति सहजानंद तद्देहि मे त्वम् ॥३॥
द्रोहस्ते सेविनां ते न भवतु मनसापि क्वचित्सज्जनानाम्, तिष्टेन्नैवान्यनिष्ठा ह्यणुरपि हृदि मे वासना सेवनात्ते ॥
दास्यं कुर्यां सदाहं तव निकटगतो वांछितं सज्जनानाम्, हे नाथ प्रार्थये त्वां मुहुरिति सहजानंद तद्देहि मे त्वम् ॥४॥
देहेऽहंता तदीये क्वचिदपि ममता मे न च स्यात्सुतादौ, सा तु स्यान्मे सदैव त्वयि वृषतनये च त्वदीयेषु सत्सु ॥
नित्यं ब्रह्मात्मनो मे त्वयि रतिरधिका स्यात्सदानंदरुपे, हे नाथ प्रार्थये त्वां मुहुरिति सहजानंद तद्देहि मे त्वम् ॥५॥
विश्वासो वाचि ते स्यान्ममकिल कुहविन्नास्तिकत्वं न मे स्यात्, सल्लक्ष्माण्यव्ययानि स्युरपि मयि सदा त्वत्प्रणीतानि तानि ॥
नो मे स्यादासुरत्वं क्वचिदेव जनकात्तस्य कामादितोमाम्, हे नाथ प्रार्थये त्वां मुहुरिति सहजानंद तद्देहि मे त्वम् ॥६॥

नित्यं त्वदर्शने मे नयनयुगमपि स्यात्त्वदीयेक्षणे च, त्वद्भुक्तान्नेऽस्तु जिह्वा प्रभवतु मम वाक् कीर्तिसंकीर्तने ते ॥
कर्णौ मे त्वत्कथानां श्रवणपरतरौ त्वज्जनास्यात् सदैव, हे नाथ प्रार्थये त्वां मुहुरिति सहजानंद तद्देहि मे त्वम् ॥७॥
त्वत्संकल्पान्विदध्यादनिशमपि मनो मे च तच्छुद्धिहेतून् मच्चितं चिन्तनं ते विदधतु वपुषो नासिका त्वत्सुगन्धौ ॥
सेवायां ते सतां ते व्रजतु करयुगं मे त्वदीयस्यनित्यं, हे नाथ प्रार्थये त्वां मुहुरिति सहजानंद तद्देहि मे त्वम् ॥८॥
पूजनान्तसमये हरिकृष्णप्रार्थनाष्टकमिदं पठनीयम्, एनदुक्तकृतिना घटनीयं साधुनैतदनीशं रटनीयम् ॥९॥

*॥ इति योगानन्दमुनिकृतं प्रार्थनाष्टकम् समपातम् ॥*

## ४ ● ॥ श्रीनरनारायणप्रार्थनास्तोत्रम् ॥

अवतीर्य निजाक्षरात्परादिह मूर्त्या बद्रीवने स्थितः । भूविभारतजीवशर्मणे नरनारायणदेव पाहिमाम् ॥१॥
यदुपर्यभवत्कृपा तव स नरो द्दष्टुमिहार्हतीक्षणम् । न परः सुरसत्तमोन्यथा नरनारायणदेव पाहिमाम् ॥२॥
प्रथितम् च ब्रहद्व्रतं त्वया जनतायाः निजधामलब्धये । अवबोधनमुत्तमम् भुवि नरनारायणदेव पाहिमाम् ॥३॥
जगतो जननं हि पालनं प्रलयं चापि करोषि नित्यदा । रजसा तमसा च सत्त्वतो नरनारायणदेव पाहिमाम् ॥४॥
ऋषिरूपधरं तपश्चरं ह्यवमन्येत कदापि कश्चन । स भवेत्सततं च नारकी नरनारायणदेव पाहिमाम् ॥५॥
तव मूर्तिरियं सुखाप्तये जनतायाः किलताप शान्तये । मरणस्य जयाय नित्यदा नरनारायणदेव पाहिमाम् ॥६॥
जगदन्यतनुस्तथावितुं धरसित्वं च युगे युगेऽह्यवै । हरिकृष्णतनुस्त्वया धृता नरनारायणदेव पाहिमाम् ॥७॥
विधिशंभुमुखामर व्रजश्चरणौ ते सततं समर्चति । परमादरतश्च चिन्तति नरनारायणदेव पाहिमाम् ॥८॥

५ ●

श्रीनरनारायणमृषिराजं सुखदमहो करुणा रसभाजं ।
मानसहरिं भजबद्रिपतिं हरिललनापुरईभगतिम् ॥ मानस ॥१॥ (ध्रुवपदम्)
नटवरराजमखिलजनवन्द्यं । निजजनमोक्षपथोज्जितमाद्यं ॥ मानस ॥२॥
निगमकदम्बककृतगुणगानं । श्रितजनदत्त महासुखदानं ॥ मानस ॥३॥
धृतसितवाससममतुलमुदारं । कनकविभूषणलज्जितमारं ॥ मानस ॥४॥
कमलदलोपमनयनविभान्तं । रदनततप्रभयापरिकान्तं ॥ मानस ॥५॥
मृगमदचन्दनतिलकविशोभं । भृकुटीकटाक्षसुरारिविलोभं ॥ मानस ॥६॥
हृदयमनोहर सुमनः सुहारं । मुनिवरवन्दित चित्रविहारं ॥ मानस ॥७॥
ब्रह्ममुनिनित्यकृतपरिचारं । शमितनिजाश्रितसकलविकारं ॥ मानस ॥८॥

**६ ● ॥ वसन्ततिलकावृत्तम् ॥**

श्रीवासुदेवइहभारतजीवलोकक्षेमायनिर्जरऋषिः करुणानिधिस्त्वं ॥
आकल्पमाचरतितीव्रतपांसि तं त्वां नारायणं मुनिवरं बदरीशमीडे ॥१॥
श्रीनारदादिमुनिमण्डलसेवितांघ्रि निर्नीडगाढदलसंकुलितां विशालाम् ॥
अध्यास्यवेदहृदयस्यनिरूपकंतंत्वा नारायणं मुनिवरं बदरीशमीडे ॥२॥

देवांगनागणवसन्तसुगन्धिवातैर्युक्तः सुराधिपतिमोहकगायकौघैः ।।
कामोऽपि येन सहसा विजितश्च तं त्वां नारायणं मुनिवरं बदरीशमीडे ।।३।।
यन्मानसंजिततपस्विगणौपिरोषः स्प्रष्टुंकथंचन कदाचननाऽपशक्तिम् ।।
तं त्वां च बिभ्यतियतान्तरवैरिणोऽन्ये नारायणं मुनिवरं बदरीशमीडे ।।४।।
त्वां पूर्णकामपतिरप्यनुवासर स्वं दैवं च पित्र्यमपिकर्मकरोषिकाले ।।
संग्राहयन्नखिलनैष्ठिकवर्णिनस्त्वां नारायणं मुनिवरं बदरीशमीडे ।।५।।
यस्मात्प्रवर्त्तत इहाखिलसौख्यहेतुः सच्छास्त्रवृन्दमखिलं खलुनैष्ठिकेन्द्रात् ।।
यत्कर्मदुष्करममर्त्यगणैश्च तं त्वां नारायणं मुनिवरं बदरीशमीडे ।।६।।
ये ये निवृत्तिमुपयान्तिविरागवेगात्संसारभीति जनितादधिभूमि ते ते ।।
यस्याश्रयेणसुखिनोऽत्र भवन्ति तं त्वां नारायणं मुनिवरं बदरीशमीडे ।।७।।
यत्पादपद्ममकरन्दरसैकलुब्धौ ब्रह्माण्डसौख्यमखिलं हि कदाचिदेव ।।
रंकोपिनेच्छन्ति सुखाम्बुधिमेव तं त्वां नारायणं मुनिवरं बदरीशमीडे ।।८।।

*।। इति सत्संगिजीवनस्थ नारायणाष्टकम् ।।*

## ७ ● ।। मञ्जुभाषिणीवृत्तम् ।।

सुरराजराज तव दर्शनं विना भगवन्नपि क्षणलवो युगायते ।।
तपतां मनीषियतीनां च दुर्लभं हरिकृष्णकृष्ण तव देहि दर्शनम् ।।१।।

करुणानिधे कुरु कृपां सतांपते भवतो विनाशमपि संविषायते ॥
दहनायते निशि निशाकरोऽपि मे हरिकृष्णकृष्ण तव देहि दर्शनम् ॥२॥
मम मानसं तव वियोगपाकः परितापयत्यपि परं रमापते ॥
सुतरामसौ दहति मे तनूलतां हरिकृष्णकृष्ण तव देहि दर्शनम् ॥३॥
प्रियनाथ नाथ तव वीक्षणं विना कमनीयरूपमपि कुष्ठसन्निभम् ॥
रमणीयहर्म्यमपि कटोरायते हरिकृष्णकृष्ण तव देहि दर्शनम् ॥४॥
भवदीयवीक्षणामृते दयानिधे मरणायते जगति जीवनं मम ॥
श्रवणीयगीतमपि मे शरायते हरिकृष्णकृष्ण तव देहि दर्शनम् ॥५॥
अमृतादपूर्वमपि चाधिकं हरे चरितं त्वदीयमतिशान्तिदं सदा ॥
न तथापि मे भवति शान्तये भृशं हरिकृष्णकृष्ण तव देहि दर्शनम् ॥६॥
जगतामधिशं ममदर्शितं पुरा चरितं त्वया त्रिजगतां च पावनम् ॥
हृदि मे यदास्मरति तन्न शान्तये हरिकृष्णकृष्ण तव देहि दर्शनम् ॥७॥
विधिशंभुशेषमुनिभिश्च गीयते चरितं शुभं तदपि दर्शनायते ॥
तव ते भजन्ति सुतनुं सुमंगलां हरिकृष्णकृष्ण तव देहि दर्शनम् ॥८॥
इति कृष्णवियोगिनामनिशं भजतां प्रेमजनेन भाषितम् ॥
विरहाष्टकमादरादिदं पठतामाशुं तनोतुं मंगलम् ॥९॥

*॥ इति योगानन्दमुनिविरचितं श्रीहरिकृष्णाष्टकं समाप्तम् ॥*

## ८ ● ॥ ललित छन्दः ॥

अतिमनोहरं सर्वसुन्दरं तिलकलक्षणं चंचलेक्षणम् ॥
विबुधवन्दितं स्वामिनाथते वपुरिहास्तु नो नित्यदर्शने ॥१॥
मदनमोहनं प्रेमदोहनं नयनगोचरं भक्तसंचरम् ॥
भुवि सुदुर्लभं स्वामिनाथते वपुरिहास्तु नो नित्यदर्शने ॥२॥
निजजनैः सदा वाञ्छितंहृदा परसुखावहं हृत्तमोपहम् ॥
परममंगलं स्वामिनाथते वपुरिहास्तु नो नित्यदर्शने ॥३॥
हृदयरोचनं बद्धमोचनं विगतशोचनं दीर्घलोचनम् ॥
मृदुसितांम्बरं स्वामिनाथते वपुरिहास्तु नो नित्यदर्शने ॥४॥
मधुरभाषणं पुष्पभूषणं विजितदूषणं शोकशोषणम् ॥
प्रहसदाननं स्वामिनाथते वपुरिहास्तु नो नित्यदर्शने ॥५॥
कुसुमशेखरं कोमलान्तरं सदयदर्शनं दुःखकर्शनम् ॥
विधिहरार्चितं स्वामिनाथते वपुरिहास्तु नो नित्यदर्शने ॥६॥
परमपावनं लोकभावनं कुटिलकुन्तलं पुष्पकुण्डलम् ॥
भवभयापहं स्वामिनाथते वपुरिहास्तु नो नित्यदर्शने ॥७॥

सकलसिद्धिभिः सर्वऋद्धिभिः श्रितपदं सदा योगिभिर्मुदा ।।
तदिदमेवहि स्वामिनाथते वपुरिहास्तु नो नित्यदर्शने ।।८।।

*।। इति सत्संगिजीवनस्थ श्रीहरिप्रार्थनास्तोत्रं ।।*

## ९ ● ।। प्रहर्षणीयवृत्तम् ।।

मुक्तानां सदसि सदा विराजमानं पूर्णेन्दुप्रवरमुखाब्जपत्रनेत्रम् ।।
मन्दारस्थलरुहकुन्दसारहारं धर्मांगप्रभवमहं हरिं प्रपद्ये ।।१।।
अम्भोजध्वजकलशांकुशोर्ध्वरेखागोपदप्रमुखसुक्ष्मपादपद्मम् ।।
सामोदभ्रमरविगुंजितावचूलं धर्मांगप्रभवमहं हरिं प्रपद्ये ।।२।।
भक्तेभ्यो विहितसबीजसांख्ययोगं प्रावारप्रचलितकंचुकाभिरामम् ।।
श्रीखण्डप्रवरतमालपत्रमीशं धर्मांगप्रभवमहं हरिं प्रपद्ये ।।३।।
विद्योतन्मणिमयहेमकुण्डलश्रीकर्णाग्रोत्तमकुसुमावतंसरम्यम् ।।
श्रीवत्सोल्लसितभुजान्तरं सदीशं धर्मांगप्रभवमहं हरिं प्रपद्ये ।।४।।
संसारप्रशमनकारणप्रतापं विभ्राणं सुरुचिरमौक्तिकीं च मालाम् ।।
हस्ताग्रे सुललितमालिकां दधानं धर्मांगप्रभवमहं हरिं प्रपद्ये ।।५।।
शान्तानां विदलितमानमत्सराणां कामादिप्रबलविपक्षनिर्जयानाम् ।।

साधूनामनिशमवेक्षणीयरूपं धर्मांगप्रभवमहं हरिं प्रपद्ये ॥६॥
वेदान्तैरूदितसुकीर्तिमाप्तकामं जुष्टांघ्रि विजितविदुषणैर्मुनिन्द्रैः ॥
ब्रह्माण्डस्थपतिसुरेश्वरैकनाथं धर्मांगप्रभवमहं हरिं प्रपद्ये ॥७॥
रम्याणां विमलसुवर्णभूषणानां श्रीमत्तामवयवशोभया दधानम् ॥
घर्मान्तप्रभवनवीनमेघनीलं धर्मांगप्रभवमहं हरिं प्रपद्ये ॥८॥

*॥ इति अचिन्त्यानन्दवर्णिविरचितं धर्मनन्दनाष्टकम् समाप्तम् ॥*

**१० •**

ब्राह्मेमुहूर्ते शयनं विहाय निजस्वरुपं हृदि चिन्तयित्वा। स्नातं विशुद्धं प्रचुराभिरद्भिः श्रीनीलकंठं हृदि चिन्तयामि ॥१॥
श्वेतं च सूक्ष्मं परिधाय वासः सितं द्वितीयं वसनं वसित्वा। चतुष्कपीठाद्द्रूतमुतरन्तं श्रीनीलकंठं हृदि चिन्तयामि ॥२॥
आशूपविश्यामलनैजपीठे विधायसन्नैष्ठिककर्म नित्यम्। नारायणं मालिकया स्मरन्तं श्रीनीलकंठं हृदि चिन्तयामि ॥३॥
सुगन्धिना केसरचन्दनेन सन्मल्लिकाचम्पकपुष्पहारैः। सम्पूज्यमानं निजभक्तवर्यैः श्रीनीलकंठं हृदि चिन्तयामि ॥४॥
कर्णे दधानं कुसुमावतंसं शिरः पटे कौसुमशेखरालिम्। कण्ठे च नानाविधपुष्पहारान् श्रीनीलकंठं हृदि चिन्तयामि ॥५॥
भक्ष्यैश्च भोज्यैः सह लेहयचोष्यैर्द्दष्ट्वा पुरो भोजनभाजनं च। पूरीमदन्तं च ससूपभक्तं श्रीनीलकंठं हृदि चिन्तयामि ॥६॥
भक्तैरनेकैर्मुनिभिर्गृस्थैर्वृतं सभायां भगणैरिवेन्दुम्। सहासवक्त्राम्बुजचारुनेत्रं श्रीनीलकंठं हृदि चिन्तयामि ॥७॥
निः सीमकारुण्यसुधामयेन विलोकनेनातिमुदा स्वभक्तम्। बध्ध्यांजलिं दीनमवेक्षमाणं श्रीनीलकंठं हृदि चिन्तयामि ॥८॥

श्रीनारायणमातमानुषतनुं भूमौ कृपासागरम् । भक्तैश्चन्दनपुष्पहारनिकरैः संपूज्यमानं निजैः ।।
पीठस्थं तुलसीस्रजं च दधतं दक्षे करे सुन्दरम् । स्मेरास्यं सितसूक्ष्मवाससमहं श्रीनीलकंठं भजे ।।९।।

## ११ ● ।। वसन्ततिलका वृत्तम् ।।

श्रीनीलकंठ हरिकृष्ण हरे दयालो स्वामिन् परात्परवराक्षरधाम वासिन ।।
हारिप्रसाद पुरुषोत्तम धर्मपुत्र नारायणं सुखनिधिं प्रणमाम्यहं त्वाम् ।।१।।
यद्वद्रमन्ति परमाणुगणा गवाक्षे भूमन्नसंख्यभुवनानि तथोद्व्रजन्ति ।।
त्वद्धामरोमविवरे निखिलार्ति हारिन नारायणं सुखनिधिं प्रणमाम्यहं त्वाम् ।।२।।
विघ्नोघपूगदलनस्मरणं शरण्यं पाषण्डखण्डनविचक्षण माप्तकाम् ।।
शेषागमश्रुतिशिरोक्षरमुक्तगीतं नारायणं सुखनिधिं प्रणमाम्यहं त्वाम् ।।३।।
संसारनीरनिधिमज्जदसंख्य जीवान्निर्हेत्वदभ्र दयया द्रुतमुदध्धरन्तम् ।।
अप्राकृतान्यतुलनोज्झितपुण्यकीर्ति नारायणं सुखनिधिं प्रणमाम्यहं त्वाम् ।।४।।
निर्दोषभक्तजनजुष्टमनन्तकोटिब्रह्माण्डजन्मपरिपालनभंगलीलम् ।।
कल्याणकारिसकलाचरितं स्वतंत्र नारायणं सुखनिधिं प्रणमाम्यहं त्वाम् ।।५।।
दिव्यादभूतानवधिकातिशयस्वसिद्धज्ञानादिसदगुणनिधानमनन्यसाम्यम् ।।
एकान्तधर्ममवनौ परिपोषयन्तं नारायणं सुखनिधिं प्रणमाम्यहं त्वाम् ।।६।।

वाक्यामृताब्धिपरितर्पितभक्तजातं स्वीयान्तरारिदलनातुलप्रतापम् ॥
अज्ञानसंज्ञतिमिरव्रजहारिबोधं नारायणं सुखनिधिं प्रणमाम्यहं त्वाम् ॥७॥
इन्दीवरासितमणीन्द्रपयोदवर्णकोटिस्मरस्मयविभेदनदिव्यरुपम् ॥
संचिन्तितं परमहंसगणैरजस्रं नारायणं सुखनिधिं प्रणमाम्यहं त्वाम् ॥८॥

*॥ इति अचिन्त्यानन्द वर्णि रचित श्रीनारायणस्तवनाष्टकम् ॥*

## १२ ● ॥ उपजातिवृत्तम् ॥

सद्धर्मरक्षात्तजने सदीश प्रतापनिर्मूलनदैत्ययूथ ॥
पाखण्डतो रक्षितानैज्ञभक्ता प्रशान्तमूर्ते जय नीलकंठः ॥१॥
निश्रेयसायैव कलौ नराणां भक्त्याः सदोपास्यमनोज्ञमूर्ते ॥
अतिक्षमाब्धऽतिदयानिधान प्रशान्तमूर्ते जय नीलकंठः ॥२॥
स्वभक्तगोलोकनयात्मनिष्ठः प्रभो सदैकान्तिकधर्मधर्त्तः ॥
प्रवृत्तितक्षेमदसांख्ययोग प्रशान्तमूर्ते जय नीलकंठः ॥३॥
अधर्ममायाकलिकालनानादोषाशुनाशन श्रवणादिभक्तेः ॥
धर्मक्रियातत्परः चारुवेष प्रशान्तमूर्ते जय नीलकंठः ॥४॥

महामुने योगकलाप्रवृत्ते योगेश्वरानन्तगुणप्रभावः ।।
विभोः धराभीतिदः दिव्यरुपेः प्रशान्तमूर्ते जय नीलकंठः ।।५।।
कामाद्यऽरित्रासदः चिन्तनेश पापौघविद्रवणनामधेय ।।
अज्ञानविध्वसंन बोधशक्तेः प्रशान्तमूर्ते जय नीलकंठः ।।६।।
हारिप्रसादे हरिकृष्ण कृष्णस्वामिन् हरे तापस नैष्ठिकेन्द्रः ।।
नारायणः प्रेमवतीतनुजः प्रशान्तमूर्ते जय नीलकंठः ।।७।।
अदीनदिव्यचरितः स्वतन्त्रः ब्रह्मार्षिराजर्षिसमर्चितांघ्रेः ।।
श्री स्वामिनारायणदेशिकेन्द्रः प्रशान्तमूर्ते जय नीलकंठः ।।८।।

*।। इति श्रीमुकुन्दानंद वर्णिकृता स्तुतिः ।।*

## १३ ● ।। स्त्रग्वीणीवृत्तम् ।।

ब्रह्मधामाधिपं पुंप्रकृत्याक्षिप्तं वन्दितं निर्ज्जरैः पण्डितैर्नन्दितम् ।।
धार्मिकं स्वामिनं सदगुणं श्रीहरिं स्वामिनारायणं हे मनस्त्वं भज ।।१।।
मानदं कारणं शर्मणस्तारणं सागरादुःखतोजन्मिनां सद्गतिम् ।।
ज्ञानिनं ध्यनिनं योगिनं निर्ममं स्वामिनारायणं हे मनस्त्वं भज ।।२।।

वासुदेव जगत्पावनं सर्वदावारणेन्द्रं यथाधावमानं तथा ।।
सत्वरं सिद्धिदं सिद्धिपं सत्पतिं स्वामिनारायणं हे मनस्त्वं भज ।।३।।
देवदेवेशं दयासागरं नागरं श्रीहरं श्रीकरं नीलकंठाभिधम् ।।
धर्मवंश्यावनं धर्मरक्षाभवं स्वामिनारायणं हे मनस्त्वं भज ।।४।।
छुप्पैयावासिनं पद्मसिंहासनं चन्द्रबिम्बाननं कन्दमूलाशनम् ।।
तापसं वर्णिनां नैष्ठिकानां गुरूं स्वामिनारायणं हे मनस्त्वं भज ।।५।।
मस्तकेपिंगलां संदधानं जटां मेखलां मौजिकां चांसयुग्मेकटौ ।।
चर्मचेणं सदानन्दकन्दमुदां स्वामिनारायणं हे मनस्त्वं भज ।।६।।
सिंहशार्दुलगौव्यालनागादिभिर्जन्तुभिर्दुर्गमेदुष्टभीकानने ।।
पद्यमानं हिमागस्य चानेकशः स्वामिनारायणं हे मनस्त्वं भज ।।७।।
पुष्पहारावलिं दीर्घदोर्दण्डकं वेदवाचं नराकारमण्डस्थितम् ।।
कंजशोणाम्बकं मेघनिम्नस्वनं स्वामिनारायणं हे मनस्त्वं भज ।।८।।
पापहं वर्णिनावासुदेवेन शं स्तोत्रमेतत्कृतं श्रीहरेच्छयाखिलं ।।
यः कथेद्यः पठेदन्ततः प्रत्यहं मानवः प्राप्नुयान्मंगलं सोऽत्रहि ।।९।।

*।। इति श्रीवासुदेवानंदवर्णिविरचित श्रीहरिस्तोत्रं समाप्तम् ।।*

१४ •

स्वामिनारायणदेवं शरणं व्रजामि शरणं ॥ (ध्रुवपदम्)

भक्तिधर्मसुप्रियतमबालम् । मायाकालमहाविकरालम् । सदाश्वेताम्बरशालं भवन्तं भजामि ॥ शरणं...॥१॥

सकलशास्त्रनिगमागमसारम् । वर्णिवेषरमणीयमुदारम् । शरणागतपातकहारम् शरण्यम नमामि ॥ शरणं...॥२॥

कोटिमदनमोहनसुखरुपम् । सुरनरवरमुनिवरभूपम् । ज्ञानसुधारसकूपम् सततं स्मरामि ॥ शरणं...॥३॥

ब्रह्मरुपमुनिवन्दितपादम् । संहृतसंश्रितसर्वविषादम् । वादिजनखण्डिवादम् प्रपन्नोभवामि ॥ शरणं...॥४॥

हित्वा राजसतामसदेवम् कार्य हरिपदशरणमित्येकम् । निष्कामानन्दजनोऽहं शतशो वदामि ॥ शरणं...॥५॥

*॥ निष्कामानन्दवर्णिविरचितं शरणस्तोत्रं समाप्तम् ॥*

**१५ • ॥ अष्टपदीयम् ॥**

वरवरकरूणासागर कृष्ण सतांनाथ संपत्तिकरणम् ।
जयजय धार्मिक नमामीहं संकष्टहरणम् ॥ (ध्रुवपदम्)

वरवर नरसख चन्द्रानन देवाधिप दैत्यानाशनम् ।
वृषसुत परमदया कर साधो खगपतिवाहनम् ॥ खग. २ ॥ सतांनाथ ॥१॥

वरवरजलधरकायाभयरूपाकर लोकपावनम् ।
जितरुषतरणिकरोज्ज्वलवासो लघुतरधावनम् ॥ लधु. ॥ सतांनाथ ॥२॥

वरवरदीनदयाकर तपःप्रियाजित कुसुमोत्तमहारम् ।
किसलय मृदुलमहाबलहस्तं महसि महाकारम् ॥ मह. ॥ सतांनाथ ॥३॥
वरवरसरसिजलोचन पापविमोचन जनतासुखकारम् ।
विधिविधि महितपदाम्बुजदेवं भवसागरतारम् ॥ भव. ॥ सतांनाथ ॥४॥
वरवरसुचरितपुण्यावनभूमिधृतसुरूचिरनरदेहम् ।
अनलस वरदतमोहर तेजः स्थितरुचिमयगेहम् ॥ स्थित. ॥ सतांनाथ ॥५॥
वरवर नरमुनिसिद्धेश्वरदेवासुरसंस्कृतगुणगानम् ।
सुनयन निजनृविधापितयोषातनुपशुकुणमानम् ॥ तनु ॥ सतांनाथ ॥६॥
वरवर लोकविभूषण वृषकुलभूषण भक्तारिमरणम् ।
बहुदयहृदयकजेश्वरमात्मन्नशरणजनशरणम् ॥ नशर ॥ सतांनाथ ॥७॥
वरवर परमतखंडन दक्षनिरंजन निगमागमगीतम् ।
घनरवनिनदमनोहर नित्यं पुरुहरिरसपीतम् ॥ पुरु ॥ सतांनाथ ॥८॥
वरवर शुभमिदमेवं किल वासुदेववर्णिविरचितम् ।
परतर हरतुतमःस्तवनं तत् कविजनसम्भणितम् ॥ कवि ॥ सतांनाथ ॥९॥

*॥ श्री वासुदेवानंदवर्णिविरचाताष्टपदी संपूर्ण ॥*

## १६ • ॥ हरिगीत छन्दः ॥

नवमेघमेचकविग्रहं धृतपुष्पहारमनोहरं । जयकारिणं भयहारिणं तमसः परं शिशिरोदरम् ॥
निजमोदितं निगमोदितं जगदीश्वरैः कृतवन्दनं । हरिकृष्ण कृष्ण भवन्तमीश नमाम्यहं वृषनंदनम् ॥१॥
जनताप पापविनाशितं क्षितिभक्तिधर्मविकाशितं । जितदेवदानवदैत्यमानवकामगर्वविपाटितम् ॥
द्विजसाधुदैवतमण्डनं कृतकौलनास्तिकखण्डनं । हरिकृष्ण कृष्ण भवन्तमीश नमाम्यहं वृषनंदनम् ॥२॥
परिपूर्णचन्द्रसमाननं तपसे मुदाश्रितकाननं । हयवाहनं रिपुगाहनं कुलदेवमारुतिमाननम् ॥
करुणालयं जगदालयं घृतपीतकेशरचन्दनम् । हरिकृष्ण कृष्ण भवन्तमीश नमाम्यहं वृषनंदनम् ॥३॥
शरदब्जपत्रविलोचनं निजभक्तकष्टविमोचनं । वनमालिनं सुरशालिनं ज्वलनार्कसोमविरोचनम् ॥
कलिभूरिसारविभंजनं निजदासहासविरंजनं । हरिकृष्ण कृष्ण भवन्तमीश नमाम्यहं वृषनंदनम् ॥४॥
मृदुपल्लवारुणपत्तलं व्रततीर्थदानतपः फलं । पदपावनं लघुधावनं भुवनावनं गगनामलम् ॥
तिलपुष्पसन्निभनासिकं जनतान्तराहितगंजनं । हरिकृष्ण कृष्ण भवन्तमीश नमाम्यहं वृषनंदनम् ॥५॥
करिपुष्करोपमदोर्युगं सुहृदां खलान्तरभेदनं । पृथुभालकुंकुमचन्द्रकं भुवि बोधितात्मनिवेदनम् ॥
भगवन्तमच्युतमव्ययं प्रकृतिश्वरान्तककंपनं । हरिकृष्ण कृष्ण भवन्तमीश नमाम्यहं वृषनंदनम् ॥६॥
यमदूतभूतनिवारणं सकलागामोद्भवकारणं । सितवाससं रविभाससं नरकातिकष्टवितारणम् ॥
श्रुतदुर्गपत्तनवासिनं सुकृतारिबन्धुनिकन्दनं । हरिकृष्ण कृष्ण भवन्तमीश नमाम्यहं वृषनंदनम् ॥७॥

कविवासुदेवपरिष्ठुतं यशसोज्वलेन भुवि श्रुतं । गुणसागरं सुहृदाहरं बहुमूल्यभूषणसंयुतम् ॥
वृषवंशिवाडवमंगलं समितौ तु विप्रसदंचनं । हरिकृष्ण कृष्ण भवन्तमीश नमाम्यहं वृषनंदनम् ॥८॥

*॥ इति वासुदेवानंदवर्णि विरचितं नमनाष्टकम् ॥*

**१७ • ॥ पिलुरागेण गीयते ॥ अष्टपदी ॥**

मानस चिन्तय चारुचरित्रं प्रेमवतिवृषपुत्रं पवित्रं मा. ॥ (ध्रुवपद)
नूतनमुदितदयितमंजुकाये । चन्द्रविशदवसनानि धरन्तं म. ॥१॥
केसरतिलकललितनिजभाले । कुंकुमचन्द्रकधरमभिरामं मा. ॥२॥
बिन्दुपरिष्कृतशुभश्रुतियुग्मे । रत्नसुशोभितकुण्डलधारं मा. ॥३॥
अम्बकमधुपलसितलपनाब्जे । कुन्दमुकुलसमहासं दधानं मा. ॥४॥
रेखाविराजितवरकम्बुकण्ठे । पुरुविधपुष्पकनकमणिहार मा. ॥५॥
विषधरविग्रहकल्पकरद्वये । पुष्परचितवलयांगदधारं मा. ॥६॥
हरिमदहरतनमंजुलकट्याम । नंगखचितचामीकररसनाढ्यम् मा. ॥७॥
करिकरकदलीकरभसमसक्थिम । सुषमसुवृत्तमुकुररुपजानुं मा. ॥८॥
नूपुरनादितचरणमुदारं । निष्कामानन्दनिखिलतापहारं मा. ॥९॥

## १८ ● ॥ अष्टपदी ॥

नित्यं शुद्धमंजं भुवनेश्वरमीशेशं किल विश्वेशम्, मायापाशनिराकरणं शरणं निगमागमगीतगुणम् ॥
प्रगटीतसर्वकलं विकलं कमनं जनिमृत्युजराशमनं, सर्वज्ञं श्रुतिसारं चिन्तय सुखकन्दं सहजानन्दम् ॥१॥
श्रेष्ठं यज्ञपति भूयिष्ठं विश्ववरिष्ठं धर्मिष्ठं दान्तं, शान्तमखिलहृदिभान्तंसुललितमम्बुधिजाकान्तम् ॥
योगिध्येयमजेयमगेज्ञं विज्ञेयं निर्गतहेयं गोविन्द, वरदेशं चिन्तय सुखकन्दं सहजानन्दम् ॥२॥
पुण्यं प्रेमवतीप्रियपुत्रं परमपवित्रं सच्चरितम्, वागीशं वृषवंश विभूषणमादिगुरुं करुणाधारम् ॥
शाश्वतमब्जविलोचनरोचन मन्तकमोचनमतिसारं, कालिदतमदध्नं चिन्तय सुखकन्दं सहजानन्दम् ॥३॥
स्वेच्छाविरचितविविधाकारं दिव्याकारघनाकारम्, लीलाधृतवरमनुजाकारं विश्वविहारं भयहारम् ॥
पूर्णचतुर्दशलोकाधारं सर्वाधारमनाधारं, श्रीवत्सांकमुदारं चिन्तय सुखकन्दं सहजानन्दम् ॥४॥
वेत्तारं नरकान्तकमव्ययमव्यक्तं परमानन्दम्, सिद्धसुरासुरवंद्यपदं विपदन्तकरं जनतासुखदम् ॥
भक्तानुग्रहतत्परमादिमनादिमशेषगुणोपेतम्, कोमलगात्रमनीहं चिन्तय सुखकन्दं सहजानन्दम् ॥५॥
वामं वामरिपुञ्जयविग्रहं सुरविनिग्रहमभिरामम्, दुःखविमोचनमम्बुजरोचनमसुरविमोहनमार्तिहरम् ॥
भयविनिवारणमानततारण मागमधारणमवितारं, श्यामं धनवदकामम् चिन्तय सुखकन्दं सहजानन्दम् ॥६॥
शर्मकलापं मधुरालापं विरमितनिजजनसंतापम्, शिवकरजापं कुमतिदुरापं मुक्तकलापं हतपापम् ॥
विदलिततिष्यज कलुषकलापं धृतमतिचापं श्रितशापम्, कटितटपुरटकलापम् चिन्तय सुखकन्दं सहजानन्दम् ॥७॥

बहुतरदिनकरचन्द्रछटाहरमवितचराचरमात्मरतिम्, योगकलाधरमसुरभयं करममितगुणाकरमाधिहरम् ॥
धार्मिधर्मधुरंधरमीड्यमनेक जनाभयदातारम्, कविनिष्कामविचिन्त्यम् चिन्तय सुखकन्दं सहजानन्दम् ॥८॥

*॥ इति निष्कामानन्दवर्णिविरचित सहजानन्दाष्टकम् ॥*

## १९ • ॥ कोकिलवृत्तं ॥

विहरति योऽक्षरेक्षरपदाक्षरमुक्तपतिः पुरुषविधो विधिंविधिहरीश्वरमुख्यबुधाः ॥
शिरसिवहन्ति ते समुदितं किल येन मुदा हृदि तमजं भजे भवहरं हरिकृष्णमहम् ॥१॥
प्रकृतिमया गुणा न च भवन्ति हि यत्र हरौ इति निगमागमा अपि वदन्ति च निर्गुणकम् ॥
इति सगुणं गणैरपि युतं परदिव्यशुभैर्हृदि तमजं भजे भवहरं हरिकृष्णमहम् ॥२॥
शमदमकौशलस्मृतितपोबलकान्तिभगश्रुत-शुचिसत्यतास्ववशतार्जवकीर्तिमुखाः ॥
अपरिमिता गुणा ध्रुवतयात्र वसन्ति सदा हृदि तमजं भजे भवहरं हरिकृष्णमहम् ॥३॥
प्रकृतिपराक्षरे बृहतिधामनि मूर्तिधरेनिंगमनिजायुधैश्च निजपार्षदमुख्यगणैः ॥
उरूय उपस्यतेऽपि रमया रमणीयतनुर्हृदि तमजं भजे भवहरं हरिकृष्णमहम् ॥४॥
निखिलभगैश्च योऽक्षरपदे दिवि देवगणैरखिलविभूतिभिर्विभवभूमिरुपास्यत ए ॥
रतिपतिदर्पहारमणरम्यकरुपनिधिर्हृदि तमजं भजे भवहरं हरिकृष्णमहम् ॥५॥
विजितमनोभवा भुविभजन्ति च यं सततं शमदमसाधनैः प्रशमितेन्द्रियवाजिरयाः ॥
प्रकटितमानुषाकृतिमिमे मुनिदेवगणा हृदि तमजं भजे भवहरं हरिकृष्णमहम् ॥६॥

द्विजवृषसाधुगोमुनिगणानवितुं भुवि यो वृषभवने वृषादधृतजनिर्जनको जगताम् ॥
प्रकृतिभुवामपि प्रशमितुं यदधर्मकुलं हृदि तमजं भजे भवहरं हरिकृष्णमहम् ॥७॥
ऋषिभिरभिष्टुतो नृपगणैर्नतपादतलः श्रुतिशिरसां गणैरुदितसूज्ज्वलकीर्तिरसौ ॥
अतिकृतिभिः प्रगीत इति यः कविकोकिलकैर्हृदि तमजं भजे भवहरं हरिकृष्णमहम् ॥८॥

*॥ इति योगानन्दमुनिविरचितं भजनाष्टकम् ॥*

## २० ● ॥ अष्टपदी ॥

तरुणं लोकयचातिकरुणं कृष्णं पथि, हे सखी मम् रञ्जनम् ॥ तरुणं....१
आवयमानं कलरवगानं, विधुमुखबालानन्दनम् ॥ तरुणं....२
वपुषि नीले गजगतिलीले, दधतं तु केसरचंदनम् ॥ तरुणं....३
चेतो हरन्तं सखि विहरन्तं, कुसुमहारमीशमण्डनम् ॥ तरुणं....४
चंञ्चलदृष्टिं कृतलोकसृष्टिं, अजितमदनमदगञ्जनम् ॥ तरुणं....५
सुमनोऽनुकूलं मंगलमूलं, कुपथदेशिकमतखण्डनम् ॥ तरुणं....६
धृतसितवसनं मुखमितहसनं, विधिभवदेवकृतवन्दनम् ॥ तरुणं....७
उपचितसेवं कविवासुदेवं, तं पाति कलिकालकम्पनम् ॥ तरुणं....८

*॥ इति श्रीवासुदेवानन्दवर्णिरचिताऽष्टपदी सम्पूर्णा ॥*

## २१ ● ॥ अष्टपदीयम ॥

हरिकृष्णं मानस लोककमनियमे ॥हरिः॥ भजहरिमविरतम् धावतु मा ॥हरिः॥ .... (ध्रुवपद)

ततो वरेह निगम कायजलधौ । तमानिन्ये विधाय ततो नमनियमे ॥भज.. १॥

तिष्ठति कमठमये धरणीयं । यस्य पृष्ठे चपलभयशमनीयमे ॥भज.. २॥

वराहरूपधरोऽवनये सा । दतादैत्य जघान हि नमनियम ॥भज.. ३॥

द्दतो नखैर्हरिणां नरहरिणा । दितिपुत्रो द्विरदइव गमनियमे ॥भज.. ४॥

वसुधां दांपयितुं शचीपतये । बलीं विप्रो ययाच फलजमनियमे ॥भज.. ५॥

क्षत्रियरुधिरजले स्नापयन्तं । जामदग्न्यो जनतापशमनियमे ॥भज.. ६॥

रावणनाशकरो भूविरामो । यशः सेतुदधेह भवदमनियमे ॥भज.. ७॥

बलबुधकल्किवपुषा येन चरितं । कृतं परंपरं पूरूश्रयणीयमे ॥भज.. ८॥

वासुदेवस्य धवो हरिकृष्णो । दशाकृति दधार बहुरमणीयमे ॥भज.. ९॥

*॥ इति श्रीवासुदेवानन्दवर्णिविरचिताष्टपदी संपूर्णा ॥*

## २२ ● ॥ वंशस्थवृत्तम् ॥

अथेकदा दिव्यतपास्तपंस्तस्विनां कौतुककारकर्मकः ॥
यथेस्टयोगाय वने वसन्वशी स वर्णिवेषोऽवतु धर्मनन्दनः ॥१॥

नवीननीलाम्बुददिव्यविग्रहो जितेन्द्रियो योगकलासु कौशलः ।।
कृषीकृषांगतपसा तपोधनः स वर्णिवेषोऽवतु धर्मनन्दनः ।।२।।
कटितटे पिंगलवर्णवेशलां नवीनमौंजीं दधदेवमेखलाम् ।।
जटां दधानोऽथ शिरोरूहच्छटां स वर्णिवेषोऽवतु धर्मनन्दनः ।।३।।
सितोपवितां सततोऽटवींरुचिरतीव कौपीनपटं द्दढं दधत् ।।
विराजमानो मृगचारुचर्मणा स वर्णिवेषोऽवतु धर्मनन्दनः ।।४।।
दधच्चकण्ठे तनुतौलसीं स्रजं सनामपाणौ जपमालिकां तथा ।।
सचन्द्रमध्योर्ध्वतमालपत्रकः स वर्णिवेषोऽवतु धर्मनन्दनः ।।५।।
तनूतरस्कन्धनिषक्तपुस्तको रतः सदा बालमुकुन्दपूजने ।।
वनेचरैः सिद्धगणैस्तु सेवितः स वर्णिवेषोऽवतु धर्मनन्दनः ।।६।।
ससिंहशार्दूलवराहवारणैर्महामृगैर्व्यालगणैश्च संकुले ।।
वनेऽपि धीरो विचरन्नभीतिकः स वर्णिवेषोऽवतु धर्मनन्दनः ।।७।।
सदात्मदर्शी फलकन्दभोजनो वने निवासो यदि दुःखदः खलु ।।
तथाऽपि तत्रापि सुखो महामतिः स वर्णिवेषोऽवतु धर्मनन्दनः ।।८।।

*।। इति श्रीयोगानन्दमुनि विरचितं श्रीधर्मनन्दनतपश्चर्या वर्णनाष्टकम् ।।*

## २३ • ॥ श्रीगुरु भजन स्तोत्रम्, वियोगिनीवृत्तम् ॥

भवसंभवभीतिभेदनं सुखसम्पत्करुणानिकेतनम् ।।
व्रतदानतपः क्रियाफलं सहजानन्दगुरुं भजे सदा ।।१।।
करुणामयचारुलोचनं शरणायातजनार्तिमोचनम् ।।
पतितोद्धरणाय तत्परं सहजानन्दगुरुं भजे सदा ।।२।।
निजतत्त्वपथावबोधनं जनतायाः स्वत एव दुर्गमम् ।।
इति चिन्त्य गृहितविग्रहं सहजानन्दगुरुं भजे सदा ।।३।।
विधिशंभुमुखैरनिग्रहं भवपाथोधिपरिभ्रमाकुलम् ।।
अपिधार्यमनो नरप्रभं सहजानन्दगुरुं भजे सदा ।।४।।
निजपादपयोजकीर्तनं सततं स्याद्‌भवजीवगोचरम् ।।
इति यः कुरुते क्रतूत्सवं सहजानन्दगुरुं भजे सदा ।।५।।
बहिरीक्षणलोकमानुषं निजदत्ताम्बकदर्शिनां हरिम् ।।
भजनियपदं जगद्‌गुरुं सहजानन्दगुरुं भजे सदा ।।६।।
शरणागतपापपर्वतं गणयित्वा न तदीयसद्‌गुणम् ।।
अणुमप्यतुलं हि मन्यते सहजानन्दगुरुं भजे सदा ।।७।।

भववारिधिमोक्षसाधनं गुरुराजप्रकटस्वसंगमम् ।।
प्रकटीकृतवान् कृपावशः सहजानन्दगुरुं भजे सदा ।।८।।
भगवन् कृपया त्वया कृतं जनतायामुपकारमीद्दसम् ।।
क्षमते प्रतिकर्तुमत्र कः कुरुते दीनजनस्ततोऽञ्जलिम् ।।९।।

## २४ • ॥ वसन्ततिलकावृत्तम् शतानन्दमुनि रचित् ॥

श्रीवासुदेव विमलामृतधामवासं नारायणं नरकतारणनामधेयम् ।।
श्यामं सितं द्विभुजमेव चतुरभुजं च त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ।।१।।
शिक्षार्थमत्र निजभक्तिमतां नराणामेकान्तधर्ममखिलं परिशीलयन्तम् ।।
अष्टांगयोगकलनाश्च महाव्रतानि त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ।।२।।
श्वासेन साकमनुलोमविलोमवृत्त्या स्वान्तर्बहिश्च भगवत्युरुधा निजस्य ।।
पूरे गतागतजलाम्बुधिनोपमेयं त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ।।३।।
बाह्यान्तरिन्द्रियगणश्वसनाधिदैववृत्त्युद्भवस्थितिलयानपि जायमानान ।।
स्थित्वा ततः स्वमहसा पृथगीक्षमाणं त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ।।४।।

मायामयाकृतितमोऽशुभवासनानां कर्तुं निषेधमुरुधा भगवत्स्वरुपे ॥
निर्बीजसांख्यमतयोगसुयुक्तिभाजं त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥५॥
दिव्याकृतित्वसुमहस्त्वसुवासनानां सम्यग्विधि प्रथयितुं च पतौ रमायाः ॥
सालम्बसांख्यपथयोगसुयुक्तिभाजं त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥६॥
कामार्ततस्करनटव्यसनिद्विषन्तः स्वस्वार्थसिद्धिमिव चेतसि नित्यमेव ॥
नारायणं परमयैव मुदा स्मरन्तं त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥७॥
साध्वीचकोरशलभास्तिमिकालकण्ठकोका निजेष्टविषयेयु यथैव लग्नाः ॥
मूर्तौ तथा भगवतोऽत्र मुदातिलग्नं त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥८॥
स्नेहास्तुरस्त्वथ भयातुर आमयावीं यद्वत्क्षुधातुरजनैश्च विहायमानम् ॥
दैन्यं भजेयुरिह सत्सु तथा चरन्तं त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥९॥
धर्मस्थितैरुपगतैर्बृहता निजैक्यं सेव्यो हरिः सितमहः स्थितदिव्यमूर्तिः ॥
शब्दाद्यरागिभिरिति स्वमतं वदन्तं त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥१०॥
सद्गन्थनित्यपठनश्रवणादिसक्तं ब्राह्मी च सत्सदसि शासतमत्र विद्याम् ॥
संसारजालपतिताखिलजीवबन्धो त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥११॥

*॥ इति सत्संगिजीवने धार्मिकस्तोत्रम् । सत्संगिजीवन पंचम् ५ प्रकरण अध्याय-६६, श्लोक १२ थी ॥*

## २५ ● ॥ मालवरागे रूपकताले गीयते ॥

जय जय सुखदवरं कमलाननलोभं दर्शयमुनिवरवन्दितशौभं ॥
माधवरूपमखिलविदित जय घनश्याम हरे जय घनश्याम हरे ॥१॥
जय जय कीर्तिधरं श्रितशान्तिसमुद्रम् ॥ दृष्टिचलितविधिहरिहररूद्रं । माधव..॥२॥
जय जय विजयकरं धृतसुमनःसुहारम् ॥ निजचरणाश्रितविदलितमारम । माधव..॥३॥
जय जय सुमतिवरं निजजनहितभाजं ॥ रतिविलसितमुनिसदसिविराजं । माधव..॥४॥
जय जय जगदुदयं गजगतिकमनियम् ॥ कनकवसनभूषणरमणीयम् । माधव..॥५॥
जय जय मधुरवं रतिपतिमतिगम्यम् ॥ विविधविचित्रजगदेकरम्यम् । माधव..॥६॥
जय जय कुमतिहरं धृतनटवरवेशम् ॥ शुभदमुनिराजिकृतपरिवेषम् । माधव..॥७॥
जय जय सद यद्दशं अवतरणनिदानं ॥ ब्रह्ममुनिनित्यविरचितमानं । माधव..॥८॥

*॥ इति श्रीब्रह्मानंदमुनिविरचिताष्टपदी समाप्ता ॥*

## २६ ●

श्रीधर्मसद्मन्यवतीर्य विष्णुर्यो वासुदेवो हरिकृष्ण ईशः ॥
श्रीनिलकण्ठोऽत्रपुनाति मर्त्यान् ध्यायेहरिं तं हृदि धर्मपुत्रम् ॥१॥
यस्य स्वरुपे तिललक्षणानि स्वभक्तचेतांसि हरन्ति यद्वत् ॥
अयांसिचाकर्षमणिप्रवेका ध्यायेहरिं तं हृदि धर्मपुत्रम् ॥२॥

यस्याक्षरे धाम्नियत्प्रसक्ताः क्रीडन्ति दिव्येऽक्षरसंज्ञमुक्ताः ॥
सम्राट्तनुजा इवसर्व मान्या ध्यायेहरिं तं हृदि धर्मपुत्रम् ॥३॥
यस्यायस्यपद्मेऽद्भुतभूरिशोभे वसन्ति नेत्रभ्रमरा जनानाम् ॥
हंसायथा मानसपद्मवृन्दे ध्यायेहरिं तं हृदि धर्मपुत्रम् ॥४॥
यः पोषयत्यत्र जना स्वकीयज्ञानोपदेशेन सुधोपमेन ॥
वत्सान् सुशिला पयसा यथा गौः ध्यायेहरिं तं हृदि धर्मपुत्रम् ॥५॥
पाखण्डधर्माद्युदयेन यस्य शाक्ताः व्यलीयन्त यथोदितेऽर्के ॥
घूका वृषद्वेषिण एव चान्ये ध्यायेहरिं तं हृदि धर्मपुत्रम् ॥६॥
यत्पादपद्मेऽक्षरमुक्तचेतो भृगां रमन्ते सरसीवमीनाः ॥
आसेव्यमाने भुवि भूरिभक्तैः ध्यायेहरिं तं हृदि धर्मपुत्रम् ॥७॥
यदीयसौन्दर्यगुणादिपारं शेषादयो यान्ति न यस्य भक्ताः ॥
वांच्छन्तिनाप्यक्षरसौख्यमन्तः ध्यायेहरिं तं हृदि धर्मपुत्रम् ॥८॥

॥ स्त्रग्धरावृत्तम् ॥

गोपालानन्दनाम्ना रचितमतिशुभंत्वष्टकं सन्मयेदं प्रीत्यै श्री धर्मसूनोः प्रगटभगवतः स्वामिनारायणस्य ॥
तन्महात्म्यावबोधं य इदमिह जनः श्रावयेत्कीर्त्तयेद्वा स स्याद्वै ब्रह्मरुपः हरिरतुलमुदं चाप्नुयात्तत्र धार्मिः ॥९॥

## २७ ● ॥ श्रीहरि महिमाष्टकम् ॥

गोविन्द नारायण वासुदेव श्रीकृष्ण संकर्षण पद्मनाभ ॥
नरानिरुद्धेश्वर लोकनाथ हरे मुकुन्दाद्य नमो नमस्ते ॥१॥
आनन्दकंदाच्युत सुंदरागं दयानिधे माधव मंगलात्मन ॥
विष्णो हृषिकेश परावरेश प्रद्युम्न पद्मनाभ ते नोऽस्तु ॥२॥
विशुद्धमूर्ते मधुसूदनाज दामोदर श्रीधर सर्ववन्द्य ॥
ब्रह्मण्यदेवाक्षर पूर्णकाम प्रभो विभो नाथ नमो नमस्ते ॥३॥
वैकुन्ठ सत्योत्तम सत्व भूमन् हिरण्यगर्भ त्रिककुत्कलेश ॥
विश्वोतमश्लोक विधे महर्षे प्राणेश विश्वेश्वर ते नमोऽस्तु ॥४॥
वृषाकपे केशव धर्म धीर शुचिश्रवो भूतपते परात्मन् ॥
पुण्यांग यज्ञेष्टद पुण्यकीर्ते सुधीर्नमस्ते पुरुषोतमाय ॥५॥
अधोक्षज श्रीकर कंजनेत्र वेदैकविद्वेदकृदव्ययात्मन् ॥
अव्यक्त संश्रित्पर सौख्य हेतो आनंद विद्याधिपते नमोऽस्तु ॥६॥
ज्ञेयादिदेव प्रियभक्त पूज्य प्रेष्ठ प्रजेशामरवर्य सर्व ॥
ब्रह्मागुणागम्य सदर्चनीय प्रमाणहीनाधिपते नमोऽस्तु ॥७॥

स्वामिन्महेशामलधाम देव ज्ञानप्रदागोचर सद्‌गुणाप्त ॥
सहस्रमूर्ते पुरुषाप्तकाम प्रकाशकाकाशवपुर्नमस्ते ॥८॥
स्वतंत्र मायाधिप सर्वशक्ते सदा प्रसन्नो भव पाहि चास्मान् ॥
त्वमेव सर्वाश्रयणीय एकस्तस्मै मुहुस्ते भगवन्नमोऽस्तु ॥९॥

## २८ ● ॥ अष्टपदीयम् योगानन्दमुनिकृतम् ॥

जलधरसुन्दर मदनमनोहर हृदयतमोहर कृष्ण हरे ।
वृषकुलभुषण दलितविदूषण दिव्यविभूषण दिव्यगते ॥
जय जय जयकर दीनदयाकर जगतिदिवाकर दिव्यपते ॥१॥
निजजनरंजन भवभयभंजन मुनिजनरंजन भक्तरते ।
मुनिजनमंडन विषयविखंन खलजनदंडन दंडविधे ॥ जयजय..॥२॥
असुरनिकंदन सुरवृषनंदन चर्चितचंदन मुक्तमुने ।
भवजलतारण दोषनिवारण मंगलकारण मुक्तपते ॥ जयजय..॥३॥
सरसिजलोचन जनिमृतिमोचन रविशशिरोचन रागिरते ।
असुरविमोहन सुरसुखदोहन वारणरोहण शीघ्रगते ॥ जयजय..॥४॥
निजहितशासन शापविनाशन हयगरूडासन सादिवृते ।
दुर्गपुरासन भक्तनिवासन भुंजितकुवासना भक्तरते ॥ जयजय..॥५॥

रचितनिजावन भक्तविभाजन पंक्तिसुपावन पुण्यपते ।
शंकुरु शंकर वैरिभयंकर धर्मधुंरधर योगिगते ॥ जयजय..॥६॥
खंडितचंडं पंडितमंडं जितपाखडं दंडभटम् ।
कंपितकालं वृषकुलपालं वरवनमालंपीतपटं ॥ जयजय..॥७॥
श्रितसुखकंदं बोधितमंदं सहजानंदं त्वधिभजे ।
कुरू तव दासं चरणनिवासं त्यक्तकुवासं योगमुनिम् ॥ जयजय..॥८॥

२९ ●

परमाद्भ्रुतदिव्यवपु रुचिरं रुचिरेंघ्रितलेंगुलयो रुचिराः ॥
नखमंडलमिंदुनिभं रुचिरं रुचिराधिपतेरखिलं रुचिरम् ॥१॥
प्रपदे रुचिरे प्रसूते रुचिरे मृदुजानुयुगं रुचिरं रुचिरम् ॥
करिहस्तनिभोरुयुगं रुचिरं रुचिराधिपतेरखिलं रुचिरम् ॥२॥
कटिपुष्टनितंबयुगं रुचिरं नतनाभिकंज जठरं रुचिरम् ॥
मृदुलो स्तननीलमणीरुचिरौ रुचिराधिपतेरखिलं रुचिरम् ॥३॥
हृदयं रुचिरं पृथुतुंगमुरः स्थलहंसयुगं रुचिरं रुचिरौ ॥
करभौ करकंजतले रुचिरे रुचिराधिपतेरखिलं रुचिरम् ॥४॥

भुजदंडयुगं रुचिरं चिबुकं विधुमोदकरं वदनं रुचिरम् ॥
रसना रुचिरा दशना रुचिरा रुचिराधिपतेरखिलं रुचिरम् ॥५॥
जलजोपकंठशिरो रुचिरं तिलपुष्पनिभा सुनसा रुचिरा ॥
अधरौ रुचिरावलीकं रुचिरं रुचिराधिपतेरखिलं रुचिरम् ॥६॥
अरुणे चपले नयने रुचिरं स्मरचापनिभे मुनिशान्तिकरे ॥
भृकुटी रुचिरे श्रवणौ रुचिरौ रुचिराधिपतेरखिलं रुचिरम् ॥७॥
हरिचंदन चर्चितमंगममलं तिलकं रुचिरं कुसुमाभरणम् ॥
बहुशस्तिलका रुचिराश्चिकुरा रुचिराधिपतेरखिलं रुचिरम् ॥८॥
सितसूक्ष्मघनं वसनं रुचिरं मुनिरंजनकं वचनं रुचिरम् ॥
अवलोकनमाभरणं रुचिरं रुचिराधिपतेरखिलं रुचिरम् ॥९॥
स्नपनं रुचिरं तरणं रुचिरं भरणं रुचिरं शरणं रुचिरम् ॥
रमणं रुचिरं श्रवणं रुचिरं रुचिराधिपतेरखिलं रुचिरम् ॥१०॥
कथनं रुचिरं स्मरणं रुचिरं मननं रुचिरं स्तवनं रुचिरम् ॥
विनयो रुचिरो घटनं रुचिर रुचिराधिपतेरखिलं रुचिरम् ॥११॥
अशनं रुचिरं मुखवास ईहाचमनं रुचिरं नमनं रुचिरम् ॥

जलपानमहो रुचिरं रुचिराधिपतेरखिलं रुचिरम् ॥१२॥
गमनं रुचिरं दमनं रुचिरं शमनं रुचिरं जपनं रुचिरम् ॥
तपनं रुचिरं यजनं रुचिरं रुचिराधिपतेरखिलं रुचिरम् ॥१३॥
हवनं रुचिरं यमनं रुचिरं भजनं रुचिरं त्यजनं रुचिरम् ॥
भवनं रुचिरं सदनं रुचिरं रुचिराधिपतेरखिलं रुचिरम् ॥१४॥
जननी रुचिरा जनको रुचिरः स्वजना रुचिरा मुनयो रुचिराः ॥
बटवो रुचिरां पदगा रुचिरा रुचिराधिपतेरखिलं रुचिरम् ॥१५॥
अवनं रुचिरं रुचिरं रचनं हरणं रुचिरं रुचिरं करणम् ॥
पठनं रुचिरं रुचिरं रटनं रुचिराधिपतेरखिलं रुचिरम् ॥१६॥
वचनं रुचिरं दृढभक्तिविरागसदाचरणं रुचिरं रुचिराः ॥
परिषन्निजभक्तजना रुचिरा रुचिराधिपतेरखिलं रुचिरम् ॥१७॥
हरिकृष्णमुदारमनन्तमजं प्रणतार्त्तिहरं जलदाभतनुम् ॥
करुणार्द्रदृशं वृषभक्तिसुतं नमन विदधे सुचिरं रुचिरम् ॥१८॥
ईदमर्थभृतं मुनिनित्यकृतं रुचरं स्तवनं जनपावनम् ॥
श्रुतमात्रमनोमलनाशकरं जनतापहरं भवतीष्टकम् ॥१९॥

**३० ●**

केशवतापं हर हर मे ब्रह्मवन्तं । त्वां नमामि सदा भगवन्तं । (ध्रुवपदम्)

अरुण कमल लोचनहृतखंजनमानमहागुणवन्तं । नारायणहरिकृष्णमहेश सुकृतं सदसि कथयन्तं ॥ केशव ॥१॥

नीलजलदसमविग्रहचर्चितचन्दनमतिबलवन्तं । दीनदयाकर जय जयदेवं कुरु हृदि मम शमनन्तम् ॥ केशव ॥२॥

सदय हृदय दर्शय मुखपंकजमाशुमालामाहरन्तं । यष्टयासु मनसां ते भक्तवासं कुसुममुकुलगौरदन्तं ॥ केशव ॥३॥

किसलय कोमलतलमधिशोभं ध्यायत्यजस्त्रं हसन्तम् । तं चारुयन्मुनयः पादपद्मं मदनकदन भगवन्तम् ॥ केशव ॥४॥

नवघनधवलमृदुलवसनानि शिवेनवपुषाधरन्तम् । नयनानन्दमान्तरशत्रून् शमयझटितिदयाव ॥ केशव ॥५॥

कालाक्षरपुंप्रकृतिविराजं तरूणवारणगतिमन्तम् । शंकरौयस्यशिरसिसुकरौ तं तवधरममधृतिमन्तं ॥ केशव ॥६॥

कलितललितभूषणभवनस्त्वं भूवनत्रयेविलसन्तं । गोविन्दमेदयितोभवगाढं जननिहृदयनिवसन्तम् ॥ केशव ॥७॥

वृषकुलरविमण्डलभूषयन्तं वाममुखं रुचिमन्तम् । वासुदेवचेतसिमनुजानामघगणनिकरं दहन्तम् ॥ केशव ॥८॥

*॥ इति वासुदेवानन्दवर्णिविरचिताषटपदी ॥*

**३१ ● ॥ गुर्जररागे एकतालीताले गीयते ॥**

एहि दयालो हृदय शयालो दर्शय समुधुरमूर्तिम् ॥
प्रशमय तांपं विदलय पापं जनय हृदयसुखपूर्तिम् ॥ (ध्रुवपदम्)
सुखकरशीले जलधरनीले हसितमुखे त्वयि याते ॥
ताम्यति चेतो वीक्षणहेतोः कृतिरियमतिविषमाते ॥एहि. १॥

चरणसमीपे शुभमतिदीपे सुखयसि खलु जनजातम् ॥
स्मर तव दासं दूरनिवासं कुरु पुरुविरहविघातं ॥एहि. २॥
जगनुकुले मंगलमूले त्वयि चिरयति दृशिदाने ॥
नहि मम स्नाने न च जलपाने रुचिररपि न निधाने ॥एहि. ३॥
जनसुखकारी भवभयहारी त्वमसि विषयविषपाता ।
मा विपरीतो भव सुप्रीतो रमण चरण दृशिदाता ॥एहि. ४॥
वचन विगितं चरितमधीतं मम बहुतरमपराधम् ॥
मा कुरु भावे करुणाहावे शीलमेव निजमगाधम् ॥एहि. ५॥
पश्यमपूर्ण त्यजसि हि तूर्ण का बत तव परिपाटी ॥
त्वयि सुखपुरे निवसति दूरे प्रपतति कलिमलघाटी ॥एहि. ६॥
बोधितमंदं सहजानन्दं शासितशामनभटधावम् ॥
प्रोज्झ्य भवन्तं भुवि विलसन्तं न गतिरतितनावम् ॥एहि. ७॥
गतसुखलेशे कुमतिनगेशे कुरु करूणां चरणसम्बम् ॥
विरहविहीनं कुरु तव दीनं किमिति करोषि विलम्बम् ॥एहि. ८॥

*॥ इति दीनानाथभट्टविरचितविरहाष्टपदी ॥*

## ३२ ● ॥ हनुमत्सतोत्रम् ॥

नीतिप्रविण निगमागमशास्त्रबुद्धे राजाधिराजरघुनायकमन्त्रिवर्य ॥
सिन्दूरचर्चितकलेवर नैष्ठिकेन्द्र श्रीरामदूत हनुमन् हर संकंटं मे ॥१॥
सीतानिमित्तजरघूत्तमभूरिकष्टोप्रोत्सारणैकसहाय हतास्त्रपौध ॥
निर्दग्धायातुपतिहाटकराजधाने श्रीरामदूत हनुमन् हर संकंटं मे ॥२॥
दुर्वार्यरावणविसर्जित शक्तिघातकष्ठासुलक्ष्मणसुखाहृतजीववल्ले ॥
द्रोणाचलानयननन्दितरामपक्ष श्रीरामदूत हनुमन् हर संकंटं मे ॥३॥
रामागमोक्तितरितारितबन्ध्वयोग दुःखाब्धिमग्नभरतार्पितपारिबर्ह ॥
रामांघ्रिपद्ममधुपीभवदन्तरात्मन् श्रीरामदूत हनुमन् हर संकंटं मे ॥४॥
वातात्मकेसरिमहाकपिराट तदीयभार्याञ्जनीपुरुतपः फलपुत्रभाव ॥
ताक्ष्योंपमोचितवपुर्बलतीव्रवेग श्रीरामदूत हनुमन् हर संकंटं मे ॥५॥
नानाभिचारिकविसृष्टसवीरकृत्याविद्रावणरुणसमीक्षणदुःप्रधर्ष्य ॥
रोगघ्नसत्सुतदवित्तदमन्त्रजाप श्रीरामदूत हनुमन् हर संकंटं मे ॥६॥
यन्नामधेयपदकश्रुतिमात्रतोऽपि ये ब्रह्मराक्षसपिशाचगणाच्च भूताः ॥
ते मारिकाश्च सभयं ह्युपयान्ति स त्वं श्रीरामदूत हनुमन् हर संकंटं मे ॥७॥

त्वं भक्तमानससमीप्सितपूर्तिशक्तो दीनस्य दुर्मदसपत्नभयार्तिभाजः ।।
इष्टं ममापि परिपूरय पूर्णकाम श्रीरामदूत हनुमन् हर संकंटं मे ।।८।।

*।। इति श्रीशतानन्दमुनिविरचितं श्रीहनुमानत्स्त्रोम् ।।*

## ३३ ● ।। श्रीराधिकाष्टम् ।।

नवीनजीमुतसमानवर्णं रत्नोल्लसत्कुण्डलशोभिकर्णम् ।।
महाकिरीटाग्रमयूरपर्णं श्रीराधिकाकृष्णमहं नमामि ।।१।।

निधाय पाणिद्धितीयेन वेणु निजाधरे शेखरयातरेणुम् ।।
निनादयन्तं च गतौ करेणुं श्रीराधिकाकृष्णमहं नमामि ।।२।।

विशुद्धहेमोज्जवलपीतवस्त्र हतारियुथं च विनापि शस्त्रम् ।।
व्यर्थीकृतानेकसुरद्धिऽस्त्र श्रीराधिकाकृष्णमहं नमामि ।।३।।

अधर्मतिष्यर्दितसाधुपालं सद्धर्मवैरासुरसंघकालम् ।।
पुष्पादिमालं व्रजराजबालं श्रीराधिकाकृष्णमहं नमामि ।।४।।

गोपीप्रियारंभितरासखेलं रासेश्वरीरञ्जजनकृतप्रहेलम् ।।
स्कन्धोल्लसत्कृंकुमचिन्हचेलं श्रीराधिकाकृष्णमहं नमामि ।।५।।

वृन्दावने प्रीततया वसन्तं निजाश्रितानापद उद्धरन्तम् ॥
गोगोपगोपीरभिनंदयन्तं श्रीराधिकाकृष्णमहं नमामि ॥६॥
विश्वद्विषन्मन्मथदर्पहारं संसारिजीवाश्रयणीयसारम् ॥
सदैव सत्पुरुषसौख्यकारं श्रीराधिकाकृष्णमहं नमामि ॥७॥
आनन्दितात्मव्रजवासितोकं नंदादिसंदर्शितदिव्यलोकम् ॥
विनाशितस्वाश्रितजीवशोकं श्रीराधिकाकृष्णमहं नमामि ॥८॥

## ३४ ● ॥ ठुमरी रागेण गीयते ॥

हर हर गोपीनाथ मम कष्टम् । हर.... (ध्रुवपदम्)
सुरनर मुनिवर जलधरसुन्दर । मारमहामदमार । मम...१॥
राजीवलोचन पापविमोचन । दुर्गपुरीसुविहार । मम...२॥
हाटकभूषण हतजनदूषण । दिव्यगुणालयसार । मम...३॥
वृषकुलनायक सुरसुखदायक । कुन्दकुसुमशुभहार । मम...४॥
मंगलकारण गतिजितवारण । प्रेमवतीसुकुमार । मम...५॥
मानसमोदन दितिसुतरोदन । भूमिनिवारितभार । मम...६॥
विश्वविभावन दुर्मतिपावन । कालदवानलहार । मम...७॥

सुरकुलरंजन नित्यनिरंजन । भानुसुतावितनार । मम...८॥
ब्रह्मपुरासन जनहितशासन । निष्कामानन्दनिधान । मम...९॥

*॥ इति निष्कामानन्दवर्णिविरचिता अष्टपदी समाप्ता ॥*

## ३५ ● ॥ अष्टपदी ठुमरी राग ॥ निष्कामानंद वर्णिरचित:

भजमानस त्वं श्रीहरिं हरिकृष्णंपुराणम् । भज..... ध्रुवपदम्
मायापारे निलये निवसन्तम् । मुनिजनमण्डलमण्डितं.. हरि..॥१॥
नवघनमेचकमंगं दधानम् । वामरिपुमदमारकम्.. हरि..॥२॥
भास्वद्द्युतिवसनैर्विलसन्तम् । बहुविधभूषणभूषितम्.. हरि..॥३॥
भुवि शकुलाद्याकृतिं विदधानम् । स्वीयजनानन्ददायकम्.. हरि..॥४॥
प्रेमवतीवृषलालं विशोकम् । दुर्गपत्तनसंवासिनं.. हरि..॥५॥
उन्मतगंगाजले विहरंतम् । ज्ञानसुधाजनशंकरम्.. हरि..॥६॥
ब्रह्मप्रियं ब्रह्मावर्तधरवेषम् । ब्रह्मव्रतधरनायकम्.. हरि..॥७॥
हंसरूचिरगमनं कंजनेत्रम् । धर्मवंशावनकारकं.. हरि..॥८॥
निष्कामवर्णिरचितगीतगीतम् । निष्कामनरव्रजशर्मद.. हरि..॥९॥

*॥ इति निष्कामानन्दवर्णिविरचिता अष्टपदी समाप्ता ॥*

## ३६ ● ॥ पुषपिताग्रावृत्तम् योगानन्द मुनि कृत ॥

सजलजलदसुन्दरं समांगं सरसिरुहेक्षणमीक्षणीयमूर्तिम् ॥
निखिलभुवननायकैकनाथं हृदि हरिकृष्णमहं सदा स्मरामि ॥१॥
कलितललितनीलनुत्नवासः कटितटमंसतटे पटंदधानम् ॥
वसितविशदसुन्दरांबरं च हृदि हरिकृष्णमहं सदा स्मरामि ॥२॥
कुसुमरचितशेखरालिरम्यं शिरसि सुरक्तशिरः पटं दधानम् ॥
विविधकुसुमहारिकम्बुकण्ठं हृदि हरिकृष्णमहं सदा स्मरामि ॥३॥
भगणमुनिगणैर्वृत्तंयथेन्दु सदयदृशास्वजनान्विलोकयन्तम् ॥
मधुरवचनमोदितस्वभक्तं हृदि हरिकृष्णमहं सदा स्मरामि ॥४॥
रुचिरकरपुटे विचालयन्तं नवतुलसीन्धनसंभवा सुमालाम् ॥
मुनिविहितसबीजसांख्ययोगं हृदि हरिकृष्णमहं सदा स्मरामि ॥५॥
हसितवदनचन्द्रचन्द्रिकाभिर्हतनिजभक्तहृदन्धकारतापम् ॥
प्रकटीतजगतीसधर्मभर्क्तिं हृदि हरिकृष्णमहं सदा स्मरामि ॥६॥
धृतिदमशमशीलसत्यशौच स्मृतिबलकीर्तितपः प्रगल्भताद्यैः ॥
अपरिमितगुणैयुतं च नित्यं हृदि हरिकृष्णमहं सदा स्मरामि ॥७॥

परनिजमहसा जनान्समाधौ प्रकृतिपराक्षरनैज धामनिष्ठाम् ।।
जगति निज तनुं च दर्शयन्तं हृदि हरिकृष्णमहं सदा स्मरामि ।।८।।

*।। इति श्रीयोगानन्दमुनि विरचित हरिकृष्णस्मरणाष्टकम् ।।*

## ३७ ● ।। संकटहर दशावतार स्तोत्र ।।

सत्संगिजीवन प्रकरण-२ अध्याय-२६ नुं

मात्स्यं रूपमलौकिकं भुवि दधत्कल्पान्तकाले नृपं । साकं भूतरणौ महर्षिभिरपात्सत्यव्रतं तोयगः ।।
तस्मै मत्स्यपुराणमाह च हयग्रीवं निहत्यासुरं । धात्रेऽदान्निगमांश्चयः स हरतात्कष्टं समग्रं हरिः ।।१।।
पीयूषाय पयोनिधिः स्वमहसा देवासुराणामनाधारं । चोन्मथतां तु मन्दरगिरिं मज्जन्तमम्भो निधौ ।।
पृष्ठे कूर्मतनुर्दधार सहसा कारुण्यतो यो जगौ । सद्धर्मांश्च मुनिभ्य एष हरतात्कष्टं समग्रं हरिः ।।२।।
यो वाराहतनू रसातलगतां क्षोणीं क्षणादुद्दधौ । दैतेयं च जघान संयति हिरण्याक्षं तनुस्थाध्वरः ।।
धर्मानाह भुवेऽभवाय च नृणां यज्ञान्वितत्याखिलान् । कल्पादौ प्रतिवासरं स हरतात्कष्टं समग्रं हरिः ।।३।।
दैत्यानामधिपं हिरण्यकशिपुं हत्वा नृसिंहाकृतिः । प्रह्लादं च ततोऽभिरक्ष्य परमंभक्तं निजं निर्जरान् ।।
इन्द्रादीन् सुरसद्मसौरव्यमुदितांश्चक्रे य उग्रेक्षणो । भक्ताभीष्टफलप्रदः स हरतात्कष्टं समग्रं हरिः ।।४।।
याचित्वा त्रिपदच्छलेन च बलिं त्रैलोक्यमिन्द्राय यः । प्रादाद्वामनमूर्तिरस्य च पुनर्दौवारिकत्वं स्वयम् ।।
चक्रेऽथ त्रिदिवस्थितोऽपि च मनोर्वैवस्वतस्यावनं । सुत्रामावरजः स मेऽपहरतात्कष्टं समग्रं हरिः ।।५।।

क्षत्रं घोरतरं च कापथगतं त्रिःसप्तकृत्वश्च यो । हत्वा सान्वयकार्तवीर्यनृपति प्राणापहृद्भार्गवः ॥
रामः पर्शुकरो धरामरकरप्रत्तासमुद्रक्षितिः । सिद्धर्षिस्तुतसद्यशा स हरतात्कष्टं समग्रं हरिः ॥६॥
धर्मात्मा पितुराज्ञया सदयितासौमित्रिराप्तो । वनंबद्ध्वा सेतुमपांनिधौ स्वमहसा लङ्केश्वरं सान्वयम् ॥
योषाहारिणमाशु यो निहतवान् धर्मेण सर्वाः प्रजा । रामः स्मावति पुत्रवत्स हरतात्कष्टं समग्रं हरिः ॥७॥
कंसादीनसुरान्निहत्य नृपतीन् भारान् भुवो भूरिशो । गोभूसाधुधरामरामरवृषान् पाति स्म यः सर्वतः ॥
लोकक्षेमकरस्वरूपचरितो विघ्नोघविद्रावणः । श्रीकृष्णः स यदूत्तमोऽपहरतात्कष्टं समग्रं हरिः ॥८॥
श्रीबुद्धोऽसुरबुद्धिमोहचरितः सद्धर्मसंस्थापकः । पाषण्डादवितात्मभक्तनिकरः कारुण्यवारांनिधिः ॥
हिंसाहीनमखप्रवर्तन यशा यः शुद्धबुद्धिप्रदः । संसारार्णवतारकः स हरतात्कष्टं समग्रं हरिः ॥९॥
आरुह्याश्वममर्त्यदत्तमवनौ निस्त्रिंशपाणिश्चरन् । कल्की पापिनराधिपांश्च बहुशो हत्वाऽवसाने कलेः ॥
धर्मं स्थापयिता विशुद्धमखिलं यः स्वाङ्गसङ्गानिलस्पर्शोच्छिन्नकुबुद्धिरेष हरतात्कष्टं समग्रं हरिः ॥१०॥
स्तोत्रस्य श्रवणाद्दशाकृतिधृतः स्यान्नास्य पाठाच्च भीस्तोयार्तेर्निरयार्तितोऽसुरगणाद् व्याघ्रादितो दुःस्थलात् ॥
राजभ्यश्च कदध्वतो रिपुगणादज्ञानतोऽथो कलेर्देहान्ते सुगतिर्नृणां करुणया स्याद्दीनबन्धोर्हरिः ॥११॥

## ३८ ● प्रार्थना स्तोत्र - वसंततिलका वृत्तम् अखंडानन्द वर्णी कृत्

हे नीलकंठ शरणागतजीवपालं संसारसिंधु पतितोद्धरणैककृत्यम् ॥
स्वानां सुखं वितरितुं धृतनैकरुपं प्राप्तोऽस्मि भक्तितनयं शरणं हरिं त्वाम् ॥१॥

स्वामिन् सदाऽतिकरुणार्द्रविलोचनाब्जं स्वातिप्रियोद्धवमताब्जविकासनार्कम् ।।
पाखंडखंडनपटुं स्वजनार्द्रचितं प्राप्तोऽस्मि भक्तितनयंशरणंहरिं त्वाम् ।।२।।
मुक्तिप्रदं भवभयार्तजनस्य बंधुम् धर्माढ्यभक्तिपथपोषणतत्परं च ।।
भक्तप्रियं सुरनराधिपवंद्यपादम् प्राप्तोऽस्मि भक्तितनयंशरणंहरिं त्वाम् ।।३।।
नारायणं धृतमनोहरवर्णिवेषम् धर्मं च नैष्ठिकमिह प्रथयंतमाद्यम् ।।
तापत्रयाभिभवकारिगुणानुवादं प्राप्तोऽस्मि भक्तितनयंशरणंहरिं त्वाम् ।।४।।
शर्मप्रदातुमवनौ स्वसत्तामदभ्रमं हंतुं च तत्प्रतीपदुष्टजनान्सदीशम् ।।
भक्तौ वृषाद्धृतशुभांगमजं रमेशं प्राप्तोऽस्मि भक्तितनयंशरणंहरिं त्वाम् ।।५।।
यस्येक्षणं स्मरणकीर्तनवंदनानि प्रीत्यार्हणं श्रवणमाशु हरंति पापम् ।।
मोक्षं दिशन्तिभवपाशनिबंधनातम् प्राप्तोऽस्मि भक्तितनयंशरणंहरिं त्वाम् ।।६।।
यस्याश्रयादवरजंतुरपि स्वपापं हित्वाप्य देववरणीयमथ स्वरुपम् ।।
एत्यक्षरे निवसनं तमतीत्य विघ्नान् प्राप्तोऽस्मि भक्तितनयंशरणंहरिं त्वाम् ।।७।।
दीनानुकंपितमरं शरणागताघस्तोमम् गुणज्ञ न गणय्यगुणम् तदीयम् ।।
अप्यल्पमीश सुभगं बहु मन्यमानम् प्राप्तोऽस्मि भक्तितनयंशरणंहरिं त्वाम् ।।८।।
संसारसिंधुपतितस्य निजाधतः स्वप्रारब्धकर्म परिभुक्तवतोऽल्प बुद्धैः ।।
वीक्ष्य स्वयं स्वबिरुदं कुरु मे भवाब्धेरुध्धारमार्तिहरणं प्रणामाम्यहं त्वाम् ।।९।।

## ३९ ● ॥ वसंततिलकावृतम्, अखंडानन्द वर्णी कृत ॥

हे धर्मपुत्र हरिकृष्ण तपः प्रियाद्य नारायणाखिलगुरो विजितेन्द्रियेश ॥
ज्ञानिन प्रभोऽनिलसुतेष्ट हरे अजन्मन कृष्णं नमामि सततं अवतारिणं त्वाम् ॥१॥
भूमन् बृहद् वृतधरात्मद वासुदेव भक्त्यात्मजास्तिक महाव्रत साधुशिल ॥
स्वामिन् स्वतंत्र घनमैचक नीलकंठ कृष्णं नमामि सततं अवतारिणं त्वाम् ॥२॥
योगीश्वरातिकरुणार्द्र विलोचनाब्ज सिद्धेश्वरोद्धवमताब्जविकाससूर्य ॥
पाखंडखंडनपटौ स्वजनार्द्रचित कृष्णं नमामि सततं अवतारिणं त्वाम् ॥३॥
ब्रह्मन् परात्परविभोऽक्षरवास विष्णो कारुण्यसागर महामुनिवंदितांघ्रे ॥
भक्तप्रियोतम नराधिपवंद्यपाद कृष्णं नमामि सततं अवतारिणं त्वाम् ॥४॥
मुक्तेड्य चाश्रितजनार्तिहरप्रताप धर्माढ्यभक्तिपथपोषक दिव्यमूर्ति ॥
तापत्रयाभिभावार्तजनानुराग कृष्णं नमामि सततं अवतारिणं त्वाम् ॥५॥
लक्ष्मीपते जनपते स्वपते परात्मन् मयापते मुनिपतैऽजपते महात्मन् ॥
गोपीपते सुरपतेऽर्कपतेऽव्ययात्मन् कृष्णं नमामि सततं अवतारिणं त्वाम् ॥६॥
शुद्धप्रगल्भपुरुषोत्तम मोक्षदायिन् दातांतिशांत विशदाशय भक्तलभ्यः ॥
वाग्मिन् क्षमाजलनिधे शुभलक्ष्मपाद कृष्णं नमामि सततं अवतारिणं त्वाम् ॥७॥

सर्वोपकारक नियामक पुण्यकीर्ते निर्दोष निस्पृह वशिन्निजभक्तपूज्य ॥
लोभादिदोषदमनाच्युत कौलहंत कृष्णं नमामि सततं अवतारिणं त्वाम् ॥८॥
यज्ञेड्य यजहृदयामर यज्ञतंतो यज्ञेश यज्ञफलदोतम यज्ञकर्ता ॥
यज्ञेज्य यजविधिशंसन यज्ञमूर्ति कृष्णं नमामि सततं अवतारिणं त्वाम् ॥९॥
सर्वज्ञ दिव्यचरितातिमनोज्ञ सत्य वेदैकवेद्यः पुरुषार्थद दीनबंधो ॥
धर्मेष्ट निर्गुण निरंजन नित्यमुक्त कृष्णं नमामि सततं अवतारिणं त्वाम् ॥१०॥
गोविंद केशव वरेण्य महाधिराज दैत्यांतकाशुभहरिशुद वर्णीवेष ॥
स्वस्तोत्रपाठकजनेप्सितसर्वदायिन् कृष्णं नमामि सततं अवतारिणं त्वाम् ॥११॥

## ४० ● श्रीहरि प्रार्थनाष्टपदी राग ठुमंरी - अखंडानंद वर्णी विरचित

वदनं दर्शय मंदहसनं भक्तप्रिय ते हरे जनरंजनम् ॥ वदनं.... (ध्रुवपद)
कुंकुमभालं अधरप्रवालं मदनगर्वोच्चयखंडनम् ॥१॥
तनुसितदंतं वरतरकान्तं मधुरहासश्रीमोहनम् ॥ वदनं...२॥
त्रासितकालं भ्रूकुटिकरालं शशिरविव्योमविवासनम् ॥ वदनं...३॥
सुंदरनासं सौरभवासं नयनचारुतमभूषणम् ॥ वदनं...४॥
मोहितमारं समुदितसारं निगमागमखगनीडम् ॥ वदनं...५॥

कुंडलभासं केसरश्वासं वचनामृतैर्जननंदनम् ॥ वदनं...६॥
चंचलनेत्रं कारुण्यक्षेत्रं विकचिताब्जभातिमोषणम् ॥ वदनं...७॥
पुंड्रितभालं तारितबालं जनहितपीयूषवर्षणम् ॥ वदनं...८॥

## ४१ ● ॥ गणपतिस्तोत्रम् ॥

विघ्नेश विघ्नचयखण्डननाधेयं श्रीशंकरात्मज सुराधिपवन्द्यपाद ॥
दुर्गामहाव्रतफलाखिलमंगलात्मन् विघ्नंममापहरसिद्धिविनायक त्वम् ॥१॥
सत्यद्मरागमणिवर्णशरीरकान्ति श्रीसिद्धिबुद्धिपरिचर्चितकुंकुमश्रीः ॥
दक्षस्तनेवलयितातिमनोज्ञ शुण्डो विघ्नंममापहरसिद्धिविनायक त्वम् ॥२॥
पाशांकुंशाब्जपरशूंश्च दधच्चतुर्भिर्दोर्भिश्चशोणकुसुमस्त्रगुमांग जातः ॥
सिन्दुरशोभितललाटविधुप्रकाशो विघ्नंममापहरसिद्धिविनायक त्वम् ॥३॥
कार्येषुविघ्नचयभितविरंचिमुख्यैः सम्पूजितः सुरवरैरपि मोदकाद्यैः ॥
सर्वेषु च प्रथममेव सुरेषु पूज्यो विघ्नंममापहरसिद्धिविनायक त्वम् ॥४॥
शीघ्रांचनस्खलनचुंचुंरवोर्ध्वकण्ठस्थूलोन्दुरूद्रवणहासितदेवसंघः ॥
शूर्पश्रुतिश्चपृथुवर्तुलतुंगतुन्दो विघ्नंममापहरसिद्धिविनायक त्वम् ॥५॥
यज्ञोपवितपदलम्भितनागराजो मासादिपुण्यदद्दशीकृतऋक्षराजः ॥

भक्ताभयप्रद दयालय विघ्नराजो विघ्नंममापहरसिद्धिविनायक त्वम् ॥६॥
सद्रत्नसारततिराज सत्किरीटः कौसुम्भचारुवसनद्वय उर्जितश्रीः ॥
सर्वत्रमंगलकरस्मरणप्रतापो विघ्नंममापहरसिद्धिविनायक त्वम् ॥७॥
देवान्तकाद्यसुरभीतसुरार्तिहर्ता विज्ञानबोधनवरेण तमोपहर्ता ॥
आनन्दितत्रिभुनेश कुमारबन्धो विघ्नंममापहरसिद्धिविनायक त्वम् ॥८॥

*॥ इति श्रीशतानन्दमुनिविरचितं सत्संगिजीवनस्थं श्रीगणपतिस्तोत्रम् ॥*

## ४२ ● श्रीहरि महिमाष्टक – वसंततिलकावृतम् शुकानन्द मुनि कृत्

स्वामिन्परात्पर विभो पुरुषोत्तमाद्य नारायणाक्षरनिवास कृपानिधान ॥
श्रीकृष्णनिर्गुण सदीश्वर दिव्यमूर्ति हे श्रीहरे मम भवान् दृशिगोचरोऽस्तु ॥१॥
देवाधिदेव परमेश्वर वासुदेव योगेश्वरनियामक शास्त्रयौने ॥
भूमंस्तपः प्रिय महापुरुषाक्षरात्मन् हे श्रीहरे मम भवान् दृशिगोचरोऽस्तु ॥२॥
एकान्तधर्मधर सेश्वरसांख्ययोग मार्गप्रवर्तक ऋषीश्वरवृंदजुष्ट ॥
भक्तेप्सितप्रदवराभयपाणिपद्मप हे श्रीहरे मम भवान् दृशिगोचरोऽस्तु ॥३॥
सर्वेश्वरेश हृषिकेशपते परात्मन् सत्संगलभ्यपथयोगदसुप्रवृत्ते ॥
एकन्तिकप्रिय भवांबुधिपारदायिन् हे श्रीहरे मम भवान् दृशिगोचरोऽस्तु ॥४॥

श्रीमन्नवीनजलदासितसुंदरास्य सत्पुंड्रीकनयनप्रथितप्रताप ॥
नैकावतारपरिरक्षितसाधुवृंद हे श्रीहरे मम भवान् द्दशिगोचरोऽस्तु ॥५॥
नैकांडनायकनिषेवितपादपद्म कल्याणकारीगुणवृंदविभूषणाढ्य ॥
सूक्ष्मोज्ज्वलांबरविधारणशोभितांग हे श्रीहरे मम भवान् द्दशिगोचरोऽस्तु ॥६॥
धर्मान्वायनिहितस्वकदेशिकत्व निष्कामभक्तपरमप्रिय नैष्ठिकेन्द्र ॥
ब्रह्मण्यदेव सकलाश्रितसौख्यकारिन् हे श्रीहरे मम भवान् द्दशिगोचरोऽस्तु ॥७॥
अज्ञानसंतमसनाशनबोधभाव कामादिशत्रुगणभीतिदनामधेय ॥
पाखंडखंडदलन प्रणतात्मबोध हे श्रीहरे मम भवान् द्दशिगोचरोऽस्तु ॥८।
हे भक्तिधर्मसुत हे हरिकृष्ण नाथ हे नीलकंठ कलितारण पूर्णकाम ॥
सौम्यस्वभाव शरणागतवत्सलात्मन् हे श्रीहरे मम भवान् द्दशिगोचरोऽस्तु ॥९॥
स्वीयेतितेजसिपरेक्षरसंज्ञके च धाम्न्यक्षरात्मनिलये निजपार्षदाग्यैः ॥
प्रेम्णा निषेव्यचरणाब्जशुकेन चात्र हे श्रीहरे मम भवान् द्दशिगोचरोऽस्तु ॥१०॥

## ४३ ● ॥ अष्टपदी ॥

जय जय दीनानाथ हरिकृष्ण ॥ जय ॥ (ध्रुवपद)
वचोमधुवदनदेहिसुखसदन । श्रावयतोऽघहार ॥हरि...१॥

गजगतिगमनं विधविधनमनम् । नौमि मुहुत्वातितार ॥हरि...२॥
वसो मम भवने सदासंपदवने । जनयेशं जितमार ॥हरि...३॥
अशरणशरणे हृदरूचरणे । त्वयि मे भ्रमत्यतिपार ॥हरि...४॥
रूचिराणिधारय वसनानि वारय । कुमति मे वेदधार ॥हरि...५॥
हृतनिजशमलं तवकरकमलम् । शिरसि निधेहि जयकार ॥हरि...६॥
मदनमनोहरमृदुशिशिरोहर । तव मांशाधिनृसार ॥हरि...७॥
कृतमुनिसेवं कविवासुदेवम् । निकटं ते रक्षमोदार ॥हरि...८॥

*॥ इति वासुदेवानन्दवर्णिविरचिताष्टपदी ॥*

## ४४ ● ॥ परमभागवतस्तोत्रम् ॥ शार्दूलविक्रीडितं वृत्तम् ॥

धर्मस्तज्जनको हरेश्चतनयोऽयोध्याप्रसादो । महाकान्त्यर्कोरघुवीरकः क्षितिधरोरामप्रतापः प्रभुः ॥
इच्छारामतदात्मजाभगवतो भक्तविरक्ताभवे । सर्वान्भागवतानहं हृदि परमान् वन्दे सदैतान्नरान् ॥१॥
मुक्तानन्दमहानुभावशुकमुन्यानन्द गोपालकात्मानन्दयुगं । कृपः सुखशता नन्दौ मुनिः सुव्रतः ॥
ब्रह्मानन्ददयाऽविनाशभजनानन्दानृणां मुक्तिदाः । सर्वान्भागवतानहं हृदि परमान् वन्दे सदैतान्नरान् ॥२॥
नित्यानन्दनिरंजनोभगवदानन्दो गुणातीतयोगानन्द । मुनिसत्तमौ तु बदरीनाथावखण्डौ शिवौ ॥
भूमानन्दमुकुन्दनिष्कुलजयानन्दाः स्वरुपोविभुः । सर्वान्भागवतानहं हृदि परमान् वन्दे सदैतान्नरान् ॥३॥

कृष्णानन्दशुकप्रकाशपरमज्ञानस्वरुपोतमानन्दौ । राघववासुदेवरघुनाथानन्दनारायणः ॥
चैतन्याऽखिलरामदासकपिलानन्दश्च योगेश्वरः । सर्वान्भागवतानहं हृदि परमान् वन्दे सदैतान्नरान् ॥४॥
सर्वज्ञोमुनिराड् नृसिंहनियमानन्दौ प्रभाव्यापकौ । निर्दोषो हरिकृष्णवामन मुनि तद्रूपपूर्णादयः ॥
देवानन्दमहाप्रसादपुरुषानन्दाश्च सर्वेश्वरः । सर्वान्भागवतानहं हृदि परमान् वन्दे सदैतान्नरान् ॥५॥
चिद्रूपोमुनिसच्चिदौ मुनिवरौ स्वयंप्रकाशो यमी । गोविन्दाक्षररामकृष्ण मुनियो नारायणो यो नरः ॥
प्रेमानन्दनरोत्तमाद्भुतसदानन्दागुरुवैष्णवः । सर्वान्भागवतानहं हृदि परमान् वन्दे सदैतान्नरान् ॥६॥
हेमन्तोत्तमसूरवास्तुभृगुजिन्नांजालयस्तुंगजित् । खट्वांगाऽभयसोमवीरमयजिद्देवप्रतापादयः ॥
जाल्मोमाभयनांगमालकरिमालक्षः कमोरत्नजित् । सर्वान्भागवतानहं हृदि परमान् वन्दे सदैतान्नरान् ॥७॥
रेवाशंकरसुन्दरौ चतुलजारामौ प्रभाशंकरौ । गांगेयोमयारामनन्दुभगमूला नाचिकेतादयः ॥
काशीपर्वतदेवरामभगवद्धेमन्तगोवर्द्धनाः । सर्वान्भागवतानहं हृदि परमान् वन्दे सदैतान्नरान् ॥८॥
आशाजिज्जयसिंहभीमरवजीद्दामोदरामूलजिद्द्रौपालो । हरजिद्गणेशनिभौ वेणीभयोभक्तराट् ॥
अम्बाराममुकुन्दगावलरणछोडाः शिवोयाज्ञिकः । सर्वान्भागवतानहं हृदि परमान् वन्दे सदैतान्नरान् ॥९॥
एतेषास्तवनं नृणां प्रियकरं सायं प्रगेवाजनाः । सर्वाघक्षयकारिणं प्रतिदिनं रम्यं पठन्तित्विदम् ॥
तांस्ते वै खलु दर्शयन्ति करुणं नारायणं मुक्तिदं । तेभ्यश्चामलकं यथा करगतं यच्छन्ति मोक्षं च ते ॥१०॥

*॥ इति वासुदेवानंदवर्णि विरचित परम भागवतस्तोत्रं ॥*

## ४५ ● ॥ अष्टपदीयम् ॥

धर्मधुरंधर दैत्यभयंकर भक्तमनोहर भक्तपते ।
बोधसुधाकर भक्तिदिवाकर योगकलाघर योगिगते ॥
जय जय मुनिवरसज्जनशंकर भक्तमहादर भक्तरते ॥जय जय...१॥
जीवदयाकर भक्ततमोहर भक्तसुखर मुक्तिपते ।
वाक्यसुधाधर धर्मसुपंजर कामकलाहर दिव्यगते ॥जय जय...२॥
संकटभंजन चारुविलोचन बन्धविमोचन नामपते ।
नाशितबंधन निर्मदनन्दन दुष्कुरन्धन मुक्तपते ॥जय जय...३॥
शर्मदवन्दन नित्यनिरंजन सज्जनरंजन साधुपते ।
दम्भविभेदन मत्सरखेदन रोषविनाशन शान्तमते ॥जय जय...४॥
विश्वविभावन सज्जनपावन पापविदाहनपादनते ।
सत्पुरुषावन कापुरुषोत्खन कंसनिकन्दन सत्यकृते ॥जय जय...५॥
सत्पथपोषण कापथरोषण लोभविमोषण पापहृते ।
सज्जनभूषण दुर्जनदूषण भक्तविभूषण धर्मरते ॥जय जय...६॥
लोकविलक्षण बोधविचक्षण सज्जनरक्षण सादिवृते ।
पद्मदलेक्षण लक्षितलक्षण दिव्यविभूषण पुष्पधृते ॥जय जय...७॥

कुरु तव किंकरमंघ्रिरजोभरमानत सद्वरमात्मरतिम् ।
सेवनतत्परमिष्टमहादमच्युत केशव नित्यमुनिम् ॥जय जय...८॥

*॥ इति नित्यानन्दमुनि विरचिताष्टपदी ॥*

## ४६ • ॥ अष्टपदीयम् ॥

त्वयितुहरेचेतो रमताम् । (ध्रुवपदम्)
नीलेवपुषिवसनानिसितानी । दधे धवे तत्र जगताम् ॥त्वयितु... ॥१॥
विधिभववन्दितचरणसरोजे । वरवृषांगेऽपिवदताम् ॥त्वयितु... ॥२॥
सदसिसाधूनामकृत यो मानम् । मदहर वाक्यैर्मधुरसताम् ॥त्वयितु... ॥३॥
मुक्तापुष्पवरहारसुकण्ठे । कृतभवदूरेभजताम् ॥त्वयितु... ॥४॥
तिष्ठतुतत्रयदाघपदंनः । हृदिसुखसद्मनिभवताम् ॥त्वयितु... ॥५॥
पृथुललाटविराजितचन्द्रे । महीयसिधीमतिमहताम् ॥त्वयितु... ॥६॥
विकचितशोणकमलदलदृष्टे । द्विरदगतौगतौहसताम् ॥त्वयितु... ॥७॥
वदनशशिहृत्तमोभूरिहस्ते । सखेतत्रयस्त्वरंहरताम् ॥त्वयितु... ॥८॥
वासुदेवभणितमेतदर्च्यम् । नृणांश्रवणसोरसंनयताम् ॥त्वयितु... ॥९॥

*॥ इति वासुदेवानंदवर्णी विरचिताष्टपदी ॥*

## ४७ ● ॥ अष्टपदीयम् ॥

देवाभयदं नारायण देवाभयदं नारायण। रमणीयमे रुपं वरमतिदर्शय ॥देवाभय...॥ (ध्रुवपदम्)
परिहृतकोटिककामायसुषमम् । तरुणवयः संवरणीयमे ॥देवाभय... ॥१॥
सहजानंदनाम वृषकन्दं । करुणावरुणगृहरमणीयमे ॥देवाभय... ॥२॥
हंसद्युतिवसनानियदर्च्यं । दधतिशितिशंकरणीयमे ॥देवाभय... ॥३॥
वामंवामश्रवणेनीलबिन्दुं । केनोदधद्देवधरणीयमे ॥देवाभय... ॥४॥
मुमुदिमहे प्रत्यहंमंजुहारी । वीक्षमनसि देवश्रवणीयमे ॥देवाभय... ॥५॥
सममेतुमब्जंमृगायतदृग्भ्यां । वने वातपस्यन्तिमरणीयमे ॥देवाभय... ॥६॥
दृष्टवामनोतित्वरतिहृद्यं । यन्मेऽनिशंपापंहरणीयमे ॥देवाभय... ॥७॥
वासुदेवोसौनामेतितन्मेचक्रे । भवतुभवभरणीयमे ॥देवाभय... ॥८॥

*॥ इति वासुदेवानंदवर्णी विरचिताष्टपदी ॥*

## ४८ ● ॥ द्रुतविलम्बितवृत्तम् ॥

प्रथमतः शकुलाकृतिरादधे श्रुतिगणोधरणाय धरातले ॥
पटुतरासुरसंघ विनाशिने भुवि भजे हरिकृष्णमहं हृदि ॥१॥

सपदि येन नवातिशितैर्नखैरसुरराडदितिजः प्रतिचस्करे ॥
तदुरसोऽतिविधाय विदारणं भुवि भजे हरिकृष्णमहं हृदि ॥२॥
अतुलमन्दरभृत्कमठाकृतिस्तिलमिवाथ दधे धरणीतलम् ॥
सगिरियेन लसद्दशनांचले भुवि भजे हरिकृष्णमहं हृदि ॥३॥
त्रिपदमात्रमितक्षितियाचनं छलतया वरवामनरुपिणि ॥
छलयितु बलिमेव तनुर्धृता भुवि भजे हरिकृष्णमहं हृदि ॥४॥
धृतशरासनराजकुलं कुले भुवि भृगोरवतीर्य समूलतः ॥
परशुभृद्वपुषा निधनीकृतं भुवि भजे हरिकृष्णमहं हृदि ॥५॥
क्षितिसुतापतिदाशरथिर्भवन् पृथुतरं प्रविलंध्य पयोनिधिम् ॥
दशमुखं बिभिदे किललीलया भुवि भजे हरिकृष्णमहं हृदि ॥६॥
प्रबलकंसकुलं बिभिदे भृशं गिरिधरो वसुदेवसुतोऽथ यः ॥
जनितमात्रजनातिदयोदधिः भुवि भजे हरिकृष्णमहं हृदि ॥७॥
असुरसंघविमोहनकारकः सकरुणोऽथ कलेरवसानके ॥
अखिलपापिविनाशवित्ताश्च यो भुवि भजे हरिकृष्णमहं हृदि ॥८॥

*॥ इति दीनानाथ भट्ट रचित दशावतारस्तोत्रम् ॥*

## ४९ ● श्रीहरि स्तुति । सत्संगीजीवनस्थ मुक्तानंदमुनिकृत ॥

(गुर्जरी रागे एकताली तालेगीयते)

रमतां सततं सततमखे त्वयि मानसं मम सखे ॥ (ध्रुवपदम्)

अशरणशरणे भवभयहरणे बहुतरकरुणालये ।
सुखकरचरिते मुनिवरविदिते गुणगणवरुणालये ॥रमतां... ॥१॥

धृतसितवसने कृतमितहसने रुचिरचिकुरराजिते ।
शशिनिभवदने द्युतिजितमदने सकलसुरसभाजिते ॥रमतां... ॥२॥

प्रविततनयने क्षणजितजयने विविधकुसुमहारके ।
तततरदलिके कृतवरतिलके निजजनसुखकारके ॥रमतां... ॥३॥

परसुखनिलये परदरविलये सुररिपुमतिमोहने ।
अघचयहरणे सुखचयकरणे निगमगरसदोहने ॥रमतां... ॥४॥

हृतसुरशमले करधृतकमले परिधृतपुरुभूषणे ।
कलिबलकदने शुभमतिसदने परिहृतनिजदूषणे ॥रमतां... ॥५॥

प्रशमितकोषे कृतमदलोपे मुनिवरगणनन्दिते ।
अतिमृदुहृदये निजजनसदये सुरनरमुनिवन्दिते ॥रमतां... ॥६॥

*॥ सत्संगीजीवन प्र.३ अ. ६३ ॥*

## ५० ● ॥ श्रीहरिस्तुति उपजाति ॥ सत्संगिजीवनस्थ अभयराजा कृत ॥

सिताम्बरं नैष्ठिकवर्णिवेषं पीताम्बरं तं नटवर्यवेषम् ।।
नवाम्बुदश्यामलसुन्दराङ्गं वन्दे हरिं धर्मसुतं च कृष्णम् ।।१।।
शान्तान्तरस्वाश्रितमण्डलस्थं शृङ्गारिगोपीगणमण्डलस्थम् ।।
सरोजपत्राभविलोलनेत्रं वन्दे हरिं धर्मसुतं च कृष्णम् ।।२।।
वृन्देन्धन स्रग्धरपद्मपाणिं वृन्दावने सुस्वरवेणुपाणिम् ।।
विचित्रपुष्पोत्तमचारुहारं वन्दे हरिं धर्मसुतं च कृष्णम् ।।३।।
समाधिविस्मापितसर्वलोकं रासक्रियाचित्रितदेवलोकम् ।।
कन्दर्पदर्पोत्खननातिदक्षं वन्दे हरिं धर्मसुतं च कृष्णम् ।।४।।
स्वभक्तसत्सद्मविराजमानं ज्योतिर्मये धामनि शोभमानम् ।।
स्वानां हरन्तं हृदयानि दृष्ट्या वन्दे हरिं धर्मसुतं चं कृष्णम् ।।५।।
शिरः पटापीडनिजात्मलोभं मयूरपत्रालिकिरीटशोभम् ।।
पद्मादिलक्ष्माङ्कितपादयुग्मं वन्दे हरिं धर्मसुतं च कृष्णम् ।।६।।
स्वदत्तभूषाः सहसा ददानं स्वाङ्गेषु भूषा विविधा दधानम् ।।
सकालमायाभयदाभिधानं वन्दे हरिं धर्मसुतं च कृष्णम् ।।७।।

भक्तान्तरारिक्षपणप्रतापं गोगोपगोपीरिपुदैत्यतापम् ।।
पादानमत्स्वीयजनैकबन्धुं वन्दे हरिं धर्मसुतं च कृष्णम् ।।८।।

## ५१ ● ।। पंचचामरवृत्तम् ।।

दयार्जवादिसागरंनिरन्तरप्रजागरंप्रसून दिव्यशेखरंविदांवरं मनोहरम् ।।
प्रवालसन्निभाधरंविनम्रभक्तशंकरंसुरैः कृताभि वंदनंभजामि धर्मनंदनम् ।।१।।
स्वसाधुशर्मकारिणंजगन्नरानुसारिणंप्रसूनगुच्छधारिणं करेणुमन्दचारिणम् ।।
स्वशुद्धकीर्तिकारिणंशरण्यकष्टहारिणंसुरैः कृताभि वंदनंभजामि धर्मनंदनम् ।।२।।
कृपाकटाक्षवीक्षणंदयानिधिसुलक्षणं समाधियोगशिक्षणंफलादिनित्यभक्षणम् ।।
सदाहिदीनरक्षणंस्वचिन्तनंप्रतिक्षणंसुरैः कृताभि वंदनंभजामि धर्मनंदनम् ।।३।।
अजादि देवकारणंसुरारिसैन्यमारणंभवाब्धिभक्ततारणम्समग्रविश्व धारणम् ।।
अधिश्रितोत्तमांगणप्रकोष्टपुष्पकंकणंसुरैः कृताभि वंदनंभजामि धर्मनंदनम् ।।४।।
सुभक्तिदैत्यमोहनंचवेदसारदोहनंकुवासनाव्यपोहनंचसत्पथप्ररोहणम् ।।
सुनासिकंसुलोचनंनिजाश्रितार्तिमोचनंसुरैः कृताभि वंदनंभजामि धर्मनंदनम् ।।५।।
सुधाकरप्रभाननंस्वधिष्टिताधिकाननंभुजंगदादि शोभनंसुरादि चित्तलोभनम् ।।
अनघ्र्यर्यमौलिवेष्टनं सदामुदासुचेष्टनंसुरैः कृताभि वंदनंभजामि धर्मनंदनम् ।।६।।

तपस्वियोगिनायकं धरासुकृद्विधायकं पुराणवेदगायकं प्रशान्तकामसायकम् ।।
सतां सदासहायकंस्वभक्तमोक्षदायकंसुरैः कृताभि वंदनंभजामि धर्मनंदनम् ।।७।।
अनंतविश्वकारकंह्यनन्तपापहारंकंहिमोष्णवर्षसाहकंसतांगतिं विनायकम् ।।
कृताधिकाध्वखण्डनंच भक्ति धर्मण्डनंसुरैः कृताभि वंदनंभजामि धर्मनंदनम् ।।८।।

*।। इति मंजुकाशानन्दविरचितं हरिभजनाष्टकम् ।।*

## ५२ ● ।। सरस्वती स्तोत्रम् ।।

श्रीमत्प्रदीपालविरोचमाने स्थानेस्थितां चारुसहासवकत्राम् ।।
चराचराणामुपकारकर्त्रीं वन्दामहे देवि सरस्वती त्वाम् ।।१।।
रुपानुरुपावयवैरुपेतां प्रसन्नताभ्यासविशेषलभ्याम् ।।
विश्वेश्वरीं बिम्बफलाधरौष्ठीं वन्दामहे देवि सरस्वती त्वाम् ।।२।।
महानुभावैरपिवन्द्यमानां स्वैश्वर्यदां हेमविभूषणाढ्याम् ।।
संराजमानां निजहंसृष्ठे वन्दामहे देवि सरस्वती त्वाम् ।।३।।
यथाप्रबन्धेषु सुबोधधीरैर्निष्किंचनानां विदुषां साक्षात् ।।
विज्ञाय तत्त्वं धनरुपगीतां वन्दामहे देवि सरस्वती त्वाम् ।।४।।
तथैवरीत्या बहुशक्तिभाजां नारायणीं वै प्रवदन्ति वाचाम् ।।
निवारितानेक जनाज्ञभावां वन्दामहे देवि सरस्वती त्वाम् ।।५।।

वीणां दधानामपि कच्छपीं स्वां महच्चपाणौ प्रसरत्प्रतापम् ।।
नानर्थसंयुक्तसुरम्यशास्त्रं वन्दामहे देवि सरस्वती त्वाम् ।।६।।
अनघ्र्यकेयूरविषाकतपाणिं धातुश्च पुत्रीमतुलप्रभावाम् ।।
विशालभाले कृतपत्रलेखां वन्दामहे देवि सरस्वती त्वाम् ।।७।।
सुकम्बुकण्ठीं रमणीयवेषां कण्ठप्रदेशार्पितपुष्पमालाम् ।।
सदाकिशोरीं कमनीयरुपां वन्दामहे देवि सरस्वती त्वाम् ।।८।।
पाणिद्वये कंकणमादधानां चन्द्राननां दन्तपंक्तिम् ।।
सुरासुरप्रार्थ्यतमांघ्रिपद्मां वन्दामहे देवि सरस्वती त्वाम् ।।९।।
समग्रशास्त्रे प्रविभक्तरुपां तारानुकाराम्बरधारिणीं ताम् ।।
प्रफुल्लपद्मायत्पत्रनेत्राम् वन्दामहे देवि सरस्वती त्वाम् ।।१०।।
विधृत्यहस्ते परिचालन्तीं स्थलारविन्दं कमनीय शोभाम् ।।
संयावोग्धादिनिवेदिताग्रां वन्दामहे देवि सरस्वती त्वाम् ।।११।।
श्रीमद्धार्मिकपादपद्मभजतां चिन्तान्धकारापहां । संसारावर्णवलंघनं च पठतां तापत्रयोन्मूलनम् ।।
त्यागानंदबुधेन शीघ्ररचितं बुद्धिप्रदं । वाणीस्तोत्रकमाशु मंगलमिदं संव्यतनोत्विष्टदम् ।।१२।।

*।। इति त्यागानंदवर्णि विरचितंसरस्वत्यष्टकम् ।।*

## ५३ • ॥ उपजातिवृत्तम् ॥

विशालभालं कलिजाकरालं स्वभक्तपालं वृष भक्तिबालं ॥
सन्माल्यमालं ललितांगशालं श्रीस्वामिनारायणमानतस्तम् ॥१॥
धर्मावितारं भवसिन्धुतारं दयाविहारं सुकृतारिदारम् ॥
निजार्तिहारं वयुनादिसारं श्रीस्वामिनारायणमानतस्तम् ॥२॥
मुनिन्द्रवासं वरभूमिभासं विपन्निरासं सुखितात्मदासम् ॥
सदास्यहासं तिलमाल्यनासं श्रीस्वामिनारायणमानतस्तम् ॥३॥
मुक्तावचूलं परशान्तिमूलं सुरारिशूलं श्रितवैरितूलम् ॥
निजानुकुलं सितसदुकुलं श्रीस्वामिनारायणमानतस्तम् ॥४॥
घ्नन्तंविशादं शमितप्रवादं पयोदनादं दलित प्रसादम् ॥
सुपद्मपादं विपद प्रसादं श्रीस्वामिनारायणमानतस्तम् ॥५॥
निरस्तपापं भवहारिजापं लसत्कपालं हृतभक्ततापम् ॥
असदुरापं धृतबुद्धिचापं श्रीस्वामिनारायणमानतस्तम् ॥६॥
त्रसत्कृतान्तं कृतपातकान्तं प्रियं नितान्तं महतां प्रशान्तम् ॥
श्रियानिशान्तं शुभकीर्तिकान्तं श्रीस्वामिनारायणमानतस्तम् ॥७॥

श्रेयोनिदानं श्रुतमुक्तिगानं गजेन्द्रयानं कृतसाधुमानम् ।।
मोक्षैकतानं करुणानिधानं श्रीस्वामिनारायणमानतस्तम् ।।८।।

*।। इति अचित्यानंदवर्णि विरचितं श्रीस्वामिनारायणवर्णनाष्टकम् ।।*

## ५४ • ।। ललितवृत्तम् ।।

भुविसदंगणे सर्वसद्गुणे रचितखेलनं भक्तमेलनम् ।।
तव सुरंजनं दुःखभंजनं भज मनः सदा स्वामिनं मुदा ।।१।।
शुभनिकेतनं बन्धभेदनं निगममण्डनं कालखण्डनम् ।।
परसुखाश्रयं भक्तसंशयं भज मनः सदा स्वामिनं मुदा ।।२।।
अघविधुननं शोभिताननं प्रकटिताकृतिं सुंदराहृतिं ।।
परतमंगलं मुक्तसंकुलं भज मनः सदा स्वामिनं मुदा ।।३।।
सकलकारणं भक्ततारणं भयविदारणं मुक्ति धारणम् ।।
कुपथवारणं कोपमारणं भज मनः सदा स्वामिनं मुदा ।।४।।
भुवनमंडले कामनाकुले मरणभीषणे पूर्णदुषणे ।।
नहिसुखं मठाद्यसिं किं हठात् भज मनः सदा स्वामिनं मुदा ।।५।।
बहुलसंशयं दुःखसंश्रयं सज्जनवैसुखं तेन ते सुखम् ।।

हरणमापदां धाम संपदां भज मनः सदा स्वामिनं मुदा ॥६॥
विषयसन्निधौ दुःखवारिधो सुखधियासुधामन्थितामुदा ॥
नहि मृतिर्गता सा सुसेविता भज मनः सदा स्वामिनं मुदा ॥७॥
हरिवचोमृतं सर्वसंमतं पिबयतो हितं नशिताहितम् ॥
इति सदंजितं दीनयाचितं भज मनः सदा स्वामिनं मुदा ॥८॥

*॥ इति दीनानाथ भट्ट विरचित भजनाष्टकम् ॥*

## ५५ ● ॥ वसन्ततिलकावृत्तम् ॥

प्रातः स्मरामिवृषपुत्रपदार्विन्दं पापौघपापिजनपातक पुञ्जदाहम ॥
मुक्तैर्महामुनिगणैर्महनीयमाद्यं सत्संगिनां परममंगलमार्तिनाशनम् ॥१॥
प्रातः स्मरामि सुखशान्तिनिदानहेतुं कल्याणकारीगुणसागर दिव्यरुपम् ॥
स्वानेकजन्मसुकृतैरवलोकनीयं श्रीधर्मपुत्रपदमात्मनी संदधामि ॥२॥
प्रातर्भजामिभजनीय भवाब्धिसेतुं संसारिणां सकलविघ्नविनाशदक्षम् ॥
वेदान्तवेद्य शुभषोडशचिन्हलक्ष्यं ध्यायामिधर्मतनयांघ्रियुगंधियाऽहम् ॥३॥
प्रातर्भजामिभवभीतिहरं वरेण्यं ध्यानासनादिनियमैश्च विना समाधिम् ॥
पापात्मनां सुकृतिनामपिकारयन्तं तं नौमि धर्मतनयं शिरसाप्रणम्य ॥४॥

प्रातर्नमामि शिरसा निगमैकगम्यं ब्रह्मेन्द्रशर्वविबुधादिभिरप्य गम्यम् ॥
उत्पतिसंस्थितिलयादिनिदानमेकं संचिन्त्यामि सततं हरिकृष्णदेवम् ॥५॥
प्रातर्नमाम्यमितदुष्टनिर्बर्हणाय सद्धर्म मर्म परिपालनकारणाय ॥
ब्राह्मण्यवेदपथगोसदनुग्रहाय प्रादुर्बभुव भुविभक्तिवृषांगतोऽसौ ॥६॥
प्रातर्नमामि नमनीयनिजैकधाम्नो दुर्वाससाविहितशापनिदानमेत्य ॥
घोरेकलौ विषयिपामरजीवजातं मुक्तैः समंसमकरोदवतीर्ययस्तम् ॥७॥
प्रातर्नमन्ति पुलकांकितसर्वगात्राः प्रेम्णासदैकमनसाऽचलचेतसाये ॥
ध्यात्वास्वकीयहृदये हरिकृष्णमूर्ति ते यान्तिधाम विशदंक्षरभावशून्यम् ॥८॥
प्रातर्विहायशयनं स्थिरचेतसा यः श्लोकाष्टकंपठति नित्यमनन्यभक्त्या ॥
स्तोत्रंस्वमंगलकरंगिरिजाशिवोक्तं पुण्याहमेतिनिखिलं नहि तस्यविघ्नाः ॥९॥

*॥ इति याज्ञिक गीरीजाशंकर विरचितं प्रातः स्मरणाष्टकं समाप्तम् ॥*

## ५६ ● ॥ प्रातः स्मरणम् ॥

प्रातः स्मरामि भवभीतिमहार्तिशान्त्यै नारायणं गरुडवाहनमब्जनाभम् ॥
ग्राहाभिभूतवरवारणमुक्तिहेतुं चक्रायुधं तरुणवारिजपत्रनेत्रम् ॥१॥
प्रातर्नमामि मनसा वचसा च मूर्ध्ना पादारविन्दयुगलं परमस्य पुंसः ॥
नारायणस्य नरकार्णवतारकस्य पारायणप्रवरविप्रपरायणस्य ॥२॥

प्रातर्भजामि भजतामभयंकरं तं प्राकसर्वजन्मकृतपाप भयापहत्यै ॥
यो ग्राहवक्रपतितांघ्रिगजेन्द्र घोरशोकप्रणशनकरो धृतशंखचक्रः ॥३॥
श्लोकत्रयमिदं पुण्यं प्रातः प्रातः पठेनरः ॥ लोकत्रयपतिस्तस्मै दद्यादात्मपदं हरिः ॥४॥
प्रातः स्मरामि हरिकृष्णमुखारविन्दं बिम्बाधरं स्मितसुधाहृतविश्वतापम् ॥
कारुण्यपूर्णनयनं शुभनासिकाढ्यं पुण्ड्राढ्यभालमवतंसलसत्कपोलम् ॥५॥
प्रातः श्रये वृषजनेर्भुजदण्डयुग्मं संसारसिन्धुपतिताश्रयणीयमेकम् ॥
आजानुलम्बितवराभयदं मनोज्ञं संस्थापकं स्वसुतयोश्च निजाकृतीनाम् ॥६॥
प्रातर्नमामि हरिकृष्णपादार्विन्दे तीर्थीकृतावनितले हृदयावधार्ये ॥
वज्राकुंशध्वजयवाम्बरगोपष्पदोर्ध्वरेखांकिते नखविधुक्षतहृदगतान्धे ॥७॥
प्रातः शिखान्तहरिकृष्णतनुं घनाभां ध्यायामि सज्जनसभान्तरराजमानाम् ॥
सप्रान्तशेखरशिरः पटमादधानां श्रीवत्सकौस्तुभसिताम्बर भूषणाढ्यम् ॥८॥

●

## ५७ ● ॥ मंगलाचरण ॥

स्वीये धाम्नि सदाऽक्षरे परतरेसंसेवितांघ्रिद्वयै । भक्तैर्ब्रह्मशरीरिभिर्यः उरुधा वेदान्तवेद्यः प्रभुः ॥
नैकाण्डोद्भवपालनादिकरपुंमायानियन्ता स्वराट् । कारुण्याम्बुनिधिर्नमामितमहं श्रीस्वामिनारायणम् ॥१॥

त्वं साक्षात्पुरुषोत्तमोऽसि परमं ब्रह्माऽक्षर: । श्रीकृष्णो हरिकृष्ण आदिपुरुषो धर्मात्मज: श्रीहरे: ॥
हे नारायण वासुदेव परमानंद प्रभो सत्पते । मायाधीश बृहत्पुरस्थ नृतनो श्रीस्वामिनारायण: ॥२॥
योऽन्त: स्थित्वाऽऽत्मवर्गं नियमयति यत: सर्वकार्यस्य सिद्धि: । यश्चाराध्य: समस्तैर्निगमनिगदतै: कर्मभिस्तत्तदात्मा ॥
त्रायन्ते श्रूयमाण: परमखनिलयो य: परंब्रह्म कृष्णो । विश्वाविर्भावहे तु: स जयतु भगवान् स्वामिनारायणोऽयम् ॥३॥
श्रीमन्मंगल मूर्तिमार्तिशमनं मालां करे तौलसीं । दक्षे सूक्ष्मवलक्षसान्द्रवसनान्याबिभ्रतं सर्वदा ॥
चारुस्मैरमुखाम्बुजं लसदुर: श्रीवत्सलक्ष्मांकितं । ध्याये भूषणभूषणांगमनिशं श्रीस्वामिनारायणम् ॥४॥
पातुं सद्धर्ममार्गं निरतिशयदया पूर्णमानंदमूर्ति धर्माद्भक्तौ । नृ मूर्त्याकलिकलुषहरं वीक्षणा ब्रह्मणोयम् ॥
धाम्नचास्यां प्रजातं भुविसम जनतातापहरं नमामि । ह्यज्ञानध्वान्तसूर्यं सुरनरसुनतं श्रीस्वामिनारायणं तम् ॥५॥
श्रीमत्स्वीयपदाब्जचिन्तनविधिं लोके स्वतो दुष्करं । दृष्टवाऽऽविष्कृतरम्य मूर्तिमखिलानुद्धारयन्तं श्रितान् ॥
मायावाद कुतर्क विभ्रमहरं श्रीमत् कृपावीक्षणात्तं । ध्यायामि सदा जगद्गुरुमहं श्रीस्वामिनारायणम् ॥६॥
श्रीधार्मि: पुरुषोत्तमो गुणनिधिर्यो ब्रह्मधामेश्वरो । मुक्तैर्जुष्टपदाम्बुजो वरतरैश्वर्यैरुपेत: प्रभु: ॥
अन्तर्याम्यखिलात्मनां भवहर: सर्वेश्वराधीश्वरस्तं । ध्यायाम्यवतारिणं मुनिपतिं श्री स्वामिनारायणम् ॥७॥
नित्यं संरममाणमक्षरपदे ब्रह्मात्ममुक्तव्रजै: । श्रीराधादिसमर्चितांघ्रिकमलं नैकाडनाथानतम् ॥
छन्द: शेषमहेशगीतयशसं योगीन्द्रहृच्चिन्तितं । ध्यायामीष्टमहं मुदाऽखिलगुरुं श्री स्वामिनारायणम् ॥८॥
वेदा: स्तोतुं प्रवृत्ता: यदनवधिमहानंदमालक्ष्य दूरात् । प्रत्यावर्तन्त सर्गस्थितिलयमखिलस्यास्य येनामनन्ति ॥

स्थाने दिव्येऽक्षरे यो निवसति सततं नित्यमुक्तानुषक्तः । सोऽयं कृष्णः कृपालुः स्वयमवति निजान्स्वामिनारयणो नः ॥९॥
श्रीजुष्टे वटपत्तने नृपपथे भूपस्य हर्म्यांगणे । नागेन्द्रोपरिरुढमीडितपदं भूपेन भक्त्या भृशम् ॥
नानारत्नमणीन्द्रमौक्तिकलितं हेमोद्भवं भूषणं मूर्धाग्रे । दधतं दधामि हृदि तं श्री स्वामिनारायणम् ॥१०॥
योऽसंख्येयमनोज्ञ दिव्यगुणयुक् सच्चित्सुखात्मा । स्वरान्मुक्तव्रातसमर्चितांघ्रिकमलो राधारमाधीश्वरः ॥
वेदैर्मूर्तिधरैः स्तुतोऽक्षरपदे जुष्टोऽधिराजश्रिया । तुष्यान्नः परमेश्वरोऽखिलगुरुः श्रीस्वामिनारायणः ॥११॥
यः साक्षाद्भगवान् क्षराक्षरपरः कृष्णः स एव स्वयं । भक्तौ धर्मतः आस भूरिकृपया श्री स्वामिनारायणः ॥
मानुष्ये भुवि नाट्यन्निजजनाचार्यत्वधर्मे स्थितः । कृष्णं प्राह परोक्षवन्नतु ततोऽन्यः सोऽस्ति यत्स स्वयम् ॥१२॥

## ५८ ●

अखिलभुवनजन्मस्थेमभंगादि लीले । विनतविविधभूतव्रातरक्षैकदीक्षे ॥
श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे । भवतु मम परस्मिन् शेमुषि भक्तिरुपा ॥१॥
यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः । स्तवैर्वेदैः सांगपदक्रमोपनिषदैर्गायन्ति यं सामगाः ॥
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो । यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥२॥
वेदानुद्धरते जगन्निवहते भूगलमुब्दिभ्रते । दैत्यान् दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ॥
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते । म्लेच्छान् मूर्छयते दशकृतिकृते कृष्णाय तुभ्यं नमः ॥३॥
मत्स्यं कूर्मं वराहं कपिलमथः हरिं वासुदेव च वैन्यं । दत्तात्रेयं च हसं नरहरिमृषभं वामनं पर्शुरामम् ॥

यज्ञं रामं कुमारं हयशिरसमथो नारदं राजराजं। व्यासं कृष्णं बुद्धं धृतपुरुवपुषं नौमि नारायणं त्वाम् ॥४॥
शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं । गगनसदेशं मेघवर्णं शुभांगम् ॥
लक्ष्मीकान्त कमलनयनं योगिभिर्ध्यानगम्यं । वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥५॥
कस्तूरितिलकं ललाटपटले वक्षः स्थले कौस्तुभं। नासाग्रेवरमौक्तिकं करतले वेणुः करे कंकणम् ॥
सर्वांगे हरिचन्दनं सुललितं कण्ठे च मुक्तावली। गोपस्त्रीपरिवेष्ठितो विजयते गोपालचूडामणिः ॥६॥
बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं बिभ्रदवासः । कनककपिशं वैजयन्ती च मालाम् ॥
रन्ध्रान् वेणोरधरसुधया पूरयन् गोपवृन्दैर्वृन्दारण्यं । स्वपदरमणं प्राविशद गीककीर्तिः ॥७॥
मल्लानामसनिनृणां नरवरः स्त्रीणां स्मरो मूर्तिमान् । गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ॥
मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां। वृष्णीनां पर देवतेति विदितो रंगं गतः साग्रजः ॥८॥
जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्। तेने ब्रह्महृदाय आदिकवये मुह्यन्ति यत्सूरयः ॥
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा। धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमति ॥९॥
वाणीमंगल रुपिणी च हसितं यस्यास्ति वै मंगलं। नेत्रे मंगलदे च दोर्विलसितं नृणां परं मंगलम् ॥
वक्त्रं मंगलकृच्च पादचलितं यस्याखिलं मंगलम्। सोऽयं मंगल मूर्तिराशु जगतो क्रियात् मंगलम् ॥१०॥
भगवंस्तव चरणं भवभयहरणं जनसुखरणं कमलसमं। कमलासनसारं हृदयविहारं विषयनिवारं वरवरदम् ॥
वरममलनिवासं रुचिरविलासं नखमणिभासं। मृदुमृदुलं मृदुभूरुहरंगं निजजनसंगं विलसितगंगं भवतु मुदे ॥११॥

रक्षन्वेदममन्दमन्दरगिरिं बिभ्रद्धरामाहरन्प्रहलादं । परिपालयन्बलिमनः क्षुभ्यन्क्षयन्क्षत्रियान् ॥
लंकेशान्तकरश्च कंसशमनः शान्तोऽसुरोन्मोहनो । म्लेच्छोन्मूलनकारकस्तमनिशं श्रीनीलकंठ भजे ॥१२॥

## ५९ ● ॥ मंगलाचरण ॥

आदौ प्रेमवतिवृषांगजननं सन्नैकतीर्थाटनं । दुष्कर्मोपशमनं च साधुशरणं सद्धर्मसंस्थापनम् ॥
हिंसावर्जितभूरियज्ञकरणं मूर्तिप्रतिष्ठापनम् । आर्यस्थापनमक्षराख्यगमनं सत्संगिसंजीवनम् ॥१॥
सदानंदाम्भोधिः स्मितरुचिरपूर्णेन्दुवदनः । प्रफुल्लाम्भोजन्मच्छदसद्द शोभाक्षियुगलम् ॥
कृपापारावारः श्रितसकलजीवातिसुखदो । महाश्रेयो मूर्तिर्जयति स हि नारायणमुनिः ॥२॥
पातुं धर्ममधर्ममुत्खनयितुं श्रीभक्तिधर्मांगतो । जातायोत्तरकोसलेषुविबुधानन्दायसद्धर्मिणे ॥
श्रीमच्चन्दनपुष्पहाररूचये शुभ्रांशुके बिभ्रते । तस्मै श्रीगुरुवेनमोस्तुहरये नारायणायर्षये ॥३॥
स्नातं चन्दनचर्चितं निजजनैः पुष्पैसृजालंकृतं प्रातः । सुर्यमयूखसेवितमुखं श्रीचन्द्रशालोपरि ॥
धृत्वा रोटकमेकपाणितलके भक्त्वांऽऽन्यहस्तेन । तं भुञ्जजानं प्रविलोक्य सेवकगणान् वन्दे सदा स्वामिनम् ॥४॥
धर्मस्त्याज्यो न कैश्छित्स्वनिगमविहितो वासुदेवे च । भक्तिर्दिव्याकारे विधेया सितघनमहसि ब्रह्मणैक्यं निजस्य ॥
निश्चित्वैवान्यवस्तुन्यणुमपि च रति सम्परित्यज्य । सन्तस्तन्माहात्म्याय सेव्या ईति वदति निजान् धार्मिको नीलकण्ठः ॥५॥
दृष्टाः पृष्ठाः नता वा कृतपरि चरणा भोजिताः पूजिताः वा । सद्यः पुंसामघौघं बहुजनिजनितं घ्नन्ति ये वै समूलम् ॥
प्रोक्ताः कृष्णेन ये वा निजहृदयसमा यत्पदे तीर्थजातं । तेषां मातः प्रसंगात्किमिह ननु सतां दुर्लभं स्यान्मुमुक्षो ॥६॥

सुनीशारं सारं शुचिकनकबुट्टं परिदधन्निचोलं । कौस्तुभं कटितटपटे चारुणरुचिम् ॥
बहून हारान् हैमान् वरवलयकेयूरमुकुटान् । हसद्वक्त्रेन्दुर्मे दृशि जयतु नारायणमुनिः ॥७॥
श्रीमच्छारदपूर्णचन्द्रविलसत्स्मेराननं श्रीहरिं । तुंगेपीठवरे स्थितं परिव्रतं सद्भक्तवृन्दैर्यथा ॥
ताराभिर्विधुमर्च्यमानमुरुधा तैश्चन्दनैः कौसुमैहारैः । शेखरपंक्तिभिश्च हृदये शुकलांबरं चिन्तये ॥८॥
य ईशोऽपि स्वेच्छाधृतनृतनुरानंदनिलयः । कृपासिन्धुर्भवजलनिधौ दुःखितनृणाम् ॥
सकामैर्निष्कामैरपि सुरनरैः सेव्य चरणं । नमाम्यात्मात्मानं तमहमिह नारायणमुनिम् ॥९॥
स्वभक्तवृन्दपालिनं मणिन्द्रमाल्यमालिनं । विमुक्तसंघशालिनं स्वशक्तियुक्तलालिनम् ॥
क्षमादयाधिमालिनं विनाशिताघजालिनं । भवन्तमार्त्तिकनन्दनं भजामि धर्मनंदनम् ॥१०॥
स्त्रीपुंसैर्जयतल्पपत्तन बहिर्वाटिवटेवेष्टिते । दोले तूलपटोपबर्हणपटैर्जुष्टे चलन्मूर्त्तये ॥
हस्तेकोमलकर्कटीफलयुगं धृत्वा विलोक्य । स्वकान्दन्तैश्चर्वण चातुरीं विदधते तस्मै नमः स्वामिने ॥११॥
श्रीकान्तं शान्तमूर्तिं सरसिजनयनं पूर्णचन्द्राभवक्त्रं । पीतं वासोवसानं भव भयशमनं मुक्तवृन्दार्चितांघ्रिम् ॥
विश्वाधारं गुणाब्धिं नवजलदतनुं धार्मिनारायणाह्वं । कृष्णं सत्संगगम्यं मनसि मम सदा भावये श्रेयसेऽहम् ॥१२॥

## ६० ● ॥ मंगलाचरण ॥

पातुं धर्ममधर्ममुत्खनयितुं श्रीभक्तिधर्मांगतो । जातायोत्तरकोसलेषु दयया सर्वेश्वराय च ॥
तृप्तिं वाक्यसुधारसैर्विदधते नैजैर्निजानां । मुहुस्तस्मै श्रीहरये नमोस्तु सहजानंदाय सद्वर्णिने ॥१॥

श्रीमन्नूतननीरदाभतनवे श्रीमाधुरीमूर्तये । त्वंगतुंगतरंगसंगिवृत्तये चञ्चच्चलद्वाससे ॥
नानाहार मनोहराय हरये यष्ट्या लसतपाणये । तस्मै श्रीगुरुवेऽभवाय सहजानंदाय वन्दामहे ॥२॥
श्रीमत्केतुयवाष्टकोणकमलस्वस्त्यूर्ध्वरे । खासृणिभ्राजज्जम्बुफलाशनिश्रितलसद्दक्षाघ्रिमब्जप्रभम ॥
मत्स्यार्धेन्दुधनुस्त्रिकोणकलशव्योमोल्लसद्गोपदजुष्टादक्षपदं । स्मरामि सहजानंदं सदा तं मुदा ॥३॥
श्री धर्मधुरन्धरं सुखरं कारुण्यपाथोनिधिं सन्नाथ । निगमान्तगीतयशसं पाथोदनीलप्रभम् ॥
धर्मस्थीकृतभूतलं स्वमहसा धर्मात्मजं स्वामिनं । सदाधाम्नः पतिमक्षरस्य सहजानंदं हरिं तं भजे ॥४॥
यो भूमेरुदडीडयत्स्वमहसा वात्येव तुलं । सुरामांसप्राशमयोपधर्ममभितः कार्ष्णं वृषं पोषयन् ॥
स्वैश्वर्य समपप्रथल्लघु नृणां स्वान्तासुरोधाद्धरौ । श्रीस्वामी जयतीश्वरः स सहजानंदो ममानंददः ॥५॥
श्रीकृष्णाय तमोहराय हरये श्रीनीलकण्ठाय ते । श्रीनारायणनामधेयधृतये धर्मात्मजायाऽऽत्मने ॥
सद्धर्मावनसम्भवाय हरियुककृष्णाभिधायानिशं । षण्णामावलिसंयुताय सहजानंदाय वन्दामहे ॥६॥
परं तीर्थस्थानं ध्वजयवसरोजांकुशनभो । धनूरेखार्धेन्दुप्रभृतिशुभलक्ष्मांकितमपि ॥
श्रिया जुष्टं तद्यत्प्रणतजनपापप्रशमनं । पदाब्जं ते स्वामिन् वसतु सहजानंद हृदि मे ॥७॥
सर्वेषां पतिरात्मदः प्रभुरनंतेहोऽक्षरे संस्थितः । कारुण्येक्षण नीरजः सुखनिधिः सर्वज्ञईशः परः ॥
कल्याणऽमित दिव्यजन्मचरितोयो ब्रह्मणेऽध्यायपयद्वैदास्तं । प्रणमाम्यहं च सहजानंदं सदा धर्मजम् ॥८॥
यं ब्रह्मेश्वरदेवराज रवयो दिव्यैस्तुवन्ति स्तवैर्यं । वेदैः क्रमतः पदैश्चजटया गायन्ति सामर्षयः ॥

ध्यानेनात्मनी यंमहे प्रतिदिनं पश्यन्ति योगेश्वरायत्पारं । निगमां विदुर्न सहजानंदाय तस्मै नमः ॥९॥
कश्यैकस्य कुमंडलं हि शिरशः शेषश्य देशेस्थितं । यस्येदं फणिनः सहस्त्रशिरसां सिद्धार्थवद्राजते ॥
सोप्यस्यैश्च सहस्त्रशः प्रतिदिनं नूत्नानि यन्नामन्याह । सिताम्बराय सहजानंदाय तस्मै नमः ॥१०॥
ख्यातं धर्मकुलं गुणैर्भुविवरै यश्चाविरासीत्ततः कर्तुं । सद्विजतो यथा शशधर पूर्वाचलं पुष्कलः ॥
यस्यासन्मुनयोपि शुद्ध हृदय धन्याश्च सत्संगिन । संबन्धात्सततं समेऽस्तु सहजानंद प्रसन्नो हरिः ॥११॥
अतिक्षान्त्या दान्त्या मृदुलवचनैश्छादितमह । न्निजातकयैश्वर्याददि्वलसितनृनाट्यय गुरवे ॥
वसानाय श्वेताम्बरयुगलमावार्धियशसे । नमस्तस्मै नित्यं हृदि भगवते ध्येयवपुषे ॥१२॥

**६१ ● ॥ अष्टपदी ॥ ब्रह्मानंदमुनि विरचित ॥**

हरिकृष्णविहारी नरतनुधारी पाहि सदा घनश्याम ।
निजजन सुखकारी सर्वावतारी पाहि सदा घनश्याम ॥ (ध्रुवपद)
नन्दितमुक्तमुनिवृन्दवन्दित भवभीतिभंजनभूप ।
दर्शितनिजजन दिव्यसिंहासन स्वामिनारायणरुप ॥ हे हरिकृष्णविहारी० ॥१॥
कीरविकिरवदनतुल्य प्रोन्नसत्रिरेखोच्चन्द्रितभाल ।
शोभितश्रुतिलोचनदुःखमोचन कण्ठे मुक्तामणिमाल ॥ हे हरिकृष्णविहारी० ॥२॥
रदततिस्मितहास्योपेताननकाननतुल्यकृतवास ।
दारिद्रयनाशन हृदयप्रकाशन वारितवन्दारुत्रास ॥ हे हरिकृष्णविहारी० ॥३॥

सज्जनव्यर्दन मन्मथमर्दन क्ष्मापतिकृतनित्यसेव ।
सज्जनश्रेयो निर्झरपरमादर भूषितभूमिभूदेव ॥ हे हरिकृष्णविहारी० ॥४॥
कृतवृषधारणाधर्मनिवारण कारणकारणनाथ ।
तिष्यप्रतारण श्रितारिदारण शोषित भवसिंधुपाथ ॥ हे हरिकृष्णविहारी० ॥५॥
रिष्टकरारिष्टदारक वाहक ग्राहित गुणव्रजवाम ।
यांत्रिक मांत्रिक कृतदासतांत्रित स्वेच्छित पुरणकाम ॥ हे हरिकृष्णविहारी० ॥६॥
नैष्ठिकब्रह्मव्रतावनकारक धारक शक्तित्रयाधीश ।
साकारव्यापक निजसुखदायक जय जय जगदीश ॥ हे हरिकृष्णविहारी० ॥७॥
सच्छास्त्रदोहनासुरमतिमोहन केशव कन्दर्पकाल ।
ब्रह्मानन्दसुद्धबुद्धिसभाजित चारित्रमुदित मराल ॥ हे हरिकृष्णविहारी० ॥८॥

## ६२ ● ॥ श्री घनश्याम स्तोत्रम् ॥ पुराणी नन्दकीशोरदासजी रचित ॥

शंकुरु घनश्याम नारायण सुन्दरतासुखधाम । मुक्तमण्डलस्वभिराम रामानुज केशव पुरणकाम ॥ (ध्रुवपद) ॥
एकान्तिकधर्म स्थापयितुं मेदिन्यां महाराज । उत्तरकोशलदेशछुपय्यासिसिंजज्ञे मुनिराज शंकुरु घनश्याम ॥१॥
सामवेदि सरवरिया ज्ञाति धर्मतनूजनूतनसार । बालस्वरुपविचित्रविचेष्टित विस्मापित निजनार शंकुरु घनश्याम ॥२॥
तीर्थोत्तमकृतमीनसरोवर नारायणकासार । भूतकूपखंपाभिधपल्वलक्रीडितधर्मकुमार शंकुरु घनश्याम ॥३॥

जन्मस्थानसमीपकूप गोघट्टादिकनिजस्थान। नाशित निजदर्शन जीवबन्धन गन्धन श्रीभगवान शंकुरु घनश्याम ॥४॥
स्थावरजंगमदिव्यदृष्टिगोचर प्रापितनिजलोक। स्वेच्छामय धृतदिव्यस्वरुपानन्द विशोषितशोक शंकुरु घनश्याम ॥५॥
छुप्ययापुरीवासिजनरंजन मनसिजमोहनरुप । नैकाण्डोद्भवस्थितिलयकारक ब्रह्मपुराभूप शंकुरु घनश्याम ॥६॥
श्वेतद्वीपगोलोकपतिवन्दनपरमखिल ललाम । छुप्ययापुरमकारीश्वरसंसेवितशुभगुणग्राम शंकुरु घनश्याम ॥७॥
नन्दकिसोर रमापतिवामनकपिलप्रभृत्यावतार। दासविभावित हे ब्रह्मानन्द सेवित शुद्धविचार शंकुरु घनश्याम ॥८॥

## ६३ ● ॥ अष्टपदी ॥ श्री ब्रह्मानन्दमुनि विरचित ॥

सज्जन संवर धर्मकुमारम्। श्रीहरिकृष्णरुचिररुपधारम् ॥ सज्जन... (ध्रुवपद)
नन्दभुवनश्रितहितकृतवासम् । वामवदनविलसितसितहासम् ॥सज्जन...१॥
तदशनुद्युतिदृश्यगौरकपोलम् । पापविमोचनलोचनलोलम् ॥सज्जन...२॥
किशलयकमनीयचरणचरन्तम् । कोमलकरं निजशिरसि धरन्तम् ॥सज्जन...३॥
शोभितहृदयकुमराजिधारम् । भालतिलकयुतचन्द्रकसारम् ॥सज्जन...४॥
रत्नखचितकिरीटादिविराजम् । कनकवसनवपुमुनिवरराजम् ॥सज्जन...५॥
दासविनाशितरिपुव्रजवंद्यम् । गतिगजहंसविजितसुरनन्द्यम् ॥सज्जन...६॥
सत्रसभाजितसकलावतारम् । क्षितितलविचरणकलिमलहारम् ॥सज्जन...७॥
प्रकटप्रतापविमोहितमारम् । ब्रह्ममुनिमुखहृतभूमिभारम् ॥सज्जन...८॥

*॥ इति श्रीब्रह्मानन्द मुनि विरचिताष्टपदी समाप्ता ॥*

## ६४ ● ॥ श्रीहरिकृष्णमहिम्नः स्तोत्रम् ॥

ब्रह्माभिधे निजपदे परिपूर्णरूपम् । नित्यं स्थितं शिवकरं नवनीरदाभम् ॥
ब्रह्मादिभिः सुरवरेरभिसेव्यमानम् । प्राप्तं भुजंगनगरं हरिकृष्णमीडे ॥१॥
हम्मीरसंज्ञकसरोवरनीरतीरे । वेदीं विलोक्य वितता वरवाटिकायाम् ॥
तत्रोपविष्टमखिलान् प्रतिबोधयन्तम् । प्राप्तं भुजंगनगरं हरिकृष्णमीडे ॥२॥
संस्थाप्य योगकुशलैर्हृदयारविन्दे । मुक्तैः सदामुनिगणैरपि चिन्तनीयम् ॥
गांगेयमल्लपरिपूजितपादपद्मम् । प्राप्तं भुजंगनगरं हरिकृष्णमीडे ॥३॥
पद्माभिभूषितकरं मुनिवर्यवेषम् । दिव्याकृतिं कनकपिंगजटां दधानम् ॥
वेदान्तवेद्यवचनैर्जितवादिवृन्दम् । प्राप्तं भुजंगनगरं हरिकृष्णमीडे ॥४॥
शान्तम्प्रसन्नवदनाम्बुरूहं सुनेत्रम् । शुक्लांशुकं समदृशं भुवनैकवन्द्यम् ॥
प्रोत्फुल्लपंकजरजः समलंकृतांगम् । प्राप्तं भुजंगनगरं हरिकृष्णमीडे ॥५॥
सर्वेश्वरं सुखकरं महनीयकीर्त्तिम् । पाटीरपीतरूचिरं तिलकं दधानम् ॥
आनन्दकन्दवृषनन्दनदेवदेवम् । प्राप्तं भुजंगनगरं हरिकृष्णमीडे ॥६॥
यत्पादपंकजपरागरसैकलुब्धाः । मुक्तिगता मुनिगणा दृढयोगयुक्ताः ॥

तं मोक्षदं भवहरं मुनिवृन्दजुष्टम् । प्राप्तं भुजंगनगरं हरिकृष्णमीडे ॥७॥
यस्यानुभावमतुलं विधिशंकराद्याः जानन्ति यम्परतरं मुनियो वदन्ति ॥
तं वासुदेवमनिशं निजलाभतुष्टम् । प्राप्तं भुजंगनगरं हरिकृष्णमीडे ॥८॥
संलग्नकण्ठतुलसीनलिनाक्षमालं । ब्रह्माद्वयम्परमनन्तमगाधबोधम् ॥
दुःखाब्धिपूरपतितोत्तरणावलम्बम् । प्राप्तं भुजंगनगरं हरिकृष्णमीडे ॥९॥
नारायणं नरसखं प्रतिपूजयन्तम् । शास्त्रोदितेन विधिनापि च विप्रवर्यान् ॥
श्रीव्यापाकादिमुनिमम्डलगीतकीर्तिम् । प्राप्तं भुजंगनगरं हरिकृष्णमीडे ॥१०॥
उत्फुल्ल्य योगकलया हृदयाब्जकोशम् । भक्तैश्चिरादपि यथारूचि चिन्त्यमानम् ॥
पूर्णेन्दुबिम्बवदनम्परिपूर्णरुपम् । प्राप्तं भुजंगनगरं हरिकृष्णमीडे ॥११॥
पाखण्डखण्डनपटुं प्रथितप्रतापम् । विद्यानिधिं निखिलजीवनिकायकेतम् ॥
आत्मानमक्षरपरं परिचिन्तयन्तम् । प्राप्तं भुजंगनगरं हरिकृष्णमीडे ॥१२॥
यस्याज्ञया तपति खे तपनो हिणांशुः । शान्तैः करैः सुखयति प्रकटप्रतापम् ॥
वाति प्रकर्षमपहाय समीरणोऽपि । धर्मारिनाशकमहं हरिकृष्णमीडे ॥१३॥

*॥ इति श्रीहरिकृष्णमहिम्नः स्तोत्रं समाप्तम् ॥*

## ६५ ● ॥ अष्टपदी ॥

जय जय धर्मधुरंधर नवघनसुन्दर वन्दे सुखकरम् ।
हर हर निजजनकलिकृतभारं रतिपतिमतिहारम् (२)
मोहनवरवन्दे सुखकारम् हर हर ॥ (ध्रुवपदम्)
जय जय नन्दन निजवनकुसुमसुरर्चितनीरदनिभदेहम् ।
युग युग वृषसुत अकलिततनु धृतकृत नवनविननेहम् ॥ (२) मोहन..॥१॥
जय जय दहनदिवाकर भगणनिशाकर दिवि षद्रूचिधाम् ।
शीतकर शशधर वदनमदनदरत्रिभुजन भर्तारम् (२) मोहन..॥२॥
जय जय किसलय मृदुतर भुवन जयत्कर परतर परमेशम् ।
श्रितजनजनिमृतिमोचन लोचनमेचक शिरकेशम् (२) मोहन..॥३॥
जय जय शोकविमोहन कृतवृषदोहन निगमागमसारम् ।
शुभमतिदायक नीतिपथनायक नरनाटकधारम् (२) मोहन..॥४॥
जय जय रसिक तमोहर मदनमनोहर चरणशरणपालम् ।
निजहितप्रकटित सुचरितभूमौ भक्तिभुवनबालम् (२) मोहन..॥५॥
जय जय दानदयादमत्रयदापक व्यापक साकारम् ।
स्यन्दनखगपतिगजनरवाहन श्रितजनभवातारम् (२) मोहन..॥६॥

जय जय सकलकलाकल विमलसुखाचल निजपदरूचिरुपम् ।
निजरतधृतवरव्रतमुरुमर्दन मंगलमुनिभूपम् (२) मोहन..॥७॥
जय जय श्रीपुरुषोत्तमपूरणपुरुष परमात्मन्नभिरामम् ।
ब्रह्मपतिब्रह्मानन्दसेवितचरणकमलवामम् (२) मोहन..॥८॥

*॥ इति श्रीब्रह्मानन्दमुनिकृताष्टपदी समाप्ता ॥*

## ६६ ● ॥ हरिकृष्णनामस्तोत्रम् ॥

हरिकृष्णनामतुल्यं नहि विद्यते पृथिव्याम्, कमलासनादिगीतं सनकादिभिर्विमृग्यम् ।
बहुजन्मपुण्यपुंजः समुदेति यर्हि येषाम्, हरिकृष्णनामतुल्यं नहि विद्यते पृथिव्याम् ॥१॥
स्वमुखे हि नाम तेषां मुहुरेति नास्ति शंका । नहि विस्मरेत्कदाचिद्विलयं प्रयाति पापम् ॥
हरिकृष्णनामतुल्यं नहि विद्यते पृथिव्याम् ॥२॥
विमलं करोति चित्तं हृदये प्रकाशमेति । हरिदर्शनं प्रयाति पुनरेतिनो भवेऽस्मिन ॥
हरिकृष्णनामतुल्यं नहि विद्यते पृथिव्याम् ॥३॥
सुकरः सुमार्ग एषः भज रे भवाब्धिमुक्त्यैः । सफलं भवेन्नृजन्म क्षणभंगुरे शरीरे ॥
हरिकृष्णनामतुल्यं नहि विद्यते पृथिव्याम् ॥४॥
भवभीतिभंजकन्तत् त्यज मानसमत्सरादि । भवसर्वकार्यजातं मनसः करोतु दूरम् ॥
हरिकृष्णनामतुल्यं नहि विद्यते पृथिव्याम् ॥५॥

भजनप्रतापतोऽन्ये हरिदिव्यधाम याताः । अवलम्ब्य यद्गजेन्द्रः पशुजातिभाक् तथापि ॥
हरिकृष्णनामतुल्यं नहि विद्यते पृथिव्याम् ॥६॥
कृपया हरेर्गजत्वं प्रविहाय धाम यातः । हुतभुक् स्वभावतुल्यं समतां करोति सर्वम् ॥
हरिकृष्णनामतुल्यं नहि विद्यते पृथिव्याम् ॥७॥
सकलं हरेः स्वनाम्नः भुवि वेत्ति कः प्रतापम् । शरणं प्रपन्नपुंसामभयं करोति हर्षात् ॥
हरिकृष्णनामतुल्यं नहि विद्यते पृथिव्याम् ॥८॥
हृदये मुदा स्वकीये क्षरतां प्रयातुमिच्छाम् । तवदास एष नम्रः स्मरणं करोतिनित्यम् ॥
हरिकृष्णनामतुल्यं नहि विद्यते पृथिव्याम् ॥९॥
अत एव भक्तिनम्राः वृषनन्दनं भजन्तु । गिरीजादिशंकरस्य प्रविदन्तु निश्चितं तत् ॥
हरिकृष्णनामतुल्यं नहि विद्यते पृथिव्याम् ॥१०॥

*॥ इति श्रीहरिकृष्णनामस्तोत्रंगिरीजाशंकर शास्त्रीविरचितं सम्पूर्णम् ॥*

## ६७ ● ॥ उद्गतावृत्तम् ॥

प्रलयाम्बुधेः श्रुतिगणस्य पयसिसमकारिबिभ्रता ॥
येनशकुलतनुमुद्धरणम् भुवितं भजे हरिमहं तपोभुवम् ॥१॥
समधारिमन्दर उपात्तकमठवपुषात्मपृष्ठतः ॥

येनबृहती धर्णीधरणो भुवितं भजे हरिमहं तपोभुवम् ॥२॥
जगती धृतैत्यकिलयेन शशिनिसमभाद्रदांचले ॥
क्रोडतनुमिव कलंककला भुवितं भजे हरिमहं तपोभुवम् ॥३॥
करजैर्भुजान्तरविदारसुरपतिरुच्छ्रितैर्हत: ॥
येननरहरिशरीरभृता भुवितं भजे हरिमहं तपोभुवम् ॥४॥
इह योऽर्थितत्रिपदमात्रजगतिरथवामनाकृति: ॥
अच्छलयतबलिमात्तबलिर्भुवितं भजे हरिमहं तपोभुवम् ॥५॥
भृगवंशजेन भुवियेनपरशुविधृतासमूलत: ॥
क्षात्रकुलमतिमदं निहतं भुवितं भजे हरिमहं तपोभुवम् ॥६॥
प्रधनेव्यतारिविगतेन दशरथजनुपादिगीषत: ॥
येनदशवदनमौलिबलि: भुवितं भजे हरिमहं तपोभुवम् ॥७॥
वसुदावजोऽस्यदवनीशमिशदितिजसञ्चयंचय: ॥
शैलभृदघहरणाचरणो भुवितं भजे हरिमहं तपोभुवम् ॥८॥
असुरौघमोहकृदधीलमतुलकरुणानिधिश्चय: ॥
हिंसनयुतयजनच्छिदुरो भुवितं भजे हरिमहं तपोभुवम् ॥९॥

अथ धूमकेत्वतिकरालतरलकरवालभृद्धियः ॥
म्लेच्छनिकरनिधनिकरणो भुवितं भजे हरिमहं तपोभुवम् ॥१०॥
श्रुतिपः क्षितिदधदगेन्द्रमसुरविदृतिर्बलिच्छलः ॥
क्षन्त्रदशवदनकंसवधः सदयोऽदयोस्तुहृदिमे सदाहरिः ॥११॥
इतिकृष्णवर्णिपरिगीतमिदमखिलमंगलंशिवम् ॥
स्तोत्रमिहवितनुतां पठतां निखिलाशुभोपशमनं श्रुतिप्रियम् ॥१२॥

*॥ इत्यचिन्त्यानन्दर्णिरचितं दशाकृतिधृतिधार्मिश्रीहरिस्तोत्रं समाप्तम् ॥*

## ६८ • ॥ शरणाष्टकस्तोत्रम् ॥ नर्कुटकं वृत्तम् ॥

वरनरनाटनेनपरभावमनन्यतुलं जगतिनिगूहयन्तमखिलार्तिहरप्रणतिम् ॥
भवभयभेदनं वृषभुवंपरशर्मनिधिं शरणमयामहेहरिमनन्तभवन्तमजम् ॥१॥
अयिपुरुषोत्तमप्रचुरणावनसन्महसं विविधशुभावतारगणकारणमर्च्यपदम् ॥
निखिलशरीरिसाक्षिणमतुल्यसुखाम्बुनिधिं शरणमयामहेहरिमनन्तभवन्तमजम् ॥२॥
प्रकृतिपरेऽक्षरेनिजसुधामनिदिव्यतरे सततसमर्चितांघ्रियुगमक्षरमुक्तगणैः ॥
बहुलमहोन्वितावयवराजितदिव्यतनुं शरणमयामहेहरिमनन्तभवन्तमजम् ॥३॥
द्रुहिणमुखेश्वरैर्दशशतास्यकवीन्द्रगणैर्मुनिनिकरैः श्रुतिश्रुतिविदांविप्रवरैरनिशम् ॥

उपनिषदांव्रजैरुदितकीर्तिमनन्यसमं शरणमयामहेहरिमनन्तभवन्तमजम् ।।४।।
शमदमवित्तिभिर्विरतिकौशलकान्तितपः श्रुतशुचिमार्दृवैः स्ववशताज्र्जवशौर्यमुखैः ।।
अपरिमितैर्युतं गुणगणैर्ध्रुवदिव्यशुभैः शरणमयामहेहरिमनन्तभवन्तमज् ।।५।।
सुखदयदांज्ञयासृजतिविश्वमिदं द्रुहिणेहरिरवतीश्वरश्चनयतिप्रतियंसभयम् ।।
शिरसिबिभर्तिनागपतिरेवमहीसततं शरणमयामहेहरिमनन्तभवन्तमजम् ।।६।।
तरणिनिशेश्वरप्रकृतिपुरुषकालमरुदृहनसुरेश्वरप्रभृतयोतनुयस्यविधिम् ।।
सकरुणपालयन्तिच वितानितरांसततं शरणमयामहेहरिमनन्तभवन्तमजम् ।।७।।
सुखकरमेवयस्य महिमानमुदारतरं पुरुपरिवर्णयन्त उरुधाप्यहिराजमुखाः ।।
वियतइवद्विजानकिलयान्तितदन्तमहो शरणमयामहेहरिमनन्तभवन्तमजम् ।।८।।
अगणितजीवमुक्तिविधये धृतमर्त्यतनुं परतरमक्षरादपिपराद्वरभूतिनिधिम् ।।
वृषकुलभूषणं विशदबोधसुधाजलधिं शरणमयामहेहरिमनन्तभवन्तमजम् ।।९।।
बहुविधादव्यसिद्धिभिरतर्क्यमहाविभवैर्निगमगणैश्चदिव्यतनुभीरुचिरैः सततं ।।
अपचितपादपद्मयुगलं रमणीयतनुं शरणमयामहेहरिमनन्तभवन्तमजम् ।।१०।।
द्युतिमयदिव्यमूर्तिवृषभक्तिरमाप्रमुखैर्विविधवरोपचार निकरैरतिभक्तितया ।।
परनिजपार्षदैश्च कृतपूजनमेवनुतं शरणमयामहेहरिमनन्तभवन्तमजम् ।।११।।

परमनिजौजसापरिभवन्तमशेषगुरुं जगतिविवादिनो निगमशास्त्रविदोऽपिगुरून् ॥
पुरुपरितोषयन्तमिहधर्ममुदारसुखं शरणमयामहेहरिमनन्तभवन्तमजम् ॥१२॥
तवदुरतिक्रमप्रकृतिसंवृतमूढधियो बहुविधशास्त्रवेदनमहास्मयदुष्टहृदः ॥
दुरधिगमं विबोध्य निजरुपमनन्यसमंपरतरनिर्वृत्तिंहिगमिता भवताऽद्यवयम् ॥१३॥

*॥ इत्यंचिन्त्यानन्दवर्णिविरचितां श्रीहरिस्तुतिस्तोत्रं समाप्तम् ॥*

## ६९ ● ॥ अथ पञ्चाचामर छन्दः ॥

अगाधशुद्धबोधनं वृषारिसर्गरोधनं अमेध्यबुद्धिशोधनं नमन्महातपोधनं ॥
हरिविपन्निकन्दनं विशालभालचन्दनं बुधैः कृताभिवन्दनं नमामि धर्मनन्दनम् ॥१॥
भवाम्बुराशितारिणं विशुद्धधर्मधारिणं प्रसूनसारहारिणं नितान्तशान्तिकारिणम् ॥
स्वभक्तसद्मचारिणं मनोज्ञसद्विहारिणं पवित्रसद्विचारिण् नमामि धर्मनन्दनम् ॥२॥
स्वभक्तभक्तरंजनं भवादिभीतिभञ्जनं अनंगगर्वगञ्जनं दयोदधिं निरञ्जनम् ॥
हृतांगिहृत्तमोमलं ललामशीलकोमलं अतुल्यशालिकौशलं पवित्रयोगिवत्सलम् ॥३॥
विविक्तसन्मतीरणं विशुद्धिकृत्समीरणं वचः सुधावधीरणं स्वशक्तिभृद्यतीरणम् ॥
कृताश्रितव्रजावनं सधर्मभक्तिभावनं शरीरिवृन्दपावनं प्रियद्रुमन्महावनम् ॥४॥
असंख्यविश्वकारणं दुरन्तलोभमारणं शुभांगयोगधारणं कलिप्रवृत्तिवारणम् ॥

कृतांगिमोहदारणं विनाशितप्रतारणं महायशः प्रसारणं बुधेन्द्रदर्पणम् ॥५॥
स्वभक्तचित्तमोषणं श्रुतोदिताध्वजोषणं बृहद्व्रतैकपोषणं निरस्तदोषतोषणम् ॥
महासभाविराजितं वरैर्विदां सभाजितं श्रुतादिवित्सभाजितं नरामरापराजितम् ॥६॥
कृतातिपुण्यखेलनं निजोरुभक्तमेलनं उदस्तदेवहेलनं वृषान्विताश्रमेलनम् ॥
जनार्पितात्मवेदनं क्षतस्वकीयखेदनं विचित्रभोगभेदनं सुकर्मसन्निवेदनम् ॥७॥
विशाललोललोचनं कृतान्तपाशमोचनं हृताश्रितातिशोचनं रवीन्दुवृन्दरोचनम् ॥
अकामभक्तलालिनं शुभोरुसद्गुणालिनं परास्तपापजालिनं मणीन्द्रहेममालिनम् ॥८॥
सदास्यहास्यभासिनं कृतानुषंगशासिनं तुरंगवारणासिनं सदा जगत्युदासिनम् ॥
स्वसेविसद्विलासिनं सुरद्विषन्निरासिनं श्रुतिश्रुतप्रकाशिनं मुनिप्रवर्यवासिनम् ॥९॥
स्वलोकिलोकहर्षणं स्वभक्तहृद्विकर्षणं विनाशितक्षमाभरं मनोरमं शमाकरम् ॥
सुबिम्बविद्रुमाधरं वितर्पितक्षमामरं सुधर्मशत्रुकन्दनं भजामि भक्तिनन्दनम् ॥१०॥
प्रचण्डदुष्टदण्डनं पराक्षरादिमण्डनं प्रकृत्युपाधिखण्डनं सदम्भमानभण्डनम् ॥
दुरागमप्रचण्डनं निरीशमार्गकण्डनं दुराशयप्रतण्डनं मणीन्द्रहेममण्डनम् ॥११॥
सदब्जहर्षदायिनं सतां सदानपायिनं स्वभूरिशर्मनायिनं परास्तसर्वमायिनम् ॥
विचिन्त्य दिव्यकायिनं महागुणानुयायिनं मुनीन्द्रवृन्दगायिनं स्वसक्तसन्निकायिनम् ॥१२॥

अचिन्त्यवर्णिना कृतं हरिप्रवर्णनामृतं इदंस्तवं सुनिर्मदा जनाः पठन्ति ये सदा ॥
प्रयान्तिते निरञ्जने हरौ रतिनिरञ्जने अनेकभक्तशर्मदे विनिर्जितातिदुर्मदे ॥१३॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं श्रीहरिवर्णनस्तोत्रं समाप्तम् ॥*

## ७० ● ॥ मत्तमयूरवृत्तम् ॥

दिव्येऽनन्ते शर्मचये धामनिमुक्तैर्यस्तेजः सौन्दर्यमृदुत्वादिपयोधिः ॥
आस्ते जुष्टो दिव्यतरैरक्षरसंज्ञे वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥१॥
यस्त्यागप्रागल्भ्यदयाकौशलकीर्तिक्षान्त्यैश्वर्यस्थैर्यतपोमार्दृवशौचैः ॥
स्वातन्त्र्याद्यैः सद्गुणवृन्दैरधिजुष्टो वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥२॥
यस्येच्छातो मानुषमात्रं जलविन्दोरप्यम्भोधिः सेतुविहीनो न भिनत्ति ॥
यन्मर्यादामास्यकराद्यंगसमेतं वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥३॥
पाथोऽनाधारं धृतमभ्रे स्थितिमाप्तंयेनोल्कास्फुर्त्यम्बुधरोद्गर्जितयुक्तम् ॥
यस्येच्छातः शाम्यति नाब्धौ वडवाग्निर्वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥४॥
गोत्रास्थैर्य वर्त्ततएवेत्य यदाज्ञावश्यादम्भो वर्षतिवार्दः स्थितिमाप्तम् ॥
द्यावाभूम्योर्मण्डलमन्तर्भगणस्य वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥५॥
आज्ञातोयस्योदयमस्तं दिनभर्त्ता शीतांशुंशुर्वेलामनतिक्रम्य च याति ॥

काले काले याति फलान्यौषधिजातं वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥६॥
यल्लीलापीयुषमहाब्धेर्नविधत्ते पीत्वा सद्वेदानिलनीतां जनएषः ॥
भोगेच्छां चित्ते कणिकांद्वन्द्वविहीनो वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥७॥
यत्पादप्रक्षालननीरं भुवि तीर्थंसेवन्ते गात्रेण यशः पापवितण्डम् ॥
प्राज्ञायस्यानुश्रवमेव श्रवणाभ्यां वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥८॥
स्थैर्योपेते चेतसि सन्तो रतिमन्तो यं ध्यायन्तिप्रोज्झितभोगाभिनिवेशाः ॥
योगज्ञानाभ्यासनिरस्ताखिलदोषा वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥९॥
को यस्यादेशेन सृजत्येव समग्रं विष्णुर्विश्वं पाति हरः संहरतीदम् ॥
यद्भित्यैवैस्मिन्ननिशं धावति मृत्युः वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥१०॥
आम्नायायं बद्रिसमूहा इव मूर्त्तासम्राजसंस्तुत्यमुदारं प्रणुवन्ति ॥
सेवन्ते राधाकमलाद्या इव दास्यो वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥११॥
सर्वज्ञंमूलप्रकृतिर्नाक्षरसंज्ञोयं सर्वाधारं भजति श्रेष्ठगुणेशम् ॥
नैकब्रह्माण्डोद्भवसंस्थालयलीलं वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥१२॥
नागेशाद्याः पारमिवाभ्रस्य शकुन्तानो यान्त्यैश्वर्यादिमहाब्धेर्हि महिम्नः ॥
यस्य क्लेशच्छेदविधानोत्तमभक्तेः वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥१३॥

विद्वांसोद्वैपायनसूत्रैरनवद्यं शास्त्रैस्तोत्रैरत्र पुराणैः प्रणुवन्ति ॥
सर्वोत्कृष्टानन्दसमुद्रं शुभकीर्त्ति वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥१४॥
संसारोदारोरगदंशार्त्तिचयानां यत्पुण्याभिख्यामृतवल्लीतनुभाजाम् ॥
तत्पीडाशान्ति प्रविधातुं किलशक्ता वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥१५॥
अस्यत्यात्मध्यानकृतामत्रजनानां तूर्णं स्वान्तद्रोणिगतं ध्वान्तमभेद्यम् ॥
मार्त्तण्डेन प्राज्यरूचायोजपि समग्रं वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥१६॥
कामाद्यन्तःशत्रुगणो भीतिमुपेतोरंकीशात्क्षिप्रंमहसोयस्यगरिष्ठात् ॥
रंकुव्राताताएव पलायन्तइवाराद्वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥१७॥
संसारोरर्वम्भोनिधिमिज्जत्पुरूखेदप्राणिव्रातप्रोतरनूत्नोत्तमनौका ॥
यद्भक्तिर्वैकल्यलतेवेप्सितदात्री वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥१८॥
संप्राप्तोयद्ब्रह्मशिरः कीर्त्तितकीर्त्तिः प्रोद्दाम श्रेष्ठामृतनद्यामभिषेकम् ॥
शान्तियातिस्वान्तगजोऽनंगदवार्त्तो वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥१९॥
हेयाधर्मस्यास्यतियो वंशमशेषंक्षिप्रं वात्यातूलमिवध्वान्तमिवार्कः ॥
संसारोर्वापन्निरयापत्तिनिदाहो वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥२०॥
योऽशेषार्त्तिच्छेदपटीयांसमहेयं धर्मस्य प्रेयांसमथस्वस्यहिसर्गम् ॥

मार्त्तण्डः प्राबोधयतीवाब्जसमूहं वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥२१॥
यः शक्तोमायाविषयेष्वप्यखिलस्थश्चित्तव्यामोहेश्वनिवार्योत्तमवीर्यः ॥
सत्प्रेयान्निर्लेपतयास्थातृमिवाभ्रं वन्दे शुद्धं धर्मभुवं तं हरिमीशम् ॥२२॥
येऽचिन्त्यानन्दब्रतिनेदं रमणीयं श्रोष्यन्तिस्तोत्रं रचितं यास्यतितोषम् ॥
वक्ष्यन्तिश्रीमद्धरिमाहात्म्यं निबोधं पापघ्नं तोषांमुपरिश्रीहरिरेव ॥२३॥

*॥ इत्यतिन्त्यानन्दवर्णिविरचितं श्रीहरिमाहात्म्यस्तोत्रं समाप्तम् ॥*

## ७१ ● ॥ मालिनीवृत्तम् ॥

कुटिलकलिकरालं श्रीहरि भक्तपालं गतिविजितमरालं सज्जनानां रसालम् ॥
ललिततिलकभालं प्रोल्लसन्माल्यमालं विशद वसनशालं चिन्तये धर्मबालम् ॥१॥
प्रशमितनिजतापं दुर्मदानां दुरापं विदलितजनपापं संसृतिच्छेदिजापम् ॥
सुकृतकुलकलापं मुक्तगीतप्रतापं विशद वसनशालं चिन्तये धर्मबालम् ॥२॥
भुविनरतनुधारं भूरिभूभारहारं भवजलनिधितारं दुस्तरापन्निवारम् ॥
मुनिविहितविहारं मानदर्पापहारं विशद वसनशालं चिन्तये धर्मबालम् ॥३॥
यमभटभयहारं सर्वदा निर्विकारं बहुविधमहकारं भक्तगेहप्रचारम् ॥
कृतकपटिनिकारं प्रोक्तमुक्तिप्रकारं विशद वसनशालं चिन्तये धर्मबालम् ॥४॥

परसुखदनिदेशं निर्जितशेषदेशं पदविनतसुरेशं बिभ्रतं वर्णिवेशम् ॥
विहितसदुपदेशं प्राज्यतेजोक्षरेशं विशद वसनशालं चिन्तये धर्मबालम् ॥५॥
परिहृतजनदोषं स्वाश्रितस्वान्तमोषं विशदहृदयतोषं धर्मवंशैकपोषम् ॥
क्षपितमलिनरोषं दुष्टमार्गाब्धिशोषं विशद वसनशालं चिन्तये धर्मबालम् ॥६॥
मुखजितशतपन्त्रं स्वाश्रितैकातपत्रं गरूडतुरगपत्रं कारितानेकसत्रम् ॥
मुदितहतकलत्रं भूतिबोधाद्यमन्त्रं विशद वसनशालं चिन्तये धर्मबालम् ॥७॥
श्रुतिमुनिजनगानं कुम्भिकादम्बयानं परमसुखनिधानं जीवमोक्षैकतानम् ॥
कृतनिजसुखदानं सज्जनैः सेव्यमानं विशद वसनशालं चिन्तये धर्मबालम् ॥८॥
विपुलविलसदक्षं मोक्षमार्गैकदक्षं क्षपितवृषविपक्षं पावनं धर्मरक्षम् ॥
निजपदरतपक्षं दिव्यकीर्त्त्यावलक्षं विशद वसनशालं चिन्तये धर्मबालम् ॥९॥

॥ शिखरिणीवृत्तम् ॥

अचिन्त्यानन्देन प्रवरमतिभद्रं विरचितं हरेर्धामेरेतत्सवनमखिलक्लेशदलनम् ॥
पठेध्ध्यायेत्प्रीत्या य इह श्रृणुयाद्वाप्रतिदिनं व्रजेद्भक्तिं सोऽग्र्यां वृषभुविहारौ शान्तिजलधौ ॥१०॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं धर्मनन्दन श्रीहरिवर्णनस्तोत्रं समाप्तम् ॥*

## ७२ ● ॥ रथोद्धतावृत्तम् ॥

चारूदीर्घपृथुनेत्रपंकजं पंकजं भयमिहाश्रितांगिनाम् । नाशयन्तमतुलं कृपालयं पालयन्तमनिशं हरिंभजे ॥१॥
धर्मवैरिकुलनाशनोदयंनोदयन्तं मिहसज्जनव्रजान् । स्वाश्रिताखिलविपत्तिहारिणं हारिणं हरिमहं विचिन्चये ॥२॥
यंप्रयातुमिह भूमिपावनं पावनं ययुरतुल्यशान्तिदम् । चित्रकारि वरविक्रमालयंमालयंहृदि दधामितं हरिम् ॥३॥
हर्षयन्तमघहारकंसहं कंसहंशुभचरित्रसद्गुणैः । चिन्तये हरिमहंशुभालकं भालकंचदधतं सचित्रकम् ॥४॥
सुप्रियापहतवासनाशयं नाशयन्तमिहतिष्यमोजसा । नौमितंहरिमहंस्वनन्दनं नन्दनं नहि लषन्तियच्छ्रिताः ॥५॥
श्रीहरिंस्वजनताशमोदयं मोदयन्तमखिलान्निजाश्रितान् । चन्द्रफुल्लजलजोत्तमाननं माननं हृदिविचिन्तयेसताम् ॥६॥
श्रीहरिं विदधतंमुदासवंदासवन्दितपदाम्बुजं भजे । स्वानुरक्ततरसत्सभासिनं भासिनं यतिपतिं भवच्छिदम् ॥७॥
येन धामनिजमत्यनाविलं नाविलंघितविधिर्हियाप्यते । स्वाश्रितागणितजन्मकर्मदं कर्मदम्भभिदुरं भजे हरिम् ॥८॥
संहृताश्रितदुरन्तवासनं वासनं हरिमहंविचिन्तये । शान्तिकारि वृषवंशभूषणं दूषणं विदलयन्तमोजसा ॥९॥
निर्व्यालीकानिनिजभक्ततोषणं पोषणं विदधतं श्रितांगिनाम् । स्वावलोकिजनचित्तमोषणं जोषणं हरिमहं सतां भजे ॥१०॥
कामलोभरतदेहिवर्ज्जनं वर्ज्जनं हि जगतां हरिं भजे । मन्दहासरूचिचन्द्रतर्ज्जनं भर्ज्जनं च दुरितक्रमैनसाम् ॥११॥
श्रीहरिं श्रितजनातिरञ्जनं भञ्जनं भवभयस्य चिन्तये । भारभूरितरगर्वगञ्जनं षञ्जनं सुमति सत्सु सर्वदा ॥१२॥
नाशितार्कसुतदूतयोधनं बोधनं तनुभृतामपेयुषाम् । श्रीहरिं मलिनबुद्धिशोधनं रोधनं कलिबलस्य चिन्तये ॥१३॥
यस्य चन्द्रकिरणान् प्रभावतो भावतोऽपि जयति श्रवःशिवम् । नौमियोगविलसत्कलालयं लालयन्तमजितं तमाश्रितान् ॥१४॥
शं नयन्तमखिलं सभाजनं भाजनं गुणसुखादिसंपदाम् । श्रीहरिं वरितनुत्कवीश्वरं वीश्वरञ्जनपराक्रमं भजे ॥१५॥

गात्रचर्च्चितसुगन्धिचन्दनभन्दनं विदधतं स्वदर्शिनाम् । श्रीहरिं मुनिकृताभिवन्दनं नन्दनं सुतपसो विचिन्तये ॥१६॥
त्वां जनः स्वशरणं हि योगतो योगतोऽप्यधिकशान्तिदं हरिम् । ध्वस्तदीनजनसर्ववेदनं वेदनन्दनशुभेहितं भजे ॥१७॥
भूतले सुकृतभक्तिभावनं भावनंदितनिजाश्रितं हरिम् । नौमि दुस्तरकृतान्तमोचनं शोचनंप्रशमयन्तमगिनाम् ॥१८॥
संचरन्तमरूतापसेवने सेवनेरितविशुद्धपार्षदम् । शास्त्रवेदिबुधदर्पतर्द्दनं मर्द्दनं कलिजुषां भजे हरिम् ॥१९॥
नाट्यमादधतमत्र मानुषं मानुषंगमनुजारूचिं हरिम् । नौमि पावनविचित्रदेवनं देवनन्दनचरित्रकारिणम् ॥२०॥
दानवांशगुरूगर्वतण्डनं दण्डनं विदधतं कृतैनसाम् । नौमि देवरिपुवृन्दखण्डनं कण्डनं हरिमसद्धियां द्रुतम् ॥२१॥

॥ शिखरिणीवृत्तम् ॥

अचिन्त्यानन्देन प्रवरतरशान्तिप्रदमिदं हरेरेतद्रम्यं स्तवनमतिपुण्यं वृषभुवः ॥
पठेद्ब्रुयात्प्रीत्याभुवि च शृणुयाद्यः प्रतिदिनं व्रजेत्तोषं तस्मिन् स हरिरखिलेशोऽक्षरपतिः ॥२२॥

*॥ इत्याचिन्त्यानन्दवर्णिविरचितं श्रीहरिस्तोत्रं समाप्तम् ॥*

## ७३ ● ॥ पुष्पिताग्रावृत्तम् ॥

प्रियगिरितटिवनाधिवासो निजपरशर्मरतो विरक्तिवार्द्धिः ॥
हरिरिहवृषभूर्भवापहारी जयति हि नैष्ठीकराजनीलकण्ठः ॥१॥
शुचिरूचिरचमूरूचर्मचञ्चद्रुचिकरचीरधरो विरोचमानः ॥
सजलजलदजालनीलगात्रो जयति हि नैष्ठीकराजनीलकण्ठः ॥२॥
स्फुटपुरटजटाच्छटाकिरीटः कटितटमञ्जुलमेखलाकलापः ॥

करकलितपलाशदण्डशाली जयति हि नैष्ठीकराजनीलकण्ठः ॥३॥
वरतरजपमालिकां दधानः श्रुतनिकरोद्धृतसारपुस्तिकां सः ॥
करकमलकमण्डलुर्दयालुः जयति हि नैष्ठीकराजनीलकण्ठ : ॥४॥
मृदुतनुरपिकर्कशाकृतिनां निजतपसाऽपि तपस्तपस्विनां यः ॥
बहुतरमधरीचकार तीव्रं जयति हि नैष्ठीकराजनीलकण्ठः ॥५॥
क्वच फलदलमूलकन्दमश्नन् क्वचन जलं च निपीय वर्त्तमानः ॥
निजपरतरदिव्यरूपदर्शी जयति हि नैष्ठीकराजनीलकण्ठः ॥६॥
पदमुरूविपदां वनेस्ति वासस्तदपि सदा ननु तत्र सौख्यवर्त्ती ॥
परमतरनिजात्मलाभपूर्णो जयति हि नैष्ठीकराजनीलकण्ठः ॥७॥
मृगमहिषवराहदन्तिसिंहैर्वनपशुभिश्च वनेऽपि संकुलेऽन्यैः ॥
व्यचरदभय एव योऽनुघस्रं जयति हि नैष्ठीकराजनीलकण्ठः ॥८॥
प्रकृतिविरहितैरनादिसिद्धैरनवधिकातिशयैः शुभैरतर्क्यैः ॥
श्रितवरचरणो गुणैरगण्यो जयति हि नैष्ठीकराजनीलकण्ठः ॥९॥
ललिततिलकलक्ष्यशालनालः कलिकलुषक्लमजाललोपलीलः ॥
सकलभयनिवारणावलोको जयति हि नैष्ठीकराजनीलकण्ठः ॥१०॥
वनभुवमधिपावयन् पदाभ्यां मृदुतलमंगललक्ष्मलक्षिताभ्याम् ॥

धृतिजलधिरधिव्रजन्स्वतन्त्रो जयति हि नैष्ठीकराजनीलकण्ठः ॥११॥
वरविहगरवैरिवाह्वयन्तः पथि तरवो यमवाकिरन्प्रसूनैः ॥
तरूजनिकृदघौघहारियोगं जयति हि नैष्ठीकराजनीलकण्ठः ॥१२॥
प्रविशतिसतिकाननेहि यस्मिन् दवदहनोऽप्यशमद्विनैव वृष्टिम् ॥
जहुरपि पशवो निसर्गवैरं जयति हि नैष्ठीकराजनीलकण्ठः ॥१३॥
वनहरिणगणानिरीक्ष्य तूर्णं यमधिगता इव योगिनः समाधिम् ॥
नयनविपुलताफलं समीयुः जयति हि नैष्ठीकराजनीलकण्ठः ॥१४॥
मधुकरनिकरास्त्वनुव्रजन्तो यमतिवरं परिगूढदिव्यभावम् ॥
जगुरिव मुनयो यशो यदीयं जयति हि नैष्ठीकराजनीलकण्ठः ॥१५॥
दुरितभरहरं निरीक्ष्य धार्मिं कलरवणाः सकलाः कलापिनो यम् ॥
ननृतुरतितरां मुदं प्रपन्नाः जयति हि नैष्ठीकराजनीलकण्ठः ॥१६॥
वरपरिमलमान्द्यशैत्ययुक्तो यमनुगवन्मुहुरेवसेवमानः ॥
पवन उपजगाम नाम सार्थं जयति हि नैष्ठीकराजनीलकण्ठः ॥१७॥
ययुरधिकसुखं यथायदीयं क्षणमपि वीक्षणमेत्य योगभाजः ॥
क्वचिदपि न तथात्मदर्शनाद्यैः जयति हि नैष्ठीकराजनीलकण्ठः ॥१८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं श्रीनीलकण्ठवर्णनस्तोत्रं सम्पूर्णम् ॥*

## ७४ • ॥ वियोगिनीवृत्तम् ॥

भगवंस्तव दर्शनं विना युगतुल्यो भवति क्षणोऽपि मे । निखिलार्त्तिहरं ततो हरे सहजानन्द दिशत्वदीक्षणम् ॥१॥
त्वदयोगदवाग्नितापितं निशि मां दाहयतेऽपि चन्द्रमाः । न सुखं दिवसेऽपिकर्हिचित् सहजानन्द दिशत्वदीक्षणम् ॥२॥
विरहेण तवैव सन्ति मे मृदुशय्याज्वलदग्निसन्निभाः । मरणेन समास्ति मेऽपि तत् सहजानन्द दिशत्वदीक्षणम् ॥३॥
प्रथमं निकटेऽभिरक्षितो भवता दूरतरीकृतोऽधुना । अहमस्मि ततोऽतिदुःखितः सहजानन्द दिशत्वदीक्षणम् ॥४॥
अहमस्मितवांघ्रिकिंकरो वचसो विश्वसनं तवास्ति मे । नय मां हि ततस्त्वदन्तिकं सहजानन्द दिशत्वदीक्षणम् ॥५॥
भवदीक्षणसक्त चेतसे नहि पक्षो विधिनाऽर्पितोऽद्य मे । कथमेतिततस्तवान्तिकं सहजानन्द दिशत्वदीक्षणम् ॥६॥
अवलम्ब्य भवत्प्रदर्शनप्रचुराशामृतवल्लरीं स्थिताः । असवो व्यथिता ममाकृतौ सहजानन्द दिशत्वदीक्षणम् ॥७॥
विरहेण तवातुरस्य मे वरभोज्यं च जलं विषायते । न च किञ्चनवस्तुसौख्यदं सहजानन्द दिशत्वदीक्षणम् ॥८॥
ममशीतमरूद्दवायते निशिनिद्रामुपयामि न क्वचित् । सदनं च वरं वनायते सहजानन्द दिशत्वदीक्षणम् ॥९॥
हृदिमेप्युषितोन्तरात्मना न मनः शाम्यति वै तथापि मे । प्रकटत्वदवेक्षणोत्सुकं सहजानन्द दिशत्वदीक्षणम् ॥१०॥
विरहानलतप्तमेव मां त्वदुदारोक्तिसुधाभिषेचनैः । शमयाशुदयामहोदधे सहजानन्द दिशत्वदीक्षणम् ॥११॥
जलदेन विनेव चातकः शकुलो नीरमिवान्तरा कुकी । कुकयोगमिवान्तरातुरः सहजानन्द दिशत्वदीक्षणम् ॥१२॥
वदनं तव वीक्षितुं शुभं त्वरयत्येव मनो ममातुरम् । मधुरस्मितमब्जलोचनं सहजानन्द दिशत्वदीक्षणम् ॥१३॥
तव वामवरश्रवोन्तरे पृथुबिन्दुं जलदप्रभं हि मे । त्वरितं भवतीक्षितुं मनः सहजानन्द दिशत्वदीक्षणम् ॥१४॥

गमनं तव हंसलज्जनं मधुरं भाषणमीक्षणं तथा । स्मरतो विदुनोति मे मनः सहजानन्द दिशत्वदीक्षणम् ॥१५॥

॥ मञ्जुभाषिणीवृत्तम् ॥

हरिकृष्णपादनलिनानुरागिणा भणितं जनेन विरहातुरात्मना ॥
विरहस्तवं प्रपठतामिमं हरेर्भवतात्तदीक्षणमनन्यशान्तिदम् ॥१६॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं श्रीहरिकृष्णविरहास्तोत्रं समाप्तम् ॥*

## ७५ ● ॥ शिखरिणीवृत्तम् ॥

सदानन्दामन्दान्तररिपुविनिष्कासनरता हरेरंगासंगान्निजहृदि महानन्दमुदिताः ॥
महादोषा योषा नहि मनसियेषां समुदिताः सदासंगस्तेषां भुवि हरिजनानां भवतु मे ॥१॥
महालोकालोकाः कुवलयपतीनां कृतुभुजां जनैर्घृष्टा पुष्टास्त अपिखलु योषां कृमिमयाः ॥
स्वकेदेहे गेहे पशुसुतधने प्रीतिरहिताः सदासंगस्तेषां भुवि हरिजनानां भवतु मे ॥२॥
विसारं संसारं प्रकटयति येषां परिचयः सदा पूर्णं तूर्णं गमयति हरिं चातिसुखदम् ॥
कलेर्हन्ताऽहन्ताविशसनपटुर्दुःखशमनः सदासंगस्तेषां भुवि हरिजनानां भवतु मे ॥३॥
वने वासोऽवासोऽध्वनिवसनखण्डैर्निपतितैः पुरेऽवीक्षाभिक्षा हरिभजनशिक्षार्थगमनाः ॥
न येषां केषांचित्स्तवननमनापेक्षणमहो सदासंगस्तेषां भुवि हरिजनानां भवतु मे ॥४॥
गृहं हित्वा धृत्वा हरिगुणविनिर्धूतशनले विशुद्धे सिद्धैष्ये हृदिमधुरमूर्तिं भगवतः ॥

चरन्तो नन्दन्तो भुवि भवति येषां न तुलना सदासंगस्तेषां भुवि हरिजनानां भवतु मे ॥५॥
प्रकामं निष्कामं विगलिततृषं मानरहितं विवादं निःस्वादं हरिचरणपद्मैकशरणम् ॥
प्रवृत्तं सद्वृत्तं भुवि भवति येषां सुखफलं सदासंगस्तेषां भुवि हरिजनानां भवतु मे ॥६॥
न हृष्टा नोद्विष्टा भवजनित सौख्येन विपदा प्रचण्डाः पाखण्डा दधति पुरतस्तूलतुलनां ॥
सजीवं निर्जीवं सकलमपि येषां तृणनिभं सदासंगस्तेषां भुवि हरिजनानां भवतु मे ॥७॥
यदुक्तं तद्युक्तं सकलमपि कर्त्तुं भगवता स्वचित्तेष्टं नेष्टं किमपि करणीयं च सततम् ॥
दृढबुद्धिः सिद्धिस्तृणमिव च येषां हि निकटे सदासंगस्तेषां भुवि हरिजनानां भवतु मे ॥८॥

*॥ इति दीनानाथभट्टविरचितं हरिजनाष्टकं स्तोत्रं सम्पूर्णम् ॥*

## ७६ ● ॥ स्वागतावृत्तम् ॥

मारमारणरणेरटनीयं भक्तियुक्तिमनसाघटनीयम् । मोक्षकांक्षकहृदामटनीयं स्वामिनाथचरणं शरणं मे ॥१॥
जीवजातशरणागतपालं भक्तमानससरोरूहशालम् । पापतापभयभीषणकालं स्वामिनाथचरणं शरणं मे ॥२॥
दोषशोषणशुभे हृदि गम्यं सर्वलोकनिलयैरधिनम्यम् । भक्तनिर्मितपदावृतिरम्यं स्वामिनाथचरणं शरणं मे ॥३॥
ज्ञानिलोकनयनांगणरूपं दुःखमोक्षणमहाक्रतुयूपम् । ईक्षणेन हृतकल्मषभूषम् स्वामिनाथचरणं शरणं मे ॥४॥
लब्धमानुषभवैः स्मरणीयं सर्वदैव मनसा धरणीयम् । जन्मनाशजभयैः श्रयणीयं स्वामिनाथचरणं शरणं मे ॥५॥
भूतले कुमनसामतिदूरं स्वाश्रयेषु सुखवर्णनशूरम् । मोहसन्तमसनाशनशूरं स्वामिनाथचरणं शरणं मे ॥६॥

शोणवर्णनखमण्डलसारं भक्तसंगनयनाम्बुजहारम् । अज्ञजीवदययाकृतिधारं स्वामिनाथचरणं शरणं मे ॥७॥
सारहारमधुपाधिपलीलं तेजितासितनवोत्पलनीलम् । दीनजीवपरिपालनशीलं स्वामिनाथचरणं शरणं मे ॥८॥

*॥ इति दीनानाथभट्टविरचितं शरणाष्टक स्तोत्रं समाप्तम् ॥*

## ७७ ● ॥ हरिगीतच्छदः ॥

सितसान्द्रसद्वसनालिनं वरमाल्यमञ्जुलमालिनं चलितालिनं पृथुमालिनं नवपुष्पभूषणशालिनम् ॥
वृषपालिनं श्रितलालिनं जपमालिकापरिचालिनं प्रणमामिधर्मसुतं शुभकारिसद्गुणमालिनम् ॥१॥
मलजालभृत्कलिकण्डनं जनमित्रसज्जनमण्डनं स्मरतण्डनं मदभण्डनं कृतदुष्टमानवदण्डनम् ॥
जितचण्डनं स्मयकण्डनं कृतभूरिदुर्मतखण्डनं, प्रणमामिधर्मसुतं शुभकारिसद्गुणमालिनम् ॥२॥
वृषवैरिदर्पविदारणं श्रितजातसंसृतिहारिणम्, अवतारिणं शुभकारिणं मणिहेमभूषणधारिणम् ॥
जनभन्दनं मुनिवन्दनं परिचर्चितोत्तमचन्दनं, प्रणमामिधर्मसुतं शुभकारिसद्गुणमालिनम् ॥३॥
जितदूषणं श्रिततोषणं कृतधर्मवंशविपोषणं क्षतरोषणं श्रुतजोषणं निजभक्तमानस पोषणम् ॥
जनबोधनं मतिशोधनं प्रियनम्रशान्ततपोधनं प्रणमामिधर्मसुतं शुभकारिसद्गुणमालिनम् ॥४॥
हृतभक्तिमज्जनवासनं शतकोटिभास्करभासनं जनशासनं गरूडासनं स्वनुरक्तसभासनम् ॥
हृतशोचनं घनरोचनं कृतबद्धजीवविमोचनं प्रणमामिधर्मसुतं शुभकारिसद्गुणमालिनम् ॥५॥
भुवनोद्भवादिविधायिनं भवहारिसद्गुणनायिनं अनपायिनं सुखदायिनं हितकारिसज्जनयायिनम् ॥

जनपावनं स्वजनावनं शुभधर्मभक्तिविभावनं प्रणमामिधर्मसुतं शुभकारिसद्गुणमालिनम् ।।६।।
निजभक्तपद्मविकाशिनं दुरतिक्रमार्त्तिविनाशिनं स्वविलासीनं मतिदाशिनं प्रियदम्भहीननिराशिनम् ।।
क्षतखेदनं शुभवेदनं यमदूतभितिभेदनं प्रणमामिधर्मसुतं शुभकारिसद्गुणमालिनम् ।।७।।
असुरांशदेशिकगञ्जनं श्रितवृन्दमानसमञ्जनं निजरञ्जनं भवभञ्जनं गुणनीरराशिनिरञ्जनम् ।।
मुनिमाननं प्रियकाननं नवपद्मचन्द्रवराननं प्रणमामिधर्मसुतं शुभकारिसद्गुणमालिनम् ।।८।।
नृपदेवमुक्तसभाजितं श्रुतिशास्त्रवेदिसभाजितं सकलाजितं सुजनाजितं गुणभाजिवाजिनि राजितम् ।।
श्रितनोदनं मुनिमोदनं दलितक्षमाऽखिलतोदनं प्रणमामिधर्मसुतं शुभकारिसद्गुणमालिनम् ।।९।।

।। मालिनीवृत्तम् ।।

रूचिरमिदमचिन्त्यानन्दवर्णिप्रणीतं स्तवनमतिपुनानं श्रीहरेर्धर्मसूनोः ।।
इह भुवि शृणुयाद्यः कीर्तयेत्संपठेद्वा स किलपरिलभेत स्वेप्सितार्थानशेषान् ।।१०।।

*।। इत्यचिन्त्यानन्दवर्णिविरिचितं धर्मनन्दनगुणवर्णनाष्टकं सम्पूर्णम् ।।*

## ७८ ● ।। स्त्रग्विणीवृत्तम् ।।

ब्रह्मधामाधिपं मुक्तवृन्दाश्रितं दिव्यसिंहासनवन्द्यमेकं मुदा ।।
सेवितंचामितैः पार्षदैः सिद्धिभिः प्रेमवत्यात्मजं कृष्णमीडेऽन्वहम् ।।१।।
मेधवन्मेचकं श्वेततेजच्छटासंवृतस्वाकृतिं दिव्यभूषाम्बरम् ।।
पद्मयाराधयापूजितांघ्रिद्वयं प्रेमवत्यात्मजं कृष्णमीडेऽन्वहम् ।।२।।

ज्ञानधर्मादिभिः षडंगैः संस्तुतं कालमायेश्वरं सर्वहेतुं परम् ॥
स्थेमसृष्ट्यादिकं स्वेच्छयाकारकं प्रेमवत्यात्मजं कृष्णमीडेऽन्वहम् ॥३॥
ब्रह्मधाम्नस्ततः स्वीयकारूण्यतश्च्छुप्यः पत्तनेदृश्यतां संगतम् ॥
स्वाश्रितानन्ददंबाललीलाकरं प्रेमवत्यात्मजं कृष्णमीडेऽन्वहम् ॥४॥
पावितायोध्यमुत्खण्डितोच्छृंखलंप्रेक्षितारण्यकंतीर्थसंशोधकम् ॥
आत्मसम्बन्धतोऽनन्तजीवाघहं प्रेमवत्यात्मजं कृष्णमीडेऽन्वहम् ॥५॥
एत्यपाञ्चालमात्मियभक्तालयेदुर्गसंज्ञेपुरेशश्वदेवोषितम् ॥
उत्तमाद्यैर्निजैराश्रितैः सेवितं प्रेमवत्यात्मजं कृष्णमीडेऽन्वहम् ॥६॥
कारकंभूरियज्ञोत्सवानां श्रितांदुःखसंहारकं स्वीयशर्मप्रदं ॥
तीर्थतीर्थीकृतोन्मत्तगंगाजलं प्रेमवत्यात्मजं कृष्णमीडेऽन्वहम् ॥७॥
दुर्गवृत्तालयश्रीपुरादिष्विहात्मीयदिव्याकृतिस्थापकं धामसु ॥
प्राणिनांश्रेयसे भूरिकालावधि प्रेमवत्यात्मजं कृष्णमीडेऽन्वहम् ॥८
धर्मवंश्यावयोर्दत्तसून्वोर्निजाचार्यभावं स्वयं स्वार्प्यनृश्रेयसे ॥
स्वीयदीक्षापथंवर्त्तयं तं वरं प्रेमवत्यात्मजं कृष्णमीडेऽन्वहम् ॥९॥
स्वाश्रितानां तनुत्यागकाले च तान्नैतुमेत्य स्वयं यानमुक्तैः सह ॥

ब्रह्मधामात्मनः प्रापयन्तं परं प्रेमवत्यात्मजं कृष्णमीडेऽन्वहम् ॥
दीनदारिद्र्यतां दुर्धियां जाड्यतां घातुकं हारिणं स्वच्छबुद्धिप्रदम् ॥
बद्धशुद्धोत्तमैकान्तधर्मायनं प्रेमवत्यात्मजं कृष्णमीडेऽन्वहम् ॥

*॥ इति श्रीरघुवात्मजश्रीभगवत्प्रसादाचार्यविरचितं श्रीहरिस्तोत्रं सम्पूर्णम् ॥*

## ७९ ● ॥ उपजातिवृत्तम् ॥

धर्मस्यबालं मदनस्यकालं सन्मार्गपालं हतलोभजालम् ॥
कलेः करालं सुधियां रसालं नारायणं भक्तिसुतं नमामि ॥१॥
अहिंसशीलं प्रियहंसलीलं जितप्रमीलंकृतदिव्यलीलम् ॥
पयोदनीलं प्रियसाधुशीलं नारायणं भक्तिसुतं नमामि ॥२॥
पाखण्डनाशं विबुधप्रकाशं सुखावकाशं हतभक्तपाशम् ॥
विद्याविकाशं जनतानिराशं नारायणं भक्तिसुतं नमामि ॥३॥
सुरारिमोहं सुमतिप्ररोहं सच्छास्त्रदोहं कुधियामपोहम् ॥
सदाविमोहं पुरूशोभनोहं नारायणं भक्तिसुतं नमामि ॥४॥
सदापवित्रं मुनिवर्य्यमित्रं क्षमाचरित्रं जनतातिचित्रम् ॥
अहिंससत्रं सृजनातपत्रं नारायणं भक्तिसुतं नमामि ॥५॥

वर्णीन्द्रवेषं लघुकीर्णकेशं हितोपदेशं सकलप्रजेशम् ॥
गताघलेशं जितसर्वदेशं नारायणं भक्तिसुतं नमामि ॥६॥
अभीतिहस्तं वरदान्यहस्तं कर्म्मप्रशस्तं हतिपातबस्तम् ॥
कुदेशिकास्तं कुपथागमास्तं नारायणं भक्तिसुतं नमामि ॥७॥
संसारसारं भवसिन्धुपारं दयाविहारं कृतधर्मधारम् ॥
भक्तार्तिहारं भुवि दीनतारं नारायणं भक्तिसुतं नमामि ॥८॥

*॥ इति दीनानाथभट्टविरचितं श्रीहरिमहिमाष्टकम् सम्पूर्णम् ॥*

## ८० ● ॥ वंशस्थवृत्तम् ॥

यथोदिताचारविनाशके कलौ प्रवर्त्तमाने खलधर्मवर्द्धके ॥
मतेषु सर्वेषुकदध्वगामिषु वृषात्मजः श्रीहरिरेवमेगतिः ॥१॥
विशुद्धतीर्थेषु कुमार्गगैर्जनैर्वृत्तेषु शिष्णोदरपोषकैः सदा ॥
गताधिदैवेषुसुरापगादिषु वृषात्मजः श्रीहरिरेवमेगतिः ॥२॥
परांगनागामिषु देशिकेषुवा अनार्य्यवृत्तिष्वतिगर्व्वितेषु च ॥
तमालभंगारसगञ्जपायिषु वृषात्मजः श्रीहरिरेवमेगतिः ॥३॥
रमत्सुचाक्षैर्गणिकाविनर्त्तनैः सुभण्डहासैरतिमोदकेष्वहो ॥
व्रतोपवासादिदिनैन्नभक्षिषु वृषात्मजः श्रीहरिरेवमेगतिः ॥४॥

स्वशिष्ययोषागमनोत्सुकेषु च प्रभोरनुज्ञामतिलंघ्यवर्त्तिषु ॥
विहाय सन्मार्गममार्गगामिषु वृषात्मजः श्रीहरिरेवमेगतिः ॥५॥
अदीर्घदृष्टिष्वथ कृष्णसेवनालयेषु योषात्मजवित्तसेविषु ॥
निजांश्चकृष्णोहमितिप्रबोधिषु वृषात्मजः श्रीहरिरेवमेगतिः ॥६॥
अधर्मसर्गेणजितेषु तेषु च वृषान्वयोच्छेदनमानसेषु वै ॥
हरेः कथायां विमुखेषु नित्यदा वृषात्मजः श्रीहरिरेवमेगतिः ॥७॥
असत्कथाकामकलानिषेविषु विवेकधैर्यादिगुणोज्झितेषुहि ॥
उपस्थजिह्वासुखसक्तबुद्धिषु वृषात्मजः श्रीहरिरेवमेगतिः ॥८॥
अनात्मबुद्धिष्वघमार्गवर्त्तिषु धनाशनस्त्रीष्वतिलोलुपेषु च ॥
निजार्चनायासपरेषु साधुषु वृषात्मजः श्रीहरिरेवमेगतिः ॥९॥
विरूद्धवेदार्थगतेषु वाडवेष्वनेकदेवार्चनतत्परेषु वै ॥
बहिर्मुखेष्वच्युतपादपंकजात् वृषात्मजः श्रीहरिरेवमेगतिः ॥१०॥
द्विजत्वविज्ञापनसूत्रधारिषु द्विजेषु सच्छास्त्रविनिन्दकेषु च ॥
असत्प्रबन्धप्रतिपादकेष्वहो वृषात्मजः श्रीहरिरेवमेगतिः ॥११॥
मनोजरूङलोभपरेषु दम्भिषु शरीरयात्रार्थकृतोद्यमेषु वै ॥
अभक्षभक्षिषु सुरातिपायिषु वृषात्मजः श्रीहरिरेवमेगतिः ॥१२॥

नृपेष्वधर्मानृततीव्रमन्युषु परांगनाद्रव्यरतेषु कामिषु ॥
रजस्तमोव्याप्ततमेषु मानिषु वृषात्मजः  श्रीहरिरेवमेगतिः ॥१३॥
क्रियाबिहीनाल्पबलायुरन्वितेष्वसंस्कृतेषु क्षितिपेषु सत्सु च ॥
तथा प्रजापीडनतत्परेषु वै वृषात्मजः श्रीहरिरेवमेगतिः ॥१४॥
व्रताऽबलागोद्विजबालघातिषु नयोज्झितम्लेच्छतमेषु सर्वथा ॥
नृपेषु वर्णाश्रमधर्महन्तृषु वृषात्मजः श्रीहरिरेवमेगतिः ॥१५॥
कुदेशिकज्ञानविनष्टबुद्धिषु जनेषु सर्वेष्वतिपापवर्त्तिषु ॥
सतां प्रपीडाकरणोद्यतेष्वथ वृषात्मजः श्रीहरिरेवमेगतिः ॥१६॥
श्वविटवराहोष्ट्रखराजवानरैः समानशीलेष्वतिहिंस्रवृत्तिषु ॥
असत्प्रसंगाभिरूचिष्वसाधुषु वृषात्मजः श्रीहरिरेवमेगतिः ॥१७॥
वृथापवादानृतचौर्य्यनिन्दनपरस्परोद्वैरविवादबुद्धिषु ॥
सतां विहायाद्यपथं चरत्सु वै वृषात्मजः श्रीहरिरेवमेगतिः ॥१८॥
प्रचण्डपाखण्डपरेषु मानवव्रजेषु पापैकरतेषु सर्वथा ॥
हरिप्रतीपेषु यमार्त्तिलिप्सुषु वृषात्मजः श्रीहरिरेवमेगतिः ॥१९॥
अनेकधावादवितर्कजालकैर्व्रतादिसत्कर्मणि नाशतांगते ॥

अबोधनष्टासु विवेकवृत्तिषु वृषात्मजः श्रीहरिरेवमेगतिः ॥२०॥
अजामिलाद्याघवतां विमोचकः स्वनाममाहात्म्यनिदर्शको विभुः ॥
स्वभक्तवृन्दार्त्तिहरः सुखप्रदो वृषात्मजः श्रीहरिरेवमेगतिः ॥२१॥
विवेकवैराग्यविमर्शभक्तिभिः स्वधर्मधैर्योपशमादिकैर्गुणैः ॥
निषेवनीयोऽखिललोकपालको वृषात्मजः श्रीहरिरेवमेगतिः ॥२२॥
अनन्तसामर्थ्ययुतं सुरेश्वरं निजाश्रयं साधुजनैकरक्षकम् ॥
स्वकीयभक्तोद्भवमृत्युनाशनं वृषात्मजं तं शरणं व्रजाम्यहम् ॥२३॥
वृषात्मजस्तोत्रमिदं शुभावहं पठेद्धरेर्यः सविधेन्वहंमुदा ॥
वृषात्मजस्तस्य भवेत्समाश्रयोऽब्रवीन्सुधीर्नित्यमुनिर्हरिप्रियः ॥२४॥

*॥ इति श्रीसहजानन्दस्वामिशिष्यनित्यानन्दमुनिविरचितं श्रीहर्य्याश्रयस्तोत्रं सम्पूर्णम् ॥*

## ८१ • ॥ स्त्रग्विणीवृत्तम् ॥

श्रीवरं श्रीकरं श्रीधरं श्रीश्वरं श्रीपतिं श्रीरतिं श्रीगतिं श्रीनतिम् ॥
श्रीनुतं श्रीहृदं श्रीप्रदं श्रीमुदं श्रीमुखं श्रीसुखं नौम्यहं श्रीहरिम् ॥१॥
श्रीवृत्तं श्रीकृतं श्रीभृतं श्रीव्रतं श्रीमतं श्रीततं श्रीश्रितं श्रीश्रयम् ॥
श्रीशमं श्रीदमं श्रीयमं श्रीविभुं श्रीसखं श्रीमखं नौम्यहं श्रीहरिम् ॥२॥

भक्तिधर्मात्मजं केशवं माधवं स्वामिनारायणं कृष्णदामोदरम् ॥
अच्युतं वामनं पावनं तारकं नीलकण्ठं द्विजं नौम्यहं श्रीहरिम् ॥३॥
कारकं पालकं हारकं पोषकं धर्मवंशार्त्तिहं देवदेवेश्वरम् ॥
भूमिभारायिताऽधर्मनाशोद्यतं भक्तवन्द्यांघ्रिकं नौम्यहं श्रीहरिम् ॥४॥
ऋद्धिदं सिद्धिदं बुद्धिदं शुद्धिदं तुष्टिदं पुष्टिदं भुक्तिदं मुक्तिदम् ॥
शान्तिदं कान्तिदं कीर्त्तिदं ख्यातिदं क्षान्तिदं शक्तिदं नौम्यहं श्रीहरिम् ॥५॥
आत्मदं ज्ञानदं भक्तिदं ध्यनदं धर्मदं योगवैराग्यदं शर्मदम् ॥
प्राणदं त्राणदं धैर्यदं शौर्यदं पुण्यदं कामदं नौम्यहं श्रीहरिम् ॥६॥
भक्तिधर्मावनं सर्वलोकाधिपं सर्वदुःखातिगं शाश्वतं पूरूषम् ॥
पद्मनाभं सुरेशं निधिंमेघवर्णं शुभांगंध्रुवं नौम्यहं श्रीहरिम् ॥७॥
अव्ययं सर्वगं विश्वयोनिं शुचिं सुप्रसादं स्थिरं कामहं क्रोधहम् ॥
स्वादहं स्नेहहं मानहं दैत्यहं लोभहं शोकहं नौम्यहं श्रीहरिम् ॥८॥
आधिहं व्याधिहं तापहं पापहं शत्रुहं रोगहं दोषहं दुःखहम् ॥
आदिदेवं महापुरूषं नन्दनं पुष्कराक्षं कविं नौम्यहं श्रीहरिम् ॥९॥

पुण्यकीर्त्तिमहातेजसं सद्गतिसत्कृतिं सन्निवासं कृतिं सुन्दरम् ॥
शेवधिं लोकबन्धुरमासेव्यपादाम्बुजं सद्गुरूं नौम्यहं श्रीहरिम् ॥१०॥
धार्मिकं निस्पृहं वर्णिराजं मुनिंधर्मवंशावतंसं बटुं निर्ममम् ॥
देवकीनन्दनं यादवं गोपगोपीश्वरं मंगलं नौम्यहं श्रीहरिम् ॥११॥
नारसिहाकृतं राजराजाधिपं वैन्यमात्रैयकं पर्शुरामं नरम् ॥
रामचन्द्रं मनोज्ञं वराहं झषं रामकृष्णाभिधं नौम्यहं श्रीहरिम् ॥१२॥
जानकीजीवनं राधिकावल्लभं रूक्मिणीसेवितं सत्यभामार्चितम् ॥
लक्ष्मणावंदितं सर्वपत्नीनुतं सर्वयाद्वावृत्तं नौम्यहं श्रीहरिम् ॥१३॥
ऊर्ध्ध्वगं दुर्धरं दुर्लभं दुर्गमं दुर्जयं स्वस्तिदं सुक्तिदं सामगम् ॥
इष्टदं निर्मदं सत्रधर्मार्चितं योगिनं योगदं नौम्यहं श्रीहरिम् ॥१४॥
त्यागिमान्यं महायोगसिद्धिप्रदं बुद्धिमन्तं बुधं संपदापत्समम् ॥
उत्तमं सन्मनोहारकं सुव्रतं सत्तमं सिद्धिपं नौम्यहं श्रीहरिम् ॥१५॥
भक्तभुक्तिक्षणानन्दमीशंमृदुं शूरसंभावनं नैष्ठिकेन्द्रं प्रियम् ॥
उद्धवेक्षोत्सुकं सिद्धदर्पापहं लोजलोकप्रियं नौम्यहं श्रीहरिम् ॥१६॥

*॥ इति श्रीसहजानन्दस्वामिशिष्यनित्यानन्दमुनिविरचितं श्रीहरिनमनस्तोत्रं समाप्तम् ॥*

## ८२ ● ॥ ललितवृत्तम् ॥

हसितमुत्तमं श्रीहरेः सितं वदनशारदप्रोल्लसद्विधौ । भवतुनस्तुयत्सख्यमीप्सितं हृदि मुदा सदा ध्येयमीशितुः ॥१॥
अरूणनूतनाशोकपल्लवोपरिसभास्थितश्चन्द्रिकायुतः । हिमकणोयथाशोभतेतथा भगवतोहरेर्हासउज्वलः ॥२॥
शृणुतसत्पतेः सर्वधामसन्मुकुटहीरकेब्रह्मधामनि । स्थितवतः सदा भक्तिजन्मनो सखलुवार्त्तिकां सख्यमुत्तमाम् ॥३॥
तमभितो मुदा तत्र संस्थिताः सततमक्षरानन्तपूरूषाः । तदधरस्मिते मोहितागताः किल चकोरतां सूर्यपुष्पताम् ॥४॥
प्रकृतिचञ्चला प्रार्थिता मुहुर्विधिमुखैः सुरैर्व्रत्तसंयमैः । अतिविमोहिताऽमुष्यसुस्मिते नहिजहात्यमुं सेन्दिरा कदा ॥५॥
तदतिदुर्लभं पास्यतां मुहुर्जनिमृतिक्षयं पूर्णशर्मदम् । प्रकटितस्यवैतस्यसंप्रतिनिरवधिक्षितौ भाग्यमस्तिः नः ॥६॥
मुनयईदृशा ब्रह्मरूपिणः सदसि संस्थितस्यास्य यान्ति च । वदनचन्द्रके हास्यभासुरे ननु चकोरतां यावदीक्षणम् ॥७॥
हरिनिरीक्षणं कर्त्तुमागता गृहिजना मुदा दूरदेशतः । हसितमुज्जवलं वीक्ष्य मोहिता मुनिहितं च संगृह्यतेऽस्यवै ॥८॥
सखिहरेस्तथा काञ्चनस्त्रियो मधुरहास्यतोऽप्याशुमूर्च्छिताः । पतिसुतादिकान् संविहाय ता मलवदत्र तं विक्षितुं स्थिताः ॥९॥
सरितमात्मनो गच्छतः प्रभोः स्मरविमोहनं विक्षितुं स्मितम् । सरभसाऽऽगताभिल्लयोषितो ह्यऽपि निरीक्ष्य तद्यान्तिमुक्तताम् ॥१०॥
तरूबहिर्लतासुस्थिताः खगा मुनिगणा इव स्थास्नुविग्रहाः । हरिमुखेन्दुगस्मेरदर्शनाज्झटिति यान्ति तत्प्राणसंयमम् ॥११॥
सरिदपि प्रभुं स्नातुमागतं मुनिजनावृतं वीक्ष्य हर्षिता । निजभूजोर्मिभिस्तस्य सन्मुखं जलनिधिर्यथेन्दोस्तथैत्यरम् ॥१२॥
विदधतोऽक्षराभिख्यपूरूषैः सहसलीलमाप्लावमात्मनि । स्मितममुष्य सद्वीक्ष्य भूयतेत्वरितवेगयोन्मत्तगंगया ॥१३॥
तदनुकुर्वती फेनमुज्वलं सखि बिभर्त्ति सा तस्य पृष्ठतः । प्रभवतां नृणां कर्तुमास्मृतिं हरिरदोषमं मौक्तिकाच्छभम् ॥१४॥

प्रियमहोस्मितं द्रष्टुमिशितुः सितगरूत्कुलं तं तटे स्थितम् । मुनिगणो यथा वीक्ष्य लोचनैः पुलकितातनुं संदधाति तत् ॥१५॥
अपिमृगा अहो मूढजातयः सवनिता मुदाऽऽकर्ण्य तद्यशः । त्वरितमेत्य तत्तीरमस्यते ह्यतिपिबन्ति तद्धास्यमीक्षणैः ॥१६॥
स्मितसुधारसं भक्तिबालकं मुखविधौ स्थितं संसृतिक्षयम् । अमरयूथपा एत्य खस्थिताः पुरूनिपीय वै यान्ति तत्पदम् ॥१७॥
तदबला अपि काममोहनं स्मितमवेक्ष्य तद्हृच्छयासुर्दिताः । स्वसुखनिन्दनं संविधाय ता हरिपदाश्रयं प्रार्थयन्त्यलम् ॥१८॥
अनुपमां हरेर्दन्तरोचितं तनुसुधाकरो वीक्ष्य निर्भरम् । अतिविलज्जितः स्वां च चन्द्रिकां गतउरूभ्रमं गर्हयन्मुहुः ॥१९॥
हरिमुखस्मिते पूर्णशर्मदे रसविदो ध्रुवं वर्णिपार्षदाः । जहाति नो कदा तं च सस्मितं सकलचन्द्रकं चन्द्रिका यथा ॥२०॥
अमृतसंज्ञकं धामसाक्षिणो वृषसुतस्य तच्छ्रीहरेः स्मितम् । यदि निरीक्षितं येन सोऽपि नो यमगृहं कदासख्य इक्षते ॥२१॥

*॥ इति श्रीप्रार्थनास्तोत्रं सम्पूर्णम् ॥*

## ८३ ● ॥ मञ्जुभाषिणीवृत्तम् ॥

वरशुभ्रसान्द्रतरभास्वराम्बरं जलदालिनीलविलसत्कलेवरम् ॥
मिलितार्कजासुरसरित्समश्रियं हृदि चिन्तये हरिमहं तपोभुवम् ॥१॥
अवलोक्य यस्य पुरूधामविग्रहं स्पृहणीयसद्गुणमणीन्द्रभूषणम् ॥
नितरां हि कोटिमदनाययुस्त्रपां हृदि चिन्तये हरिमहं तपोभुवम् ॥२॥
स्मितभासि यस्य दशनच्छदद्वयं समतर्ज्जयत्स्फटिकयुक्तविद्रुमम् ॥
नवपल्लवं च सितमाल्यसंयुतं हृदि चिन्तये हरिमहं तपोभुवम् ॥३॥

नवमल्लिकाभवदवेक्ष्ययद्रदांस्त्रपयेव भृंगवसनावृतं सदा ॥
अवतिष्ठते करकमप्यधोमुखं हृदि चिन्तये हरिमहं तपोभुवम् ॥४॥
अभिदृश्य यस्य परमस्य नासिकां तिलमाल्यदीपकलिकावरीयसीम् ॥
त्रपयेव कीरनिकरावने ऽवसन् हृदि चिन्तये हरिमहं तपोभुवम् ॥५॥
रमणीयहेममयकुण्डलस्फुरन्मणिभासि यस्य शुभगण्डमण्डलम् ॥
जयति स्म नीलमणिदर्पणश्रियं हृदि चिन्तये हरिमहं तपोभुवम् ॥६॥
अवलोक्य यस्य नयने तपोजलेनलिनानि यद्रुचिरताप्तये मृगाः ॥
विपिने ह्रियेव निवसन्ति कुर्वते हृदि चिन्तये हरिमहं तपोभुवम् ॥७॥
स्मरदावदग्धमनसाकलनाक्षयगामिनापसदबन्धुनेन्दुना ॥
न यदास्यदास्यविधियोग्यताप्यते हृदि चिन्तये हरिमहं तपोभुवम् ॥८॥
चटुचाक्षि यस्य मुखमब्जराजिभिर्लसितं सखेलतिमिखञ्जनंसरः ॥
द्विजराजिराजितमलज्जयद्भृशं हृदि चिन्तये हरिमहं तपोभुवम् ॥९॥
भवहारिभिः सुमधुरैर्वचोऽमृतैरिहतर्पयन्तमखिलान्निजाश्रितान् ॥
गुणरूपशान्तिविभवादिसागरं हृदि चिन्तये हरिमहं तपोभुवम् ॥१०॥
वलयांगदैसुरभिमाल्यनिर्मितैरवतंसहारनिकरैश्च शेखरैः ॥
करमाल्यगेन्दुकधरं विराजितं हृदि चिन्तये हरिमहं तपोभुवम् ॥११॥

वरमाल्यभूषणसुगन्धलोलुपैर्लसितं भ्रमद्भिरलिभिः सगुञ्जितैः ॥
कृतसामगीतिभिरिवर्षिसूनुभिः हृदि चिन्तये हरिमहं तपोभुवम् ॥१२॥

॥ पुष्पिताग्रावृत्तम् ॥

स्तवनमिदमशर्महारि भद्रहरिपररूपनिरूपणाभिरामम् ॥
इह भुवि शृणुयाच्च यः प्रगायेत्स रतिमियाद्वृषजे हरावुदाराम् ॥१३॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं श्रीहरिस्वरूपवर्णनस्तोत्रं समाप्तम् ॥*

## ८४ ● ॥ भुजंगप्रयातवृत्तम् ॥

महादिव्यलोके सदावीतशोके महामुक्तलोके सहस्त्रार्करोके ॥
सदा शंनिधने त्विशांसन्निदाने सुधासिन्धुपाने सदैकान्तमाने ॥१॥
सदाराजमानं सदा राजमानं सदाराजमानं सदाराजमानम् ॥
सदा दिव्यदेहं सदा दिव्यगेहं सदानन्ददेहं सदा तं भजेऽहं ॥२॥
महादेवदेवं सदाचारसेवं लसद्दिव्यभोगं लसद्दिव्ययोगम् ॥
हृतार्त्ताऽधिरोगं सदात्माऽवियोगं सदानन्ददेहं सदा तं भजेऽहम् ॥३॥
महाकालकालं महामुक्तपालं हृतोन्मोहजालं लसत्तुष्यमालम् ॥
अलंकारशालं रसद्धीरसालं भजद्धीविशालं भजे धर्मबालम् ॥४॥
सदीक्षातिलोलं लसद्दिव्यदोलं श्रयल्लोललोलं वदद्वेदगोलम् ॥

नवीनाब्जनीलं कृतापारलीलं क्षमासारशीलं महाकौलकीलम् ॥५॥
असद्देशिशुलं भजत्सौख्यमूलं स्वभक्तानुकूलं लसत्सद्दुकूलम् ॥
सदात्मीयमेलं सदैकान्तकेलं शिरःश्वेतचेलं भजेऽहं रमेलम् ॥६॥
ककाकाककाकं ककोकाकिकाकां खखाखाखिखीखं खुखूखैखखौखम् ॥
गगागिर्गुगंगुगूगुर्गगोगं घघाघाघघीघं घघूघूघघाघम् ॥७॥
शुभश्रीनिवासे सदामुक्तिवासे महापापनाशे महासुक्तभासे ॥
पुरे दुर्गनाम्नि प्रिये भक्तधाम्नि वसन्तं सुधाम्नि भजे त्वां स्वनाम्नि ॥८॥
स्वरूपाभिरूपं सुधीष्णेयरूपं लसन्नाभिकूपं पतत्पादभूपम् ॥
अरं चारूचारं चलच्चन्द्रहारं महामारमारं धराभारहारम् ॥९॥
कविंयोगसंज्ञं त्वदैश्वर्यसंज्ञं त्वदीयांघ्रियोगं विभो त्वन्नियेगम् ॥
स मां देहि देव प्रभोऽजस्रमेव भजे त्वां दयालोजनान्तश्शयालो ॥१०॥
भजत्षड्भगेशं नमन्नागेशं स्वरूपोपदेशं लसन्नीलकेशम् ॥
असभ्योऽतिदूरं निजानामदूरं दयादानशूरं श्रयत्सौख्यपूरम् ॥११॥
तपोनीलकण्ठं लसत्कम्बुकण्ठं मनोहारिकण्ठं हरिं नीलकण्ठम् ॥
नितान्तावदातं विधीशादितातं भजे भक्तिजातं भुजंगप्रयातम् ॥१२॥

*॥ इति योगानन्दमुनिविरचितं श्रीधर्मनन्दननीलकण्टस्तोत्रं समाप्तम् ॥*

**८५ ● ॥ स्त्रग्धरावृत्तम् ॥ सत्संगिजीवन - मुकुन्दानन्दमुनि**

मत्स्यं कूर्मं वराहं कपिलमथ हरिं वासुदेवं च वैन्यं दत्तात्रेयं च हंसं नरहरिमृषभं वामनं पर्शुरामम् ॥
यज्ञं रामं कुमारं हयशिरसमथो नारदं राजराजं व्यसं कृष्णं च बुद्धं धृतपुरूवपुषं नौमि नारायणं त्वाम् ॥१॥

मत्तगयन्दच्छन्दः ॥ सत्संगिजीवन- मुक्तानन्दमुनि

कौसुमशेखरराजिविराजितभाललसत्तिलकेकलितारे चारूसरोजदलायतचञ्चललोचनमोचितनारे ॥
शोणपटेन कटिं च निबद्धयतदर्पितपाणियुगेऽङ्घधारे स्मेरमुखेऽस्तु मनोऽत्र विभो त्वयि भूरिसुगन्धि मनोहरहारे ॥२॥

शिखरिणीवृत्तम् ॥ सत्संगिजीवन - गोपाळानन्दमुनि

जयश्रीमद्भास्वच्चयरूचिबृहद्धामनिलय प्रभोकारूण्याब्धे जनसुखविधानात्तनूतनो ॥
जय स्वामिनारायणनिजजनानन्दद सदा दृगग्रे रूपं ते प्रतिजनुरिदं ह्येव वसताम् ॥३॥

भुजंगप्रयातवृत्तम् ॥ सत्संगिजीवन-ब्रह्मानन्दमुनि

त्वदीयं मनोहारिरूपं मदीयं मनो मां जहातु क्षणं ह्येतदेव - अनादृत्य लोकं लसच्छेखराले वृतस्त्वं मया मस्तकेनासि बाढम् ॥४॥

द्रुतविलम्बितवृत्तम् ॥ सत्संगिजीवन -आनन्दानन्दमुनि

निखिलभक्तजनैरभितोऽर्चितं विविधनूतनवस्त्रमनोहरम् - रूचिररत्नविभूषणभूषितं हृदि भवन्तमहं निदधे सदा ॥५॥

मत्तमयूरवृत्तम् ॥ सत्संगिजीवन – नित्यानन्दमुनि

किसलयमृदुले पदाम्बुजे ते नीजजनहृत्तिमिरापहारशीले – विलसदशनिनीरजोद्ध्वरेखे नयनयुगं मम पट्पदत्वमेतु ॥६॥

स्रग्विणीवृत्तम् ॥ सत्संगिजीवन –महानुभावानन्दमुनि

केवलं ते कथामेव यः श्रोत्रगां मानवः कोपि कुर्यान्नसोऽपिभ्रमेत् ।
संसृतौ तर्हि साक्षाद्भवन्तं दृशापश्यति सः कुतस्तं भजे त्वां सदा ॥७॥

शार्दूलविक्रीडितवृत्तम् ॥ सत्संगिजीवन शुकमुनिः

नित्यं यो अक्षरधाम्नि दिव्यमहसि त्वत्प्राकृताख्यात्परे गाढाख्यात्तमसः प्रभोऽक्षरपरः श्रीवासुदेवः स्वयम् ।
मुक्तैर्दिव्यवपुर्भिराश्रितपदोऽसंख्यैश्च तेजोमयैरास्ते सत्वमिहासि दीव्यनृतनुर्नारायणाख्योमुनिः ॥८॥
स्वज्ञानप्रथनं च भक्तनयनानन्दं च धर्मावनं कर्तुं ह्यात्तनराकृतौ करूणया स्वीयान्तरारीक्षिति ।
प्रादुर्भावितदिव्यवैभव इह त्वय्येव तस्मिन्मनोलीनं मेऽस्तु सदासिताम्बरधरे श्वेतप्रसूनस्रजि ॥९॥

वियोगिनीवृत्तम् ॥ सत्संगिजीवन आत्मानन्दमुनिः

कृपया परयैव यस्य सद्यो भुवि मूढोऽपि जनो बुधैर्नजेयः – भवतात्यखिलागमैकहेतुं भुवि नारायणमीश्वरं भजे त्वाम् ॥

तोटकवृत्तम् ॥ चैतन्यानन्दमुनि

निदधे हृदये हृदयेशवपुस्तवदेशिकदेशिकहंसवृतम् – मम मा मतिरन्यपदं विपदं भजतां रमतामिह नाथ सदा ॥ ११ ॥

पञ्चचामरवृत्तम् ॥ परमचैतन्यानन्दमुनि

अशेषदुःखभञ्जनं निजान्तरंगमञ्जनम् । विशालनेत्रखञ्जनं नमामि भक्तरञ्जनम् ॥१२॥

पथ्याऽऽर्य्या ॥ शिवानन्दमुनि

नारायण तव चरणं शरणं मम कामपूरणं पुंसाम् । तारण कारण करूणाभरणं शरणागत त्राणम् ॥१३॥

मालिनीवृत्तम् ॥ वासुदेवानन्द मुनि

सकलमुनिजनेशं धर्ममोक्षाब्धिभेशं मखसुखितसुरेशं नाथ मज्जीवितेशम् ।
अनुदितमदलेशं पावितानेकदेशं नटवरसमवेशं त्वां भजे मञ्जुकेशम् ॥ ॥१४॥

पञ्चचामरवृत्तम् ॥ आत्मानन्दमुनि

अधर्महेतुभेदनं प्रकाशितात्मवेदनं सुरैः कृताभिवन्दनं निरीशमार्गनिन्दनम् ।
निजान्तरारितर्द्दनं नमामि मानमर्द्दनं ललाटपीतचन्दनं हरिप्रसादनन्दनम् ॥ ॥१५॥

मालिनीवृत्तम् ॥ पूर्णानन्दमुनि

विशदकुसुममालं पापतापौघकालं रूचिरतिलकभालं भक्तसंघैकपालम् ।
हृतनीजजनिजालं कालमायाकरालं सुखीतपरमरालं त्वां भजे धर्मबालम् ॥१६॥

शिखरिणीवृत्तम् ॥ गुणातातानन्दमुनि

निजानन्दं मंदस्मितमधुरचन्द्राभवदनं दयासिन्धुं शान्तं बहुविधविभूषाश्च दधतम् ।
अनर्घ्यैर्वासोभिर्नटवरसमानच्छविमहं समायातोऽस्मि त्वां शरणमिह नारायणमुने ॥१७॥

यः साक्षाद्भगवान् क्षराक्षरपरः कृष्णः स एव स्वयं भक्तौ धर्मतः आस भूरिकृपया श्रीस्वामिनारायणः ।
मानुष्ये भुवि नाट्यन्निजजनाचार्यत्वधर्मे स्थितः - कृष्णं प्राह परोक्षवन्नतु ततोऽन्यः सोऽस्ति यत्स स्वयम् ॥१८॥

अतिक्षान्त्या दान्त्या मृदुलवचनैश्छादितमहन्निजातर्क्यैश्वर्याद्विलसितनृनाट्याय गुरवे ।
वसानाय श्वेताम्बरयुगलमावार्धियशसे नमस्तस्मै नित्यं हृदि भगवते ध्येयवपुषे ॥१९॥

इति श्रीसत्संगिजीवनोक्ता मुनिकृतास्तुतिः सम्पूर्णा ॥

## ८६ ● ॥ ललितवृत्तम् ॥

जयतितेधिकं जन्मनाव्रजः श्रयतइन्द्रिरा शश्वदत्रहि । दयितदृश्यतांदिक्षुतावकास्त्वयि धृतासवस्त्वां विचिन्वते ॥१॥
शरदुदारये साधुजातसत्सरसिजोदरश्रीमुषादृशा । सुरतनाथ ते शुल्कदासिका वरदनिघ्नतोनेहर्किंवधः ॥२॥
विषजलाप्ययाद्व्यालराक्षसाद्वषाभमारूताद्वैद्युतानलात् । वृषमयात्मजाद्विश्वतो भयादृषभतेवयं रक्षिता मुहूः ॥३॥
नखलुगोपिकानन्दनोभवानखिलदेहिनामन्तरात्मदृक। विखनसार्थितोविश्वगुप्तये सख उदेयिवान्सात्वतांकुले ॥४॥

विरचिताभयंवृष्णिधूर्य ते चरणमीयुषांसंसृतेर्भयात् । करसरोरूहंकान्तकामदं शिरसि धेहिनः श्रीकरग्रहम् ॥५॥
व्रजजनार्त्तिहन्वीरयोषितां निजजनस्मयध्वसनस्मित । भजसखेभवत्किंकरीः स्मनोजलरूहाननंचारूदर्शय ॥६॥
प्रणतदेहिनां पापकर्षणं तृणचरानृगंश्रीनिकेतनम् । फणिफणार्पितं ते पदाम्बुजंकृणुकुचेषु नः कृन्धि हृच्छयम् ॥७॥
मधुरयागिरावल्गुवाक्ययाबुधमनोज्ञयापुष्करेक्षण । विधिकरीरिमा वीर मुह्यतीरधरसिन्धुनाप्याययस्वनः ॥८॥
तव कथामृतं तप्तजीवनं कविभिरीडितं कल्पषापहम् । श्रवणमंगलं श्रीमुदाततं भुवि गृणन्ति ते भूरिदाजनाः ॥९॥
प्रहसितं प्रियप्रेमवीक्षणं विहरणं च ते ध्यानमंगलम् । रहसिसंविदोयाहृदिस्पृशः कुहक नो मनः क्षोभयन्ति हि ॥१०॥
चलसियद्व्रजाच्चारयन्पशून्नलिनसुन्दरं नाथ ते पदम् । शिलतृणांकुरैः सीदतीतिनः कलिलतां मनः कान्तगच्छति ॥११॥
दिनपरिक्षये नीलकुन्तलैर्वनरूहाननं बिभ्रदावृत्तम् । घनरजस्वलंदर्शयन्मुहूर्मनसि नस्मरंवीरयच्छसि ॥१२॥
प्रणतकामदं पद्मजार्चितं धरणिमण्डनंध्येयमापदि । चरणपंकजं शंतमं च ते रमणनस्तनेष्वर्पयाधिहन् ॥१३॥
सुरतवर्द्धनं शोकनाशनं स्वरितवेणुना सुषिट्चुम्बितम् । इतररागविस्मारणं नृणांवितरवीरनस्तेऽधरामृतम् ॥१४॥
अटतियद्भवानन्हिकाननं त्रुटियुगायतेत्वामपश्यताम् । कुटीलकुन्तलं श्रीमुखं च ते जडउदीक्षतां पक्ष्यकृद्दृशाम् ॥१५॥
पतिसुतान्वयं भ्रातृबान्धवानतिविलंध्यतेन्त्यच्युतागताः । गतिविदस्तवोद्गीतमोहिताः कितवयोषितः कस्त्यजेन्निशि ॥१६॥
रहसिसंविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणम् । बृहदुरः श्रियोधामविक्ष्य ते मुहूरतिल्पृहामुह्यतेमनः ॥१७॥
व्रजवनौकसां व्यक्तिरंगते व्रजिनहन्त्यलं विश्वमंगलम् । त्यजमनाक्वनस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनम् ॥१८॥

॥ वसन्ततिलकावृत्तम् ॥

यत्तेजसुजातचरणाम्बुरूहस्तनेषु भीताः शनैः प्रियदधीमहि कर्कशेषु ॥
तेनाटवीमटसितद्व्यथतेनकिंस्वित् कूर्पादिभिर्भ्रमतिधीर्भवदायुषांनः ॥१९॥

*॥ इति गोपिकागीतं सम्पूर्णम् ॥*

**८७ • ॥ अथ वेदस्तुतिः ॥ नर्कुटकंवृत्तम् ॥**

जयजय जह्यजामजित दोषगृभीतगुणांत्वमसि यदात्मना समवरूद्धसमस्तभगः ॥
अगजगदोकसामखिलशक्त्यवबोधक ते क्वचिदजयात्मनाचचरतोऽनुचरेन्निगमः ॥१॥
बृहजुपलब्धमेतदवयन्तयवशेषतया यतउगययास्तमयौविकृतेर्मृदिवा विकृतात् ॥
अतऋषयोदधुस्त्वयि मनोवचनाचरितं कथमयथाभवन्ति भुवि दत्तपदानि नृणाम् ॥२॥
इति तव सूरयस्र्त्यधिपते ऽखिललोककमलक्षपणकथाऽमृताब्धिमवगाह्य तपासि जहुः ॥
क्मुत पुनः स्वधामविधुताशयकालगुणाः परम भजन्ति ये पदमजस्त्र सुखानुभवम् ॥३॥
द्दतयदइवश्वसन्त्यसुभृतो यदि तेऽस्नुविधामहदहमादयोऽण्डमसृजन् यदनुग्रहतः ॥
पुरूषविधोऽन्वयोऽत्र चरमोऽन्नमयादिषु यः सदसतः परं त्वमथयदेष्ववशेषमृतम् ॥४॥
उदरमुपासतेयऋषिवर्त्मसुकुर्प्यद्दशः परिसरपद्धतिं हृदयमारूणयो दहरम् ॥
तत उदगादनन्त तव धाम शिरः परमं पुनरिहयत्समेत्यनपन्तिकृतान्तमुखे ॥५॥

स्वकृतविचित्रयोनिषु विशन्निवहेतुतया तरतमतश्चकास्त्यनवलवत्स्वकृतानुकृतिः ।।
अथ वितथास्वमूष्ववितथं तव धाम समं विरजधियोऽन्वयन्त्यभिविपन्यवएकरसम् ।।६।।
स्वकृतपुरेष्वमीष्वबहिरन्तरसंवरणं तव पुरूषं वदन्त्यखिलशक्तिधृतोंऽशकृतम् ।।
इति नृगतिं विविच्य कवयो निगमावपनं भवत उपासतेऽङ्घ्रिमभवं भुवि विश्वसिताः ।।७।।
दुरवगमात्मतत्त्वनिगमायतवात्ततनोश्चरितमहामृताब्धिपरिवर्त्तपरिश्रमणाः ।।
न परिलषन्तिकेचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसंगविसृष्टगृहाः ।।८।।
त्वदनुपथं कुलायमिदमात्मसुहृत्प्रियवच्चरति तथोन्मुखे त्वयि हिते प्रिय आत्मनि च ।।
नबत रमन्त्यहो असदुपासनयात्महनो यदनुशयाभ्रमन्त्युरूभयेकुशरीरभृतः ।।९।।
निभृतमरून्मनोऽक्षदृढयोगयुजो हृदि यन्मुनय उपासते तदरयोऽपि ययुः स्मरणात् ।।
स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तिधियो वयमपि ते समाः समदृशोऽङ्घ्रिसरोजसुधाः ।।१०।।
कइहनुवेदवतावरजन्मलयोऽग्रसरं यत उदगादृषिर्यमनुदेवगणा उभये ।।
तर्हिनसन्नचासदुभयंनचकालजवः किमपि न तत्र शास्त्रमवकृष्य शयीत यदा ।।११।।
जनिमसतः सतोमृतिसुतात्मनियेचभिदां विषणमृतं स्मरन्त्युपदिशन्तितआरूपितैः ।।
त्रिगुणमयः पुमानितिभिदायदबोधकृता त्वयि नततः परत्र स भवेदवबोधरसे ।।१२।।
सदिवमनस्त्रिवृत्त्वयि विभात्यसदामनुजात्सदभिमृशन्त्यशेषमिदमात्मतयात्मविदः ।।
नहिविकृति त्यजन्ति कनकस्य तदात्मतया स्वकृतमनुप्रविष्टमिदमात्मतयाऽवसितम् ।।१३।।

तवपरियेचरन्त्यखिलसत्त्वनिकेततया त उत पदाक्रमन्त्यविगणय्यशिरोर्निर्ऋते: ।।
परिवयसे पशून्निव गिरा विबुधानपितांस्त्वयि कृतसौहृदा: खलुपुनन्ति न ये विमुखा: ।।१४।।
त्वमकरण: स्वराडखिलकारकशक्तिधरस्तव बलिमुद्वहन्ति समदन्त्यजयाऽनिमिषा: ।।
वर्षभुजोऽखिलक्षितिपतेरिव विश्वसृजो विदधति यत्र ये त्वधिकृता भवतश्चकिता: ।।१५।।
स्थिरचरजातय: स्युरजयोत्थनिमित्तयुजो विहर उदीक्षया यदि परस्य विमुक्तत: ।।
नहि परमस्य कश्चिदपरो न परश्च भवेद्वियत इवापदस्यतव शून्यतुलांदधत: ।।१६।।
अपरिमिताध्रुवास्तनुभृतो यदि सर्वगतास्तर्हि न शास्यतेति नियमो ध्रुवनेतरथा ।।
अजनि च यन्मयं तदविमुच्य नियन्तृ भवेत्सममनुजानतां यदमतं मतदुष्टतया ।।१७।।
घटत उद्‌भव: प्रकृतिपुरूषयोरजयोरूभययुजाभवन्त्यसुभृतो जलबुद्बुदवत् ।।
त्वयि त इमे ततो विविधनामगुणै: परमेसरित इवार्णवे मधुनिलिलियुरशेषरसा: ।।१८।।
नृषुतव मायया भ्रमममीष्ववगत्य भृशंत्वयिसुधियोऽभवे दधतिभावमनुप्रभवम् ।।
कथमनुवर्त्ततां भवभयं तवयद्‌भ्रूकुटि: सृजति मुहुस्त्रिणेमिरभवच्छरणेषु भयम् ।।१९।।
विजितहृषीकवायुभिरदान्तमनस्तुरगं य इह यतन्तियन्तुमतिलोलमुपायखिद: ।।
व्यसनशतान्विता: समपहाय गुरोश्चरणं वणिज इवाजसन्त्यकृतकर्णधराजलधौ ।।२०।।
स्वजनसुतात्मदारधनधामधरासुरथैस्त्वयिसतिकिंनृणां श्रयत आत्मनि सर्वरसे ।।

इतिसदजानतांमिथुनतो रतये चरतां सुखयति कोन्विहस्वविहते खनिरस्तभगे ॥२१॥
भुवि पुरूपुण्यतीर्थसदनान्यृषयोविमदास्तउतभवत्पदाम्बुजहृदोऽघभिदंघ्रिजलाः ॥
दधतिसकृन्मनस्त्वयि य आत्मनि नित्यसुखे नपुनरूपासते पुरूषसारहरावसथान् ॥२२॥
सतइदमुत्थितंसदितिचेन्ननु तर्कहतं व्यभिचरति क्वचक्वच मृषा न तथोभययुक् ॥
व्यवहृतयेविकल्पद्रषितोऽन्धपरंपरया भ्रमयति भारती तउरूवृत्तिभिरूक्थजडान् ॥२३॥
न यदिदमग्र आस न भविष्यदतो निधनादनुमितमन्तरात्वयिविभाति मृषैकरसे ॥
अत उपमीयते द्रविणजातिविकल्पपथैर्वितथमनोविलासमृतमित्यवयन्त्यबुधाः ॥२४॥
सयदजयात्वजामनुशयीतगुणांश्च जुषन् भजति सरूपतांतदनुमृत्युमपेतभगः ॥
त्वमुतजहासि तामहिरिव त्वचमात्तभगो महसि महीयसेष्टगुणिते परिमेयभगः ॥२५॥
यदि न समुद्धरन्ति यतयो हृदि कामजटादुरधिगमोऽसतांहृदिगतोऽस्मृतकण्ठमणिः ॥
असुतृपयोगिनामुभयतोप्यसुखं भगवन्ननपगतान्तकादनधिरूढपदाद्भवतः ॥२६॥
त्वदवगमीनवेत्ति भवदुत्यशुभाशुभयोर्गुणविगुणान्वयांस्तर्हिदेहभृतां च गिरः ॥
अनुयुगमन्वहं स गुणगीतपरंपरया श्रवणधृतो यतस्त्वमपवर्गगतिर्मनुजैः ॥२७॥
द्युपतय एव ते न ययुरन्तमनन्ततयात्वमपियदन्तराण्डनिचया ननु सावरणाः ॥
खइवरजांसि वान्तिवयसा सह यच्छ्रुतयस्त्वयिहि फलन्त्यतन्निरसनेन भवन्निधनाः ॥२८॥

*॥ इति वेदस्तुति समाप्ता ॥*

## ८८ • ॥ वियोगिनीवृत्तम् ॥

मुनिवर्यकृताभिवन्दनं बहुजन्मार्जितपुण्यदर्शनम् । शिवदंहरिकृष्णनन्दनं रघुवीरं प्रणमामि सद्गुरूम् ॥१॥
जनमोक्षविधित्सयापरं प्रददौ धर्मसुतः स्वविष्टरम् । तमधर्मतमः प्रभाकरं रघुवीरं प्रणमामि सद्गुरूम् ॥२॥
भवब्रह्ममुखाधिपः स्वयं हरिराचार्यपदं ददेऽभयम् । हरिभक्तसुरक्षणाश्रयं रघुवीरं प्रणमामि सद्गुरूम् ॥३॥
मनुजाकृतिमक्षराधिपं भजमानंनिजभक्तसत्कृपम् । भुवि धर्मधुरंधराधिपं रघुवीरं प्रणमामि सद्गुरूम् ॥४॥
शरणागतदोषणं धृतमुक्ताफलहेमभूषणम् । स्थलजोत्पलहारहारिणं रघुवीरं प्रणमामि सद्गुरूम् ॥५॥
मदनादिरिपुप्रणाशनं निजताताक्षरधामयापनं । भवमृत्युभयप्रमोचनं रघुवीरं प्रणमामि सद्गुरूम् ॥६॥
धरणीधरधैर्यधारिणं धृतगाम्भीर्यगुणादिभूषणम् । वशमानसमत्तवारणं रघुवीरं प्रणमामि सद्गुरूम् ॥७॥
असुरांशगुरूप्रतापनं विजिताद्वैतमतोग्रवादिनम् । उरूभूपवरैः कृतार्चनं रघुवीरं प्रणमामि सद्गुरूम् ॥८॥
अघकृज्जनजातदण्डनाद्यमराजादिविरामदायिनम् । शिवदं नतिमात्रकुर्वता रघुवीरं विदधामि वन्दनम् ॥९॥
हरिकृष्णपदाम्बुजाश्रयैर्मुनिवर्यैर्गृहिभिर्जितेन्द्रियैः । सदसीन्दुमिवोडुभिर्वृतं प्रणमे श्रीरघुवीरदेशिकम् ॥१०॥

॥ मालिनीवृत्तम् ॥

जगति जनसमाजं भुक्तिमुक्त्येकहेतुर्वृषसुतहरिकृष्णो यत्प्रसादात्प्रसन्नः ॥
स जयति रघुवाराचार्यवर्यो जगत्यां स्तवनमिति तदीयं कृष्णदत्तप्रणीतम् ॥११॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं श्रीहरिकृष्णनन्दनवन्दनस्तोत्रम् ॥*

## ८९ • ॥ अथ ध्यानस्तोत्रं प्रारभ्यते ॥ अनुष्टुपछन्दः ॥

वासुदेवं नमस्कृत्य तेजः पुंञ्जनिवासिनम् । भक्तानां ध्यानबोधाय वदामि ध्यानमंगलम् ॥१॥

॥ वसन्ततिलकावृत्तम् ॥

धर्मात्मजे भगवते प्रतिलब्धभक्त्या सक्तिगते मनसि मंगलमूर्त्तिकृष्णे ॥
भक्तेन नैजहृदये पृथगेकमेकमंगंमुदास्य पदपद्मतलादिचिन्त्यम् ॥२॥

रम्ये मनोनयनगोचर एव जाते स्वीये हृदि ह्यपवने पृथगेएके ॥
पारिप्लवं चिरमपि स्थिरमाशु कार्यं ते न व्रजन्ति निधनं किलतन्मलौघाः ॥३॥

वज्राब्जकेतुयवजम्बुफलोर्द्ध्वरेखास्वस्त्यष्टकोणलसदंकुशचिन्हमस्य ॥
व्योमत्रिकोणकलशार्द्धशशांकचापगोपादमत्स्ययुतमंघ्रितलं च चिन्त्यम् ॥४॥

अभ्युन्नतारूणनखेन्दुसुचन्द्रिकाभिर्भिन्नस्वचिन्तकमहाहृदयान्धकारम् ॥
अत्युल्लसत्क्रमलघुद्युतिमन्नखाभिश्चिन्त्यंतदंगुंलिभिराहृतपल्लवश्रि ॥५॥

आत्मीयभक्तमनसामुरूहर्षणार्थं ध्यानास्पदं च धृतनूपुरसाररम्यम् ॥
स्वप्राप्तभक्तजननेत्रसुवृत्तिचोरं पुंसा चिरं पदयुगं हृदि चिन्नीयम् ॥६॥

जंघेसुवर्तुलंशुभेमृदुलेऽथ जानू वृतौ ततानुभजतां भजनीयमूर्त्तेः ॥
नागेन्द्रकान्तकरसन्निभमेकपीनं पुंसासुसक्थियुगलं हृदि चिन्त्यमस्य ॥७॥

दिव्यातिसूक्ष्मघनशुभ्रविशालदीर्घवासोलसत्कनककाञ्चिकलापयुक्तम् ॥
चिन्त्यं चिरं पृथुलमस्य कटिद्वयं च सद्धर्मरक्षणधियात्र ग्रहीतमूर्तैः ॥८॥
गम्भीरसभ्रमसमोत्तमनाभिकूपमम्भोजपत्रविलसत्सुवलित्रयं च ॥
आनाभिलम्बविशदोत्तमपुष्पहारकान्त्याऽस्य गौरमुदरं हृदि चिन्तनीयम् ॥९॥
मल्लीलसद्विशदशान्त सुगन्धिपुष्पहारारूणस्थलरूहोत्तमहाररम्यम् ॥
तुंगं समं सुविपुलं हृदयं विचिन्त्यं चञ्चद्धरिन्मणिवरस्तनयुग्ममस्य ॥१०॥
भ्राजद्धिरण्यमयकंकणकान्तिकान्तौ चिन्त्यौकरौ स्थलरूहारूणरोचिसौच ॥
बाहूविशूद्धपुरचांगदशोभमानौ रम्यौ द्दढौ हृदि विभोरभवस्य पुंसा ॥११॥
ध्यानादिनिर्मलहृदा हृदयेऽस्य चिन्त्यो नानाविधाभमणिमौक्तिकमालिकण्ठः ॥
श्रीमच्छरज्जनविनोज्वलकान्तिपूर्णचन्द्रोपमं मुखमिहास्य जनेन चिन्त्यम् ॥१२॥
मन्दस्मितप्रसरदुज्ज्वलदन्तकान्तिविद्योतमानसितगण्डयुगं च चिन्त्यम् ॥
उत्फुल्लसारनवनीरजपत्रदीर्घ नेत्रद्वयं तरलमस्य मनोहरस्य ॥१३॥
कर्णद्वयं पुरकुण्डलमण्डलाभं भालन्तु केसरमयोर्द्धतमालपत्रम् ॥
तुंगं विशालमुरूरम्यमुदारकीर्त्तेः कीर्त्यस्वनामचरितस्य जनेन चिन्त्यम् ॥१४॥
भ्रूवल्लीमण्डलमुदारमजस्रमस्य श्रीकृष्णभक्तजनमण्डलमंगलया ॥
दैत्याद्यमंगलकृते कृतमत्र वक्रं स्वीयेच्छया च ललितं हृदि चिन्तनीयम् ॥१५॥

नासिकान्तिकेऽसिततिलोत्तमलक्ष्य दक्षेगण्डेऽस्य मंगलकरं कमनीयमस्ति ॥
दक्षेतरश्रुतिपुटेऽसितबिन्दुरस्ति सद्भक्तिनातिमनसा हृदि चिन्तनीयः ॥१६॥
नानाप्रसूनवरशेखरराजिराजदुष्णीषमस्य च शिरो हृदि चिन्तयित्वा ॥
एवं सदा वदनपंकजमेव चिन्त्यं श्रीभक्तिधर्मतनयस्य सुचिन्तकेन ॥१७॥

॥ प्रहर्षणीयवृत्तम् ॥

इत्थं ये प्रतिदिनमेव चिन्तयन्ति कृष्णं तज्जगति जना यशः प्रपद्य ॥
देहान्तेऽविचलपदं व्रजन्तितेऽस्य कृष्णस्य क्षतमदना महाप्रकाशम् ॥१८॥

*॥ इति योगानन्दमुनिप्रणीतं श्रीहरिध्यानस्तोत्रं सम्पूर्णम् ॥*

## ९० ● ॥ अतिरूचिरावृत्तम् ॥

महोत्सवे निजजनवृन्दसंमुदे परिस्फुरत्पुरटमयानि बिभ्रतम् ॥
वराम्बराण्युरूतरकान्तिभास्वरं विचिन्तये सुकृतभुवं हरिं सदा ॥१॥
प्रदीप्तिमन्मणिवसुहारमुद्रिकासुकर्णिकांगदवलयैर्विराजितम् ॥
महोपलामलकलधौतमौलिना विचिन्तये सुकृतभुवं हरिं सदा ॥२॥
ऋजूर्ध्वकंरूचिकरकेसरोल्लसद्विशेषकं सपिशुनमध्यचन्द्रकम् ॥
ततायते दधतमुरूतमेऽलिके विचिन्तये सुकृतभुवं हरिं सदा ॥३॥
समश्रवोवरतरमाल्यगुच्छकं सितेतरभ्रूकुटिधनुर्विराजितम् ॥

स्मितप्रभालसितकपोलमण्डलं विचिन्तये सुकृतभुवं हरिं सदा ॥४॥
सुनासिकाजितशुकचञ्चुदीपकं सितस्मितद्युतिपरिभासिताधरम् ॥
रदच्छदच्छविजितबिम्बपल्लवं विचिन्तये सुकृतभुवं हरिं सदा ॥५॥
रदप्रभापरिजितकुन्दकोरकं प्रशान्तिकृद्भवभयहृद्विलोकनम् ॥
वचःसुधारसपरिपोषिताश्रितं विचिन्तये सुकृतभुवं हरिं सदा ॥६॥
विल्लज्जिताम्बुजमृगमीनखञ्जनस्रवत्कृपामृतनयनं मनोरमम् ॥
मुखश्रियाजितरजनीशनीरजं विचिन्तये सुकृतभुवं हरिं सदा ॥७॥
लसद्गलेललिततरां ललन्तिकांस्फुरत्प्रभां दधतमुरूत्तमांसकम् ॥
वराभये भजयुगले च विभ्रतं विचिन्तये सुकृतभुवं हरिं सदा ॥८॥
सुलक्ष्मवत्प्रवरविशालवक्षसं वरोदरंललितवलित्रयप्रभम् ॥
गंभीरसभ्रमशुभनाभिशोभितं विचिन्तये सुकृतभुवं हरिं सदा ॥९॥
वितर्ज्जितद्विरदकरोरूभास्वरं मृदुस्फुरन्मुकुरसुवृत्तजानुकम् ॥
समुल्लसत्क्रमपृथुजंघमञ्चितं विचिन्तये सुकृतभुवं हरिं सदा ॥१०॥
यवांकुशाशनिशकुलेन्दुजाम्बवध्वजार्ज्जुनीपदकलशाम्बुजादिभिः ॥
सुलक्ष्मभिर्लसितपदाम्बुजद्वयं विचिन्तये सुकृतभुवं हरिं सदा ॥११॥

*॥ इत्यचिन्त्यानन्दवर्मिविरचितं धामिश्रीहरिध्यानस्तोत्रम् समाप्तम् ॥*

## ९१ ● ॥ तोटकवृत्तम् ॥

दययाह्वावनी नरनाट्यकरं मुनिमण्डलरञ्जनवेशधरम् ॥
शुभदं भजतां नितरां शरणं तमहं वृषजं सततं विभजे ॥१॥
वरतुंगनखेन्दुलसच्चरणं समवर्तुलजानुं सुसक्थियुगम् ॥
रूचिराजितकोमलवस्त्रकटिं तमहं वृषजं सततं विभजे ॥२॥
उर आश्रितपार्षदचित्तहरं शुचिकंकणभूषितदीर्घभुजम् ॥
त्रिवलित्रयतुन्दमनोज्ञतनुं तमहं वृषजं सततं विभजे ॥३॥
धृतसुन्दरमौक्तिकहारगलं श्रुतिकुण्डलमण्डितगण्डयुगम् ॥
मुखपंकजदन्तसुकुन्दकलि तमहं वृषजं सततं विभजे ॥४॥
दधतं शिरसिप्रवरं मुकुटं ललितेक्षणरञ्जितभक्तजनम् ॥
निजचिन्तकपातकदुःखहरं तमहं वृषजं सततं विभजे ॥५॥
सुखसागरदीनदयालुंहरिं कमलासनशंकरशेषसुरैः ॥
बहुवन्दितसुन्दरपादतलं तमहं वृषजं सततं विभजे ॥६॥
रटनाभ्यसनैः सुलभं मतिदं यमपाशविमोचितजीवगणम् ॥
परिपालितमञ्जुलवेदपथं तमहं वृषजं सततं विभजे ॥७॥

भवसिन्धुनिमग्नजनौघतरीं कलिदोषनिवारकभक्तपतिम् ॥
वचनामृततर्पितवर्णिमुनिं तमहं वृषजं सततं विभजे ॥८॥

*॥ इति त्यागानन्दवर्णिकृत ध्यानाष्टकं सम्पूर्णम् ॥*

## ९२ ● ॥ वैतालीयवृत्तम् ॥

जनपातकहारिणीं हरे जनतामेत्य तवात्र तत्पराम् । विरहानलहैमसन्निभां तव तां मा तनुमीश दर्शय ॥१॥
निजलोकविलोकनोत्सुक सदय प्रेमवतीतनूजने पथि । लोकविलोकितागमां तव तां मां तनुमीश दर्शय ॥२॥
जगतीपतिराजमण्डलैर्ललितैश्चञ्चलवाजिराजिकैः । रविरश्मिविभासितायुधैस्तव तां मा तनुमीश दर्शय ॥३॥
परितः पथि नाथवेष्टितां नगदुर्गस्थपतीन्दुनायकैः । तुरगोचितवेशपेशलां तव तां मा तनुमीश दर्शय ॥४॥
दधतीमिहवर्णिरूपतां बहुसद्धामवतीं गतिं सताम् । व्रतपुण्यतपः फलंपरां तव तां मा तनुमीश दर्शय ॥५॥
पदवीमनपायिनीं निजां गमयन्तीं जनतां निजाश्रिताम् । विधिशंभुमुखाधिदेवतां तव तां मा तनुमीश दर्शय ॥६॥
पदतर्ज्जितपंकजश्रियंसकलंकेन्दुतनुश्रिया समम् । अविधेयमुखोपमानतां तव तां मा तनुमीश दर्शय ॥७॥
स्थलपद्मरूचं च बिभ्रतीं करयुग्मेन भृशं दृशःश्रियम् । कुरूतत्तनुतां न मे दृशि तव तां मा तनुमीश दर्शय ॥८॥

*॥ इति योगानन्दमुनिकृतविरहाष्टकं सम्पूर्णम् ॥*

## ९३ ● ॥ ववितछन्दः ॥

मदनखण्डने धर्ममण्डने परममंगले पुण्यवर्धने । दुरितभञ्जने भक्तरंजने वसतु मे मतिधर्मनन्दने ॥१॥
भुवनकारणे भक्ततारणे प्रणतपोषणे दोषशोषणे । निगमदोहने दैत्यमोहने वसतु मे मतिधर्मनन्दने ॥२॥
भुजगवर्त्तुले जानुलंबने भुजयुगेंगदे भक्तसंमुदे । दधतिरूक्मजेरत्नराजिते वसतु मे मतिधर्मनन्दने ॥३॥
वदनतर्जितश्रीहिमांशुके सिततरांशुके स्वर्णमेखले । कनककंकणेकम्रवर्णने वसतु मे मतिधर्मनन्दने ॥४॥
शिरसि शेखरान् कौसुमोत्तमान्भ्रमरगुञ्जितान्भूषिताम्बरान् । दधति कुण्डले कर्णमण्डले वसतु मे मतिधर्मनन्दने ॥५॥
दधतिमालिकां मौक्तिकीं गले विशदभासिनीं नाभिलम्बनीम् । विदधतीं सभां श्वेततां सतां वसतु मे मतिधर्मनन्दने ॥६॥
सुरसरित्पयः स्रोतसी यदा पृथगुभे तु खे पातिनी तदा । तदुपमेयसन्नीलवक्षसि वसतु मे मतिधर्मनन्दने ॥ ७
वदति संसदि ब्रह्मभारतीं विबुधवन्दितामुत्तमांगणे । मतिमतां सतामग्रतोमुदा वसतु मे मतिधर्मनन्दने ॥८॥

*॥ इति योगानन्दमुनिकृतं द्वारिकेशाष्टकं समाप्तम् ॥*

## ९४ ● ॥ वंशस्थवृत्तम् ॥

अथैकदा धर्मधुरंधरो हरिस्तपः क्रियांविस्मितततापसो मुनिः ॥
वने वसन्नैष्ठिकवेशसुन्दरः स वर्णिराजोऽवतु मामधर्मतः ॥१॥
नवाम्बुदश्यामलरस्यविग्रहो व्रतोपवासैरतितापसैः कृशः ॥
निजेष्टयोगाचरणो जितेन्द्रियः स वर्णिराजोऽवतु मामधर्मतः ॥२॥

पिंशंगमौञ्जीरमणीयमेखलां कटीतटे नीलमणिप्रभेदधत् ॥
जटाच्छटामण्डितदिव्यमस्तकः स वर्णिराजोऽवतु मामधर्मतः ॥३॥
धृतोपवीताजिनरम्यमालिकाकमण्डलुः स्कन्धनिषक्तपुस्तकः ॥
वलक्षकौपीनपटोटवीरूचिः स वर्णिराजोऽवतु मामधर्मतः ॥४॥
ललाटमध्योर्द्धसचन्द्रचन्दनः शिरोधरायांतुलसीन्धनस्रजम् ॥
दधत्सुजाताम्बुजपत्रलोचनः स वर्णिराजोऽवतु मामधर्मतः ॥५॥
सदैकरूपात्मविलोकने रतस्तपोनिधिर्बालमुकुन्दपूजने ॥
समीहमानोऽनुसवं मुदा युतः स वर्णिराजोऽवतु मामधर्मतः ॥६॥
वराहशार्दूलमहामृगोरगैर्मतंगजैः केसरिभिश्च संकुले ॥
वनेऽपिबालो विचरन्महामतिः स वर्णिराजोऽवतु मामधर्मतः ॥७॥
तपस्विसिद्धैर्नकपादपंकजः सुपूजितो योगकलाविदांवरः ॥
तपोधनः कन्दफलाशनो वशी स वर्णिराजोऽवतु मामधर्मतः ॥८॥

*॥ इत्याचिन्त्यानन्दवर्णिविरचितं श्रीहरिप्रार्थनाष्टकं समाप्तम् ॥*

## ९५ ● ॥ वसन्ततिलकावृत्तम् ॥

श्रीकृक्मिणीरमणरम्यमुखारविन्द श्रीकृष्ण शंकरविधीन्द्रसुरादिवन्द्य ॥
सद्धर्मभक्तिपरमाश्रयपुण्यकीर्ते श्रीद्वारिकेश वरदो भव मे प्रसन्नः ॥१॥

त्वं भक्तसंघमवितुं स्वकमासुरेभ्यो दोर्भिर्दधद्दरगदारिसरोरूहाणि ॥
नित्यं विराजस इहाऽखिलशक्तिनाथ श्रीद्वारिकेश वरदो भव मे प्रसन्नः ।।२।।
वस्त्राहृतौ द्रुपदपुत्रिकया स्मृतस्त्वं श्रमञ्चमाशु परिहाय च तामुपेत्य ॥
दत्वांशूकानि बहुधा ह्रियमाविथाफस्या श्रीद्वारिकेश वरदो भव मे प्रसन्नः ।।३।।
तस्या अनन्यनिजभक्तिजुषः सभायां केशग्रहं कुरूकृतं च न मृष्यमाणः ॥
तत्स्त्रीर्हतेशपरिमुक्तकचाश्चकर्थ श्रीद्वारिकेश वरदो भव मे प्रसन्नः ।।४।।
दुर्वाससो विपदिपाण्डुसुतान्निमग्नानुद्धर्त्तुमाशुनिरूपानदगा अरण्यम् ॥
भक्तप्रियस्य तव तस्य भवामि दासः श्रीद्वारिकेश वरदो भव मे प्रसन्नः ।।५।।
भामामनोरथमपि प्रतिपूरयंस्त्वं जित्वा सुरेन्द्रममरैः सह नाकलोकात् ॥
पुर्यामिहाऽऽनयिथनाथितपारिजातं श्रीद्वारिकेश वरदो भव मे प्रसन्नः ।।६।।
वैरावबद्धकुटिलभ्रुकुटीक्षमाणान् शस्त्रै घ्नतोऽपि शपतो बहुधाऽतिद्रष्टान् ॥
दैत्यानपित्वमनयः स्वपदं दयालो श्रीद्वारिकेश वरदो भव मे प्रसन्नः ।।७।।
संप्राप्यते धनिभिरेव न रंकपुम्भिस्त्वन्मूर्त्तिदर्शनसुधेति न वक्तुमर्हम् ॥
निष्किञ्चनप्रिय इति प्रथिते त्वयीश श्रीद्वारिकेश वरदो भव मे प्रसन्नः ।।८।।
ज्ञानादिरत्ननिचयं धृतवानसि त्वं भूमौ जनोपकृतये निजमुद्धवेवै ॥
तन्मार्गमेव सततं भजतेऽत्र मह्यं श्रीद्वारिकेश वरदो भव मे प्रसन्नः ।।९।।

अन्तःस्फुरत्कलिमलामरमर्त्यदैत्यदूरस्थितेरनुगतत्रियुगाभिधान ॥
संसारतप्तशरणागतजीवनाथ श्रीद्वारिकेश वरदो भव मे प्रसन्नः ॥१०॥

॥ स्रग्धरावृत्तम् ॥

ध्यायामि द्वारिकेशं धृततनुदशकं नव्यनीलोत्पलाभं, धर्मध्रुग्दैत्यकालं निजजनसुखदं दक्षिणे दोष्णिचक्रम् ॥
दीर्घेवामे च शंखं दधतमिषुधनुश्चर्मखड्गादिशोभं श्रीकृष्णं हेतुहेतुं द्विभुजमतिदयं रूक्मिणी कान्तमीशम् ॥११॥

*॥ इति श्रीद्वारिकानाथष्टकं सम्पूर्णम् ॥*

## ९६ • ॥ वसन्ततिलकावृत्तम् ॥

श्रीधर्मनन्दनदयालयदिनबन्धो सद्धर्मसाधुजनरक्षणतत्परेश ॥
संसारसिन्धुपतितोत्तरणावलम्ब कामाद्धि मां त्वमव नैष्ठिकनीलकण्ठ ॥१॥
कामादिदोषदमनप्रथितप्रताप पाखण्डपापपुरूखण्डनपुण्यपुष्टे ॥
धर्मिष्ठदेवमुनिमण्डललालितांघ्रे कामाद्धि मां त्वमव नैष्ठिकनीलकण्ठ ॥२॥
योगेश्वराव्ययविभोऽम्बुदादिव्यमूर्ते निर्दम्भभक्तजनवल्लभवर्णिवेश ॥
क्लेशापहारक हरे करूणार्द्रदृष्टे कामाद्धि मां त्वमव नैष्ठिकनीलकण्ठ ॥३॥
सत्यव्रतप्रियतपः प्रियसाधुशील सच्छास्त्रसाररसोपोषितसाधुलोक ॥
सत्यस्वरूपनिजदर्शनदानदायिन् कामाद्धि मां त्वमव नैष्ठिकनीलकण्ठ ॥४॥

सर्वोपकारक सदाश्रयणीयशिक्ष ब्रह्मेशशेषसुरनायकगीतकीर्ते ॥
स्वर्गोपवर्गपदवीपदपादपद्म कामाद्धि मां त्वमव नैष्ठिकनीलकण्ठ ॥५॥
संतोषसाम्यशमकौशलकान्तिकीर्ते क्षान्त्यार्जवोपरतिमार्दवधैर्यजुष्ट ॥
स्वातन्त्र्यशौचदमदानगुणाद्युपेत कामाद्धि मां त्वमव नैष्ठिकनीलकण्ठ ॥६॥
पूर्णावतारपुरूषोत्तमपुण्यबोध बुद्धिप्रकाशकसदास्तिकसत्यवादिन् ॥
यज्ञोपवीतयुतयोगकलाप्रवृत्त कामाद्धि मां त्वमव नैष्ठिकनीलकण्ठ ॥७॥
सत्यप्रतिज्ञसुखसागरशोकहारिन् हे कृष्ण हे कमललोचन हे परात्मन् ॥
हे भक्तनाथ भवमोचननामधेय कामाद्धि मां त्वमव नैष्ठिकनीलकण्ठ ॥८॥

*॥ इति योगानन्दविरचितं श्रीधर्मनन्दनप्रार्थनाष्टकं समाप्तम् ॥*

## ९७ ● ॥ रथोद्धतावृत्तम् ॥

जीवलोककरूणामहोदधे सर्वमंगलमंगलायते । त्वद्वियोगसहनं न जायते स्वामिनाथ तव देहि दर्शन् ॥१॥
चारूलोचनविलोचनोचितं श्रीमुखंतवनिरीक्षितुं हरे । मन्मनस्त्वरयते समुत्सुकं स्वामिनाथ तव देहि दर्शन् ॥२॥
मीनवृन्दमिव नीरवर्जितं चातकालिरिव नीरदं विना । त्वां दिद्दक्षुरहमस्मि काद्दशः स्वामिनाथ तव देहि दर्शन् ॥३॥
नाथयद्यपि जगन्निरन्तरं व्याप्य पूर्णवपुषा विराजसे । शान्तिमेतनतथापि मानसं स्वामिनाथ तव देहि दर्शन् ॥४॥
त्वां विना सकललोकमण्डलं कामलोभमयदाववह्निना । दह्यमानमवलोकये भृशं स्वामिनाथ तव देहि दर्शन् ॥५॥

शामये तव गुणानुवादतो मानसं प्रकटदर्शनोत्सुकम् । सोपितत्त्वरयते करोमि किं स्वामिनाथ तव देहि दर्शन् ॥६॥
त्वत्पदाम्बुजपरायणैरहं संगतोऽपि भवतोदिद्दक्षया । प्रापितोऽस्मि बत दुःसहाशमं स्वामिनाथ तव देहि दर्शन् ॥७॥
भक्तलोकमनसेप्सितं सदा दातुमेव हि विभुः स्वयं भवान् । दीनयाचितमिदं निरन्तरम् स्वामिनाथ तव देहि दर्शन् ॥८॥

*॥ इति दीनानाथभट्टकृतं दर्शनाष्टकम् ॥*

## ९८ ● ॥ ललितच्छन्दः ॥

जलदसुन्दरे वासनाहरे दलितदूषणे धर्मभूषणे । कलितचन्दने भक्तवन्दने वसतु मे मनो धर्मनन्दने ॥१॥
वनजलोचने पापमोचने तरणिरोचने वीतशोचने । स्वजनरञ्जने दुःखभञ्जने वसतु मे मनो धर्मनन्दने ॥२॥
मदनमारणे शास्त्रधारणे कलिनिवारणे दोषहारणे । भयनिवासने दैत्यशासने वसतु मे मनो धर्मनन्दने ॥३॥
सकलनायके मोक्षदायके प्रणतपालके कालकालके । स्वजनमण्डने मानखण्डने वसतु मे मनो धर्मनन्दने ॥४॥
पतितपावने भक्तभावने धवलवासने मन्दहासने । कुसुमकंकणे रूक्मकंकणे वसतु मे मनो धर्मनन्दने ॥५॥
कुमतिनाशने बुद्धिदासने मुनिनिवासने पीतवासने । कनककुण्डले वक्रकुन्तले वसतु मे मनो धर्मनन्दने ॥६॥
विधृतपुष्करे दिव्यचामरे रिपुभयंकरे मुक्तशंकरे । सकलतारणे मोहहारणे वसतु मे मनो धर्मनन्दने ॥७॥
स्वजनरोधने शीघ्रसाधने शुभनिकेतने रम्यवेष्टने । जगतिमंगले मुक्तसंकुले वसतु मे मनो धर्मनन्दने ॥८॥

*॥ इति योगानन्दमुनिकृतप्रार्थनाष्टकं समाप्तम् ॥*

## ९९ • ॥ शार्दूलविक्रिडिमवृत्तम् ॥

स्वीयेधाम्निसदाऽक्षरे परतरेसंसेवितांघ्रिद्वयो भक्तैर्ब्रह्मशरीरिभिर्य उरूधा वेदान्तवेद्यः प्रभुः ॥
नैकाण्डोद्भवपालनादिकरपुंमायानियन्ता स्वराट् कारूण्याम्बुनिधिर्नमामितमहं श्रीस्वामिनारायणम् ॥१॥

॥ उपजातिवृत्तम् ॥

तं भक्तिधर्मात्मजमीश्वरेशं समाश्रितैरत्रजनैस्ततोयत् ॥
संप्रार्थनीयं प्रतिवस्त्रमस्तिलिखामि तेषां सुखबुद्धयेतत् ॥२॥

॥ अनुष्टुप्छन्दः ॥

श्रीहरेत्वत्स्वरूपस्य निश्चयो निर्विकल्पकः । यउत्तमोस्तिसर्वेभ्यो निश्चयेभ्योऽपिदेहितम् ॥३॥
सम्बन्धत्तवमूर्तेर्यत्सुखं सर्वोत्तमं प्रभो । तदेवदेहिमे स्वामिन् नान्यत् क्वापिसुखाम्बुधे ॥४॥
त्वदाकारंविनायेस्युरत्राकारास्तुमायिकाः । ते भवन्त्वतितुच्छाश्चदुःखरूपाभृशं हरे ॥५॥
माहात्म्यज्ञानयुक्ताया भक्तिरेकान्तिकीतव । सर्वोत्तमास्ति तां देहि मह्यंत्वं भक्तिनन्दन ॥६॥
अस्यांभक्तावन्तरायो महान्सर्गोह्यधर्मजः । कामलोभादिरूपो यस्तस्माद्रक्षां विधेहि मे ॥७॥
अस्यां सहायकर्ताच धर्मसर्गोस्ति यो महान् । ज्ञानवैराग्यादिरूपस्तस्मिन्देहि दृढांस्थितिम् ॥८॥
तवैकान्तिकभक्तानां त्वत्प्रियाणांहि सर्वदा । स्वामिनसमागमं देहि याचितं स र्वसज्जनैः ॥९॥
येऽत्रस्युः शुष्कवेदान्तिकौलनास्तिककुण्डकाः । तेषांसंगोयथा क्वापिनस्यात्कुरूकृपांतथा ॥१०॥

ममत्वद्भक्ततायं च दोषः कश्चनकर्हिचित् । केनापिविधिनानाथनाऽवशेष्यस्त्वया प्रभो ॥११॥
भवतो भवदीयानां भक्तानां च कदाचन । द्रोहो नैव भवेत्स्वामिन् देहिमद्याचितंत्विति ॥१२॥
त्वत्पदाम्बुजसेवेच्छांविनाऽन्यस्यापि कस्यचित् । वस्तुनो वासना नैवशिष्यात्कुरूकृपामिति ॥१३॥
अहंबुद्धिः स्वदेहेषुममतादैहिकेषुच । माऽस्तुसाऽस्तुसर्वथैवतवैकान्तिकसत्सुहि ॥१४॥
आत्मनाब्रह्मरूपेणस्नेहः सर्वाधिकः प्रभो । विलसत्यऽक्षरेधाम्नित्वयिस्ताद्धर्मनन्दने ॥१५॥
तवदासानुदासं च स्वसमीपेऽभिरक्ष माम् । दर्शनं देहिमेऽभीष्टं भक्तैरेकान्तिकैः सदा ॥१६॥
भक्तिधर्मात्मजहरे शृणु त्वं भक्तवत्सल । संपादयगुणानेतानस्तुत्वा नत्वा मयार्थितान् ॥१७॥

॥ उपजातिवृत्तम् ॥

पूजांहरेरन्वहमाशुकृत्वाप्रार्थ्यर्तदीयैरिदमेव भक्तैः । हित्वाप्रमादं च तथैववर्त्तितुं यत्नो विधेयः परमादरेण ॥१८॥

*॥ इति शुकानन्दमुनिविरचिता श्रीहरिप्रार्थना समाप्ता ॥*

## १०० ● ॥ ललितवृत्तम् ॥

शुभतपोजनेदूषणक्षतेविमलदुद्रते दत्तसद्गते । क्षतनिजावृते सत्कृतानते स्मरदवात्सदा पाहि मां हरे ॥१॥
विनयसुक्षमाज्ञानशीलताप्रभृतिसद्गुणस्वायतां बुधे । जगदधीशितः सज्जनावितः स्मरदवात्सदा पाहि मां हरे ॥२॥
नतजनव्रजध्वस्तसंसृते दुरितहृच्छ्रुतेमंगलस्तुते । निजमहोदूतस्वाश्रितोर्वरे स्मरदवात्सदा पाहि मां हरे ॥३॥
श्रितविपद्धतेतापहस्मृतेमृदुहिताहृतेधर्मिसत्कृते । परतराकृतेसाध्वलंकृते स्मरदवात्सदा पाहि मां हरे ॥४॥

सुखमहोदधेसन्महोनिधेप्रियगतोपधेमुक्तिकृद्विधे । पदनमद्विधेज्ञानिसन्निधे स्मरदवात्सदा पाहि मां हरे ॥५॥
बहुलविस्मितेसत्पथस्थिते श्रितिवचोमितेवादकृज्जिते । तनुमहस्ततेशीघ्रसद्गते स्मरदवात्सदा पाहि मां हरे ॥६॥
रतिवदेषितोदुष्टशासितो द्रुतरतीशितः सत्सभाशितः । श्रितसमीक्षितः प्राप्तरक्षितः स्मरदवात्सदा पाहि मां हरे ॥७॥
विहितनिर्वृतेस्वाश्रिताभृते कृतसदाद्दतेधर्मसंधृते । विशदसद्व्रते भीहृदानते स्मरदवात्सदा पाहि मां हरे ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं श्रीहरि प्रार्थनाष्टकम् ॥*

## १०१ ● ॥ उपजातिवृत्तम् ॥

सदाप्रशान्ताकृतिशोभनीयदयानिधे केशवमाधवाद्य । विश्वेशनारायणनीलकण्ठ कामं दहन्मे हृदितिष्ठ कृष्ण ॥१॥
अधर्मदैत्यादिवरूथकाल गोविप्रधर्मामरनित्यपाल । एकान्तभक्तप्रियशान्तशील कामं दहन्मे हृदितिष्ठ कृष्ण ॥२॥
विश्वोद्भवस्थाननिरोधहेतोसौम्यस्वभावामितमार्दवाद्य । योगेशशश्वन्निगमादिवेद्य कामं दहन्मे हृदितिष्ठ कृष्ण ॥३॥
भवाब्धिमग्नोध्धृतिपादपोत शरत्सरोजाननचारूनेत्र । प्रसन्नकामाऽऽहरणप्रताप कामं दहन्मे हृदितिष्ठ कृष्ण ॥४॥
सद्धर्मपुष्टेकरूणार्द्रद्दष्टे हे नाथ हेकान्तवरेण्यदेव । रमाजशेषाञ्चितपादयुग्म कामं दहन्मे हृदितिष्ठ कृष्ण ॥५॥
अनेकजीवाभयदानदायिन् विष्णोपरात्मनपुरूषोत्तमाऽज । अकिञ्चनाकामजनार्त्तिहारिन् कामं दहन्मे हृदितिष्ठ कृष्ण ॥६॥
अचिन्त्यरूपावयवप्रभावगोलोकमध्ये सततं निवास । सदास्वतन्त्रामरगतिरकीर्ते कामं दहन्मे हृदितिष्ठ कृष्ण ॥७॥
हे भक्तिधर्मात्मजदेवकन्दर्पनाशायमुनीन्द्रसेव्य । हे स्वामिनारायणमञ्जुनाथ कामं दहन्मे हृदितिष्ठ कृष्ण ॥८॥

*॥ इति मञ्जुकेशानन्दविरचिताष्टकं समाप्तम् ॥*

## १०२ ● ॥ अष्टपदीयम् ॥

वृषकुलभूषण सुरकुलभूषण विगतविदूषणभूतिपते। कुसुमविभूषण मुनिजनपोषणजनिमृतिशोषणशुद्धकृते ॥
जयजयसुखकर करधृतगिरिवर दमितपुरन्दरकृष्णहरे ॥१॥
मकरवपुर्धरकमठतनूभर शूकरभूधरभुवनपते। नरहरितनुधरवञ्चितबलिपर नृपतिभयंकरपर्श्वधृते ॥
जयजयसुखकर करधृतगिरिवर दमितपुरन्दरकृष्णहरे ॥२॥
रामरमेश्वरहलधरसुन्दर कृष्णकलाभररासरते। बुद्धदयापरकल्किसुरेश्वर धर्मसदादरविप्रवृते ॥
जयजयसुखकर करधृतगिरिवर दमितपुरन्दरकृष्णहरे ॥३॥
ऋषभसदीश्वरकपिलविदांवर दत्तदिगम्बरयोगरते। वैन्यनृपेश्वरनारदमुनिवर नैकवपुर्धरहंसहरे ॥
जयजयसुखकर करधृतगिरिवर दमितपुरन्दरकृष्णहरे ॥४॥
नटवरनागरपरसुखसागर रक्षितसत्सुर साधुपते। अवितचराचरकारितमन्दिर भोजितभूसुर विश्वपते।
जयजयसुखकर करधृतगिरिवर दमितपुरन्दरकृष्णहरे ॥५॥
धर्मकुलेश्वरवर्णिपुरन्दरनीलकलेवरधर्मधृते। काममनोहरसूक्ष्मसिताम्बर धारितमन्दरदेवपते ॥
जयजयसुखकर करधृतगिरिवर दमितपुरन्दरकृष्णहरे ॥६॥
धर्मविकाशन कामितदासन सज्जनशासनसत्यगते। कामविनाशन दिव्यहयासन मोदितसज्जनसाधुरते ॥
जयजयसुखकर करधृतगिरिवर दमितपुरन्दरकृष्णहरे ॥७॥

आनन्दकन्दं सहजानन्दं निर्मदनन्दं नौमिहरिम् । कुरूतवभृत्यं साधितकृत्यं भृत्यसुभृत्यं नित्यमुनिम् ॥
जयजयसुखकर करधृतगिरिवर दमितपुरन्दरकृष्णहरे ॥८॥

*॥ इतिश्रीसहजानन्दस्वामिशिष्यनित्यानन्दमुनिविरचिता श्रीहरिकृष्णप्रार्थनाष्टपदी समाप्ता ॥*

## १०३ ● ॥ शिखरणीवृत्तम् ॥

परं तीर्थस्थानं ध्वजयवसरोजांकुशनभोधनूरेखार्द्धेन्दुप्रभृतिशुभलक्ष्मांकितमपि ॥
श्रियाजुष्टंतद्यत् प्रणतजनपापप्रशमनं पदाब्जं ते स्वामिन्वसतु सहजानन्दहृदि मे ॥१॥
मुहुस्तद्भक्तेन्द्रैरूरसि शिरसिस्वेऽक्षिणिमुदाललाटेचाधारि ध्रुवगतिपदंचन्दनवरैः ॥
यदर्चित्वानित्यंनिजसुखकरं केशरयुतैः पदाब्जं ते स्वामिन्वसतु सहजानन्दहृदि मे ॥२॥
मुनिन्द्रैर्मुक्ताद्यैर्मुदितमदनाद्यात्मरिपुभिः सदाध्येयंस्वान्तेसपदिविपदामन्तकरणम् ॥
सदासेव्यसद्भिः श्रुतिशिरसि संराजितमपि पदाब्जं ते स्वामिन्वसतु सहजानन्दहृदि मे ॥३॥
अनेकब्रह्माण्डस्थपतिविधिविध्मुत्रिनयनप्रमुख्यालोकेशा पदरूणनखादर्शनिकरे ॥
मुहुःस्वानीक्षन्ते समुकुटमुखाब्जानिमुदिताः पदाब्जं ते स्वामिन्वसतु सहजानन्दहृदि मे ॥४॥
प्रधानादेरहेतूप्रकृतिपुरूषौ यच्चभजतः स्तुवन्त्येतद्वेदाः सततमपि मूर्त्तास्तुतिपराः ॥
भगैर्यज्ज्ञानाद्यैः प्रणुतमपिदिव्याकृतिधरैः पदाब्जं ते स्वामिन्वसतु सहजानन्दहृदि मे ॥५॥
नसंहर्तुंसूर्यःप्रभवति तमोयत्स्वमहसा जनानामन्तः स्थंमहदपि निजानां हरतितत् ॥

यदंगुष्टैकांगप्रभवनखचन्द्रोपिमहसा पदाब्जं ते स्वामिन्वसतु सहजानन्दहृदि मे ॥६॥
महान्तो मुक्तेन्द्रायदपचितयेत्वक्षरपदे गृहीत्वाऽर्चाद्रव्यांस्त्वरितगमनाश्चाक्षरजनाः ॥
पतन्त्यन्योन्यस्योपरिपरिचरन्त्यर्चनपरा पदाब्जं ते स्वामिन्वसतु सहजानन्दहृदि मे ॥७॥
अनेकेयोगीन्द्रा विजितरसकामादिरिपवो निजेस्त्वान्तेशुद्धेसततमतिभक्त्यार्द्रहृदयाः ॥
यदेतेध्यायन्तित्वजनपदनिष्ठा सुखपदं पदाब्जं ते स्वामिन्वसतु सहजानन्द हृदि मे ॥८॥

*॥ इति योगानन्दमुनिविरचितं याचनाष्टकं समाप्तम् ॥*

## १०४ ● ॥ स्वागतावृत्तम् ॥

कृष्णकेशवहरेर्हरिकृष्ण संत्द्दताशु शरणागततृष्ण । माधवकेशवरदायकविष्णो पाहि मां रतिपते स्मरजिष्णो ॥१॥
भक्तनाथभवमोचननामन् प्रापिताश्रितजनाक्षरधामन् । नीलकण्ठकमलानन लोभात् पाहिमांशमितसद्गुणशोभात् ॥२॥
ब्रह्मशेषभवनारदनाथशारदादिपुरूसेवितगाथ । पापतापहर संसृतिमूलात्पाहिमां यतिपतेरतिशूलात् ॥३॥
दत्तभक्तजनजीवनमुक्तेभक्तलोकरूचिरार्पितमुक्ते । सत्तनोसकलदोषनिदानात्पाहि मां हि पुरूषोत्तम मानात् ॥४॥
भक्तिधर्मतनयप्रियकारिन् भक्तलोकभवसंकटहारिन् । भक्तियोगचरणाद्युपलब्धेपाहि मां क्रुधरितः करूणाब्धे ॥५॥
सर्वजीवपरिपोषणशालिन् मल्लिकाकुसुममौक्तिकमालिन् । श्वेतसूक्ष्मरूचिरांशुकधारिन्पाहि मां पदरिपोर्मदहारिन् ॥६॥
भक्तिधर्मपरिपालनशील भक्तिधर्मसुखसाधनलील । दम्भदर्पहर दानवमोहिन्पाहि मां सुखद मत्सरतो हि ॥७॥
धर्मरक्षणकृतेधृतमूर्ते विप्रसाधुजनगोमुखेपूर्ते । स्वादमोहकुहकादिकदोषात्पहि मां सुखनिधेमतिमोषात् ॥८॥

*॥ इतिश्रीयोगानन्दमुनिविरचितं प्रार्थनाष्टकं समाप्तम् ॥*

## १०५ • ॥ उपजातिवृत्तम् ॥

सदासदानन्दपदारविन्द प्रफुल्लपद्माननचारूहास । दयासुधापूर्णविशालनेत्र प्रकाशमूर्ते जय वासुदेव ॥१॥
श्वेताभिधद्विपवरे निजानां निवृत्तयेस्वेतरवासनानाम् । महातपोनित्यरतोर्द्धबाहो प्रकाशमूर्ते जय वासुदेव ॥२॥
एकान्तधर्माश्रयपूजितांघ्रे निरन्नमुक्तैर्विविधोपचारैः । चतुः सनानन्दन शान्तरूप प्रकाशमूर्ते जय वासुदेव ॥३॥
अनेककोटीन्दुसमानकान्ते कलानिधेनैष्ठिकवर्णिवेष । शान्त्याचदान्त्यातपसोपलभ्य प्रकाशमूर्ते जय वासुदेव ॥४॥
श्वेताम्बरश्वेतविलेपनांग श्वेतालयश्वेतसुपुष्पपूज्य । श्वेताभिधश्वेतजनैकबन्धो प्रकाशमूर्ते जय वासुदेव ॥५॥
युगे युगे भक्तियुतं च धर्मं पातुं गृहीतागणितावतार । स्वज्ञानपंकेरूहकोशभानो प्रकाशमूर्ते जय वासुदेव ॥६॥
उपात्तनानाविधकर्मपाशनिबद्धजीवौघविमुक्तिहेतो । निजाश्रितब्रह्मगतिप्रदातः प्रकाशमूर्ते जय वासुदेव ॥७॥
सुपर्णयोगेश्वर धर्म हंस विष्णो महापुरूष हे परात्मन् । वैकुण्ठसत्याक्षर दीननाथ प्रकाशमूर्ते जय वासुदेव ॥८॥

॥ सार्द्दुलविक्रीडितवृत्तम् ॥

क्षीराब्धौ विमले ऽमृताख्यनिलये कोट्यर्कतेजोनिधौ श्वेतं दीर्घचतुर्भुजं च जटिलं शान्तं च रम्याननम् ॥
वेदं दण्डकमण्डलू च तुलसीमालां करैर्विभ्रतं स्वेतद्विपपतिं बृहद्व्रतधरं श्रीवासुदेवं भजे ॥९॥

*॥ इति दानानथभट्टविरचितं श्रीवासुदेवाष्टकं सम्पूर्णम् ॥*

## १०६ • ॥ उद्गतावृत्तम् ॥

सुखदायिनं मुनिगणस्य विमलकमलायतेक्षणम् । क्लान्तकुसुमशरवीर्यबलं हरिकृष्णमेवशरणं व्रजाम्यहम् ॥१॥
प्रियकारिणं वृषकुलस्य हसितमधुराननाम्बुजम् । पूर्णविभवनिजमुक्तपतिं हरिकृष्णमेवशरणं व्रजाम्यहम् ॥२॥
विधृतोपवीतमतिरम्यसजलजलदासितप्रभम् । सान्द्रविशदवसनं सुखदं हरिकृष्णमेवशरणं व्रजाम्यहम् ॥३॥
स्थलाजावन्तसरमणीय कुटीलतनुनीलमूर्द्धजम् । पापशमनवचनाचरितं हरिकृष्णमेवशरणं व्रजाम्यहम् ॥४॥
सुरभिप्रसूनशुभहारपुरटमयनुपूरंगदम् । दिव्यविपुलहृदयं रूचिरं हरिकृष्णमेवशरणं व्रजाम्यहम् ॥५॥
स्मृतिसत्यशौचदमदान विनयवयुनादिभिः सदा । युक्तमगणितगुणैः परमैः हरिकृष्णमेवशरणं व्रजाम्यहम् ॥६॥
धृतहेमकुण्डलकिरीट वलयरशनाविराजितम् । शेषनिगमपरिगीतगुणं हरिकृष्णमेवशरणं व्रजाम्यहम् ॥७॥
सितमल्लिकाकुसुमकान्तिललितदशनारूणाधरम् । चन्दनमतिवरमादधतं हरिकृष्णमेवशरणं व्रजाम्यहम् ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं शरणाष्टकं सम्पूर्णम् ॥*

## १०७ • ॥ रथोद्धतावृत्तम् ॥

कामलोभभयमाननाशनं भूतिधारममलं जनाश्रयम् । मोक्षदं च भजतामजेश्वरं नीलकण्ठमहमेकमाश्रये ॥१॥
वर्णिवेशमुपवीतधारिणं काननेषुवनदेवास्तुतम् । एणचर्मधरमीष्टदायकं नीलकण्ठमहमेकमाश्रये ॥२॥
हैमपर्वतचरं तपःप्रियं कन्दमूलफलवायुभोजनम् । भूशयं कृशमनावृतांगकं नीलकण्ठमहमेकमाश्रये ॥३॥
रक्तपीतधवलाऽसितान्मुदं प्राप्नुवन्तमभिदृश्यपर्वतात् । काननं च विविधं मनोहरं नीलकण्ठमहमेकमाश्रये ॥४॥

एणसिंहशशकुञ्जरादयः पक्षिणोपिविजहुस्तमाधिहम् । यं समेत्य सततं च वैरिकं नीलकण्ठमहमेकमाश्रये ॥५॥
मल्लिकाबकुलकुन्दचम्पकान् प्रेक्षमाणमलिवृन्दसेवितान् । पुष्पभारविनतान्तपस्विनं नीलकण्ठमहमेकमाश्रये ॥६॥
निर्मलं परभृताभिरीडितं स्वंयशश्चसुजयंसुबर्हिभिः । मोदयन्तमजितं निशम्यतान् नीलकण्ठमहमेकमाश्रये ॥७॥
तं स्वभक्तजनमोक्षहेतवे दुर्गपत्तननिवासकारिणम् । मञ्जुनाथमसिताकृतिं हरिं नीलकण्ठमहमेकमाश्रये ॥८॥

*॥ इति मञ्जुकेशानन्द विरचिमाश्रयाष्टकं समाप्तम् ॥*

## १०८ ● ॥ वसन्ततिलकावृत्तम् ॥

शोभानानं कमलनेत्रमधर्मखण्डं धर्मात्मजं सुखद धर्मजनप्रसन्नम् ॥
मुक्तिप्रदं परममंगलमीश्वरं च श्रीस्वामिनं जलदनीलतनुं भजेऽहम् ॥१॥
भक्तावलोकविमलं सततंसुरेशं भक्तिप्रियं कुसुमबाणमदं हरन्तं ॥
यज्ञप्रियं परमदेवमशेषसारं श्रीस्वामिनं जलदनीलतनुं भजेऽहम् ॥२॥
धर्मप्रियं हरिजनैर्मनसिप्रधेयं कामादिशत्रुनिदहन्तमहर्निशंह ॥
सुपोदनन्दधिपयोप्यवभुक्तवन्तं श्रीस्वामिनं जलदनीलतनुं भजेऽहम् ॥३॥
चन्द्रोदयेसखियुतं मुनिभिःप्रगीतं गम्भीरनाभिममलं सुखसागरं च ॥
आनन्दकन्दममराधिपतिप्रचिन्त्यं श्रीस्वामिनं जलदनीलतनुं भजेऽहम् ॥४॥

अश्वप्ररूढमतिशीघ्रगतिंशुभांगं श्वेतांशुकं निदधतं परमेश्वरन्तं ॥

वेत्रधरं तपतिकामेलगुच्छयुक्तं श्रीस्वामिनं जलदनीलतनुं भजेऽहम् ॥५॥

वातोत्सृतं सुवसनं सुरभिप्रयुक्तं वाजिव्रजेन चलमस्तकहारशोभम् ॥

सान्द्रंशिलीमुखसमूहनिरीक्षितं तं श्रीस्वामिनं जलदनीलतनुं भजेऽहम् ॥६॥

पार्श्वस्थितां च जनतासदयावलोकं वेदिं वनं फलितमेव च वाटिकायाः ॥

आरूह्यमाणमवतीर्यतुरंगतश्च श्रीस्वामिनं जलदनीलतनुं भजेऽहम् ॥७॥

रम्भाफलं सुमतिनापरिभुक्तवन्तंदत्तं प्रियं परमसाररसं जनेन ॥

योगीन्द्रशेषभवपद्मजसेवितांघ्रि श्रीस्वामिनं जलदनीलतनुं भजेऽहम् ॥८॥

*॥ इति सगुणानन्दमुनिविरचितं भजनाष्टकं समाप्तम् ॥*

## १०९ ● ॥ नर्कुटकं वृत्तम् ॥

विलसितियोऽव्ययेप्रकृतितोऽमृतधाम्निपरे निगमगणैः स्तुतं निखिलमुक्तवरैः सतम् ॥

सकलजगद्भवस्थितिविनाशकरं मनसा सुकृतभुवं भजामिहरिकृष्णभवन्तमहम् ॥१॥

निखिलसुराधिपैःस्वमुकुटानतपादयुगं सनकशुकादिसाधुनिकरैर्नृपतीन्द्रगणैः ॥

प्रवरभगैस्तथागरूडनन्दमुखानुचरैः सुकृतभुवं भजामिहरिकृष्णभवन्तमहम् ॥२॥

उषितमिहावतीर्य निजधामत एवातत: स्वजनसुखाशयेतिकृपयावरवृत्तपुरे ॥
झटितिनिजेक्षणाज्जनमनोहरमात्मतनौ सुकृतभुवं भजामिहरिकृष्णभवन्तमहम् ॥३॥
सदसिसमर्चितं सकलभक्तजनैर्मुदितैर्मृगमदगन्धकेसरवरै: कुसुमाभरणै: ॥
कनकविभूषणैर्बलयशेखरहारमुखै: सुकृतभुवं भजामिहरिकृष्णभवन्तमहम् ॥४॥
नवघनमेचकाकृतिविमोहितवामरिपुं वदनविलज्जितात्रिसुतमक्षिजितालिरयम् ॥
शुभतरनासिकाच्छविविलज्जित दीपशिखं सुकृतभुवं भजामिहरिकृष्णभवन्तमहम् ॥५॥
सितदशनाधरिकृतसुमोक्तिककुन्दरूचिं भ्रुकुटिविकम्पितान्तकमघौघहराचरणम् ॥
श्रवणवितर्ज्जितातिवरकुण्डलिकातिरूचं सुकृतभुवं भजामिहरिकृष्णभवन्तमहम् ॥६॥
गमनविलज्जितद्विरदहंसमवेक्षगलं स्वजनवराभयप्रद सुजानुविलम्बिभुजम् ॥
मृदुचरणाधरिकृतनवोद्भवकोकनदं सुकृतभुवं भजामिहरिकृष्णभवन्तमहम् ॥७॥
पृथुहृदयेस्रजंकमुतपाटललक्ष्मपरं सहतिलकांकमादधतमीक्षकचित्तहरम् ॥
असुरविमोहकान्तिशुभदिव्यचरित्रकरं सुकृतभुवं भजामिहरिकृष्णभवन्तमहम् ॥८॥
प्रतिभवमस्तुदास्यमनिशंतवन: सुतरामसुलभमुत्तमं च तवपादयुगंभजताम् ॥
पुरूकरूणाकरस्यभवतस्तनुवाग्हृदयै: प्रणतिमभीक्षणं सुखदकूर्मइतिहवयम् ॥९॥

*॥ इति दीनानाथभट्टविरचितं श्रीहरिकृष्णभजनाष्टकं समिपूर्णम् ॥*

## ११० ● ॥ चर्पटपञ्जरिका ॥

भजहरिकृष्णं भजहरिकृष्णं हरिकृष्णंभजमन्दमते देहान्तेतवकः शरणं ।
नरभवसागर भयहरणम् । (ध्रुवपदमिदम् )

मूढविहायशुभेतरबुद्धिं विषयव्यग्रामगतविशुद्धिम् ।
नानारूपामेनोनुद्धिं निर्वाणास्पदसद्गुणरूद्धिम् ॥भज ... ॥१॥

आधिसहस्रं क्षयवदजस्रं गात्रमकस्रं मोहितमिस्रम् ।
आयुरविमलं विद्धयघवदलंतडिदिवतरलंस्मरबृहदनलं ॥भज... ॥२॥

कलिमलजातः कस्तवतातः संसारोऽयं न भयत्राता ।
कातवमाताकस्तेभ्राताकातवकान्तासततमशान्ता ॥भज.. ॥३॥

तरूणीगात्रंमलचयपात्रं मायामात्रंयमभयदात्रम् ।
सवसाद्यन्नंक्षतशुभमन्त्रं विद्धि हि यन्त्रं संसृतितन्त्रं ॥भज.. ॥४॥

नावतिगेहेजीर्यतिदेहे सत्यधनेहे निकषानेहे ।
कोप्यसमर्थंबन्धुमपार्यं द्रूतसकलर्थं क्षतमुक्त्यर्थं ॥भज.. ॥५॥

उपगतभोगं दुःसहरोगं प्रोझितयोगं शुभसदयोगम् ।
सुखमनपायं सुव्यवसायं योषितकायं नास्तिधनायं ॥भज...॥६॥

बहुलक्लेशं गुरूमगतेशं विषयावेषं गतसुखलेशम् ।
असदुपदेशं कपटयुतेशं धृतबहुवेशं संसृतिशेषं ॥भज...॥७॥
सुरविभवाशं विगतविकाशं मोहविपाशं दूषणदाशम् ।
वयुनविनाशं त्यजजनपाशं योगकलाशं बहुरसालं ॥भज...॥८॥
अतिशयदीनं योषिदधीनं वृषमिवपीनं स्मरसुखलीनम् ।
वनइवमीनं नात्मजनीनं शान्तिविहीनं पापवदीनं ॥भज...॥९॥
अशुचिविचारं विपदाधारं निजधनहारं विहितनिकारम् ।
विद्ध्यघभारं हृदि वृकवारं मोक्षनिवारं निजपरिवारं ॥भज...॥१०॥
लोकयलोकं मुहुरविशोकं गतमस्तोकं फणिनिर्मोकम् ।
कालग्रस्तं बहुलत्रस्तं मनसिसमस्तं ज्ञानवदस्तं ॥भज...॥११॥
विगतविवेकं यमपुरमेकं प्राप्स्यतियातं यमभटजातम् ।
स्वजनसुरक्तं भगवदभक्तं कष्टमनल्पं त्वामुरूकल्पं ॥भज...॥१२॥
आतुरचितं वाञ्छितवित्तं चिन्तितवामं विभवनिकामम् ।
विषयारामं विस्मृतरामं सुवितथयामं पुरितग्रामं ॥भज...॥१३॥
कृततनुरक्षं धर्मविपक्षं देवसमक्षं तरूणीलक्षम् ।

दुर्नयदक्षं मरूदिवकक्षं त्वां न करालोमोक्ष्यतिकालो ॥भज...॥१४॥

विषयविमननं जनिमृतिभवनं धनसंचयनं मानसदहनम् ।

यमभयनयनं दुर्मतिजननं त्यजशमहननं कापथगमनं ॥भज...॥१५॥

परिगतसारे नहिशमपारे विषमोत्तारे भवजलवारे ।

सत्वविदारे विविधविकारे मज्जितनारे पुरूभयकारे ॥भज...॥१६॥

आयुर्बाल्यं क्रीडानीतं युवतिरतावुत्तरमवगीतम् ।

अन्त्यमयेतं चिन्तावीतं हरिसुयशः कुधियानहिगीतं ॥भज...॥१७॥

अतिशयखेदं गतनिर्वेदं सुमतिच्छेदं शुभगुणभेदम् ।

निन्दितवेदं सुखयतिनेदं जगदुरूतृष्णं विस्मृतकृष्णं ॥भज...॥१८॥

महदुपहासं सुकृतनिरासं ग्राम्यविलासं यमपुरवासम् ।

जहिहिभयासं व्रजहरिदासं निजहितशासं शुभगुणभासं ॥भज...॥१९॥

मदनप्रीतिं छलवदनीतिं पामररीतिं बहुतरभीतिम् ।

विद्धिविपत्तिं शुभगुणभीति ध्वंसितवितिं निरयासत्तिं ॥भज...॥२०॥

इहराजानं पश्यवितानं बहुयतमानं तापवितानम् ।

इष्टनिविष्टं त्वमिवकनिष्टं कृमिमसदिष्टं परिहृतशिष्टं ॥भज...॥२१॥

असदवधानं निजहृदिमानं क्लेशनिदानं विद्धिनिधानम् ।
अमृतपानं त्रिदशस्थानं विविधविमानं निरयसमानं ॥भज...॥२२॥
कुरूगुणमहतां हरिमधिभजतां तददितिरतिमतां संगमिहसताम् ।
भवभयहननं पातकदहनं दूषणशमनं हरिपदनयनं ॥भज...॥२३॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं श्रीहरिकृष्णभजनोपदेशस्तोत्रम् समाप्तम ॥*

## १११ ● ॥ वसन्ततिलकावृत्तम् ॥ श्रीलक्ष्मीनारायणाष्टकम् ॥

गोविन्दमाधवदयालय दीनबन्धो श्रीमन्मनोनयननन्दनदिव्यमूर्ते ॥
दिव्येन्द्रनीलमणिकान्तिमनोहरांग श्रीरूक्मिणीरमण मामव वासुदेव ॥१॥
कंसादिदुष्टदमनप्रणतैक बन्धो कामान्तकादिनुतशंखरथांगपाणे ॥
श्रीद्वारिकापति पुरन्दरपूर्णकाम श्रीरूक्मिणीरमण मामव वासुदेव ॥२॥
आनन्दकन्द यदुनन्दन शारदीयपूर्णेन्दुबिम्बवदनाम्बुजमन्दहास ॥
भूभारराजबलनाशन शेषबन्धो श्रीरूक्मिणीरमण मामव वासुदेव ॥३॥
भामानुरंजनसमाहृतपारिजात प्रद्युम्नतात पुरूजीतसभासद्स्य ॥
पट्टांगनाद्विगुणिताष्टसहस्रकान्त श्रीरूक्मिणीरमण मामव वासुदेव ॥४॥
आत्मीयपाण्डवहितेरत जिष्णुसूतकृष्णामनोभिलषितप्रदकल्पवृक्ष ॥

देवेन्द्रवन्द्यगरूडध्वजशारंगपाणे श्रीरूक्मिणीरमण मामव वासुदेव ॥५॥
धर्मध्वजसेतुरचनोद्यत नित्यदानैः सन्तर्पितद्विजवरौघ हरे मुरारे ॥
श्रीनारदादिमुनिगीतपवित्रकीर्त्ते श्रीरूक्मिणीरमण मामव वासुदेव ॥६।
कारूण्यसागरभवाम्बुधिपारदायिन्कल्याणकृत्पतितपावननामधेयम् ॥
ब्रह्मण्यदेव नरदेवशिखामणे त्वं श्रीरूक्मिणीरमण मामव वासुदेव ॥७॥
संसारखिन्नशरणागतजीवरक्षानित्योद्यतोद्धवसमर्पितनैजबुद्धे ॥
नानावतारपरिपालितसाधुलोक श्रीरूक्मिणीरमण मामव वासुदेव ॥८॥

*॥ इति श्रीसत्संगिजीवनश्र्थं श्रीलक्ष्मीनारायणाष्टकं सम्पूर्णम् ॥*

## ११२ ● ॥ स्त्रग्धरावृत्तम् ॥

यो वीक्षापापहारी सदवयवलसन्मूर्तिरानन्दकारी चन्द्रस्योद्भासमानो विधुरूचिररूचिर्भूरिशोभाभिरामः ॥
सद्वांगस्थलक्ष्म्या बहुलरतियुजा सेव्यमानोऽनवद्यो लक्ष्मीनारायणं तं सततमतिमुदा नौमिवन्द्यंसुरेन्द्रैः ॥१॥
दोर्दण्डैश्चण्डखण्डैरतिशयमृदुलैर्भ्राजमानैश्चतुर्भिर्भक्तंत्राणातिशक्तैर्दरकमलगदाश्चारूचक्रं दधानम् ॥
स्वार्णान् हारांश्चसारान् विविधमणिमयान् स्वरणसूत्राम्बराणि लक्ष्मीनारायणं तं सततमतिमुदा नौमिवन्द्यंसुरेन्द्रैः ॥२॥
स्वर्णोष्णीषे महार्हेदधतमतिवराहेमसद्रत्नभूषा हैमीश्चांगेषु रम्या रूचिरमणिरूचोऽलंकृतीर्विस्फुरन्ती ॥
सन्मालां वैजयन्तीं कुसुमविरचितान् कर्णपूरप्रमुख्यान् लक्ष्मीनारायणं तं सततमतिमुदा नौमिवन्द्यंसुरेन्द्रैः ॥३॥

नूत्नाम्भोजच्छदाक्षं जननयनमनोभूरिद्दर्पप्रदानं स्मृत्याश्रुत्या च गीत्या पुरूतरदुरितध्वंसनोरूप्रतापम् ॥
कारूण्यौदार्यवार्द्धे शमितनतजनापद्व्रजं दर्शनीयं लक्ष्मीनारायणं तं सततमतिमुदा नौमिवन्द्यंसुरेन्द्रैः ॥४॥
बिम्बोष्ठादभ्रशोभं कुटिलवरतरभ्रूक्षतानंगदर्पं विद्योतत्कुण्डलीयस्फुरितबहुरूचा प्रोल्लसद्गण्डयुग्मम् ॥
कारूण्यापूर्णदृष्ट्या जनवृजिनभिदा प्रेक्षकान्वीक्षमाणम् लक्ष्मीनारायणं तं सततमतिमुदा नौमिवन्द्यंसुरेन्द्रैः ॥५॥
कल्याणानांनिधानं भवभयभिदुरं पावनोदारकीर्त्तिदिव्याश्चर्यैरूपेतं श्रितजनसुखदं विघ्नहृन्नामधेयम् ॥
मुक्तैर्जेगीयमानं स्मरणशुभकरंधर्मसर्गावितारं लक्ष्मीनारायणं तं सततमतिमुदा नौमिवन्द्यंसुरेन्द्रैः ॥६॥
खद्योतत्वंलभन्तेदितिसुतनिकरा यस्य सद्वीर्यवह्नौयस्मादन्तर्द्विषन्तोभयमिव हरिणा यान्ति सिंहात्स्मराद्याः ॥
यद्वत्सूर्योन्धकारं परनिजमहसा यो निरस्यत्यधर्मं लक्ष्मीनारायणं तं सततमतिमुदा नौमिवन्द्यंसुरेन्द्रैः ॥७॥
भद्राणां पावनानां वृजिनभरभिदामास्पदंसद्गुणानांभक्ताभीष्टातिपूर्त्यां त्रिदशकरूवरं लज्जयन्ते प्रकामम् ॥
प्रार्थ्यं भक्तैश्च पूज्यं सकलकलिमलक्षालनं सल्ललामं लक्ष्मीनारायणं तं सततमतिमुदा नौमिवन्द्यंसुरेन्द्रैः ॥८॥

*॥ इत्याचिन्त्यानन्दवर्णिविरचितं लक्ष्मीनारायणवन्दनाष्टकं समाप्तम् ॥*

## ११३ ● ॥ मत्तमयूरवृत्तम् ॥

मायऽतीते ब्रह्मपुराख्येनिजधाम्नि मुक्तेन्द्राणांमध्यगसिंहासनआस्ते ॥
श्रीकृष्णोयं पूजितपादाब्जयुगस्तैः श्रीलक्ष्मीनारायणमीडे तमहं त्वाम् ॥१॥

तस्मात्प्रादजुर्भूयसहात्मानुचरेन्द्रैरासिद्गामेच्छुप्यसीह प्रथितो यः ॥
श्रीहर्याद्यैर्नामिभिरानन्दमहाब्धिः श्रीलक्ष्मीनारायणमीडे तमहं त्वाम् ॥२॥
सर्वस्वामी प्रेमवतीतः कृपयाऽऽसीद्बालक्रीडारञ्जितबन्ध्वादिजनो यः ॥
स्वेक्षामात्रेणाभयदाता निखिलानां श्रीलक्ष्मीनारायणमीडे तमहं त्वाम् ॥३॥
तीर्थक्षेत्रादौ वितरन्पोषयितुंयः स्वीयंधर्महन्तुमधर्मंकृपयेशः ॥
स्वीयप्रात्यै दुर्गपुरे च स्वयमायाच्छ्री श्रीलक्ष्मीनारायणमीडे तमहं त्वाम् ॥४॥
श्रेयोनृणांयस्त्विहकर्तुंचिरकालं स्वेषां तुष्ट्यैचोत्तमवृत्तालयधाम्नि ॥
स्वातिप्रेष्ठेऽजस्रमुवासस्वयमद्धा श्रीलक्ष्मीनारायणमीडे तमहं त्वाम् ॥५॥
स्वांगान्निर्यत् श्वेतमहस्त्वात्सितवर्णो भक्तेच्छाविर्भूतचतुर्दोर्धृतहेति ॥
रम्यांगश्रीर्यः करूणार्द्राम्बुजनेत्रः श्रीलक्ष्मीनारायणमीडे तमहं त्वाम् ॥६॥
चञ्चद्वासाहेमलसच्छीर्षकिरीटो मुक्ताहारं कौस्तुभरत्नं कटिसूत्रम् ॥
प्रत्यंगं चाभूषणशोभां विदधद्यः श्रीलक्ष्मीनारायणमीडे तमहं त्वाम् ॥७॥
सर्वाधारः सर्वपरोयोह्यवतारी सर्वात्मासर्वेच्छितदाताऽखिलहेतुः ॥
शश्वत्स्वांघ्र्यब्जाश्रितबालावनकर्ता श्रीलक्ष्मीनारायणमीडे तमहं त्वाम् ॥८॥

*॥ इति श्रीअखण्डानन्दवर्णिविरचितं लक्ष्मीनारायणवन्दनाष्टकं समाप्तम् ॥*

## ११४ • ॥ प्रहर्षणीयवृत्तम् ॥

साधुनां सदसि महासनोपविष्टं स्मेरास्यं सदयविलोलनेत्रयुग्मम् ॥
सामोदप्रवरविचित्रपुष्पहारं श्रीनारायणमुनिमीश्वरं नमामि ॥१॥
उत्फुल्लस्थलनलिनावतंसरम्यं बिम्बोष्ठं सितघनसूक्ष्मसद्दुकूलम् ॥
बिभ्राणं रूचिरशिरः पटं सुरक्तं श्रीनारायणमुनिमीश्वरं नमामि ॥२॥
संतोषस्मृतिबलशीलसत्यशौच प्रागल्भ्यप्रमुखगुणैर्युतं च नित्यैः ॥
सन्मुक्ताफलशुभहारमीक्षणीयं श्रीनारायणमुनिमीश्वरं नमामि ॥३॥
गोपादाम्बरकलशांकुशोर्द्धरेखां स्वस्त्यब्जध्वजमुखलक्षणांघ्रिपद्मम् ॥
मुक्तानांमनिशमुपासनीयपादं श्रीनारायणमुनिमीश्वरं नमामि ॥४॥
राजन्तं स्थितमतिसुन्दरेतुरंगे सोत्कण्ठैः परिवृत्तमुत्तमाश्ववरैः ॥
सूर्यांशुज्वलितसुरम्यकुन्तहस्तैः श्रीनारायणमुनिमीश्वरं नमामि ॥५॥
विद्योतन्मणिमयभूषणाभिरामं गम्भीरोल्लसितसुवृत्तनाभिकूपम् ॥
दिव्यांगसजलनवीनमेघवर्णं श्रीनारायणमुनिमीश्वरं नमामि ॥६॥
आर्तानां भवजलधौनिमग्नपुंसां मोक्षाय प्रकटितदिव्यरूपमूर्व्याम् ॥
सद्धर्मनिजमहसा प्रवर्त्तयन्तं श्रीनारायणमुनिमीश्वरं नमामि ॥७॥

सानन्दैर्निजपदपंकजानुरागैः सद्भक्तैः सुललितकेसरार्च्चितांगम् ॥
मन्दारस्थलरूहमल्लिकावचूलम् श्रीनारायणमुनिमीश्वरं नमामि ॥८।

*॥ इत्याचिन्त्यानन्दमुनि विरचितं श्रीमन्नारायणाष्टकं समाप्तम् ॥*

## ११५ ● ॥ अथ तोटकवृत्तम् ॥

शमधामतमोदमनं शमनं प्रणमामि भजामि हरिं कमनम् । अमरेशनरेशमहेशनतं भयभञ्जनरञ्जनयोगिमतम् ॥१॥
वृषचण्डनतण्डविखण्डबलम् पदपंकजभूषितभूमितलम् । तनुराजितसुन्दरगौरपटं जितलोकजयस्मयकामभटम् ॥२॥
मुखलज्जितचन्द्रसरोजवनं गुणरूपसुखादिमहाभवनम् । स्वमहोनलदैत्यपतंगदहं कृतचारूविचित्रचरित्रमहम् ॥३॥
वृषसत्कुलकञ्जविकाशरविं मलशैलविलुप्यनपादपविम् । जितपण्डितमण्डितभूरिकविं कृतमुक्तिसुधासमदिव्यगवीम् ॥४॥
शरणागतवत्सलभक्तजितं गुणभूषणसज्जनवृन्दमितम् । स्वनिषक्तसुभक्तगणाकलितं कलिकालभयाकुललोकहितम् ॥५॥
गुणसन्मणिभूषणगात्रवरं नवमाल्यमनोहरहारधरम् । धृतभूषणदूषणनाशकरं जनमित्रपवित्रमुनीन्द्रचरम् ॥६॥
मतिशोधनबोधनदिव्यनिधिं कृतदुःखनिवारणमोक्षविधिम् । मुनिशिक्षितमंगलयोगविधिं भुवनप्रभवेतरितभव्यविधिम् ॥७॥
जनताशुचिताकृतिदक्षतरं निजभक्तजनार्थितदत्तवरम् । अनुभावदिनेशकरप्रसरं तनुकान्तिवितर्जितनीरधरम् ॥८॥
मितहासविलासविभासमुखं चरणाश्रितमानवदत्तसुखम् । कृतजीवहितोत्तमभूरिमखं गतकामनिकामविशुद्धसखम् ॥९॥
गुणजोषणरोषणहीनरतिं वचनामृततर्पितभक्तततिम् । गतिलज्जितहंसगजाधिपतिं परिमौदितनोदितभूरियतिम् ॥१०॥
करणावरूणालयमीड्यजयं निजसंगिजनोत्तमधर्मनयम् । जनशोचनमोचनतानमयं प्रणतव्रजितव्रजपापलयम् ॥११॥

सदचिन्त्यमुनिप्रकृतं रूचिरं हृदि चिन्त्यमिदं सुजनैः सुचिरम् । शुभदं श्रुतिपातकपुञ्जहरं स्तवनं सुखकारि हरेःप्रवरम् ॥१२॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितम श्रीहरिवर्णनं समाप्तम् ॥*

## ११६ ● ॥ उद्गतावृत्तम् ।

पुरूवारिनीरधरसाररूचितनुधृतार्ज्जुनाम्बरः । नीलमणिरिव हिमांशुकरैर्मम धार्मिरस्तु हृदि राजितो हरिः ॥१॥

किरणैरिवाहिमकरस्य विलसदसितोपलस्थलम् । शान्तितिलकललाभालतलो मम धार्मिरस्तु हृदि राजितो हरिः ॥२॥

कुसुमाच्छगुच्छयुतसार मणिगणसुव्रणकर्णिकः । नीरदइव सुरचापरूचा मम धार्मिरस्तु हृदि राजितो हरिः ॥३॥

परमश्रिया सुवदनस्य रूचिरतभंगुरंभुवः । तर्जितहिमकरनीरजया मम धार्मिरस्तु हृदि राजितो हरिः ॥४॥

हसितेन कुंकुमसुकान्तिलसदधरकीर्णरोचिषा । पल्लवयुतसितसूनरूचा मम धार्मिरस्तु हृदि राजितो हरिः ॥५॥

प्रभयोरसोवरतरस्य ललितगुलिकालीलया । नीलनलिनमिवचन्द्ररूचा मम धार्मिरस्तु हृदि राजितो हरिः ॥६॥

यमुनाप्रवाह इव चित्रजलरूहपरागसञ्चयैः । स्वर्णवरमणिगणाभरणैः मम धार्मिरस्तु हृदि राजितो हरिः ॥७॥

सकलांगसंगमिवसार हृदयपदेऽर्प्पयाश्रिया । प्रापितजनमहयागतया मम धार्मिरस्तु हृदि राजितो हरिः ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं धार्मि श्रीहरिवर्णनाष्टकं समाप्तम् ॥*

## ११७ ● ॥ द्रुतविलम्बितवृत्तम् ॥

विमलनीलमणिस्थरभास्करे कलितशालिवलक्षतराम्बरे । कुसुमशेखरहारमनोहरे मम मनोस्तु हरौ वृषनन्दने ॥१॥

श्रवणवर्णनतापनिवारणक्षमनखेन्दुविराजिविराजिते । ललितलक्ष्मललामपदद्वये मम मनोस्तु हरौ वृषनन्दने ॥२॥

मुनिविचिन्ततसुप्रसरन्महो मृदुलवर्त्तुलमञ्जूलजंघके । मरकतोपलदर्पणजानुत्तो मम मनोस्तु हरौ वृषनन्दने ॥३॥
विहगराजभुजोर्द्वविराजितस्फुरितकान्तिवरोरूयुगे प्रभौ । प्रथुलमंगलसत्कटिमण्डले मम मनोस्तु हरौ वृषनन्दने ॥४॥
ललितनाभिजलाशयसूल्लसद्वरवलित्रयचारूतरोदरे । मृदुविशालललामभुजान्तरे मम मनोस्तु हरौ वृषनन्दने ॥५॥
मणिसुवर्णविभूषणधारणे प्रजितपल्लवमार्द्दवसद्भुजे । दरलसंगलमौक्तिकमालिके मम मनोस्तु हरौ वृषनन्दने ॥६॥
मधुरहासलसद्वदनप्रभाविजितपार्वणशीतकरद्युतौ । नलिनशालिविलोलविलोचने मम मनोस्तु हरौ वृषनन्दने ॥७॥
जलदनीलललामललाटके दधति मध्यसुपैशुनचन्द्रकम् । रूचिरकैसरकं सुविशेषकं मम मनोस्तु हरौ वृषनन्दने ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं धर्मनन्दन श्रीहरिवर्णनाष्टकं समाप्तम् ॥*

## ११८ ● ॥ पुष्पिताग्रावृत्तम् ॥

जय जय जनजातमुक्तिदाता पुरूकरूणामृतवर्षिचारूदृष्टिः ॥
इह भुवि निखिलावतारहेतुः सकलशरीरिनियामकः स्वतन्त्रः ॥१॥
अगणितभुवनोद्भवादिवीक्षः परमनिजाक्षरधाम्नि सेव्यमानः ॥
सततमतिमुदाक्षराख्यमुक्तैस्त्वमसि सनातनदिव्यमूर्तिरीशः ॥२॥
क्षमतसुरजनव्रजैश्च धर्ममुनिनिकरानिह पीडितानधरित्र्याम् ॥
अनुयुगमखिलेश्वरप्रशास्ता त्वमसि मत्स्यमुखैर्निजावतारैः ॥३॥
तवगुणविभवादिवर्णयन्तो निगमशिरोक्षरमुक्तशेषमुख्याः ॥
क्वचिदपि न तदन्तमाप्नुवन्ति न परजनस्तमियात्किमत्रचित्रम् ॥४॥

अनवधिबहुनित्यसिद्धदिव्यैर्विभवसुखादिभिराश्रितांघ्रिपद्मम् ॥
अतुलितमहिमानमाप्तकामं नवितुमिहास्ति भवन्तमीश्वरः कः ॥५॥
त्वदुपगतजनेष्टकामपूर्तौवरमपिकल्पतरूं विलज्जयन्तम् ॥
विमलहृदयसज्जनप्रसन्नं परमभवन्तमजं मुहुर्नमामः ॥६॥
जनयनमनोमहोत्सवेऽस्मिन्मदनशतस्य च हारिणि त्वदीये ॥
भवभयहरणेक्षणेऽनवद्ये वपुषि रतानि भवं तु नो मनांसि ॥७॥
अरूणनखमणीन्द्रभासमाने मृदुललितांगुलिसत्पलाशमाले ॥
तव पदनलिने मनांसिऽनोस्मिन् परसुखधामनि यांतु षटपदत्वम् ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णि विरचितं हरिस्वरूपवर्मनाष्टकं समाप्तम् ॥*

## ११९ ● ॥ द्रुतविलम्बितवृत्तम् ॥

धृतनयं तनयं तपसोऽक्षरात्परतरं रतरंजनकारिणम् ॥
परहितं रहितं प्रकृतेर्गुणैर्भुवि भजे विभजे तमहं हरिम् ॥१॥
सविनयं विनयंतमिह क्षयं सकलहं कलहंसगतिं कलिम् ॥
कृतमखं तमखण्डसुखार्णवं भुवि भजे विभजे तमहं हरिम् ॥२।
सुविधिना विधिना विहितस्तवं कमलया मलयातिमुदार्च्चितम् ॥
घनरवं नरवन्दितपत्कजं भुवि भजे विभजे तमहं हरिम् ॥३॥

कविनताविनतात्मजवाहनं मुनिजनानिजनामवदार्त्तिहम् ॥
अकलयं कलयन्ति किल स्मयं भुवि भजे विभजे तमहं हरिम् ॥४॥
विमलभं मलभंजनविक्रमं कलिकलालिकलालसलूम्पनम् ॥
हृतमदं तमदं भजनप्रियं भुवि भजे विभजे तमहं हरिम् ॥५॥
परमया रमया परमश्रिया मुनितया नितयाल्पतपः कृता ॥
श्रिततरं रतरञ्जनपौरूषं भुवि भजे विभजे तमहं हरिम् ॥६॥
सुविचरं विचरन्तमिहक्षितौ शुभवनं भवनं गुणसंपदम् ॥
नयवतायवतासुभृतेक्षितं भुवि भजे विभजे तमहं हरिम् ॥७॥
प्रकृतिजात्कृतिजालनिबन्धनाद्विकृतिगानरतं रतसन्मुखात् ॥
उपरतं परतन्त्रयोजितुं भुवि भजे विभजे तमहं हरिम् ॥८॥
उभयंदं भयदंजवितण्डनं स्मृतमलंतमलंकरणं सताम् ॥
मुनिजनैर्निजनैकटलिप्सुभिः भुवि भजे विभजे तमहं हरिम् ॥९॥
शुचिरसं चिरसंस्मरणोचितं सुवदनं वदनन्दितसज्जनम् ॥
असकलं सकलंकविवर्ज्जनं भुवि भजे विभजे तमहं हरिम् ॥१०॥
बधनताधनतापहृतंहिय भुशमिताः शमितासुकृतं रतिम् ॥

सुमतयोमतयोगिनमस्तुवन् भुवि भजे विभजे तमहं हरिम् ॥११॥
नयनतोऽयनतोतुलितश्रियं सदलकन्दलकञ्जलजन्मनः ॥
मुनिजयं निजयन्तमधीश्वरं भुवि भजे विभजे तमहं हरिम् ॥१२॥
सुरवरं रवरञ्जितसज्जनं सुकृतवृद्धिकृदेतमुरूत्विषम् ॥
कृशमदं शमदं परमौजसं भुवि भजे विभजे तमहं हरिम् ॥१३॥
स्वजनवञ्जनवन्द्यशुभाकृतिं सुकृतपं कृतपण्डितनिर्ज्जयम् ॥
वरजपं रजपंकविकण्डनं भुवि भजे विभजे तमहं हरिम् ॥१४॥
सुयमदं यमदण्डविभेदनं पविपदं विपदन्तकरेक्षणम् ॥
अपरमं परमण्डनविग्रहं भुवि भजे विभजे तमहं हरिम् ॥१५॥
रसमये समयेकृतखेलनं सुभविकं भविकम्पनिवारणम् ॥
सुकलितां कलितापहरं परं भुवि भजे विभजे तमहं हरिम् ॥१६॥

॥ मालिनीवृत्तम् ॥

सुखदमिदमचिन्त्यानन्दवर्णिप्रमीतं स्तवनमघबिभेदं श्रीहरेरेव धार्मेः ॥
इह भुवि शृणुयाद्वा यः पठेच्छ्रावयेद्वा हरिरतिषयतोषं सत्पतिस्तत्र गच्छेत् ॥१७॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं श्रीहरिवर्णनस्तोत्रं समाप्तम् ॥*

## १२० • ॥ वियोगिनीवृत्तम् ॥

कलशाम्बरगोपदांकुशध्वजरेखाम्बुजमुख्यलक्षणैः । श्रितपादमनन्तविक्रमं सहजानन्दमहं विचिन्तये ॥१॥
मृदुलांकुरकोमलोत्तमद्युतिजंघायुगलं सदीश्वरम् । समवर्तुलजानुशोभितं सहजानन्दमहं विचिन्तये ॥२॥
सुकुमारगजेन्द्रपुष्करप्रतिमानोरूयुगं दयानिधिम् । विधिशेषभवाभिवन्दितं सहजानन्दमहं विचिन्तये ॥३॥
सितसूक्ष्मविशालवाससं रूचिराष्टापदरम्यमेखलम् । वरनाभिवलित्रयोदरं सहजानन्दमहं विचिन्तये ॥४॥
स्मरणीयपदाम्बुजद्वयं धृतकुन्दस्थलजावतंसकम् । श्रुतिकुण्डलमण्डलप्रभं सहजानन्दमहं विचिन्तये ॥५॥
स्मितसुन्दरपंकजाननं नवनीलाम्बुददिव्यविग्रहम् । वनजायतचञ्चलेक्षणं सहजानन्दमहं विचिन्तये ॥६॥
श्रुतिमेचकबिन्दुलक्षणं सुखदं केसरचन्दनार्च्चितम् । तिलपुष्पसमाननासिकं सहजानन्दमहं विचिन्तये ॥७॥
निजमुक्तसमाजशालिनं प्रियभक्तार्पितपुष्पमालिनम् । शरणागतजीवपालिनं सहजानन्दमहं विचिन्तये ॥८॥

*॥ इत्याचिन्त्यानन्दवर्णिविरचितं श्रीसहजानन्दाष्टकं समाप्तम् ॥*

## १२१ • ॥ औपच्छन्दसिकमवृत्तम् ॥

निजधाम्नि परेऽक्षरेदिव्ये मणिसौवर्णवरासनस्तिताय । भगवन् हरये नमोऽस्तु तुभ्यं सहजानन्दपराक्षरात्परस्मै ॥१॥
परिजुष्टपदाम्बुजद्वयाय प्रणयेनागणिताक्षराख्यमुक्तैः । रमणीयगुणार्णवाय भूम्ने सहजानन्दपराक्षरात्परस्मै ॥२॥
सुकृतेन निषेविताय पित्रा परिवारेणसहानिशं च भक्त्या । अनुरागभराद्रचेतसैव सहजानन्दपराक्षरात्परस्मै ॥३॥
निगमैरपि सिद्धिशक्तिजातै रूचिरप्रकृतमूर्तिभिश्चसर्वैः । वयुनादिभगैरूपासितोयः सहजानन्दपराक्षरात्परस्मै ॥४॥

त्वमसीश्वर एक एव हेतुर्भुवनानां प्रभवादिषु स्वतन्त्रः । न समो भवताऽस्ति कश्चिदन्यः सहजानन्दपराक्षरात्परस्मै ॥५॥
निगमागमधर्मवर्त्मरक्षामिह कर्त्तुं त्वसतां च निग्रहाय । नरनाट्यवपुर्द्दयापयोधे सहजानन्दपराक्षरात्परस्मै ॥६॥
त्वयि न प्रकृतेर्गुणाभवन्ति प्रवरैश्वर्ययुतेपि मानुषत्वे । स्मरणीयपदं सदा जनानां सहजानन्दपराक्षरात्परस्मै ॥७॥
प्रियकृच्च सुहृत्पिता चमाता हितकारी गुरूरस्युदारमित्रम् । शरणं त्वधीश एव नस्त्वं सहजानन्दपराक्षरात्परस्मै ॥८॥

*॥ इत्यचिन्त्यानन्दवर्मिविरचितम नमना॥टकं समाप्तम् ॥*

## १२२ • ॥ पञ्चचामरच्छन्दः ॥

नवीननीरदासितं निजैः सदा सभाजितं विशुद्धसत्हृदासितं समस्तदेवभासितम् ॥
क्षमाशमादिमण्डनं समस्तपापखण्डनं सदाऽभवाभिवन्दनं भजामि धर्मनन्दनम् ॥१॥
निरस्तभक्तसंकटं विधूतकामलम्पटं स्वकीयदासनैकटं गृहीतभक्तसत्पटम् ॥
कलेः कलानिकन्दनं सदागमादिवन्दनं सदाऽभवाभिवन्दनं भजामि धर्मनन्दनम् ॥२॥
सुरारिसंघमोहनं श्रुतिस्मृतिप्रदोहनं सधर्मभक्तिबोधनं कुदेशिकाधिरोधनम् ॥
अमेयसद्यशोधनं सदोषबुद्धिशोधनं सदाऽभवाभिवन्दनं भजामि धर्मनन्दनम् ॥३॥
अधर्मसर्गिखेदनं सहिंसशीलभेदनं विशुद्धसाधुसेवनं विधूतदेवदेवनम् ॥
सदागमोरूमेलनं सभक्तिचित्तखेलनं सदाऽभवाभिवन्दनं भजामि धर्मनन्दनम् ॥४॥

स्वभक्तसंघशालिनं प्रसूनसारमालिनं सधर्मभक्तिपालिनं निजानुजीविलालिनम् ॥
अनन्तभक्तमालिनं निरस्तपापजालिनं सदाऽभवाभिवन्दनं भजामि धर्मनन्दनम् ॥५॥
गृहीतदिव्यविग्रहं कृतोपधर्मनिग्रहं कृताश्रितात्यनुग्रहं महासदागमाग्रहम् ॥
प्रकाशिताखिलग्रहं कृतास्यवेदसंग्रहं सदाऽभवाभिवन्दनं भजामि धर्मनन्दनम् ॥६॥
पवित्रसत्पथासिनं सुकोमलानिवासिनं स्वतेजसा प्रकाशिनं स्वभक्तधीविकाशिनम् ॥
सबीजयोगशासिनं स्वरूपताविलासिनं सदाऽभवाभिवन्दनं भजामि धर्मनन्दनम् ॥७॥
प्रशस्तवर्णिवेषिनं प्रकीर्णनीलकेशिनं सदा परोपदेशिनं महासुखप्रदेशिनम् ॥
परार्थसन्निदेशिनं निजाजिरप्रवेशिनं सदाऽभवाभिवन्दनं भजामि धर्मनन्दनम् ॥८॥

*॥ इति योगानन्दमुनिविरचितं भजनाष्टकं समाप्तम् ॥*

## १२३ ● ॥ मञ्जुभाषिणीवृत्तम् ॥

श्रुतवेदिशिल्पिवरवृन्दनिर्मितो विलसद्विकर्द्दिवलभीविभूषितः ॥
रमणीयवेदपटलातिमञ्जुलो हरिमण्डपो जयति निर्भरं वरः ॥१॥
शरदभ्रशारदसुधांशुतर्जनः कलधौतशालिकलशो मनोहरः ॥
रविमण्डलेन हिमवानिवोल्लसन्हरिमण्डपो जयति निरभरं वरः ॥२॥

यमवेक्ष्य मोदनिरतैस्सविस्मयैर्विविधातिचारूरचनाचितं जनैः ॥
अवलोक्यते सकलशिल्पिकौशलं हरिमण्डपो जयति निर्भरं वरः ॥३॥
अतिरम्यपञ्चविधरंगशोभया परिराजितस्सुरविमानलज्जनः॥
सुरसिन्धुनीरमिव चित्रवारिजैर्हरिमण्डपो जयति निर्भरं वरः ॥४॥
हरिभूरिवासपरिलब्धसद्गुणैर्जनपापतापहरभद्रदर्शनः ॥
प्रहसन्सुरेशमुखसौधसुश्रियं हरिमण्डपो जयति निर्भरं वरः ॥५॥
अशनं हि यत्र विदधे मुहुर्हरिः शयनं सभाश्रितवतां सतां शुभम् ॥
मुनिभिर्व्यचीकरत चारूगायनं हरिमण्डपो जयति निर्भरं वरः ॥६॥
स्मरयन्हरिं हरिपदाश्रयं गतान्स्वविलोकनाज्जनगणान्मुहुर्मुहुः ॥
असमानया प्रचुरया श्रियान्वितो हरिमण्डपो जयति निर्भरं वरः ॥७॥
विचकास्ति यत्र परमं महाधनं शयनं हरेर्वरपरिच्छदं शुभम् ॥
हरिभुक्तदिव्यवसनादिराजितो हरिमण्डपो जयति निर्भरं वरः ॥८॥
रचितं मयाञ्चितमचिन्त्यवर्णिना हरिमण्डपाष्टकमिदं सुमंगलम् ॥
शृणुयात्यजेज्जगति यश्च कीर्त्तयेत्स सुखं व्रजेच्च नितरां हरौ रतिम् ॥९॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं हरिमण्डपाष्टकं समाप्तम् ॥*

## १२४ ● ॥ ललितच्छदः ॥

कुसुमकंकणं दिव्यभूषणं विमलवीक्षणं सर्वसाक्षिणम् । सुभगलक्षणं भक्तरक्षणं भज मनो हरिं धर्मजं प्रभुम् ॥१॥
जगति निस्पृहं शान्तविग्रहं कलिमलापहं वासनादहम् । करयुगांगदं नेत्रमोददं भज मनो हरिं धर्मजं प्रभुम् ॥२॥
कुपथखण्डनं विश्वमण्डनं विनतरंजनं दुष्टभंजनम् । निगमदोहनं काममोहनं भज मनो हरिं धर्मजं प्रभुम् ॥३॥
कमललोचनं दुःखमोचनं सुखदकीर्तनं साधुवर्त्तनम् । विधिभवार्चितं नाशिताहितं भज मनो हरिं धर्मजं प्रभुम् ॥४॥
वदनसूत्पलं कञ्जपत्तलं कनककुण्डलम् कीर्तिमण्डलम् । असितकुन्तलं भक्तवत्सलम् भज मनो हरिं धर्मजं प्रभुम् ॥५॥
सुकृतवर्द्धनं प्रेष्ठनिर्द्धनं स्वकृतविज्जवरं सद्भिरीश्वरम् । सगुणनिन्दितं देववन्दितं भज मनो हरिं धर्मजं प्रभुम् ॥६॥
अभयदायिनं मायिमायिनं जलधिजापतिं शास्त्रसन्मतिम् । अमितमार्दवं स्वर्त्तिलाघवं भज मनो हरिं धर्मजं प्रभुम् ॥७॥
विधृतसद्गुणं नित्यनिर्गुणं शुभतनुप्रभं योगिदुर्ल्लभम् । अमरपालकं धर्मधारकं भज मनो हरिं धर्मजं प्रभुम् ॥८॥

*॥ इति मञ्जुकाशानन्दविरचितं भजनाष्टकं समाप्तम् ॥*

## १२५ ● ॥ पुष्पिताग्रावृत्तम् ॥

नवसलिलधरालिकान्तमूर्तिं मदनमनोहरमीश्वरस्वतन्त्रम् ॥
दलितकलुषकालतिष्पभीतिं निजहृदि धर्मसुतं हरिं भजेऽहं ॥१॥
सकलभुवनरञ्जनैकबन्धुं मणिमयभूषणभूषितं मनोज्ञम् ॥
निजहृदयतमोपहं मुनीशं निजहृदि धर्मसुतं हरिं भजेऽहं ॥२॥

मुनिगणनयनाम्बुजोष्णरश्मिविषयकदम्बनिखण्डनातिदक्षम् ॥
निगमवृषविरूद्धवर्त्तिचण्डं निजहृदि धर्मसुतं हरिं भजेऽहं ॥३॥
खलगुरूचयकन्दनप्रविणं रचितवृषामरसाधुविप्ररक्षम् ॥
जनिमृतिहरणक्षमाभिधानं निजहृदि धर्मसुतं हरिं भजेऽहं ॥४॥
भूजितजनकुवासनोरूपुञ्जं स्वजनहितावहशासनं प्रतीक्ष्यम् ॥
विमलमतिमतां मतं वदान्यं निजहृदि धर्मसुतं हरिं भजेऽहं ॥५॥
सरसिजदलदीर्घदृष्टियुग्मं मिहिरहिमाशुचयाधिधामधीष्णम् ॥
अमरमुनिमनोमहासुखेहं निजहृदि धर्मसुतं हरिं भजेऽहं ॥६॥
अमितगुणगणाम्बुधिं महेच्छं नटवरमञ्जुलवेषमाप्तकामम् ॥
निगमनलिनचित्रभानुमाद्यं निजहृदि धर्मसुतं हरिं भजेऽहं ॥७॥
अपरिमितजनैः समर्च्यमानं प्रचुरवरागरूकेसरप्रसूनैः ॥
पुरटतरलरत्नमोक्तिकाद्यैः निजहृदि धर्मसुतं हरिं भजेऽहं ॥८॥

*॥ इति उत्तमचरणदासमुनिविरचितं श्रीहरिभजनाष्टकं समाप्तम् ॥*

## १२६ • ॥ स्वागतावृत्तम् ॥

अष्टकोणयवजाम्बवरेखास्वस्तिकेतुकमलांकुशवज्रैः। संश्रितारूणतलांगुलिरम्यं नीलकण्ठचरणं हृदयेऽस्तु ॥१॥
व्योमचापकलशार्द्धशशांकसत्रिकोणशुभगोपदमीनैः । लक्षणैर्युतमनंगविमोहं नीलकण्ठचरणं हृदयेऽस्तु ॥२॥
स्वीयभक्तनयनाम्बुजसूरं कायलोभरतमानसदूरम् । दोषसंसृतिविनाशनसूरं नीलकण्ठचरणं हृदयेऽस्तु ॥३॥
पुष्पचापविजयप्रविलोलं सद्व्रुताश्रितजनाखिलशूलम् । ज्ञानयोगवृषमंगलमूलं नीलकण्ठचरणं हृदयेऽस्तु ॥४॥
तुंगरक्तरमणीयनखेन्दुचन्द्रिकाविजितशारदचन्द्रम् । नूतनांकुरसुकोमलसारं नीलकण्ठचरणं हृदयेऽस्तु ॥५॥
ब्रह्मशंकरसुराधिपशेषशारदाश्रुतिशिरः परिगीतम् । साधनक्षपितदूषणगम्यं नीलकण्ठचरणं हृदयेऽस्तु ॥६॥
मल्लिकाबकुलचम्पकहारैःश्चन्दनैः सुरभिकेसरयुक्तैः । पूजितं मुनिवरैर्निजभक्तैः नीलकण्ठचरणं हृदयेऽस्तु ॥७॥
भक्तिधर्मशरणागतपालं मुक्तलोकहृदयाम्बुजशालम् । सर्वतीर्थनिलयं कलिकालं नीलकण्ठचरणं हृदयेऽस्तु ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं श्रीनीलकण्ठाष्टकं समाप्तम् ॥*

## १२७ • ॥ स्त्रग्धरावृत्तम् ॥

जातं श्रीधर्मदेवादपरिमितदयासागरं प्रेमवत्यां स्वर्णालंकारवन्तं सितघनवसनं भक्तरक्षैकदक्षम् ॥
सर्वाधारंस्वतन्त्रं सजलजलधरश्यामगात्रं पवित्रं वन्दे दिव्यस्वरूपं वृषकुलतिलकं श्रीहरिं नीलकण्ठम् ॥१॥
श्वेतं यज्ञोपवीतं दधतमतिवरं तौलसीं रम्यमालां दक्षेहस्तेविशाले सुतिलकमलिके नक्तंकं कीर्तिकान्तम् ॥
दिव्ये ऽनन्तप्रकाशेऽक्षरपरमपदे पार्षदैः सेव्यमानं वन्दे दिव्यस्वरूपं वृषकुलतिलकं श्रीहरिं नीलकण्ठम् ॥२॥

सद्वृन्दैर्वन्दनीयं सरसिजवदनं पद्मपत्रायताक्षं नानापुष्पस्रजालंकृतमतिललितैश्चन्दनैश्चर्च्चितांगम् ॥
शान्ताकारं समांगं सकलगुणगणाम्भोनिधिं देवदेवं वन्दे दिव्यस्वरूपं वृषकुलतिलकं श्रीहरिं नीलकण्ठम् ॥३॥
दिव्यं सेव्यं मुनीन्द्रैः श्रितजनसुखदं सर्ववेदान्तवेद्यं स्वीयान्भक्तान्समाधौ प्रकृतिपरतरं धामसंदर्शयन्तम् ॥
सर्वैर्मुक्तैरूपास्यं नटवरवपुषं कालमायाधिनाथं वन्दे दिव्यस्वरूपं वृषकुलतिलकं श्रीहरिं नीलकण्ठम् ॥४॥
बिभ्राणं शोणवर्णंशिरसि वरतरोष्णीषमानन्दसिन्धुं ध्येयं स्वान्ते विशुद्धेऽगणितमुनिगणैश्चण्डपाषण्डनाशम् ॥
एकान्तं धर्ममाद्यं जगति निजजनान् बोधयन्तं विशुद्धं वन्दे दिव्यस्वरूपं वृषकुलतिलकं श्रीहरिं नीलकण्ठम् ॥५॥
रम्भास्तम्भोरूयुग्मं कलिमलमथनं श्रीपतिं पूर्णकामं ब्रह्मादीनामधीशं प्रियहितवचनं ध्वस्तकंदर्पदर्पम् ॥
स्वीयस्वान्तार्त्तिवैरिक्षपणपटुतरं भूषणं सज्जनानां वन्दे दिव्यस्वरूपं वृषकुलतिलकं श्रीहरिं नीलकण्ठम् ॥६॥
वासः पीतं दधानं रूचिरकटितटे कर्णपुष्पावतंसं रम्यं रक्तं निचोलं निखिलभयहरंचारूबिम्बाधरोष्ठम् ॥
सारान् हाराननेकान्विविधमणिमयान्सत्प्रसूनावचूलं वन्दे दिव्यस्वरूपं वृषकुलतिलकं श्रीहरिं नीलकण्ठम् ॥७॥
श्रीमन्मन्दस्मितास्यंतरलसुमधुरप्रेक्षणंकम्बुकण्ठं वंदैर्ब्रह्मस्वरूपैर्निजचरणरतैर्योगिभिर्गीतकीर्त्तिम् ॥
अष्टांगं योगमीड्यंपरमकरूणयाशिक्षयन्तं स्वभक्तान् वन्दे दिव्यस्वरूपं वृषकुलतिलकं श्रीहरिं नीलकण्ठम् ॥८॥

*॥ इत्याचिन्त्यानन्दवर्णिविरचितं श्रीनीलकण्ठाष्टकं समाप्तम् ॥*

## १२८ ● ॥ नर्कुटकंवृत्तम् ॥

स्वयमखिलेश्वरोऽक्षरपरोऽप्यवतारधरः पुरूविदधत्तपो जगति शिक्षयितुं तपताम् ॥
परमतपोधनोनिखिलतापसमानहरो मम हृदि नीलकण्ठ वस नैष्ठिकवेश हरे ॥१॥
पुरटजटाच्छटामुकुटमण्डितदिव्यशिरो रूचिरचमूरूचर्मवसनो वरचीरधरः ॥
दधदुपवीतमिन्दुविशदं लसदंसतटे मम हृदि नीलकण्ठ वस नैष्ठिकवेश हरे ॥२॥
ललितकमण्डलुं कमलशालिकरे निदधद्रुचिकरचन्द्रकं तिलकलक्ष्म ललाटतले ॥
तनुतुलसीस्रजौ शुभगले दरचारूतरे मम हृदि नीलकण्ठ वस नैष्ठिकवेश हरे ॥३॥
बहुलतपोव्रताद्यतिकृशीकृतदिव्यतनुस्तप इव मूर्तिमद्धिततकान्तिरनन्तधृतिः ॥
विरतिमहोदधिर्निखिलदिव्यगुणैकनिधिः मम हृदि नीलकण्ठ वस नैष्ठिकवेश हरे ॥४॥
वृषभुवमागता यनधिसेवितुमार्त्तिहरे बहुविधसिद्धयोपि न हि येन दृशा ददृशे ॥
निजपरदिव्यरूपसुखवारिधिमग्नमनाः मम हृदि नीलकण्ठ वस नैष्ठिकवेश हरे ॥५॥
अतुलमवेक्ष्य यस्य सुतपोबहुचित्रमतैर्दुहिणमुखेश्वरैरखिलसिद्धतपस्विगणैः ॥
प्रणतपदाम्बुजोदुरितभेदनभद्रयशाः मम हृदि नीलकण्ठ वस नैष्ठिकवेश हरे ॥६॥
सततनिजात्मदर्शनरतो विधृतोपशमो मुनिजनचिन्त्यमानचरणः करूणाजलधिः ॥
शुभसकलांगयोगकलनानिलयो रूचिरो मम हृदि नीलकण्ठ वस नैष्ठिकवेश हरे ॥७॥

जगति जयन्सकैतवगुरूनपि शास्त्रविदो निजमहसात्वधर्ममभितो निखनन्निखिलम् ।।
वृषकुलपोषण: परमहंसगणैकगुरू: मम हृदि नीलकण्ठ वस नैष्ठिकवेश हरे ।।८।।

*।। इत्यचिन्त्यानन्दवर्मणिविरचितं श्रीनीलकण्ठाष्टकं समाप्तम् ।।*

## १२९ ● ।। उपजातिवृत्तम् ।।

सतां पतिं मुक्तिमतां मुनिनां महामहिम्नामपि माननीयम् । धर्मैकसेतुं मदनादिकेतुं श्रीनीलकण्ठं शरणं प्रपद्ये ।।१।।
जगद्भवस्थेमलयादिखेलं पयोदभासं जगतां निवासम् । नारायणं नीरजपत्रनेत्रं श्रीनीलकण्ठं शरणं प्रपद्ये ।।२।।
समाधिमन्तं स्मितसुन्दरास्यं सितांशुकं शोभितशेखरालिम् । भक्तोत्तमैश्चन्दनचर्चितांगं श्रीनीलकण्ठं शरणं प्रपद्ये ।।३।।
स्रजं गृहित्वा भजतो भजन्तं सबीजयोगं च सतो ब्रुवन्तम् । वृतं स्वभक्तैर्भगणैरिवेन्दुं श्रीनीलकण्ठं शरणं प्रपद्ये ।।४।।
सुगन्धिपुष्पार्पितसारहारं मनोहरं मंगलंमूर्तिमीशम् । दयार्द्रदृष्टीक्षितभक्तलोकं श्रीनीलकण्ठं शरणं प्रपद्ये ।।५।।
अधर्मभारां जगतीं निशम्य द्रुतं जगत्यां धृतदिव्यरूपम् । पुर्णेन्दुवक्रं जनताविचित्रं श्रीनीलकण्ठं शरणं प्रपद्ये ।।६।।
जनाननेकान्महसा निजस्य भवप्रवाहाद्द्रुतमुद्धरन्तम् । आनन्दकन्दं मुनिवृन्दजुष्टं श्रीनीलकण्ठं शरणं प्रपद्ये ।।७।।
स्फुरत्प्रतापं प्रकरप्रभाषं प्रशान्तयातं श्रुतिशेषशंभुम् । योगैकनाथं शरणैकसाधुं श्रीनीलकण्ठं शरणं प्रपद्ये ।।८।।

*।। इति योगानन्दमुनिविरचितं नीलकण्ठशरणाष्टकं समाप्तम् ।।*

## १३० • ॥ अनुष्टुप्छन्दः ॥

धर्मकर्ता धर्मवक्ता धर्मात्मा धर्मसंस्थितिः । धर्मरक्षावतारो मे प्रियतां धर्मनन्दनः ॥१॥
धर्मभक्तीष्टसुखदो धर्मयुग्मभक्तिबोधकः । धर्मनिष्ठजनप्रेष्ठः प्रीयतां धर्मनन्दनः ॥२॥
धर्मस्थापनउद्युक्त धर्मशास्त्रप्रवर्तकः । धर्मयुक्तज्ञानवक्ताः प्रीयतां धर्मनन्दनः ॥३॥
धर्महीनोन्मुलनकृद्धर्मरूपप्रकाशकः । धर्मकार्यरतोनित्यं प्रीयतां धर्मनन्दनः ॥४॥
धर्माश्रयो धर्मरूचिर्धर्मी धर्मधुरन्धरः । धर्मनिष्ठजनैः सेव्यः प्रीयतां धर्मनन्दनः ॥५॥
धर्मविज्ञो धर्मवपुर्धर्मरूपाखिलक्रियः । धर्मकीर्त्तिर्धर्ममतिः प्रीयतां धर्मनन्दनः ॥६॥
धर्मसर्गैकसंपोष्टा न्यस्तधर्मधुरान्वयः । स्वेष्टदेवो हि धर्माख्यः प्रीयतां धर्मनन्दनः ॥७॥
धर्मरक्षणविख्यातो धर्मपत्नीस्तनन्धयः । धर्मौद्धवपथाचार्यः प्रीयतां धर्मनन्दनः ॥८॥

*॥ इति शिवरामशर्मप्रोक्तं धर्माष्टकं समाप्तम् ॥*

## १३१ • ॥ द्रुतविलम्बितंवृत्तम् ॥

वदनतर्ज्जितरम्यहिमांशुके कमलकोमलपत्रविलोचने । मदनमोहनसुन्दरविग्रहे भवहरेऽस्तु मनो वृषनन्दने ॥१॥
मुनिसमाजसदासनसंस्थिते पुरटनूपुररम्यपदाम्बुजे । उदरनाभिवलित्रयराजिते भवहरेऽस्तु मनो वृषनन्दने ॥२॥
कुसुममालविशालभुजान्तरे मधुरहासविलासमुखाम्बुजे । रूचिरकेसरचन्दनचर्चिते भवहरेऽस्तु मनो वृषनन्दने ॥३॥
जघनकाञ्चनभासुरमेखले ललितमौक्तिकहारमनोहरे । कुटिलमम्बुलनीलशिरोरूहे भवहरेऽस्तु मनो वृषनन्दने ॥४॥

विशदचन्द्रकरप्रभशेखरे प्रणतपापविनाशदिवाकरे। धृतवलक्षविशालघनाम्बरे भवहरेऽस्तु मनो वृषनन्दने ॥५॥
क्षपितभक्तमनोभववेदने कनकभूषणहारिकरद्वये। अरूणरागशिरःपटशोभिते भवहरेऽस्तु मनो वृषनन्दने ॥६॥
तिलकलक्षणराजितगण्डके श्रुतिसितेतरबिन्दुमनोहरे। श्रवणकुण्डलशालिकपोलके भवहरेऽस्तु मनो वृषनन्दने ॥७॥
मधुरवाक्यसुधारसपोषके निजजनोदितयोगरहस्यके। वदति संसदि कृष्णनिरूपणं भवहरेऽस्तु मनो वृषनन्दने ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं श्रीधर्मनन्दनाष्टकं समाप्तम् ॥*

## १३२ ● ॥ नर्कुटकंवृत्तम् ॥

मदनमनोहरे प्रणतपापविनाशकरे कमलविलोचने कनककुण्डलकर्णयुगे ॥
स्मितमधुरानने क्षपितभक्तमनोजरिपौ भगवति मानसं वसतु धर्मतनुप्रभवे ॥१॥
धृतिदमसत्यशीलबलकान्तिविरक्तितपोविनयदयाशमस्मृतिसुकीर्तिभगप्रमुखैः ॥
वृजिनहरैर्युतेगुणगणैर्ध्रुवदिव्यपरैः भगवति मानसं वसतु धर्मतनुप्रभवे ॥२॥
अरूणतराधरे विशदशारदचन्द्रमुखे मृदुलविशालतुंगहृदयेऽक्षरमुक्तपतौ ॥
सततमुपासिते मुनिवरैर्जितदोषगणैः भगवति मानसं वसतु धर्मतनुप्रभवे ॥३॥
स्थलनलिनावचूलतनुरक्तशिरोवसने सुविहितसांख्ययोगनिगमादिरहस्यविधौ ॥
उदारवलित्रयान्तरसुरम्यकनाभिनदे भगवति मानसं वसतु धर्मतनुप्रभवे ॥४॥
शरणगतार्तिमोचनमलक्षपणाचरिते परिधृतशुभ्रदीर्घवसनोज्जवलकुन्दरदे ॥

कुसुमसुसारहारमधुपाधिपरम्यरवे भगवति मानसं वसतु धर्मतनुप्रभवे ॥५॥
कनकविभूषणेऽपरिमिताऽचलसौख्यनिधौ शुभजपमालिकाधृतिविराजितदक्षभुजे ॥
निजवचनामृताब्धिपरितोषितसाधुजने भगवति मानसं वसतु धर्मतनुप्रभवे ॥६॥
ललितललाटकेसरचन्द्रकपत्रलते नवजलदावलक्षनिजमुक्तविनोदरते ॥
कुटिलशिरोरूहेनिजभुजान्तरदत्तपदे भगवति मानसं वसतु धर्मतनुप्रभवे ॥७॥
कमलयवाष्टकोणकलशाम्बरजम्बुफलध्वजकुलिशांकुशप्रमुखलक्षणपादयुगे ॥
विधिभवशेषवन्दितपदे रमणीयतनौ भगवति मानसं वसतु धर्मतनुप्रभवे ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं श्रीधर्मनन्दनाष्टकं समाप्तम् ॥*

## १३३ • ॥ पुष्पिताग्रावृत्तम् ॥

असुरगुरूविनाशनातिदक्षं नखविधुमण्डलशालिपादपद्मम् ॥
कलितललितपुष्पहाररम्यं निजहृदिधर्मजनिं हरिं स्मरामि ॥१॥
रूचिरतिलकनक्तकोपवीतं कुटिलसुमञ्जुलसूक्ष्मनीलकेशम् ॥
विमलकमलचारूपत्रनेत्रं निजहृदिधर्मजनिं हरिं स्मरामि ॥२॥
चपलतुरगरोहणप्रलोलद्युतिवरशेखरराजिराजमानं ॥
विविधकुलुमनूपुरांगदं च निजहृदिधर्मजनिं हरिं स्मरामि ॥३॥

मितहसननिजाननातिशोभाविजितसुधाकरनीरजं मुनीशम् ॥
वृषकुलजलजप्रकाशभानुं निजहृदिधर्मजनिं हरिं स्मरामि ॥४॥
विजितमदनमानमुख्यदोषैर्विषयविरागयुतैर्मुनीन्द्रसंघैः ॥
सततमतिविचिन्तनीयपादं निजहृदिधर्मजनिं हरिं स्मरामि ॥५॥
धृतसितवसनं मनोहरांगं चिरवलितत्रयवृत्तनाभिकूपम् ॥
रतिपतिमदहारणस्वरूपं निजहृदिधर्मजनिं हरिं स्मरामि ॥६॥
किसलयजघनस्थलाभिरामं कूचिकरमौक्तिकसारहारकण्ठम् ॥
प्रणतजनभवाब्धिपारहेतुं निजहृदिधर्मजनिं हरिं स्मरामि ॥७॥
अभिनवजलदोपमेयवर्णं कनकविभूषणकौसुमावतंसं ॥
सुललितजपमालिकां दधानं निजहृदिधर्मजनिं हरिं स्मरामि ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं धर्मनन्दनश्रीहरेरष्टकं समाप्तम् ॥*

## १३४ ● ॥ पञ्चचामरवृत्तम् ॥

अधर्मसर्गमर्द्दनं सुखप्रदं जनार्द्दनं निजद्विषन्निकन्दनं पवित्रमार्गमन्दनम् ॥
विलिप्तचारूचन्दनं भवन्तमार्यवन्दनं भजामहे स्वभन्दनं वयं हि धर्मनन्दनम् ॥१॥
अमेध्यबुद्धिशोधनं स्वसिद्धशुद्धबोधनं कलिप्रवृत्तिरोधनं पदा नमत्तपोधनंम् ॥

विभिन्नयाम्ययोधनं पवित्रसद्यशोधनं भजामहे स्वभन्दनं वयं हि धर्मनन्दनम् ।।२।।
क्षराक्षरप्रशासिनं सदागमप्रकाशिनं मुनीन्द्रचित्तवासिनं विमुक्तचित्सभासिनम् ।।
अनेकसूर्यभासिनं स्वभक्तसद्विलासिनं भजामहे स्वभन्दनं वयं हि धर्मनन्दनम् ।।३।।
इहावतारधारिणं स्वभक्तशान्तिकारिणं कुमार्गजालदारिणं भवाम्बुराशितारिणम् ।।
सुवर्णिवेशधारिणं विचित्रसारहारिणं भजामहे स्वभन्दनं वयं हि धर्मनन्दनम् ।।४।।
मुनीन्द्रवृन्दरञ्जनं विवादिगर्वगञ्जनं सदोपहृदिमञ्जनं तमोहरंनिरञ्जनं अकामभक्त ।।
सञ्जनंकृतान्तभीतिभञ्जनं भजामहे स्वभन्दनं वयं हि धर्मनन्दनम् ।।५।।
दयासुधार्द्रलोचनं विबद्धजीवमोचनं नवाम्बुदालिरोचनं हृतस्वकीयशोचनम् ।।
सुचारूशीलशालिनं समस्तभक्तपालिनं भजामहे स्वभन्दनं वयं हि धर्मनन्दनम् ।।६।।
अदोषभक्ततोषणं सधर्मभक्तिपोषणं प्रियप्रहीणरोषणं प्रपन्नपापमोषणम् ।।
स्वकीयदोषशोषणं विशुद्धहार्द्दजोषणं भजामहे स्वभन्दनं वयं हि धर्मनन्दनम् ।।७।।
सुधर्मवंशमण्डनं प्रचण्डदुष्टदण्डनं कुवासनाविखण्डनं नताखिलार्त्तिकण्डनम् ।।
असन्मतावतण्डनं सदम्भमानभण्डनम् भजामहे स्वभन्दनं वयं हि धर्मनन्दनम् ।।८।।

*।। इत्यचिन्त्यानन्दवर्णिविरचितं श्रीधर्मनन्दनवर्णनाष्टकं समाप्तम् ।।*

## १३५ ● ॥ पंक्तिजातौललितच्छाया ॥

नीरजाननं मुक्तमाननं धर्मभावनं लोकपावनम् । मानमोहनं शास्त्रदोहनं चिन्तये हरिं धर्मनन्दनम् ॥१॥
पीतचन्दनं भद्रवन्दनं भक्तभन्दनं दुष्टकन्दनम् । स्मेरभासिनं सद्विलासिनं चिन्तये हरिं धर्मनन्दनम् ॥२॥
मेघरोचनं तारूलोचनं बद्धमोचनं ध्वस्तशोधनम् । भूरिभासरसं शुभ्रवाससं चिन्तये हरिं धर्मनन्दनम् ॥३॥
गर्वगंजनं दोषभंजनं भक्तरंजनं सव्यसंजनम् । स्वीयमोदनं मुक्तनोदनं चिन्तये हरिं धर्मनन्दनम् ॥४॥
शुद्धबोधनं बुद्धिशोधनं तिष्यरोधनं सत्तपोधनंम् । ध्वस्तदूषणं चित्रभूषणं चिन्तये हरिं धर्मनन्दनम् ॥५॥
भक्तपोषणं शास्त्रजोषणं चित्तमोषणं धर्मितोषणम् । पापशोषणं ध्वस्तरोषणं चिन्तये हरिं धर्मनन्दनम् ॥६॥
शान्तिकारिणं स्वर्णहारिणं धर्मधारिणं मोदकारिणम् । मुक्तचारिणं प्रणितारिणं चिन्तये हरिं धर्मनन्दनम् ॥७॥
भक्तपालिनं दीर्घमालिनं माल्यमालिनं सद्गुणालिनम् । चारूलक्षणं प्राप्तरक्षणं चिन्तये हरिं धर्मनन्दनम् ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं धर्मनन्दनाष्टकं समाप्तम् ॥*

## १३६ ● ॥ भक्तिनन्दनाष्टकं ॥ ललितच्छदः ॥

ललितचन्दने मुक्तवन्दने भवनिकन्दने भक्तभन्दने । निपुणबोधने बुद्धिशोधने वसतु मानसं भक्तिनन्दने ॥१॥
विषयखण्डने कोपतण्डने कनकमण्डने चण्डदण्डने । मदनकण्डने मानभण्डने वसतु मानसं भक्तिनन्दने ॥२॥
सितताम्बरे पल्लवाधरे रूचिरशेखरे भक्तगोचरे । उरूभुजान्तरे मालिकाकरे वसतु मानसं भक्तिनन्दने ॥३॥
कमललोचने वीतशोचने जलदरोचने दुःखमोचने । निजमनोहरे हृत्तमोहरे वसतु मानसं भक्तिनन्दने ॥४॥

असुरमोहने शास्त्रदोहने दुरितशोषणे भक्तपोषणे । सरसिजानने धर्मभावने वसतु मानसं भक्तिनन्दने ॥५॥
भयनिवारणे लोभमारणे प्रमततारणे दम्भहारणे । निगमधारणे सर्वकारणे वसतु मानसं भक्तिनन्दने ॥६॥
कृतनिजावने सज्जनासने विपुलभासने भक्तशासने । विजितदूषणे पुष्पभूषणे वसतु मानसं भक्तिनन्दने ॥७॥
असुरनिग्रहे मुक्तसंग्रहे करसरोरूहे दिव्यविग्रहे । श्रितसुखावहे प्रार्थनावहे वसतु मानसं भक्तिनन्दने ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं श्रीभक्तिनन्दनाष्टकं समाप्तम् ॥*

## १३७ ● ॥ वसन्ततिलकावृत्तम् ॥

श्रीमन्नवीनजलदासितसुन्दरांगं रत्नांगुलीयवलयांगदहस्तयुग्मम् ॥
मन्दारकुन्दसुरभिस्थलपद्महारं वन्दे विशुद्ध हरिकृष्णमहं सदीशम् ॥१॥
पद्माष्टकोणपविजम्बुफलोर्द्धरेखास्वस्त्यंकुशध्वजयवश्रितदक्षिणांघ्रिम् ॥
गोपादमीनमुखलक्षणसव्यपादं वन्दे विशुद्ध हरिकृष्णमहं सदीशम् ॥२॥
ग्रैवेयभूषितसुमौक्तिकमालिकण्ठं सन्मल्लिकाकुसुमदिव्यरदोत्पलास्यम् ॥
बिम्बाधरोष्ठतिलकांकितदक्षगण्डं वन्दे विशुद्ध हरिकृष्णमहं सदीशम् ॥३॥
उत्फुल्लकोकनदकोमलपत्रनेत्रं दक्षोतरश्रवणमेचकबिन्दुमीशम् ॥
श्रीखण्डकेशरसमर्च्चितमीक्षणीयं वन्दे विशुद्ध हरिकृष्णमहं सदीशम् ॥४॥
दिव्यातिशुभ्रवसनत्रयमादधानं पुष्पावतंसलघुमञ्जुलवक्रकेशम् ॥

काश्मीरचन्द्रकललामतमालपत्रं वन्दे विशुद्ध हरिकृष्णमहं सदीशम् ।।५।।
श्रीवत्सलक्ष्मविपुलोन्नतनीलकान्ति वक्षः सुवर्णमयभूषणशोभमानम् ।।
काञ्चीकलापकटिमण्डलमाप्तकामं वन्दे विशुद्ध हरिकृष्णमहं सदीशम् ।।६।।
रम्योदरं शुभवलित्रयराजमानं कारूण्यसागरनिजाश्रितबोधदक्षम् ।।
मञ्जीरलब्धपरभागपदारविन्दे वन्दे विशुद्ध हरिकृष्णमहं सदीशम् ।।७।।
कार्त्तस्वरस्फुरितकुण्डलवल्गितेन चञ्चत्कपोलतिलपुष्पसमाननासम् ।।
मन्दस्मितद्युतिविलज्जितपूर्णचन्द्रं वन्दे विशुद्ध हरिकृष्णमहं सदीशम् ।।८।।

*।। इत्यचिन्त्यानन्दवर्णिविरचितं श्रीहरिकृष्णाष्टकं समाप्तम् ।।*

## १३८ ● ।। शिखरिणीवृत्तम् ।।

निजे दिव्यस्थानेऽक्षरमुनिगणैर्वन्दितपदः पदाम्भोजासक्तान्तरतिमिरनाशद्युतिकरः ।।
दधानो हस्ताग्रे ललितजपमालां मुनिवरः सदा स्वान्ते सेव्योरूचिरहरिकृष्णो वसतु मे ।।१।।
कृपासिन्धुश्चन्द्रप्रतिनिभमुखश्चञ्चलगतिर्दयापूर्णप्रेक्षाश्रितसकलसंतापशमनः ।।
मुनीन्द्राणामीशः सदयहृदयो दिव्यचरितः सदा स्वान्ते सेव्योरूचिरहरिकृष्णो वसतु मे ।।२।।
सदानन्दानन्दः प्रणतजनपापौघदलनः शरत्ताराधीशप्ररूचिनखरम्यांघ्रियुगलः ।।
सुवर्णालंकारज्वलितमणिविद्योतितवपुः सदा स्वान्ते सेव्योरूचिरहरिकृष्णो वसतु मे ।।३।।

धृतिस्थैर्यक्षान्तिश्रुतवयुनसत्यार्ज्जवतपो विरक्तिस्वातन्त्र्यस्मृतिबलसुशीलाद्यगणितै ॥
गुणैर्युक्तो नित्यैः प्रकृतिपरदिव्याक्षरपतिः सदा स्वान्ते सेव्योरूचिरहरिकृष्णो वसतु मे ॥४॥
सुरक्तं बिभ्राणः शिरसि वसनं चातिसुखदः शरत्फुल्लाम्भोजप्रचरदलशोभाक्षियुगलः ॥
सूरैर्ब्रह्मेन्द्राद्यैरविजितमनोभूकृतजयः सदा स्वान्ते सेव्योरूचिरहरिकृष्णो वसतु मे ॥५॥
स्वभक्तान्तः शत्रुक्षपणनिपुणोऽनन्तविभवप्रसूनप्रावारांगदरूचिरमञ्जीरमुकुटः ॥
सुमन्दारोत्फुल्लस्थलनलिनहारालिनिनदः सदा स्वान्ते सेव्योरूचिरहरिकृष्णो वसतु मे ॥६॥
तुरंगे श्रीयुक्ते रूचिरगमने हेपितयुते स्थितो वल्गां धृत्वा कमलमृदुहस्तेन परमः ॥
सदश्वारूढैः स्वैर्निजवदनलीनैः परिवृतः सदा स्वान्ते सेव्योरूचिरहरिकृष्णो वसतु मे ॥७॥
स्थलाब्जानां हारैः प्रवरतिलकैः केसरयुतैर्जनैर्भक्तैः प्रीत्या सुविहितनमस्यातिसुभगः ॥
सतां ध्येयो नित्यं मृदुलसितदिव्याम्बरधरः सदा स्वान्ते सेव्योरूचिरहरिकृष्णो वसतु मे ॥८॥

*॥ इत्याचिन्त्यानन्दवर्णिविरचितं श्रीहरिकृष्णाष्टकं समाप्तम् ॥*

## १३९ ● ॥ शिखरिणीवृत्तम् ॥

प्रचण्डं पाखण्डं क्षयमुषनयन्तं स्वमहसासदर्पं कन्दर्पंकिल परिभवन्तं यतिपतिम् ॥
श्रियः कान्तं शान्तं कमलदलशोभेक्षणयुगं हरिं दिव्यं सेव्यं वृषजनिमहं नौमिसुखदम् ॥१॥

सदाध्येयं गेयं जितसकलदोषैर्मुनिगणैः श्रितस्वान्तध्वान्तक्षपणनिपुणं दिव्यचरितम् ॥
अमन्दानन्दाब्धिं प्रणतजनमोक्षैकनियमं हरिं दिव्यं सेव्यं वृषजनिमहं नौमिसुखदम् ॥२॥
विशुद्धैः संसिद्धैः परशुभगुणैर्मुक्तनिकरैः सदागम्यं रम्यं सकलमुनिवृन्दं सकरूणम् ॥
महापक्षं दक्षं सजलजलदश्यामवपुषं हरिं दिव्यं सेव्यं वृषजनिमहं नौमिसुखदम् ॥३॥
बहून् हारान् दिव्यान् कनकमणिपुष्पादिरचितान् सुशोणंबिभ्राणं मृदुलवसनं मूर्ध्नि रूचिरम् ॥
स्वतन्त्रं सन्मन्त्रं द्युतिवरनिचोलं च दधतं हरिं दिव्यं सेव्यं वृषजनिमहं नौमिसुखदम् ॥४॥
पदासक्तं भक्तं संमभिगमयन्तं निजपदं विशाले भाले स्वे ललिततिलकं चन्द्रकयुतम् ॥
दधानं संव्यानं रूचिरमरूणं चञ्चलगतिं हरिं दिव्यं सेव्यं वृषजनिमहं नौमिसुखदम् ॥५॥
उदारं सारं सत्कटितटपटं शेखरधरं वसानं सानन्दं सदरूणनिचोलं मुनिवरम् ॥
सदादेशं क्लेशं द्रुतमुपहरन्तं स्वभजतां हरिं दिव्यं सेव्यं वृषजनिमहं नौमिसुखदम् ॥६॥
सनिर्वेदैर्वेदैर्निगदितगुणं मुक्तमुदितं सकामैर्निष्कामैस्त्रिदसमनुजैः सेव्यचरणम् ॥
कृपावीक्षाशिक्षाश्रितसकलदोषार्त्तिशमनं हरिं दिव्यं सेव्यं वृषजनिमहं नौमिसुखदम् ॥७॥
पवित्रं सन्मित्रं श्रुतियुगलसत्कुण्डलयुगं लसत्केशं वेशं वरमुपदधानं गुणनिधिम् ॥
विमोहं दिव्योहं विमलमलिनास्यंभवहरं हरिं दिव्यं सेव्यं वृषजनिमहं नौमिसुखदम् ॥८॥

*॥ इत्याचिन्त्यानन्दवर्णिविरचितं धर्मोद्भवश्रीहरेरष्टकं समाप्तम् ॥*

## १४० • ॥ गुर्ज्जररागेएकतालीतालेगीयते ॥

सुखदविहारे भवभयहारे भगवतिवृषजनिधारे । मम भवहारे शमितविकारे निवसतु चित्तमुदारे ॥ सुखद.. ॥१॥
दनुजविदारे निखिलाधारे रक्षितवृषपरिवारे । मोहितमारे मंगलकारे प्रमुदितमुनिजनवारे ॥ सुखद.. ॥२॥
शर्मकलापे मधुरालापे विदलितकलुषकलापे । नुदितकलापे मुक्तकलापे कटितटपुरटकलापे ॥ सुखद.. ॥३॥
परमनिदेशे सुललितवेषे स्मितमुखविजितकलेशे । नमदमरेशे परिजितदेशे कुटिलसुमञ्जुलकेशे ॥ सुखद.. ॥४॥
श्रितजनपाले कलिमलकाले कल्तललितजपमाले । सुविपुलभाले चित्रकशाले पदशयनखविधुमाले ॥ सुखद.. ॥५॥
धृतमतिचापे कुमतिदुरापे विरमितनिजजनतापे । शिवकरजापे मोचिततापे पोषितपरिगतपापे ॥ सुखद.. ॥६॥
वरवृषमूले महदनुकूले मरूदरिगुरूकुलतूले । सुररिपुशूले ललितदुकूले मणिगणलसदवचूले ॥ सुखद.. ॥७॥
रूचिरचरित्रे परमपवित्रे कुसुमवतंसधरित्रे । विमलमुनित्रे जनचयचित्रे क्षपितविदूषणमित्रे ॥ सुखद.. ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं श्रीहरिगीतं समाप्तम् ॥*

## १४१ • ॥ वियोगिनीवृत्तम् ॥

शुभशान्तमनोहराकृति वरकल्याणगुणादिवारिधिम् रमणीयतराक्षरेश्वरं हरिकृष्णं प्रणमामि शर्मदम् ॥१॥
दुरितार्त्तिनिवारणेक्षणं निजपादाश्रितभक्तरक्षणम् । जनमोक्षविधौ विचक्षणं हरिकृष्णं प्रणमामि शर्मदम् ॥२॥
प्रचुरस्मरदर्पहारिणं शरणायातविमुक्तिकारिणं । स्मृतिमात्रविपद्विदारणम् हरिकृष्णं प्रणमामि शर्मदम् ॥३॥
शुभधर्मकुलैकपोषणं बहुलक्लेशददोषशोषणम् । क्षतवासनभक्ततोषणं हरिकृष्णं प्रणमामि शर्मदम् ॥४॥

रमणीयमणीन्द्रमालिनं मणिहेमाभरणातिशालिनम् । तिलकातिमनोज्ञभालिनं हरिकृष्णं प्रणमामि शर्मदम् ॥५॥
पुरूकान्तितयातिरोचनं जलजन्मच्छदचारूलोचनम् । शमनानुगभीतिमोचनं हरिकृष्णं प्रणमामि शर्मदम् ॥६॥
कलिसर्वकलाविखण्डनं परमैकान्तिकभक्तमण्डनम् । निजभक्तजनाऽरितण्डनं हरिकृष्णं प्रणमामि शर्मदम् ॥७॥
वरमुक्तसमाजरञ्जनं जनताऽज्ञानहरं निरञ्जनम् । त्रिदशारिबलप्रभञ्जनं हरिकृष्णं प्रणमामि शर्मदम् ॥८॥

*॥ इत्याचिन्त्यानन्दवर्णिविरचितं श्रीहरिकृष्णाष्टकं समाप्तम् ॥*

## १४२ ● ॥ उपजातिवृत्तम् ॥

सद्भक्तिबालं निजभक्तपालं कामादिकालं कुसुमातिमालम् । सतां रसालं सरसैकशालं वन्दे विशुद्धं हरिकृष्णमीशम् ॥१॥
महाकलेशं न महाकलेशं महाकलेशं सुखदोपदेशम् । सन्नीलकेशं परमोपदेशं वन्दे विशुद्धं हरिकृष्णमीशम् ॥२॥
धर्मैकमूलं स्वजनानुकुलं लसद्दुकूलं स्थलजावचूलम् । सुरारिशूलप्रतिकूलतूलं वन्दे विशुद्धं हरिकृष्णमीशम् ॥३॥
रक्षोविपक्षं निजरक्षदक्षं सदेकपक्षं स्वकृपाकटाक्षम् । यशोवलक्षं जलदावलक्षं वन्दे विशुद्धं हरिकृष्णमीशम् ॥४॥
स्फुटप्रतापं तपसादुरापं क्रियाकलापं हृतभक्ततापम् । भक्तैकजापं धृतबुद्धिचापं वन्दे विशुद्धं हरिकृष्णमीशम् ॥५॥
सतामदूरं कृतपापदूरं दयातिशूरं श्रुतकर्णपूरम् । सदाजसूरं निजकामपूरं वन्दे विशुद्धं हरिकृष्णमीशम् ॥६॥
मत्स्यादिरूपं पदयातभूपं शान्तैकरूपं वरनाभिकूपम् । समांगरूपं जननीतनूपं वन्दे विशुद्धं हरिकृष्णमीशम् ॥७॥
मनोऽभिरामं सुमनोललामं लीलाललामं वियशोविरामम् । योगैककामं कृतकीर्तिरामं वन्दे विशुद्धं हरिकृष्णमीशम् ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं वन्दनाष्टकं सम्पूर्णम् ॥*

## १४३ ● ॥ वसन्ततिलकावृत्तम् ॥

ध्येयं सदापरिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरञ्चिनुतं शरण्यम् ।।
भृत्यार्तिहं प्रणतपालभवाब्धिपोतं वन्दे महापुरूषते चरणारविन्दम् ।।१।।
रेखारविन्दकलशोध्वजकल्पकारि मीनातपत्रमकरांकुशवज्रशंखैः ।।
यच्चिन्तितं परमयोगिभिरर्चयद्भिर्वन्दे महापुरूष ते चरणारविन्दम् ।।२।।
यत्कालियोरगफणामणिरत्नशोभं गोपांगनाकरसरोरूहयोगयोगम् ।।
नानाविधश्रुतिदलोद्भवकर्णपूरं वन्दे महापुरूषते चरणारविन्दम् ।।३।।
वेद्यान्तवेद्यमतिगुह्यमनन्तमाद्यं देवैः सुधेयमनिशं परमात्मकामम् ।।
संसारदुःखतरवारिधिनौ प्रतीतं वन्दे महापुरूषते चरणारविन्दम् ।।४।।
कुब्जागनाकुटिलदेहपटुत्वकारं श्रीरूक्मिणीघनपयोघरकुंकुमांकम् ।।
श्रीवैनतेयकरपल्लवबद्धशंखं वन्दे महापुरूषते चरणारविन्दम् ।।५।।
प्रह्लादभक्तपरिपालनपारिजातं विश्वंभराभरणविश्रुतपुण्यमूर्त्तिम् ।।
क्षीराम्बुराशितनयैकनिधिं शरण्यं वन्दे महापुरूषते चरणारविन्दम् ।।६।।
मुक्तिप्रदं परमयोगिमुनिन्द्रसेव्यं तापत्रयानलनिवारणमादिमूलम् ।।
वृन्दावनस्थलविहारविनोदलीलं वन्दे महापुरूषते चरणारविन्दम् ।।७।।

त्यक्तासुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठआर्यवचसा यदगादरण्यम् ॥
मायामृगं दयितयेप्सितमन्वधावद्वन्दे महापुरूषते चरणारविन्दम् ॥८॥

*॥ इति श्रीकृष्णस्तुतिस्तोत्रं संप्तम् ॥*

## १४४ ● ॥ पुष्पिताग्रावृत्तम् ॥

सकलजनविमोचनैकहेतुर्भवनगुरूः कृपयायदामुकुन्दः ॥
प्रकटितकरूणार्द्ररम्ययमूर्त्तिर्मिलति तदैव भवप्रवाहमुक्तिः ॥१॥
विषयविषमहोदधिं तरीतुं भवति तरीर्गुरूपादपद्ममेकम् ॥
निगमगदितसाधनं विना तं कृतमपिनैव सुखायदुःखमुक्त्यैः ॥२॥
सुरनरयुतमण्डमीशमायावृतमिदमावरणैः समेतमस्ति ॥
अत इह नहि कोपि मोक्षदाताप्रकटहरिं गुरूमन्तरा सदैव ॥३॥
जगतितमपहाय योगुरूः स्याद्भवति तदाश्रीयाणां भवन्नमुक्तिः ॥
स्वयमपिपतितो भवाब्धिपुरे कथमिवमोचयतिप्रपन्नजीवम् ॥४
यदि मनसि हितं विधातुमिच्छा हरिजनसंगममेकमेवकुर्याः ॥
निगमगदितलक्षणा हि सन्तोभुवि विचरन्त्यतिदुःखिदीनमुक्त्यैः ॥५

*॥ इति दीनानाथभट्टकृतं शिक्षापञ्चकं समाप्तम् ॥*

## १४५ • ॥ वसन्ततिलकावृत्तम् ॥

स्वामिंस्त्वदाननसुधाकरचन्द्रिकाशं त्वां नाप्यमन्नयननामचकोरयुग्मम् ॥
मासव्रतावधिविधेरपि दूरवृत्तेः क्लिष्टं ततश्चपलमर्पय पारणां त्वं ॥१॥
न ज्ञाप्यते यदि हरे निजपत्रदूत वाचा यदा लघु भवेत्तवपादवीक्षा ॥
त्वं सर्वजीव परिपालनशीलशाली तस्माद्दयालय दयां मयि धेहि तूर्णम् ॥२॥
श्रीमत्त्वदीयपदपंकजसन्निधाने स्थित्वा त्वदीयमुखचन्द्रमहनिरीक्ष्ये ॥
उद्बुध्यते हृदि मुहुश्च दिद्दक्षया ते तां त्वं हरे सफलयाशु किमत्र चिन्त्यम् ॥३॥
कृत्वा दयामुपररामघनाघनोपि मार्गं सुपंकिलमशेषयदुष्णरश्मिः ॥
भीतिर्नलुण्ठकजनादपि नाथ मार्गे कारूण्यसागर करोषि कुतो विलम्बम् ॥४॥
नाथ त्वदीयविरहानलकीलजालेत्वद्वाक्यसुधास्मृतिमहामरूतैधमाने ॥
आनन्दनीरदसुचञ्चललोचनाभ्यां तातप्यमानमवलोकय दीनजीवम् ॥५॥

*॥ इति दीनानाथभट्टकृतं विज्ञप्तिपञ्चकं समाप्तम् ॥*

## १४६ • ॥ भुजंगप्रयातं वृत्तं ॥

परे धाम्नि दिव्येऽक्षरे राजमानं वरैरक्षराख्यैरसंख्यैर्हि मुक्तैः ॥
पुरूप्रेमसंजुष्टपादारविन्दं हरिं स्वामिनारायणं नौमि धार्मिम् ॥१॥

अतर्क्याचलानन्तचित्रातुलश्रीनिधानांघ्रिहस्ताद्यशेषप्रतीकम् ॥

सुदिव्याद्भुतानन्दसन्दोहमूर्त्तिं हरिं स्वामिनारायणं नौमि..॥२॥

परस्मात्परं चाक्षरात्पुंप्रकृत्योः कृतान्ताक्षरादेर्नियन्तारमाद्यम् ॥

समग्रेश्वराधीश्वरं पूर्णकामम् हरिं स्वामिनारायणं नौमि..॥३॥

अनन्योपमनस्वकैकांगशोभासमुद्रोर्मिणा कोटिकन्दर्पदर्पम् ॥

हरन्तं स्वसिद्धाचलागाधबोधं हरिं स्वामिनारायणं नौमि.. ॥४॥

अनेकाण्डसर्गावनान्तादिवीक्षं सदा साक्षिणं प्राणिनामात्मतन्त्रम् ॥

निदानं विचित्रावतारव्रजानां हरिं स्वामिनारायणं...॥५॥

अधर्मान्वयोच्छेदकारिप्रतापं क्षितिस्थापितापत्तिहृद्धर्मसर्गम् ॥

भवाम्भोधिनौ शान्तिकृद्दिव्यलीलं हरिं स्वामिनारायणं.. ॥६॥

शुभैर्ब्रह्मशीर्षव्रडैर्गीयमानं भवब्रह्मशेषाक्षराद्यैरजस्रम् ॥

मुदा सर्वदा चिन्त्यमानं मुनीन्द्रैः हरिं स्वामिनारायणं नौमि धार्मिम् ॥७॥

दयासत्यशौचक्षमाधैर्यस्मृतिस्थैर्यसाम्यार्ज्जवाद्यैरसंख्यैः ॥

गुणैरेवनित्यैरूपेतं पवित्रैः हरिं स्वामिनारायणं नौमि धार्मिम् ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं धार्मिश्रीहरिमहिमाष्टकं समाप्तम् ॥*

## १४७ ● ॥ पृथ्वीवृत्तम् ॥

स्वधाम्नि रूचिरेक्षरेऽगणितसूर्यतेजोमये विराजितममायिकावयवयुक्तदिव्याकृतिम् ॥
अमायिकवराम्बराभरणभूषमांगश्रियं स्मरामि परमक्षराद्वृषभुवं हरिं सर्वदा ॥१॥
निषेवितपदाब्जमक्षरसमाख्यमुक्तव्रजैः सुदिव्यविविधोपचारनिकरैः सदापूजितम् ॥
अहीन्द्रानिगमान्तमुक्तविधिसूरिमुख्यैर्नुतं स्मरामि परमक्षराद्वृषभुवं हरिं सर्वदा ॥२॥
अतुल्यबहुलौजसं परमशान्तिपथोनिधिं विचित्ररूचिरावतारगणकारणं शर्मदम् ॥
असंख्यभुवनोद्भवस्थितिविनाशकृद्वीक्षणं स्मरामि परमक्षराद्वृषभुवं हरिं सर्वदा ॥३॥
सुरासुरनरेश्वराद्रुहिणविष्णुशर्वास्तथा विधिं यदुदितं शुभं प्रकृतिपुंकृतान्तदयः ॥
सदा चकितचेतसो हि परिपालयन्त्यादृता स्मरामि परमक्षराद्वृषभुवं हरिं सर्वदा ॥४॥
स्वराजमखिलैकलक्षमघशामनश्रावसं स्वतन्त्रमखिलांगकर्मफलदायिनं सत्पतिम् ॥
अतर्क्यविशदातुलाद्भुतविबोधभूत्यर्णवं स्मरामि परमक्षराद्वृषभुवं हरिं सर्वदा ॥५॥
शुचित्वमृदुतादयाशमदमक्षमाकान्तिभिः समत्वबलशीलकौशलतपोविरागादिभिः ॥
गुणैरगणितैर्वरैरतिशुभैर्युतं मुक्तिदैः स्मरामि परमक्षराद्वृषभुवं हरिं सर्वदा ॥६॥
सुरेश्वरसरस्वतीश्रुतिकवीन्द्रशेषादयो यदीयमहिमानमेवपरिवर्णयन्तोऽनिशम् ॥
न यान्ति नभसोन्तमण्डजगणास्तदन्तं यथा स्मरामि परमक्षराद्वृषभुवं हरिं सर्वदा ॥७॥

यदीयभवहृत्कथामृतपवित्रनद्यां सकृत् विधायपरिमज्जनं जनमनोमदान्धद्विपः ॥
प्रयाति पुरूनिर्वृतिं स्मरदवाग्निदाहातुरः स्मरामि परमक्षराद्वृषभुवं हरिं सर्वदा ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं धार्मिश्रीहरिमाहात्म्यवर्णनाष्टकं समाप्तम् ॥*

## १४८ ● ॥ उद्गतावृत्तम् ॥

नमदीशमौलिपरिघृष्टिवरचरणचारूविष्टरे । शान्तिगुणरूचिरतानिलये त्वयि नो रतिर्भवतु धर्मजे हरौ ॥१॥
बहुशास्त्रवित्प्रजयजातप्रचुरमदमानमानसं । वादिगणमवजयत्यजिते त्वयि नो रतिर्भवतु धर्मजे हरौ ॥२॥
असुरान्घ्नतीशविजयेन स्मयमधिगतान् स्मरादिकान् । अप्रतिहतवरवित्त्यसिना त्वयि नो रतिर्भवतु धर्मजे हरौ ॥३॥
इह नाशयत्यतुलितेन निरयपदमोजसा तमः । प्राकृतमिवतरणिस्तिमिरं त्वयि नो रतिर्भवतु धर्मजे हरौ ॥४॥
निधनं नयत्यवृषवंशं भुवनजनतोरूतापिनम् । पोषयति विमलधर्मकुलं त्वयि नो रतिर्भवतु धर्मजे हरौ ॥५॥
निजदृष्टिमात्रजसमाधीनिह निजपदानि देहिनः । दर्शयति विनतिभीतिहरे त्वयि नो रतिर्भवतु धर्मजे हरौ ॥६॥
मदनादिवह्निशमनेननिजवयुनतोऽक्षरं जनान् । धाम नयति यतिदूरतरं त्वयि नो रतिर्भवतु धर्मजे हरौ ॥७॥
श्रवणे न नाशयति चात्मविशदगुणजन्मकर्मणाम् । भीमशमनभटभूरिभयं त्वयि नो रतिर्भवतु धर्मजे हरौ ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं श्रीहरिप्रतापाष्टकं समाप्तम् ॥*

## १४९ ● ॥ शार्दूलविक्रीडितम् ॥

श्रीमन्मंगलमूर्त्तिमार्तिशमनं सन्मण्डलिमण्डनं दिव्यानन्दमहोदधिं श्रुतिशिरोगीतोरूकीर्त्त्यादिकम् ॥
दिव्यैश्वर्यगुणप्रतापनिलयं भूषाविभूषाकृतिं वन्दे धर्मधुरंधरंवरतरं सर्वेश्वरं श्रीहरिम् ॥१॥
माधुर्यादिविराजितैरवयवैर्ध्वस्तोरूमारस्मयैरानन्दं जनयन्निजेष्वतितारां पश्यद्दशामुत्सवैः ॥
सद्वाक्यामृतवर्षणैर्निजजनान् संतर्पयन्तं हरिं वन्दे वन्द्यपदं सदैव सहजानन्दं सदानन्ददम् ॥२
सत्कार्त्तस्वरसारहाररूचिरं सुस्वर्णसूत्राम्बरं बिभ्राणं स्रजमच्छमौक्तिकमयीं तारानुकाराम्बराम् ॥
पाणौ स्वर्णमयीं तडितिप्रतिनिभां यष्टिं दधानं हरिं वन्दे स्मेर मनोहरं परतरं श्रीस्वामिनारायणम् ॥३॥
श्रीमद्भास्करभास्वराम्बरधरं सन्माल्यमालावलिं लोलालोकनलोचनातिललितंलीलाललं मंगलम् ॥
देवेन्द्रैः परिगीतकीर्त्तिमनघं योगीश्वराधीश्वरं वन्दे भूषणभूषणांगमतुलं धार्मिं हरिं सर्वदा ॥४॥
श्रीमन्नीरधरातिभास्वरतनुं गौराम्बरोद्भासुरं नद्धश्रेष्ठमणिप्रभातिरूचिरा हैमीर्विभूषा वराः ॥
कोट्यम्भोरूहचन्द्रलज्जनमुखं धार्मिं दधानं हरिं ध्याये धर्मकुलैकभूषणमहं श्रीस्वामिनारायणम् ॥५॥

॥ स्वगतावृत्तम् ॥

श्रीहरिं श्रीतजनेप्सितपूरं कामवासनहृदामतिदूरम् । नौम्यबोधतिमिरक्षयसूरं कामकेसरिपराभवशूरम् ॥६॥
मुक्तयेऽत्र शरणीकरणीयं भक्तियुक्तमनसा स्मरणीयम् । धर्मरक्षणकरं रमणीयं शुद्धमानससदादरणीयम् ॥७॥

॥ वियोगिनीवृत्तम् ॥

निगमागमधर्मधारिणं शरणायातजनार्तिहारिणं। प्रणमामि सुरारिदारिणं हरिमीड्यं मुनिवृन्दचारिणम् ॥८॥
सुखकृद्वृषवंशपालिनं रूचिरस्वर्णमणीन्द्रमालिनम् । ललितोज्जवलचेलशालिनं विलसच्चित्रकचारूभालिनम् ॥९॥
अतसीकुसुमातिरोचनं जलजन्मच्छदतर्ज्जिलोचनम्। भवदुर्जरपापमोचनं शमितस्वाश्रितसर्वशोचनम् ॥१०॥
मितहासविलासभास्वरं मधुराम्भोधरतर्ज्जनस्वरम्। मुनिवारिजनुर्विकस्वरं स्वजनप्रेमभरार्पितस्वरम् ॥११॥

॥ शार्दूलविक्रीडितम वृत्तम् ॥

जीवानामहरत्तमः स्वमहसा येऽनाद्यविद्यामयं प्राप्तानक्षरतुल्यातां समकरोत्तांश्चान्वितान् सद्गुणैः ॥
धर्मं स्थापयति स्म चात्र सुखदं प्रोन्मूल्य धर्मद्विषं वन्देतं हरिमक्षरात्परतरं सर्वेश्वराधीश्वरम् ॥१२॥
सत्कार्त्तस्वरसारहाररूचिरं विद्युत्समानाम्बरं सद्वक्रेण च कोटिकञ्जरजनीनाथान्नयन्तं त्रपाम् ॥
लोलभ्रूलतिकाललामविलसल्लीलालल्लम्बनं ध्याये धर्मभुवं हरिं वरतरं कारूण्यपूर्णेक्षणम् ॥१३
फुल्लेन्दीवरवृन्दसुन्दररूचिं स्मेरप्रभोद्भासितं चञ्चच्चञ्चलचारूचेलरूचिरं चित्रावचूलाञ्चितम् ॥
दिव्योदारदयासुधार्द्रनयनं धार्मिं श्रिताधिच्छिदं दिव्यानन्दपदं नमामि सहजानन्दं हरिं सर्वदा ॥१४॥

॥ वियोगिनीवृत्तम् ॥

प्रणमामि हरिं स्वशासिनं परमैकान्तिकभक्तवासिनम्। मणिमौक्तिकहारभासिनं निजभक्तातिमहासभासिनम् ॥१५॥
क्षतदूषणभक्ततोषणं कृतधर्मान्वयभूरिपोषणम्। शुभसज्जनमार्गजोषणं स्वपदाब्जश्रितदोषशोषणम् ॥१६॥

॥ पुष्पिताग्रावृत्तम् ॥

सकलजननियामकः स्वतन्त्रः स्मृतिकृदुपप्लवनाशनानुभवः ॥

श्रितजनसुखकृत्पवित्रकीर्त्तिर्हरिरखिलं वितनोतु मंगलं मे ॥१७॥

तनुभृदखिलबुद्धिवृत्तिवेत्ता जनकृतकर्मफलप्रदानदक्षः ॥

निजजननिखिलार्थितप्रदाता दिशतु शुभां हरिरूत्तमां मतिं मे ॥१८॥

॥ शिखरिणीवृत्तम् ॥

सुभद्रं सत्प्रज्ञाप्रदमखिलतापप्रशमनं प्रकुर्वे सद्ग्रन्थं प्रियमिह सतां बोधनिभृतम् ॥

हरेर्भूरिप्रीत्यैतदतिरतिभाजां तनुभृतां तथा तद्भक्तानां विशदहृदयानामतिमुदे ॥१९॥

॥ प्रहर्षिणीवृत्तम् ॥

श्रीजुष्टोगुणसुखमंगलादिवार्द्धिर्भद्रेक्षोभवभयभेदनानुभावः ॥

सर्वेशो निखिलनिजाश्रितार्त्तिहारी प्रज्ञां मे दिशतु शुभां हरिर्दयालुः ॥२०॥

संस्मृत्या दुरितभरोरूतापहारी सर्वज्ञो बहुविधविघ्ननाशकारी ॥

भद्रं मे परितनुतां स्मरावदारी धाम्नि स्वे हरिरतुलेऽक्षरे विहारी ॥२१॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं श्रीहरिप्रार्थनास्तोत्रं समाप्तम् ॥*

## १५० ● ॥ अष्टपदीयम् ॥

विबुधविभासित सलिलधरासित निजहृदयासित भक्तिजने ।
वृषकुलकंकट हृतजनसंकट शर्मखने ॥ मंगलमंगल दैवतदैवत भुवि जय जय हरिकृष्ण हरे ॥१॥
असदधिरोचन भक्तिविबोधन दूष्टविशोधन मञ्जुमनो ।
चरणसमीपदधीषणदीपदनीरजनुः पदरम्यतनो ॥ मंगलमंगल दैवतदैवत भुवि जय जय हरिकृष्ण हरे ॥२॥
गुणगणमण्डित तोषितपण्डित सुररिपुखण्डित भव्यपते ।
वादिसभाजित तरलविराजित भक्तसभाजित साधुगते ॥ मंगलमंगल दैवतदैवत भुवि जय जय हरिकृष्ण हरे ॥३॥
स्मृतिचयवेदन वृषरिपुखेदन कुपथविभेदन मुक्तवृते ।
परतरशासन मधुरविलासन बुद्धिविकासन तारतते ॥ मंगलमंगल दैवतदैवत भुवि जय जय हरिकृष्ण हरे ॥४॥
अधिचयनिग्रह कृतमखिविग्रह दिव्यनृविग्रह धर्मनुते ।
श्रुतिमुखसंग्रह कृतसदनुग्रह सततसदाग्रह चारूमखे ॥ मंगलमंगल दैवतदैवत भुवि जय जय हरिकृष्ण हरे ॥५॥
निगमविशारद विधिहरनारद वरणितशारदकञ्जदृशे ।
कलिबलदारूण कुवलयधारण दर्पकमारण धामनिधे ॥ मंगलमंगल दैवतदैवत भुवि जय जय हरिकृष्ण हरे ॥६॥
वर्णिपुरन्दर दलितदूरोदर शेखरसुन्दरमौलिधृते ।
विरचितखेलन निजजनमेलन वारितहेलन विश्वपते ॥ मंगलमंगल दैवतदैवत भुवि जय जय हरिकृष्ण हरे ॥७॥

चेतनचेतन करूणाकेतन दिव्यनिकेतन शीलधृते ।
जगदभिवन्दन वृषकुलनन्दन किल्विषकन्दन दिव्यकृते ।। मंगलमंगल दैवतदैवत भुवि जय जय हरिकृष्ण हरे ।।८।।

।। वियोगिनीवृत्तम् ।।

इदमुत्तमसाधुना कृतं रूचिरं पद्यमनन्तमीश्वर ।। कुरू मंगलमुत्तमं सतां पठतां भूरितरां रतिं त्वयि ।।९।।

*।। इत्युत्तमचरणदासमुनिविरचितं श्रीहरिकृष्णमहाष्टकं समाप्तम् ।।*

## १५१ • ।। शार्दुलविक्रीडितम् ।।

योऽनेकाण्डकलापकारणमहामायाधिनाथेश्वरो वेदान्तोदितकीर्त्तिशमनो धाम्न्यक्षरे राजते ।।
भूत्वायो मनुजाकृतिः स्म तनुते भक्ति सधर्मा भुवि योगानन्दमुनीशितासहजानन्दः प्रसन्नोस्तु मे ।।१।।
मूर्त्तैर्ब्रह्मणियोऽक्षरे तु सततं वेदैस्त्रिभिः स्तूयते सम्राड्वन्दिजनैर्यथाऽत्र चरितै राजा तदीयैः क्षितौ ।।
नैकाण्डामितलोकनाथनिकरैः संप्रार्थ्यते प्रत्यहं योगानन्दमुनीशितासहजानन्दः प्रसन्नोस्तु मे ।।२।।
गायन्त्यत्र च सांख्ययोगकुशलाः सांख्येन योगेन यं यं गायन्ति पुराणपातिनिपुणास्त्रय्या त्रयीवेदिनः ।।
यं गायन्ति च पञ्चरात्रनिपुणा धर्मागमज्ञास्तथा योगानन्दमुनीशितासहजानन्दः प्रसन्नोस्तु मे ।।३।।
पृथ्वीयं स्थिरतां गता भगवतो यस्याऽऽज्ञयावर्त्ते ताराणामपि मण्डलं धृतमिदं येनान्तरीक्षे स्थितं ।।
मेघो वर्षति जीवनं तनुभृतामम्भो यदाज्ञावशो योगानन्दमुनीशितासहजानन्दः प्रसन्नोस्तु मे ।।४।।

चन्द्रोर्कश्च यदाज्ञयाह्युदयते वेलामनुल्लंघ्यतौ यातोऽस्ताचलमालयं तिमिरहौ यस्याज्ञया थैतयोः ॥
वृद्धिं यान्ति कलाः क्षयं च शशिनो यस्येच्छया प्रत्यहं योगानन्दमुनीशिताससहजानन्दः प्रसन्नोस्तु मे ॥५॥
मर्यादां न भिनत्ति येन विहितां निः सेतुकोऽब्धिर्ह्यपि यस्येच्छावशतोम्बुविन्दुजमिदं रम्यंवपुर्मानुजं ॥
राजद्धस्तपदाक्षिकर्णवदनाद्यंगान्वितं वर्त्तते योगानन्दमुनीशिताससहजानन्दः प्रसन्नोस्तु मे ॥६॥
आकाशे धृतमम्बु येन विभुनाऽधारं विनाऽवस्थितं तस्मिन्नम्बुदगर्जितं भवति वा सौदामिनी द्योतते ॥
पाथोधौ वडवानलः प्रशमनं नो याति यस्येच्छया योगानन्दमुनीशिताससहजानन्दः प्रसन्नोस्तु मे ॥७॥
वायुर्वाति यदिच्छया दहति वा वह्निर्यदाज्ञावशान्मृत्युर्धावति यद्भयाच्च सृजति ब्रह्मा जगद्यद्भयात् ॥
विष्णुः पाति यदाज्ञयापि च हरो यस्येच्छया हन्ति तत् योगानन्दमुनीशिताससहजानन्दः प्रसन्नोस्तु मे ॥८॥

*॥ इति योगानन्दमुनिविरचितं श्रीहरिकृष्णमहिमाष्टकं समाप्तम् ॥*

१५२ •

## ॥ मत्तमयूरवृत्तम् ॥

स्वामिन् भक्त्या भक्तजनातिप्रियमाद्यं मायातीतं मंगलरूपं जगदीशम् ॥
आविर्भूतं धर्मगृहे त्वां प्रणमामः कृष्णं साक्षादासुरसर्गक्षयहेतुम् ॥१॥
सर्गस्यादौ शुद्धपुमांस्त्वं निजमायां पश्यस्येकश्चागणिताण्डोद्भवदृष्टा ॥
उत्पद्यन्ते ह्याण्डसमुहाश्च सहेशास्तस्याः सर्वेनाथ ततस्त्वं जगदीशः ॥२॥

त्वतो जाताश्चागणिताण्डाश्रयभूता नारासंज्ञामापुरिहापो ह्यतएव ॥
स त्वं विश्वाधार इदानीं नरनाट्यं धर्ता नाथ स्वाश्रितजीवावनहेतोः ॥३॥
नारास्वादौ तासु च शिष्ये पुरूषो यः ख्यातो वेदेतेन हि नारायणनामा ॥
देवः सोंगं देव तवैवादिमपुंसोद्दष्ट्वा साक्षात्संप्रति तं त्वा मुदिताःस्मः ॥४॥
एकैकाण्डं त्वं खलुसंकर्षणसंज्ञः शेषो भूत्वा शीर्ष्णिदधास्येव यथाऽणुम् ॥
नानासिद्धैर्नागगणेन्द्रैश्चपरीतः पातालस्थोबोधयसीशात्मगतिं च ॥५॥
नित्यं भास्वन्मण्डलमध्येऽम्बुजसंस्थस्तेजोमूर्त्तिः कर्मकृतां त्वं कृतिसाक्षी ॥
अर्चिर्मार्गाधिष्ठितदेवेशनियन्ता मुक्तानां वै ब्रह्मगतिं प्रापयिताऽसि ॥६॥
भक्त्या नित्यं संसृतिबन्धात्स्वविमुक्त्यै योगिध्यातं द्वदशपत्रे द्वादयाब्जे ॥
तेषामन्तर्ध्वान्तहरं यन्नखकान्त्या तत्पादाम्भोजं तव वन्दे जगदीश ॥७॥
वागस्माकं गायतु नित्यं गुणजातं कर्णौ नित्यं नाथचरित्रं शृणुतां तै ॥
चक्षुर्नित्यं पश्यतुमूर्तिं तवलोके रूपंह्योतद्ध्यातु नित्यं चमनो नः ॥८॥

*॥ इति योगानन्दमुनिरचितं प्रार्थनाष्टकं समाप्तम् ॥*

## १५३ ● ॥ द्रुतविलम्बितं वृत्तम् ॥

सकलमंगलमंगलमीश्वरं सकलदैवतदैवतदैवतम् । सकलपावनपावनपावनं भुवि दधे निदधे च हरिं नतिम् ॥१॥
सकलकारणकारणकारणं सकलदेशिकदेशिकमव्ययम् । सकललोकमलोकमकौशलं भुवि दधे निदधे च हरिं नतिम् ॥२॥
सकलमोहनमोहनमोहनं सकलवन्दितवन्दितपत्कजम् । सकलपूजितपूजितमात्मदं भुवि दधे निदधे च हरिं नतिम् ॥३॥
सकलबोधकबोधकलोदयं सकलभूसुरभूसुरपालकम् । सकलचेतनचेतनमच्युतं भुवि दधे निदधे च हरिं नतिम् ॥४॥
वृजिनवारणवारणवारणंप्रभुमनन्तमनन्तगुणार्णवम् । शुचिमुदारमुदारपराक्रमं भुवि दधे निदधे च हरिं नतिम् ॥५॥
अगुरूचन्दनचन्दनचर्चितं मुनिगणैःसकलैः सकलैर्मुदा । नरसुरैरसुरैरपि संस्तुतं भुवि दधे निदधे च हरिं नतिम् ॥६॥
अमलकोमलकोकनदेक्षणं गतमदं तमदम्भविवर्द्धनम् । भवभयोपरमं परमं सहं भुवि दधे निदधे च हरिं नतिम् ॥७॥
सविनयैरमरैरमरैर्नतं करवरं रवरञ्जनकारिणम् । नियमवन्तमजंचसतांमतं भुवि दधे निदधे च हरिं नतिम् ॥८॥
प्रतिदिनं भजतामिदमुत्तमाभिधमुनेरूदितं मुदितात्मनः । पुरूशुभं कुरूतेऽस्य च देवता हृदि हरिं तमहं तमहं भजे ॥९॥

*॥ इत्युत्तमचरदासमुनिविरचितम नमनाष्टकं सम्पूर्णम् ॥*

## १५४ ● ॥ अष्टपदीयम् ॥

नारायणदेवं जय जय वामं, प्रणमामि भवन्तमकामं ॥ नारायण... ॥१॥
नवाम्बुदसारमरकतश्यामं, प्रभामण्डलचन्द्रललामं ॥ नारायण... ॥२॥
मुखविजितवनस्पतिराजं, आनन्दितमुनिवरमुक्तसमाजं ॥ नारायण... ॥३॥

शुभचञ्चलनयनमुदारं, श्रुतिशष्कुलीं कुण्डलधारं ।। नारायण... ।।४।।
गौरगण्डयुगलमविकारं, रदनच्छदविद्रुमसारं ।। नारायण... ।।५।।
कुन्दमौक्तिकसमसितदन्तं, मन्दहासमधुरविलसन्तं ।। नारायण... ।।६।।
वचनामृततर्ज्जितमेघं, जितवाणीतदीश्वरवेगं ।। नारायण... ।।७।।
तिलपुष्पसुशोभितनासं, भूमिपालकृतात्मीयदासं ।। नारायण... ।।८।।
भृकुहिद्वयकम्पितकालं, विततोन्नतसुन्दरभालं ।। नारायण... ।।९।।
वृतकाश्मिरचन्द्रविराजं, पुरूमञ्जुशिरोरूहभाजं ।। नारायण... ।।१०।।
रमणीयकिरीटधरन्तं, कुसुमशेखरपंक्ति लसन्तं ।। नारायण... ।।११।।
शंखमञ्जुलकण्ठमपारं, स्थलपंकजचम्पकहारं ।। नारायण... ।।१२।।
पीवरांसमहाभुजकान्तं, वलयांगदरम्यसुशान्तं ।। नारायण... ।।१३।।
करशाखासुमुद्रिकावन्तं, तुलसीन्धनमालाहरन्तं ।। नारायण... ।।१४।।
पृथुतुंगभुजान्तरशालं, वैजयन्तीविराजितमालं ।। नारायण... ।।१५।।
अंसलम्बितरलचारूचेलं, स्वीयसंततरञ्जनहेलं ।। नारायण... ।।१६।।
वलिराजियुतोदरमीशं, नाभिकूपप्रसक्तमुनीशं ।। नारायण... ।।१७।।
घनसन्निभकटिराजमानं, मृगराजपराजितमानं ।। नारायण... ।।१८।।
पीतपरिहितकाञ्चिकलापं, अजितान्तरनरदुरवापं ।। नारायण... ।।१९।।

उरूनिन्दितगजकरशोभं, जानुवलयमुकुरबहुलोभं ॥ नारायण... ॥२०॥
क्रमपुष्टमृदुलवरजंघं, भवतारितसंश्रितसंघं ॥ नारायण... ॥२१॥
हेमनूपुरधरमभिरामं, पापकाननसंघविरामं, नारायण... ॥२२॥
कञ्जकोमलचरणमरूपं, त्रिपुरारिरिपुंजयरूपं ॥ नारायण... ॥२३॥
अवनीविनिवारितभारं, निष्काममनोभूविहारं ॥ नारायण... ॥२४॥

*॥ इति निष्कामानन्दवर्णिविरचिताष्टपदी समाप्ता ॥*

## १५५ • ॥ गुर्जररागे प्रतिमण्ठतालेगीयते ॥

वृषकुलकञ्जविकाशन मतिदाशनए । नवघननीलशरीर जय जय कृष्णहरे ॥१॥
असुरगुरूक्षयकारक भवतारकए । प्रमुदितसुमुनिवृन्द जय जय कृष्णहरे ॥२॥
भक्तमनोरथपूरक कलिदुरकए । मन्मथदर्पविभेद जय जय कृष्णहरे ॥३॥
तुलसीजपमालाकर करूणाकर ए । वृषरिपुवंशविनाश जय जय कृष्णहरे ॥४॥
संसृतियमभयवारण मददारणए । धृतसितसूक्ष्मसुवस्त्र जय जय कृष्णहरे ॥५॥
नैष्ठिकधर्मसुपोषक मलशोषकए । कामाद्यरिकरिसिंह जय जय कृष्णहरे ॥६॥
योगकलाविधिबोधक मतिशोधकए । भक्तिधर्मतनुजन्मन् जय जय कृष्णहरे ॥७॥
साधुशुकेनरचितमिदं शुभबुद्धिदंए । गीतमस्तुजनमेदं जय जय कृष्णहरे ॥८॥

*॥ इति शुकानन्दमुनिरचिताष्टपदी सम्पूर्णा ॥*

## १५६ ● ॥ देशाखरागे एकतालिताले गीयते ॥

धृतनवविशदवसन वनमाली । कोमलमलयजलेपनशाली ।
त्वं हरे द्रशीमे भव केशव स्वामिनारायण पुण्यज विष्णो ॥ त्वं हरे..... ॥१॥
करवरसिततरनक्तकधारी, करिकलहंसरूचिरगतिहारी ॥ त्वं हरे..... ॥२॥
सकरूणवीक्षणव्रतजिनविहारी, कोटिमदनमदमर्द्दनकारी ॥ त्वं हरे..... ॥३॥
सरस सुरभितरसहासविभासी, कलिमललुम्पन ललितविलासि ॥ त्वं हरे..... ॥४॥
अविरलगलितवचोमृतधारम्, मुखमभिदर्शय शतशशिसारं ॥ त्वं हरे..... ॥५॥
गतवतइह यदवेक्षणमल्पं, भवति भुवनसुखमपिविषकल्पं ॥ त्वं हरे..... ॥६॥
कुसुमवरांगदशेखरधारी, चलभृकुटीक्षणमानसहारी ॥ त्वं हरे..... ॥७॥
कृष्णमुनिप्रगदितमितिगीतं, सुखयतु भक्तजनं समधीतं त्वं हरे..... ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचिता श्रीहरिस्वरूपवर्णनाष्टपदी समाप्ता ॥*

## १५७ ● ॥ गुर्जरीरागेएकतालीतालेगीयते ॥

निवसतु शन्दे सहजानन्दे मम मानसमसमाने । मंगलशीले नीरदनीले लसदवतारनिदाने ॥ निवसतु... ॥ १ (ध्रुवपदमिदं)
धवलदुकूले लसदवचूले कुसुमसुशेखरहारे । रूचिरविहारे भवभयहारे करवरनक्तकधारे ॥ निवसतु... ॥२॥
शोकनिरासे मुनिजनवासे तिलकुसुमोत्तमनासे । पोषितभक्ते महदनुरक्ते मुखमितहासविलासे ॥ निवसतु... ॥३॥

सकरूणवीक्षे पावनदीक्षे गतिलज्जितगजहंसे । ललितकपोले चारूनिचोले कुसुमविललसदवतंसे ॥ निवसतु... ॥४॥
कृतनिजरक्षे बोधविदक्षे अकलिकतिलकरमणीये । चारूशरीरे प्रमुदितधीरे सुरवरवरवरणीये ॥ निवसतु... ॥५॥
रूचिकरकेशे सुखदनिदेशे गलतुलसीतनुमाले । कीर्त्तिकलत्रे कृतपुरूसत्रे विदलितकलिमलजाले ॥ निवसतु... ॥६॥
प्रियगतमाने शर्मनिधाने नाभिमधुरतरकूपे । शुभगुणशान्ते भूतिनिशान्ते मदनविलज्जनरूपे ॥ निवसतु... ॥७॥
सरसिजनेत्रे काञ्चनवेत्रे उदारवलित्रयशाले । सुललितभाले कुमतिकराले निजशरणागतपाले ॥ निवसतु... ॥८॥
कृष्णसुकविना हरिपदरतिना विरचितमिदमभितापम् । शमयतुसारं मीतमुदारं प्रणिगदतामिदंपापम् ॥ निवसतु... ॥९॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचिता श्रीसहजानन्दवर्णनाष्टपदी समाप्ता ॥*

## १५८ ● ॥ कर्णाटकरागे एकतालीताले गीयते ॥

नलिनयुगलमवलज्जयदलिकुलसंकुलशकुलविलासम् । नयनयुगं तव चलतरतारमतुलकरूणारसवासं ॥
सहजानन्द दयालो माधव माधव भवहर वृषभवमामिह दर्शय हृदयशयालो ॥ (ध्रुवपद ) सहजानन्द.. ॥१॥
शुभनासामनुचितनवदलितकलिकलुषांविलसन्तीम् । पातुमधरवरबिम्बरसं शुकचञ्चुमिवाऽवनमन्तीं ॥ सहजानन्द.. ॥२॥
सितमितहसितमगणितमुनिव्रजचिन्तिततमशिवनिवारम् । शारदसरसिज हिमकरतर्ज्जितमाननमशुभविदाम् ॥ सहजानन्द.. ॥३॥
वचनामृतमभिषिञ्च्यशमय तव विरहकृतबहुदाहं । घन इव वनमभिवृष्यसलिलसुमुरूदावशिखापरिणाहम् ॥ सहजानन्द.. ॥४॥
कोटिमदनमदभेदनमुरूतरसुन्दरतादिनिधानम् । तववपुरतुलविभूतिगुणादिनिकेतमनन्यसमानम् ॥ सहजानन्द.. ॥५॥
यदतिविशदवसनं जलधररूचि विलसति सुललितलीलम् । सुरधुनीसलिलमिलितमघहर रवितनयाजलमिवनीलम् ॥ सह..।६

यदतिलसतिवरकेशरचन्दनलेपयुतं स्मरणीयम् । असितमणीन्द्रपटलमिव कपिशमणिस्फुरणं रमणीयम् ॥ सहजानन्द.. ॥७॥
यदुपदधानमुरसिरूचिरं शुचिपुरटमयं वरहारम् । स्फुरदचिरांशुयुतं परिराजति जलदपटलमिवसारम् ॥ सहजानन्द.. ॥८॥
कृष्णमुनिप्रणिगदितमिदं शुभगीतमभद्रविभेदम् । श्रवणकृतांगदतां वितनोतु सुखं हरतादपिखेदम् ॥ सहजानन्द.. ॥९॥

*॥ इत्याचिन्त्यानन्दवर्णिविरचितां श्रीसहजानन्दस्वरूपवर्णनाष्टपदी समाप्ता ॥*

## १५९ ● ॥ मालवरागेरूपकताले गीयते ॥

वसितविशदवसनं चरणानतभूपं सदयहृदय दर्शय निजरूपं । केशव धृतमंगलरूप जय हरिकृष्ण हरे ॥१॥
तिलकललितवदनं धृतपुष्पसुमालं गतिवरतुरगविरोहणशालं । केशव धृतमंगलरूप जय हरिकृष्ण हरे ॥२॥
कलितललितरशनं करनक्तकधारं शशिनिभवदनविमोहितमारं । केशव धृतमंगलरूप जय हरिकृष्ण हरे ॥३॥
मुखगतमितहसनं वृषशत्रुकरालं निजशरणायातवृषकुलपालं । केशव धृतमंगलरूप जय हरिकृष्ण हरे ॥४॥
तरलकमलनयनं धृतशेखरसारं कलिमलकालदवानलहारं । केशव धृतमंगलरूप जय हरिकृष्ण हरे ॥५॥
हंसरूचिरगमनं कृतपातकदूरं निजजनकञ्जविकाशनसूरं । केशव धृतमंगलरूप जय हरिकृष्ण हरे ॥६॥
कनककटकरूचिरं करचालितमालं नखशशिराजिरूचिरपदशालं । केशव धृतमंगलरूप जय हरिकृष्ण हरे ॥७॥
कृतमुनिगणरमणं धृतमुष्टिगुलालं चञ्चलवसनं मदनमदकालं । केशव धृतमंगलरूप जय हरिकृष्ण हरे ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचिता हरिकृष्णाष्टपदी समाप्ता ॥*

## १६० ● ॥ अष्टपदीयम् ॥

मदनविमर्द्दन कदनविकर्द्दन कुजनगणार्द्दन धर्मधृते । दनुजनिकन्दन मुनिकृतवन्दन श्रितजनभन्दन मुक्तरते ॥
जय जय भयहर परसुखसागर सारगुणाकर दिव्यतनो ॥१॥
सुमतिविकासन तापविनाशन निजवरदाशन शर्मनिधे । वृषरिपुतर्ज्जन खलजनवर्ज्जन दुरितविभर्ज्जन धर्मिरते ॥
जय जय भयहर परसुखसागर सारगुणाकर दिव्यतनो ॥२॥
वृषकुलमण्डन दम्भविखण्डन दुर्ज्जनदण्डन दिव्यविधे । भवभयतण्डन श्रितरिपुचण्डन कापथकण्डन भक्तगते ॥
जय जय भयहर परसुखसागर सारगुणाकर दिव्यतनो ॥३॥
कलिमलभञ्जन सज्जनरञ्जन परमनिरञ्जन दिव्यरूचे । असदगतिगञ्जन मुनिवरसञ्जन मानसगंजन मुक्तपते ॥
जय जय भयहर परसुखसागर सारगुणाकर दिव्यतनो ॥४॥
कृतनिजरक्षण सुललितलक्षण बोधविचक्षण ज्ञानिरते । मुनिविहितक्षण सकलविलक्षण रूचिरनिरीक्षण धर्मजने ॥
जय जय भयहर परसुखसागर सारगुणाकर दिव्यतनो ॥५॥
नलिनविलोचन संसृतिमोचन जलधररोचन रूपनिधे । क्षतनिजशोचनचर्च्चितरोचन वयुनविरोचन सर्वगुणे ॥
जय जय भयहर परसुखसागर सारगुणाकर दिव्यतनो ॥६॥
श्रुतिगणधारण कारणकारण मोहविदारण विश्वपते । दूषणमारण नतभवहारण विषयनिवारण प्रेष्ठमुने ॥
जय जय भयहर परसुखसागर सारगुणाकर दिव्यतनो ॥७॥

शापनिरासन मुक्तसभासन वरतरभासन योगिरूचे । सुखकरशासन विषयनिरासन प्रियनिर्वासन चारूगते ॥
जय जय भयहर परसुखसागर सारगुणाकर दिव्यतनो ॥८॥

॥ इत्यचिन्त्यानन्दवर्णिविरचिताष्टपदी समाप्ता ॥

## १६१ ● ॥ अष्टपदीयम् ॥

मदनविमोहनं निजसुखदोहन वाजिविरोहण कृष्णहरे । मुनिगणतोषण श्रितजनपोषण दूषणशोषण रम्यगते ॥
जय जय जयकर धर्मधुरंधर शुभगुणसागर मुक्तपते ॥१॥
वृषरिपुगंजन यमभयभंजन मुनिजनरंजन भक्तरते । भवभयभेदन सुविहितवेदन कृतनिजखेदन दीनपते ॥
जय जय जयकर धर्मधुरंधर शुभगुणसागर मुक्तपते ॥२॥
असुरनिरोधन सुरवृषमोदन भक्तविनोदन मुक्तरते । मदरिपुदारण मोहनिवारण जनिमृतिहारण मुक्तिपते ॥
जय जय जयकर धर्मधुरंधर शुभगुणसागर मुक्तपते ॥३॥
जलजविलोचन हृतनिजशोछन पातकमोचन दिव्यपते कृतनिजरक्षण सकरूणवीक्षण बोधविचक्षण रागिरते ॥
जय जय जयकर धर्मधुरंधर शुभगुणसागर मुक्तपते ॥४॥
वृषकुलमण्डन दनुजविखण्डन कोपवितण्डन भक्तरते । रतिपतिभण्डन सरतिकुण्डन मानविमुण्डन दिव्यगते ॥
जय जय जयकर धर्मधुरंधर शुभगुणसागर मुक्तपते ॥५॥

विजितविचण्डन खलजनदण्डन कुण्डविकुण्डन ज्ञानिरते । कुमतिनिकन्दन विधिभववन्दन चर्च्चितचन्दन हंसगते ॥
जय जय जयकर धर्मधुरंधर शुभगुणसागर मुक्तपते ॥६॥
कसलनिभानन निजजनपावन योगविभावन योगिगते । नवजलदासितनिगमविभासित निजहितशासित पुण्यपते ॥
जय जय जयकर धर्मधुरंधर शुभगुणसागर मुक्तपते ॥७॥
कलिमलनाशन वयुनविकासन शुभमतिदाशन योगिपते । मुनिजनवासन धर्मविभासन मुक्तसभासन योगिरते ॥
जय जय जयकर धर्मधुरंधर शुभगुणसागर मुक्तपते ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचिताष्टपदी समाप्ता ॥*

## १६२ ● ॥ कर्णाकटकरागेएकतालितालेगीयते ॥

शुचिरूचिकाञ्चनसूत्रमयानि रूचिरवसनानि दधानम् । नीलनलिनमिव रविकररञ्जितमतिशयहर्षनिधानम् ।
सहजानन्दसुशीलं माधव माधववपुरतिवरमभिदर्शय मां तव नीरदनीलम् (ध्रुपदम्) ॥ सहजानन्दसुशी... ॥१॥
विविधमणीन्द्रसुवर्णविभूषणकिरणगणैरभिरामम् । सजलसलिलधर पटलमिवेन्द्रशरासनयुतमतिवामम् ॥ सह...॥२॥
यस्य विलोक्यवदनमतिपावनमिन्दुरतुलमतिकान्तम् । भ्रमति वियति सततं रभसादिव चित्रमपेत्यनितान्तम् ॥ सह... ॥३॥
पल्लवबिम्बवराधरनिपतितमन्दहसितरूचिजालम् । तर्ज्जितमोक्तिकयुतविद्रुमरूचि परिरतपरममरालम् ॥ सह... ॥४॥
नलिनपटलपरिलज्जनलोचनगलितदयामृतधारम् । चपलविलोकनलज्जितखञ्जन शकुलमखिलभयहारम् ॥ सह... ॥५॥

दीपशिखाशुकचञ्चुवितर्जित तापशमनवरनासम् । कुन्दकुसुमशरदिन्दुविनिन्दकहासमुदारविलासम् ॥ सह... ॥६॥
रूचिकरकेशरतिलकपिशुनवरचन्द्रकमञ्जुलभालम् । कोटिमदनमदहरमतिभासुरकरपादनखविधुशालम् ॥ सह... ॥७॥
ललितमृदुलशुभलक्षणलक्षितविपुलहृदयवनमालम् ॥ उदारवलित्रयनाभिजलाशयशालि कलुषकलिकालम् ॥ सह... ॥८॥
कृष्णानन्दरचितमिदमतिशुभगीतमुदितहरिरूपम् । मंगलमधितनुतामिह पठतां सुखमपिहरिरनुरूपम् ॥ सह... ॥९॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचिता श्रीसहजानन्दस्वरूपवर्णनाष्टपदी समाप्ता ॥*

## १६३ ● ॥ गुर्जररागेप्रतिमण्ठतालेगीयते ॥

जितसकलसुरमण्डल धृतकुण्डलए । स्थलजलपुष्पसुमाल जयहरिकृष्ण हरे ॥१॥
निजजनर्चर्चितचन्दन वृषनन्दन ए । प्रमुदितपरममराल जयहरिकृष्ण हरे ॥२॥
कुसुमशरासनमोहन श्रुतिदोहनए । वृषकुलनलिनदिनेश जयहरिकृष्ण हरे ॥३॥
सितघनवसनविधारक सुखकारकए । कुटिलनीलतनुकेश जयहरिकृष्ण हरे ॥४॥
कमलदलायतलोचन भवमोचनए । जलधररूचिरशरीर जयहरिकृष्ण हरे ॥५॥
कनकमणिमयभूषण जितदूषणए । पंकजमुखसितहास जयहरिकृष्ण हरे ॥६॥
मुनिजनमण्डलमण्डन खलदण्डनए । मदनमनोहरवेश जयहरिकृष्ण हरे ॥७॥
वृषरिपुतिमिरदिवाकर गुणसागरए । धृतकरशोणसरोज जयहरिकृष्ण हरे ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचिता श्रीहरिकृष्णाष्टपदी समाप्ता ॥*

## १६४ ● ॥ देशाखरागेएकतालीताले गीयते ॥

व्रजवपुषाहृतमदनमदेन मदवेक्षणपथमतिसुखदेन मंगलशील दयानिधे हरे ॥१॥ (ध्रुवपदम्)
विधुकरचयरूचिशुचिवसनेन, भवदवदहनशमन हसनेन मंगलशील दयानिधे हरे ॥२॥
स्थलजनलिनरूचिकरचरणेन, नरवरतरदरभरहरणेन मंगलशील दयानिधे हरे ॥३॥
मणिगणकिरणनिकाररसनेन, सदयहृदयमुनिजनरसनेन मंगलशील दयानिधे हरे ॥४॥
जितसरसिजहिमकरवदनेन, कुन्दकुसुमरूचिसमरदनेन मंगलशील दयानिधे हरे ॥५॥
विमलकमलदलचलनयनेन, परशुभगुणसुखसुनिलयेन मंगलशील दयानिधे हरे ॥६॥
सजलजलदचयरूचिरूचिरेण, घनचरविधुकरसरनिकरेण मंगलशील दयानिधे हरे ॥७॥
कलितसुललिततरलवलयेन, चञ्चलकरचरसुकुवलयेन मंगलशील दयानिधे हरे ॥८॥
कृष्णमुनिप्रविणभणितशुभेन, प्रविशतुहरिरपि हृदयमनेन मंगलशील दयानिधे हरे ॥९॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचिताष्टपदी समाप्ता ॥*

## १६५ ● ॥ रागेगुर्जरीएकतालितालेगीयते ॥

मम सुखकन्दे सहजानन्दे प्रविशतु हृदयममन्दे बोधितमन्दे कुहकनिकन्दे विधिहरिहरसुरच्छन्दे ॥ (ध्रुवपदम्) ॥१॥
मुखमितहासे रूचिरविलासे प्रसरदमितरसभासे । निगमनिवासे सुखकररासे मिहिरनिचयसमभासे ॥ मम सुखकन्दे... ॥२॥
निखिलकलेशे गतकलिलेशे हृतजनकुमतिनगेशे । नटवरवेषे पावितदेशे मेचकनततनुकेशे ॥ मम सुखकन्दे... ॥३॥

जनिमृतिहारे कलिजनतारे मोदितवृषमुनिवारे। मुनिगणसारेऽभयवर धारे चरणशरणकृतनारे॥ मम सुखकन्दे... ॥४॥
असदतिदूरेऽमरसददूरे शमितविषयविषपूरे। करूणाशूरे निजसुखपुरे भक्तनयनकजसूरे॥ मम सुखकन्दे... ॥५॥
महदभिरामे दितिजविरामे मणिमयकनकललामे। विदलितकामे बहुलललामे पूरितनिजजनकामे॥ मम सुखकन्दे... ॥६॥
अनिशनिशंके नाशितटंकेशोषितकलिमलपंके। हृतजनशंके तोषितरंके कृतपुरूविचरणकंके॥ मम सुखकन्दे... ॥७॥
विरमितमाने कृतपुरूदाने श्रुतमुनिकृतगुणगाने। कीर्त्तिविताने सकलेशाने वृषकुलविबुधनिधाने॥ मम सुखकन्दे... ॥८॥

॥ प्रमिताक्षरावृत्तम् ॥

मुनिनोत्तमेनरचिताष्टपदी सुखसिन्धुकृष्णगुणरत्नपरा। श्रवणाय गानकरणाय भृशं विदूषो न कस्यविहितेयमिह ॥९॥

*॥ इत्युत्तमचरणदासमुनिविरचिताष्टपदी समाप्ता ॥*

## १६६ ● ॥ देशाखरागे एकतालीताले गीयते ॥

गुणवरूणालय मदकदनेन, करूणालयशुभमति सदनेन। गच्छ हरे वपुषा दृष्टिपथं॥ (ध्रुवपदम्) ॥१॥
अतिपरतरसुखचयनिलयेन, कलिमलबलभवभयविलयेन॥ गच्छ हरे वपुषा दृष्टिपथं ॥२॥
अरूणमृदुलकरधृतकमलेन, क्षपितविबुधमुनिगणशमलेन॥ गच्छ हरे वपुषा दृष्टिपथं ॥३॥
सकलनिगमवररसकलनेन, स्मरसुरनरयममददलनेन॥ गच्छ हरे वपुषा दृष्टिपथं ॥४॥
अतितरकृतजननिकरदयेन, तुंगमृदुलसमततहृदयेन॥ गच्छ हरे वपुषा दृष्टिपथं ॥५॥
अमलहृदयमुनिगणकमनेन, खलदवदहनशमनशमनेन॥ गच्छ हरे वपुषा दृष्टिपथं ॥६॥

द्युमणिमरीचिगौरवसनेन, मरकतमयकाञ्चनरसनेन ॥ गच्छ हरे वपुषा दृष्टिपथं ॥७॥
वर्त्तुलरूचिरजानुमुकुरेण, चारूकुटिललघुतनुचिकुरेण ॥ गच्छ हरे वपुषा दृष्टिपथं ॥८॥
उत्तमचरणदासरचितेन स्फुरतु मनसि मम धार्मिरनेन गच्छ हरे वपुषा दृष्टिपथं ॥९॥

*॥ इत्यमचरणदासमुनिविरचिता श्रीहरिप्रार्थनाष्टपदी समाप्ता ॥*

## १६७ ● ॥ ठुमरीरागेगीयते ॥

भजनीयं केशवरूपमवनीयमे, अजहरिहररतं दर्शय ते ॥ भज... (ध्रुवपदम्)
नूतनजलधरमेचकदेहं, दितिसुतादितिजनरनमनीयमे ॥ अज... ॥१॥
शारदपूर्णहिमांशुशुभास्यं कञ्जनेत्रं मदनमदहरणीयमे ॥ अज... ॥२॥
कौस्तुभरत्नविराजितकण्ठं, मणिमुक्ताकनकहारकमनीयमे ॥ अज... ॥३॥
तुंगविशालभुजान्तरकान्तं, श्रीनिवासं सकलजनवरणीयमे ॥ अज... ॥४॥
उदरनाभिवलित्रयचारू, भ्राजमानं सुषमभुजश्रयणीयमे ॥ अज... ॥५॥
वसुधाधृतशकुलाद्यवतारं, स्वीयपादप्रणतदुःखशमनीयमे ॥ अज... ॥६॥
वारणहंसरूचिरगतिहृद्यं, लोकानन्दं लोकेशबहुगणनीयमे ॥ अज... ॥७॥
रूपधरश्रुतिसन्ततगेयं, गुणातीतं विमलहृदिधरणीयमे ॥ अज... ॥८॥
निष्काममानससारसवासं, माननीयं निखिलदोषदमनीयमे ॥ अज... ॥९॥

*॥ इति निष्कामानन्दवर्णिविरचिताष्टपदी समाप्ता ॥*

## १६८ ● ॥ अष्टपदीयमे ॥

परवरद हरे केशवकान्त रमानाथ सन्नतभयहारम्, भवहर वार्ष भजामि त्वां दिव्यगुणाकरम् ॥ (ध्रुवपदम्)
वरनवघनसमरूपामरभूपानत पीताम्बरधारम्, शिवरिपुमदमोदिकसाधो स्थलपंकजहारम् ॥ स्थल.. ॥ रमानाथ ॥१॥
नरवरसुरवरपूजितपादसरोरूह वरपंकजनाभम्, नरसख नरकनिवारण माधव रजनीशतुल्याभं ॥ रज.. ॥ रमानाथ ॥२॥
अघहर सुखकर दानदयावरूणालय मुनिमण्डलध्येयम्, मुरहर मधुहर कंसविमर्दन श्रुतिसन्ततगेयं ॥ श्रुति .. ॥ रमानाथ ॥३॥
भवभयलयकरं विश्वंभरं दामोदर धर्मात्मजमीशम्, पदयुगयवमुखचिन्हविराजित ब्रह्मभवादीशम् ॥ ब्रह्म...॥। रमानाथ ॥४॥
वरतररूचिर ब्रह्मालय नारायण दोषवारणम्, दितिसुतपरमविमोहन विष्णो भवनिधितारणं ॥ भव... ॥ ॥ रमानाथ ॥५॥
अभयद सदय सदानन्दाकर पालक संधृतवनमालम्, विकचितनिजजनमानससारस धर्मान्वयपालं ॥ धर्म... ॥ रमानाथ ॥६॥
जलधरसुमधुरवाणी रणशान्तिकर कलिमलसंहारम्, शशिनिभवदनकराम्बुजनक्तक धृतशेखरसारं ॥ धृत... ॥ रमानाथ ॥७॥
बहुतरदिनकरचन्द्रानलकान्तिहर पुरूबोधितमन्दम्, सुललितगमनविलज्जितवारण निष्कामानन्दं ॥निष्का.. ॥ रमानाथ ॥८॥

*॥ इति निष्कामानन्दवर्णिविरचिताष्टपदी समाप्ता ॥*

## १६९ ● ॥ मालवरागेएकतालीतालेगीयते ॥

मानस देवं भज भज धर्मकुमारं, शान्तकामं महासुखकारं ॥ (ध्रुवपदम्)
नारायणमखिलेश्वरनायक पूजितमतिशयसारं । मायापरतरब्रह्मनिवासं ॥ श्रुतिभिरसमुदितपारं ॥ मानस.... ॥१॥
नवघनमेचकरूपविराजितमजितमदनमदहारं । देवानन्दममन्दपरिगीत मघचयपंकविदारं ॥ मानस.... ॥२॥

शारदचन्द्रसमनशुभाननमम्बुजनेत्रमुदारं, नासाविकर्जितदीपककीरं रूचिरश्रवणमविकारं ॥ मानस.... ॥३॥
गौरसुशोभितसरसकपोलं बहुतरकरूणांकुपारं । बिम्बफलारूणसदधरकान्तं कुन्दमुकुलदन्तवारं ॥ मानस.... ॥४॥
तरदलघुविततालिकचन्द्रकचन्द्रच्छटाविनिवारं । कौसुमशेखरराजिविभूषितविशदशिरः पटधारं ॥ मानस.... ॥५॥
कम्बुसमत्रिसुरेखामनोहरकण्ठसमुज्जवलहारं । पीयूषसारतराम्बुदगंभिरवाणीविमोहितनारं ॥ मानस.... ॥६॥
प्रेमवतीवृषभूवनविभुषणमाहतवसुमतिभारं । स्वीयसपत्नविभञ्जनमीशं दोषदनुजगणमारं ॥ मानस.... ॥७॥
महीसुरमुनिमण्डलत्रिदेवेश्वर वेदगवाद्यवितारं । रम्यगुणालय पण्डितराजं निष्कामहृदयविहारं ॥ मानस.... ॥८॥

*॥ इति निष्कामानन्दवर्णिविरचिताष्टपदी समाप्ता ॥*

## १७० ● ॥ गुर्जररागे प्रतिमण्ठताले गीयते ॥

वरदतनो वृषनन्दन जनवन्दन ए । नुदितमुदितमुनिवृन्द । जय जय देव हरे ॥ (ध्रुवपदम्) ॥१॥
सुरनरमानसमोदन दितिरोदन ए । श्रुतिनलिनीनवसूर ॥ जय जय देव हरे ॥२॥
दलितमदनमददूषण वृषभूषण ए । श्रितजनकुमुदलेश ॥ जय जय देव हरे ॥३॥
सुरकुलसज्जनरंजनभवभंजन ए । अखिलभुवनप्रतिपाल ॥ जय जय देव हरे ॥४॥
सुमधुरजलधरबन्धुर निजबन्धुर ए । धृतिधरधरणिधरेश ॥ जय जय देव हरे ॥५॥
सुकमलकोमललोचन जनिमोचन ए । निजजनसुखकरशील ॥ जय जय देव हरे ॥६॥
कलिमलमलिननिखण्डन जनमण्डन ए । मुनिजनमधुकरकंज ॥ जय जय देव हरे ॥७॥

विकचितनिजजनकानन कमलानन ए । स्थलजकमलगलमाल ॥ जय जय देव हरे ॥८॥
योगानन्दरचितमिदं कुरूतेऽभिदं ए । किल कुशलं तवगीतं ॥ जय जय देव हरे ॥९॥

*॥ इति योगानन्दमुनिविरचिताष्टपदी समाप्ता ॥*

## १७१ ● ॥ गुर्जररागे प्रतिमण्ठताले गीयते ॥

मुनिजनमण्डलमण्डन स्मरखण्डन ए । भुवि धृतमानवदेह ॥ जय जय कृष्ण हरे ॥१॥
प्रणतपते वृषनन्दन मदगंजन ए । प्रकृतिनिशाहरसूर ॥ जय जय कृष्ण हरे ॥२॥
शुभगुणसागर माधव सुरकेशव ए । गलधृतभूरूहमाल ॥ जय जय कृष्ण हरे ॥३॥
अरूणकमलसमलोचन भवमोचन ए । विधिभवपूजितपाद ॥ जय जय कृष्ण हरे ॥४॥
जनिमृतियमभयनाशन जनशासन ए । शरणागतजनपाल ॥ जय जय कृष्ण हरे ॥५॥
जलधिजयाऽधिकलालितपदपंकज ए । विकसितधर्मसुवंश ॥ जय जय कृष्ण हरे ॥६॥
अघहरसज्जनशंकर धृतशेखर ए । निजजनवाञ्छितपूर ॥ जय जय कृष्ण हरे ॥७॥
सितकुसुमांगदधारक धृतहारक ए । भक्तमनोहरहास ॥ जय जय कृष्ण हरे ॥८॥
मञ्जुकेशानन्दकृतं शुभसंभृतं ए । भवतु शंदं तव गीतं ॥ जय जय कृष्ण हरे ॥९॥

*॥ इति मञ्जुकाशानन्दमुनिविरचिताष्टपदी समाप्ता ॥*

## १७२ • ॥ अष्टपदीयम् ॥

पावन परमोत्तमाद्य कृपानिधे सुखनिधिरव वृषबाल ए माम् ॥ पावन... ॥ (ध्रुवपदम् )

स्नपनमिषेणध्रुवमटविं भवानुषसि समुत्थाय कृष्ण ए ॥

स्वयमसहाय इतो नीलकण्ठ तपसि रतोऽहं वेद्मि ए माम् ॥ पावन... ॥१॥

विकटवने तत्र बहुतरदुःखं शिशुवयसा तेऽसह्यं ए ॥

मृदुतरपद्भ्यां चलितुमपिकण्टकशर्कररयुक्तेन शक्यं ए माम् ॥ पावन... ॥२॥

परिपृच्छति त्वां क्षुधिततृषितं कः श्रमितमुतावाह्वाति ए ॥

अतिविततागाधसरिदुदकं त्वं कथमनुतरिष्यसि ए मां ॥ पावन... ॥३॥

गहनवने स्युर्वनगजवराहा महिषमृगेन्द्राक्रूरा ए ॥

ननु भयमाप्स्यस्यत इह गृहे त्वं झटिति हरे एह्येहि ए मां ॥ पावन... ॥४॥

वन इतरेऽपिस्युरतिशयदुष्टा असुरयातुप्रेताद्या ए ॥

मृदुहृदय त्वं भवसि हरिकृष्ण मयि कृपयैहि भक्तिलाल ए मां ॥ पावन.. ॥५॥

क्वच तव लावण्यखनिमृदुमूर्त्तिः क्व विचरणं क्रूरारण्ये ए ॥

नहि नहि योग्यं निजचरणदासांस्तवगमनं नो विहाय ए मां ॥ पावन.. ॥६॥

वृषतनयोऽयं विलपति हरे ज्येष्ठदुतकनिष्ठभ्राता ते ॥
स्वजनसखायोऽप्यखिलपुरलोकः खगपशुवृक्षा भवन्तं ए मां ॥ पावन.. ॥७॥
शृणु शृण्वंग देवरइमं ममहरे त्वंकरूणविलापंदास्या ए ॥
वितरमुदेक्षां त्वरितममृतात्मंस्त्वरितमिह गच्छ स्वामिन् ए मां ॥ पावन.. ॥८॥

*॥ इति श्रीभगवत्प्रसादाचार्य विरचिताष्टपदी समाप्ता ॥*

**१७३ ● ॥ रामकर्याख्यरागेणगीयते अष्टपदीयम् ॥**

सततमिदं वपुस्तव हरे ममास्तु नयनपथे नाथ वरे । (ध्रुवपदम्)
सर्वमनोहरमार्त्तिहरेण सदानिजभक्तसुपालम् ॥
मोक्तिकपुष्पसरलसुवर्णगलार्पितानेकसुमालम् ॥ सततमिदं.... ॥१॥
नूत्नपयोधरमेचकमात्मजनेक्षणमानसहारम् ॥
ब्रह्मभवादिसुरेशपराभवजस्मरगर्वविदारं ॥ सततमिदं.... ॥२॥
अंघ्रिसरोजतिलध्वजमीनयवाब्जमुखांकसुरेखम् ॥
भक्तवराभयदायिकराम्बुजसत्तलमेचकलेखम् ॥ सततमिदं.... ॥३॥
अन्तिकचारूतिलद्वयराजितवर्त्तुलनाभिसुकूपम् ॥
तुन्दविराजिवलित्रयमोहितसज्जननिर्जरभूपम् ॥ सततमिदं.... ॥४॥

दीर्घमनोहरवक्षसि तन्तुविवर्जितहारसदंकम् ॥
श्यामलचारूकुचोपरिलक्ष्मशुभार्द्धांशुकलंकम् ॥ सततमिदं.... ॥५॥
लक्ष्मविलक्षितसंसृतिवार्द्धिपुरूदृतजीवभुजाढ्यम् ॥
कम्बुसद्दक्षतिलान्वितचारूगलं श्रुतिकुण्डलभाढ्यम् । ॥ सततमिदं.... ॥६॥
शारदपूर्णसुधाकरलज्जन सस्मितवक्रसरेजम् ॥
चारूतरभ्रूकुटीद्वयनर्त्तन मोहितानेकमनोजम् ॥ सततमिदं.... ॥७॥
कान्तनासावरचञ्चलनेत्रवितर्जितदीपकमीनम् ॥
चन्दनकुंकुमराजिकभाल शिरोधृतमौलिनवीनम् ॥ सततमिदं.... ॥८॥

*॥ इत्यखण्डानन्दवर्णिविरचिताष्टपदी समाप्ता ॥*

## १७४ • ॥ अथ श्रीनारायणमुनि नीराजनस्तोत्र प्रारम्भः ॥

जयदेव २ जयमंगलमूर्त्ते २ नारायण पुरूषोत्तम २ कृतनिजसुखपूर्त्ते । (ध्रुवपदम्)
प्राकृततमसः पारे महसि प्रथमाने २ श्रीराधासहितस्त्वं २ ब्रह्मपुरेऽमाने ॥
श्वेतद्वीपउदारेऽयुतरविरूचियुक्ते २ मूर्त्तेधामनिनूते २ निवससि सितमुक्तैः॥ जयदेव... ॥१॥
वैकुण्ठेऽपि रमाया रूचयेऽतिविशाले २ रचिते स्वेन च विष्णुः २ वससि त्वमकाले ॥
चातुर्मास्य उदारे मृदुतरतनुशेषे २ क्षीराब्धावपिलक्ष्म्या २ सेवितपच्छेषे ॥ सततमिदं... ॥२॥

त्वं च हिरण्मयरूपो रविमण्डलवर्ती २ नानायज्ञपतिस्त्वं २ ज्वलनत्रयवर्ती ॥
नरनारायणरूपो बदरीवनधामा २ सुखयसि तपसा लोकान् २ अघचयहरनामा ॥ सततमिदं.... ॥३॥
गोलोकाधिपतिस्त्वं कृष्णः कलिहर्त्ता २ राधासंगविहारी २ मुरलिरवकर्त्ता ॥
वैकुण्ठे महति त्वं हरिरसि सुखदाता २ रमयाचापिमहत्या २ सहितोऽखिलपाता ॥ सततमिदं.... ॥४॥
योगेश्वर सकलात्मा श्रितजनभयहारी २ त्वमसि प्राणभृतां वै २ निःश्रेयसकारी ॥
तव चरणाम्बुजमेकं शरणं नः सत्यं २ मोचय मायिकबन्धात् २ दूरय दौर्मत्यम् ॥ सततमिदं.... ॥५॥

*॥ इति दीनानाथभट्टविरचितं श्रीनारायणमुनिनीराजनस्तोत्रं समाप्तम् ॥*

**१७५ ● ॥ अथ श्रीसहजानन्दस्वामिनीराजनस्तोत्र प्रारम्भः ॥**

जय देव जय देव जय निजसुखदायिन् २ सहजानन्द दयालय २ निजजनपदधायिन् ॥ (ध्रुवपदम्)
तव पदपंकजमीडे जनताजनिहारं २ संसाराम्बुधिमज्जन २ खिन्नजनोद्धारम् ॥
नानाजन्मशुभाप्यं तपतापिदूरं २ कृपया दर्शितमिष्टं २ भवता सुखपूरं ॥ जय देव... ॥१॥
सुन्दरहासविलासं प्रसरद्द्रदभासं २ तवमुखफुल्लसरोजं २ निगमागमवासम् ॥
नानादुःखविमोचन लोचनयुगलाभं २ निजजनमानसमोषं २ दर्शकजनलाभं ॥ जय देव... ॥२॥
पश्चिमदेशसमुद्भवगतिवरहयरूढं २ वल्गाचञ्चलहस्तं २ निन्दकजनगूढम् ॥
चञ्चत्कुंतकराग्रैरधिगतहयसारैः २ ध्याये वेष्टितवाहं २ जय जय रवकारैः॥ जय देव... ॥३॥

कटितटसंनद्धपटं पुरटप्रभवसनं २ शिरसि बद्धसुफालं २ मुखगतमितहसनम् ॥
प्रावरणाञ्चलकञ्चुक चञ्चलनटवेषं २ ध्यायेऽहं प्रकटीकृत २ कारूण्यविशेषं ॥ जय देव... ॥४॥
विद्युत्कान्तिविभूषण भूषणकरयष्टिं २ निजचरणाम्बुजसेवक २ कृतपातकनष्टिम् ॥
निजपदपल्लवदानात् कृतनिजजनतुष्टिं २ नानाकष्टविमोचन २ साधनकृतपुष्टिं ॥ जय देव... ॥५॥
नानाभक्तसमर्पित कुसुमोत्तमहारं २ तत्स्वीकारमिषेणहि २ तद्भवभयहारम् ॥
मेघश्याममनोहरं विलसच्छुभहारं २ वपुषा मोहितमारं २ ध्याये सुखकारं ॥ जय देव... ॥६॥
त्वं जनकस्त्वं जननी त्वं गुरूरूपकारी २ त्वं मम सर्वनिधानं २ सततं भयहारी ॥
त्वं मे मित्रमुदारं त्वमसि प्रियकर्त्ता २ त्वं मे बन्धुकुटुम्बं २ भवसंकटहर्त्ता ॥ जय देव... ॥७॥
शेषब्रह्मसुरेन्द्रा भवतःपदभक्ता २ गुणगणवर्णनकृत्ये २ यद्यपि नो शक्ताः ॥
तवगुणवर्णनकारी न पुनः संसारी २ तस्माद्दीनजनोयं २ सकलोप्यधिकारी ॥ जय देव... ॥८॥

*॥ इति दीनानाथभट्टविरचितं श्रीसहजानन्दस्वामिनीराजनस्तोत्रं सम्पूर्णम् ॥*

## १७६ ● ॥ अथ श्रीहरेर्भुक्तिलीलात्मकस्तोत्र प्रारम्भः ॥

वृषकुलकमलरवे शनकैर्भगवंस्त्वं २ समय इह विहाय तु चपलत्वं । यद्रुचिकरमत्र यथेष्टमधिरसमद्धिहरे ॥ (ध्रुवपदम्)
कनकमय दिनकरोज्ज्वलपात्रभृताद्यं २ सरस सुखकरोत्तमबहुखाद्यं । साज्य सुरभिसुन्दरकूर ॥ मधिरसमद्धिहरे ॥१॥
असुहितकरघृतं परमान्नमपूपं २ सदधिवटकमुत्तमरससूपं । शाष्कुलिकमिदं च रसालं ॥ मधिरसमद्धिहरे ॥२॥

मीलितनवघृतसीतं कदलं मृदुपोलीं भवदभिमतफुल्लितसितपुरिं । शाटक दयितोदनपिष्ठ ॥ मधिरसमद्धिहरे ॥३॥
अदनरूचिदचटनी वटिकां घृतपाकं २ समजलधिजसंस्कृतबहुशाकं । पिण्डकमुतमौक्तिकगोल ॥ मधिरसमद्धिहरे ॥४॥
स्थिरकगुडकसुखदाः ससितं दधिमण्डं २ शशिनिभसममिश्रितं घृतखण्डं । मोदकमतिचारू बिरञ्ज ॥ मधिरसमद्धिहरे ॥५॥
मरिचलवणजरणादियुतेऽद्धिरसाद्यं २ दधनिनिहितमोदनमवशाद्यं । माकुरू कवलं ह्यपि दूर ॥ मधिरसमद्धिहरे ॥६॥
करकमलनिकटगं ससितं नवनीतं २ विशदपृथुलपर्पटमथशीतं । स्वम्बुपिब सितोदनदूग्ध ॥ मधिरसमद्धिहरे ॥७॥
शुचि कुरू करकमलं वदनं मुखवासं २ तदनुसदयमाददस्व निजदासं । शिक्षय हृदि मे कुरू वास ॥ मधिरसमद्धिहरे ॥८॥

*॥ इत्यखण्डानन्दवर्णिविरचितं श्रीहरिभोजनकालीयप्रार्थनास्तोत्रं समाप्तम् ॥*

## १७७ ● ॥ कोकिलकं वृत्तम् ॥

कनकमयोज्जवलागणितभाजनसन्निभृतांस्तवपुरतः क्रमेणनिचितान्प्रचुरान्नगिरीन् ॥
रूचिरकर भिन्नभिन्नरससम्भृतपथ्यकरान् निजजनशर्मणेऽद्धि शनकैः कमलाधिपते ॥१॥
अदनपटुं सितं सुरभिमोदनमाज्ययुतं प्रथममिमं समाद्य सितकुण्डलिकां मृदुलाम् ॥
स्थिरकमपूप पूप घृतपूरक घुर्घुरकान् निजजनशर्मणेऽद्धि शनकैः कमलाधिपते ॥२॥
प्रियपरमान्नमण्डकसुमौक्तिकलड्डुसिताघृतयुतपोलिकागुडकपिण्डकबासुदिकाः ॥
त्वदुचितपूरिका धवलसंयवनं सुखदां निजजनशर्मणेऽद्धि शनकैः कमलाधिपते ॥३॥
अणुतरसेविका मृदुलशाटकखाजकसन्सुमनसुमुद्गशालि हरिमन्थकचूर्णकृतान् ॥
मृदुसित पर्पिकाश्च तिलशष्ठिकपिष्टमुखान् निजजनशर्मणेऽद्धि शनकैः कमलाधिपते ॥४॥

स्थलकजगुन्द्रनालिकफलीत्रिपुटादिकृतान् शशिनिभपीतसारतरलाज्यविरंजरसाः ॥
घृतसितया विमिश्रकदलं सतरं च दधि निजजनशर्मणेऽद्धि शनकैः कमलाधिपते ॥५॥
पुतरयुक्तिसंस्कृतमुपस्करभूरिरसं बहुविधशाकमन्तिवटिकां मरिचार्णवजम् ॥
दधियुतराजिकाक्तमदनीयरूचिप्रददं निजजनशर्मणेऽद्धि शनकैः कमलाधिपते ॥६॥
दधिवटकाऽऽरनालनवनीतकफूल्लवटीर्मुदुविविधाग्र्यभज्यचटनीसितपर्पटकान् ॥
रूचिकरसंस्कृताश्चणकवर्तुलमुद्गमुखान् निजजनशर्मणेऽद्धि शनकैः कमलाधिपते ॥७॥
सुरभिसमुज्ज्वलोदनगिरिं तुवरीद्विदलां दधिकृततेमनं दधियुतोदनमम्बु पिबन् ॥
क्वथितपयोविमिश्रितसशर्करभक्तमिमं निजजनशर्मणेऽद्धि शनकैः कमलाधिपते ॥८॥
करकमलं विशुद्ध्य तत आननीररूहं पिब सलिलं गृहाण मुखवासमिमं प्रवरम् ॥
तदनु हरे प्रसादमधरामृतमर्पय नः कुरू कृपयाऽस्मदीक्षणपथे वसतिं सततम् ॥९॥

*॥ इत्यखण्डानन्दवर्णिविरचितं श्रीलक्ष्मीनारायणदिदेवार्पितान्नकूटाष्टकं सम्पूर्णम् ॥*

## १७८ ● ॥ देशीयविराडीरागे अष्टालीताले गीयते ॥

प्रभोभुंक्ष्वकामं २ गच्छामि किमु झटति सलीलम् ।
सहजसुखसुन्दरे तिष्ठ मम मन्दिरे मुंच चपलतरशिशुलीलम् ॥ (ध्रुवपदम्)
पुरटमयवाटिका रूचिररसमण्डिकाः शोभयति विततरूचिवासे ॥
कनकभुजिभाजने भोज्यरूचिराजने खाद्यमिदमुदितरविभासे ॥ प्रभोभुंक्ष्व.... ॥१॥

अदनपटुमोदनं सितं सुरभिमोदनं पायसमतिसितमथ सूपम् ॥
दधिदलितराजिकामिलितहतखारिकामुपनतमनुपममपिपूपम् ॥ प्रभोभुंक्ष्व.... ॥२॥
पृथुममलमण्डकं बहुलघृतखण्डकं लड्डुकमधिरस दधिमण्डम् ॥
फुल्लसितपूरिकां मृदुलतरपेलिकां माषवटकयुगलमखण्डम् ॥ प्रभोभुंक्ष्व.... ॥३॥
चतुरजनसेविकारचितसितफेणिकां नैकजनपदजनितशाकम् ॥
मिलितघृतशर्करं कदलमथघुर्घरं चन्द्रशकलरूचिघृतपाके ॥ प्रभोभुंक्ष्व.... ॥४॥
त्वदभिमतचिर्भटं मरिचयुतपर्पटं शाष्कुलिकमतुलदधिघोले ॥
क्वथितमथगालितं सुरभिघृतमाहितं द्युतिवरकनकचोले ॥ प्रभोभुंक्ष्व.... ॥५॥
विधुजरणलोडिते लवणमरिचाञ्चिते दधनिनिहितमतिमृदुकूरम् ॥
अद्धि शनकैर्हरे तव रूचिदमाहरे मां कुरू कवलमपि विदूरम् ॥ प्रभोभुंक्ष्व.... ॥६॥
करकमलसंगतं तव सततसंमतं लेढि ससितनवनीतम् ॥
नववसनपावितं पिब नलदवासितं गांगमिदमुदकमतिशीतम् ॥ प्रभोभुंक्ष्व.... ॥७॥
शुद्ध्यकरपंकजं तदनुमुखनीरजं स्वीकुरू समुचितमुखवासम् ॥
तिष्ठ रूचिरासने भक्तमवशासने कुरू मम नयनपथनिवासम् ॥ प्रभोभुंक्ष्व.... ॥८॥

*॥ इति शतानन्दमुनिविरचिता राजभोगाष्टपदी समाप्ता ॥*

## १७९ • ॥ अथश्रीउन्मत्तगंगामाहात्म्याष्टकानि प्रारभ्यते ॥ सृग्धरावृत्तम् ।

या नित्यं भक्तभर्त्तुर्धृतनरवपुषो वासुदेवस्य साक्षात्साकं मुक्तैर्मुनीन्द्रैः प्रमुदितवदनैः क्रीडया स्नानकाले ॥
स्वर्धुन्यामानमुच्चैर्हरिचरणसकृत्स्पर्शजातं धुनाना वन्द्या देवैः सहेशैर्भुवि जयतितरां मुक्तिदोन्मत्तगंगा ॥१॥
वीक्षामात्रेण पुंसामगणितजनिजं पातकं नाशयन्ती स्नानात्सर्वार्थदात्री हसति भुवि च या जान्हवीं फेनजालैः ॥
या चान्यासां नदीनां प्रकटभगवतोह्यंगसंगं विनापि ख्यातं लोके महत्वं प्रतिवदतितरं वारिघोषैः किमुच्चैः ॥२॥
श्वेतं स्वाभाविकं या मुनिगणतिलकैः स्नानधौतैश्च पीतं वासः प्रक्षालनेन व्रतिमुनियतिनां चारूकाषायरागम् ॥
राज्ञीनामंगधौतैः पिशुनमृगमदैरीशपूजावशिष्टैः शोणं कृष्णं च वर्णं स्वपयसि दधती चित्रवर्णा विभाति ॥३॥
यस्याः स्नानं त्रिकालं पयसि विदधतां सन्नृणां योषितां वा वक्त्रेभ्यो नामघोषः प्रकटितनृतनोः स्वामिनारायणस्य ॥
निर्यन्मिश्रोम्बुघोषैः प्रतिदिशमटतां भास्करेः किंकराणां साशंकं दूरगाणां हरिविमुखदृशां कर्णशूलायते वै ॥४॥
प्रायश्चित्तैरनाश्यनपि कलुषचयान्सद्य एवघ्नती या सौरेस्तल्लेखकस्याप्यनुदिनमघकृद्दण्डविश्रान्तिदात्री ॥
दूरस्थैरन्तकालेऽप्यणुमितमपिचेदम्बुयस्याश्च पीतं स्याच्चेत्ते त्यक्तदेहाः सुरवरवनितासेव्यतां यान्ति सद्यः ॥५॥
यस्यास्तीरे विहंगान्निवसत उदके मीननक्रोरगादीन् हातुं देहांश्चदृष्ट्वा दिवि सुखनितास्तत्कृतेऽन्योन्यकोपाः ॥
केशाकेशिप्रमर्दं विदधति मम वा एष ते नैव मेऽयं कामादित्थं ब्रुवन्त्यो झटिति मृतिमितांस्तान्नयन्ते विमानैः ॥६॥
यस्यास्तीरे कृतानां व्रतजपतपसां श्राद्धदानादिकानां पुण्यंस्यादक्षयं वा अमरपितृणां तर्पणाद्भुरितृप्तिः ।
नानायज्ञादिपुण्यंत्विह सकलजनैः स्नानतोलभ्यते वै श्रेयस्कामैस्ततो या नृभिरनिशमसौ सेव्यते सर्वकामैः ॥७॥

दुष्टान्पापान्विगर्ह्यानपि पतितजनान् स्नानमात्रेण सद्यः स्वर्गार्हान्कुर्वती या सुकविभिरूदिता नूनमुन्मत्तगंगा ॥
माहात्म्यं नैव यस्या जगति भगवतास्वात्मसाद्वैकृताया वक्तुं केऽपिक्षमन्ते भुजगपतिमुखावर्णयन्तोपि नित्यम् ॥८॥

॥ उपजातिवृत्तम् ॥

तां प्राप्य सस्नौ भगवांस्तदानीं साकं मुनीन्द्रैरखिलैर्नृभिश्च ।
सिञ्चञ्जलं स्वांजलिलाघवेन् तान् सिंचयंश्चापि परस्परं सः ॥९॥

*॥ इति शातानन्दमुनिविरचितमुन्युन्मत्तगंगाष्टकं समाप्तम् ॥*

## १८० ● ॥ उपजातिवृत्तम् ॥

यस्यां हरिर्धर्मजनिर्मुनीन्द्रैर्वृतस्तथान्यैर्मुहुरात्मभक्तैः । सस्नौ प्रसन्नैः स्वनिषक्तचि तैरून्मत्तगंगां हृदि चिन्तये ताम् ॥१॥
सिञ्चन्स तेष्वञ्जलिभिः सुनीरं तान्सिचयंश्चापि मिथो हि यस्याम् । चक्रेम्बुलीलां ललितामलं उन्मत्तगंगां हृदि चिन्तये ताम् ॥२॥
यत्स्रोतसि स्वैर्वृत एव तिष्ठन् स तालिकावादन चारू चक्रे । सत्पद्यगानं स विधापयंस्तैः उन्मत्तगंगां हृदि चिन्तये ताम् ॥३॥
विलोलकल्लोलविलोक्यलीलं विलोकयन् यत्सलिलं विलासि । प्राशंसदीशः सविलोकितः स्वैः उन्मत्तगंगां हृदि चिन्तये ताम् ॥४
निमज्ज्ययस्याः सलिलेप्यगाधे चिरेण निर्यन् वरनीरगर्भात् । ततार चित्रैस्तरणप्रकारैः उन्मत्तगंगां हृदि चिन्तये ताम् ॥५॥
आघूर्णयन् वारिणि पुण्यपाणिं मृदंगधीराम्बुरवान् सुश्रृण्वन् । यस्यां बभौ प्रेक्षित एव पौरे उन्मत्तगंगां हृदि चिन्तये ताम् ॥६॥
यस्यां स कुर्वन् विविधान्विनोदानानन्दयन्सस्मित आत्मभक्तान् । विकीर्यमाणस्त्रिदशैः प्रसूनैः उन्मत्तगंगां हृदि चिन्तये ताम् ॥७॥
हरेः प्रसंगादवतारहेतोर्याऽनन्यतुल्यं महिमानमाप्ता । गेयंह्यनन्तं भुजगेश्वराद्यैः उन्मत्तगंगां हृदि चिन्तये ताम् ॥८॥

॥ मालिनीवृत्तम् ॥

विविधतिलकरंगा चारूचंचत्तरंगा स्नपितहरिसदंगा मुक्तिकारिप्रसंगा ।
हरिपुरूतरसंगा तीरराजिद्विहंगा जयति दुरितभंगा पावनोन्मत्तगंगा ॥९॥

*॥ इत्यचिन्त्यानन्दवर्णिविरिचितमुन्मत्तगंगाष्टकं समाप्तम् ॥*

## १८१ ● ॥ पञ्चचामरवृत्तम् ॥

सुवर्णवर्णपर्ण सत्सरोजराजिराजितां नरावरामराकरश्रुतादिवित्सभाजिताम् ॥
उदारसार दुर्गसत्पुरान्तिकप्रचारिणीं नमामि पापदारिणीं सुरापगां विहारीणीम् ॥१॥
बुधामुधासुधासुधा भ्रमन्तियामसंगता नृतास्तुतां सृतास्तुतां भवन्ति मुक्तसंमताः ॥
अनिष्टशिष्टरिष्टदिष्टहीनमुक्तिकारिणीं नमामि पापदारिणीं सुरापगां विहारीणीम् ॥२॥
लसच्चलज्जलस्वलद्वलक्षफेनहासिनीं प्रभूतभूतभूतलां जलभ्रमावभासिनीम् ॥
स्वजुष्टदुष्टपुष्टरूष्टनष्टकष्टहारिणीं नमामि पापदारिणीं सुरापगां विहारीणीम् ॥३॥
प्रसारिवारिचारिहारितादिपक्षिकूजितां सुपर्वशर्वगर्वभर्वसाधुवृन्दपूजिताम् ॥
स्वलोकलोकशोकमोककारणावतारिणीं नमामि पापदारिणीं सुरापगां विहारीणीम् ॥४॥
गंभीरनीरतीरधीरसत्समीरशर्मदामनंगरंगभंगसत्तरंगसंगधर्मदाम् ॥
सदुक्तमुक्तयुक्तसद्धरिप्रकेलिसारिणीं नमामि पापदारिणीं सुरापगां विहारीणीम् ॥५॥

सुतन्तुहन्तुमन्तुकृत् स्वगन्तुजन्तुपाविनीं प्रधर्मभर्ममर्मभित् कुकर्मभद्रभाविनीम् ॥
सुतीरधीरवीरचीरधारियोगिवारिणीं नमामि पापदारिणीं सुरापगां विहारीणीम् ॥६॥
सदच्छकच्छकच्छयुक्स्वकाच्छकच्छपालिनीं धराधराकरादरां लसन्मरालमालिनीम् ॥
स्वधीतिगीतिनीतिवित्तिवर्णितामपारिणीं नमामि पापदारिणीं सुरापगां विहारीणीम् ॥७॥
अभीतिनीतिरीतिसत्प्रगीतिवित्तिदायिनीं कृतापतापपापकृत्प्रतापशान्तिदायिनीम् ॥
प्रभूत भूत दूतभूतभूत भीतिदारिणीं नमामि पापदारिणीं सुरापगां विहारीणीम् ॥८॥

॥ मालिनीवृत्तम् ॥

दुरितभरविदारं सारमुन्मत्तगंगाविषयमिदमचिन्त्यानन्दवर्णिप्रणीतम् ॥
इह भुवि शृणुयाद्यः कीर्त्तयेदष्टकं वा स किल सपदि गच्छेद्वाञ्छितार्थसिद्धिम् ॥९॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितमुन्मत्तगंगाष्टकं समाप्तम् ॥*

## १८२ ● ॥ वसन्ततिलकावृत्तम् ॥

या शुभ्रलोलसलिलातिललामलीला प्रोन्मूलयत्यघबलेऽपि कलौ मलौघान् ॥
तामिश्वैर्नरवरैरभिवन्द्यमाना मोजस्वतीं भुवि नमामि वरं नदीनाम् ॥१॥
आवर्त्तवर्त्तुलगंभीरसुनाभिरम्यां कल्लोलदीर्घतरचारूभुजाभिरामाम् ॥
फेनप्रहासविशदद्युतिभासमाना मोजस्वतीं भुवि नमामि वरं नदीनाम् ॥२॥

या पिप्पलाक्षयसुसंवसथोपकाण्डे भद्रावहा वहति सर्वलरिद्धिभूषा ॥
तां ब्रह्मशेषविनुतां भवमुक्तिदात्री मोजस्वतीं भुवि नमामि वरं नदीनाम् ॥३॥
सच्छीकरच्छविचलच्छकुलाच्छकच्छां तुंगापलस्खलदनल्पजलप्रणादाम् ॥
नानाविहंगमरवैरधिराजमाना मोजस्वतीं भुवि नमामि वरं नदीनाम् ॥४॥
चंचच्चलद्रुचिरविचिविरोचमानां संराजितां तटवटादिकुटच्छटाभिः ॥
सर्वार्थदामसुभृतां स्वजलाप्लवाना मोजस्वतीं भुवि नमामि वरं नदीनाम् ॥५॥
यानंगभंगहरिचारूतरांगसंगा तत्पुण्ययोगविधुरान्यतरंगिणीनाम् ॥
ख्यातं निषेधति महत्वमिवाम्बुघोषैरोज मोजस्वतीं भुवि नमामि वरं नदीनाम् ॥६॥
यस्यास्तटे स्म विदधाति स विष्णुयागं षण्मासतो हरिरतर्पयदाप्तकामः ॥
भोज्यैर्वरैः क्षितिसुरांश्चसहस्रशस्ता मोजस्वतीं भुवि नमामि वरं नदीनाम् ॥७॥
यत्स्रोतसिश्रितजनान् स्वदृशा समाधि स प्राक्षिपत्किल विधाप्यजलोह्यमानात् ॥
तान्स्वान्तिकं समनयच्च हरिश्चिरात्ता मोजस्वतीं भुवि नमामि वरं नदीनाम् ॥८॥
यस्यां मुहुर्विहरति स्म हरिर्विहारी सार्द्धं मुनीन्द्रनिकरैरितिरैश्च भक्तैः ॥
सस्नावजस्रामघहा सुयशाश्चिरंता मोजस्वतीं भुवि नमामि वरं नदीनाम् ॥९॥
यां संगतां वरहरिप्रचुरप्रसंगात् प्राज्यं बलं दुरितवृन्दविभेदनादौ ॥

तामाप्तकामजनशर्मचयैकदात्री मोजस्वतीं भुवि नमामि वरं नदीनाम् ॥१०॥
यद्रोधसिव्रततपोजपयोगयागश्राद्धादिकं कृतवतां शुभकर्म पुंसाम् ॥
भूयो फलं भवति तां कलुषक्षयेक्षा मोजस्वतीं भुवि नमामि वरं नदीनाम् ॥११॥

॥ शालिनीवृत्तम् ॥

ऊर्जस्वत्या मंगलं स्तोत्रमेतत् संशृण्वीत श्रावयेद्वा पठेद्यः ॥
स स्यात्सद्यः श्रद्धचित्तो हि देही शान्ति यायात्स्वोप्सितां चार्थसिद्धिम् ॥१२॥

॥ शिखरिणीवृत्तम् ॥

अचिन्त्यानन्देन प्रणतजनतासंसृतिभिदो हरेस्तोषयैतत् स्तवनमतिपुण्यं विरचितं ॥
सदा गेयं सद्भिर्हरिललितलीलामृतरसं मुदा पाठ्यं भक्तैरिदमनुदिनं स्नानसमये ॥१३॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितमोजस्वतीं गंगास्तोत्रं समाप्तम् ॥*

## १८३ ● ॥ शिखरिणीवृत्तम् ॥

परस्मान्मायाया निजशुभतमादक्षरपदाद्गुणैश्वर्याद्यैर्यो भवति भगवानुत्तम इति ॥
यदर्चा कुरवन्ति प्रततमतयो मुक्तनिकराः परात्मा ब्रह्मेति प्रभुरथहरिर्यः समुदितः ॥१॥
निदानं सर्वेषां विविधबहुलाऽऽश्चर्यनिलयो महिम्नोः यस्यान्तं निगममुनयो यान्ति न कदा ॥
प्रकृष्टैर्मुक्तौघैर्हृदयधृतपादाम्बुजयुगः स मे तुष्याद्दिव्यैरनुपमगुणैर्युक्त सुखदः ॥२॥

असौ ब्रह्माण्डेशैर्निजभुवनमानेतुमनिशं स्तुतो नम्रैः सर्वैः प्रणयिभिरहो शुद्धहृदयैः ॥
यदर्थं वै पूर्वं तपसि धृतरूच्या तु मयका कृशीभूता तन्वा ह्यनवरतमाराधित इह ॥३॥
स चायं द्दढमार्गं बहुलकरूणाव्याप्तहृदयो जनुः प्राप्तो धर्मात्सुखदचरितः कष्टशमनः ॥
तपोऽदभ्रं कर्त्तुं गहनविपिनं यात उत वा निजेक्षां वाञ्छद्‍भिर्धृतमुनियमैस्तापसगणैः ॥४॥
समहूतो यातो विपुलजनतामोक्षसरणिं प्रदेष्टुं किंवासौ सुदुरितमतान्युज्झितुमितः ॥
अतर्क्यैश्वर्यैः स्वैर्मुहुरपचितो भावुकनरैर्मयि स्नानं कस्मिन्वयसि हि विधास्यत्ययमथो ॥५॥
महत्ताप्राप्तानां क्षण इह युगे नह्यपमितः प्रवृतौ द्दष्टान्तो वितरितवरः कुम्भज इति ॥
अयं साक्षात्प्रोचे विशदसलिलायां त्वयि मुदा करिष्येऽहं स्नानं बहुयुगमितोऽयादुतवयाः ॥६॥
मयित्वेनोव्रातानघिनरगणा एत्य बहवो मृजन्ति ह्यश्रान्तं कलुषितहृदो भूरितमसः ॥
मृजाम्येतान्यत्राऽप्यधिजगति तीर्थे ननु न तत्सतस्त्वाऽतो हित्वैतदुभयमिहाऽन्यन्नसुखदम् ॥७
स उक्तेर्गंगायाः श्रवणधृतकर्णो हि भगवानवोचत्तां रम्यं वचनमथ शर्मोद्‍भवकरम् ॥
पुरे मे पूर्वोक्ते दुरितरहिता संगतिमितो ध्रुवं लब्धा तत्र स्वकजनयुजा पुण्यधिषणे ॥८॥

*॥ इति विहारीलालाचार्यविरचिता उन्मत्तगंगाकृता श्रीहरिस्तुतिः सम्पूर्णा ॥*

## १८४ ● ॥ वसन्ततिलकावृत्तम् ॥

वन्दामहेंऽघ्रिकमलं शरणागतानां तापत्रयच्छिदुरमर्चितमीश भक्तैः ॥
सर्वार्थदं सकलदेवगणेडितं ते लक्ष्म्योपलालितमनन्तमहानुभावम् ॥१॥
क्षेमाय यत्प्रतिदिनं हि भजन्ति भक्ता यच्छौचवारि निखिलं च जगत्पुनाति ॥
ध्यायन्ति यद्हृदयपंकज आद्यमुक्तावृन्दोपसेवितमजस्रमनन्तसौख्यम् ॥२॥
दैत्यायितैर्गुरूनृपैः परिपीड्यमानान्स्वीयांजनान्सुखयितुं जननं गतेन ॥
सर्वेश तांश्च निखिलान्निजमायया ते मोहं प्रणीय जनताह्यविताऽधुना स्वा ॥३॥
एतर्हिमंगलपथः सुखदः शरण्य विस्तारितोऽन्यसरणि प्रतिबध्नताते ॥
तं तेधिगत्यबहवो मनुजाः सदीश त्वद्धिष्ण्यमापुरिव कौ सुसृतिंगताः स्वम् ॥४॥
घर्म्मान्तजो जलधरो न यथाह्यशुद्धां शुद्धामपेक्षत इहैव धरां तथेश ॥
भूयिष्ठापापगणयुंमनुजा दयालो धर्मात्मजेन गमिताः स्वपदं त्वया हि ॥५॥
वज्रांकुशध्वजसरोरूहमुख्यचिन्हैः श्रीमत्पदैर्भगवताऽस्ति हि पावितोर्वी ॥
आक्रम्य नाकभुवनं जयतीयमीश द्यौश्चापि ते सुभगवीक्षणभावितैव ॥६॥
बह्वीः पुरां विदधतेशतनूर्नहीदृक कस्यांचिदेव शुभरीतिरिहापि तन्वाम् ॥
प्रावर्त्तिता सकलकारणकारणेन दृष्टा श्रुता न भवतीश्वर तादृशीतु ॥७॥

सर्वपरि त्वमसि सर्वनिदाननाथ ब्रह्माख्यधामपतिरक्षरमुक्तसेव्यः ॥
भव्याय नो भव विभो त्वदुपासकानां त्वच्छासनं विदधतां प्रभुमानिनां च ॥८॥

*॥ इति विहारिलालाचार्यविरचिता उन्मत्तगंगाकृता श्रीहरिस्तुतिः सम्पूर्णा ॥*

## १८५ ● ॥ वसन्ततिलकावृत्तम् ॥

स्वामिन्परात्परतरेऽक्षरधाम्नि दिव्ये संराजमानमनिशं स्तुतमाप्तवाग्भिः ॥
निःशेषशेषिणमनन्तगुणोम्बुराशिं वन्दामहेऽखिलगुरूं भगवन्तमाद्यम् ॥१॥
अस्माभिरेव जनकाय पुरोदितो यो धर्मस्त्वदीय उरूगाय सुखोपलब्धिः ॥
तद्भाजनानि बहवो मनुजाः कृतास्ते वन्दामहेऽखिलगुरूं भगवन्तमाद्यम् ॥२॥
त्वां ये विहाय कृपणाविषयोपभोगसक्तोन्तरा व्ययितपुण्यकला दुरन्ते ॥
मज्जन्ति जन्ममरणादिभये भवाब्धौ वन्दामहेऽखिलगुरूं भगवन्तमाद्यम् ॥३॥
येषां भवेदपहतिः कुधियो नराणां त्वत्संगमात्त इह यान्त्यपवर्गमार्गम् ॥
ते तारयन्ति भवसागरतो मनुष्यान् वन्दामहेऽखिलगुरूं भगवन्तमाद्यम् ॥४॥
त्रिर्वीक्ष्य वेदनिकरं द्रुहिणः परात्मन्स्वस्थाऽऽत्मनाऽध्यवसदंगमतिस्त्वयीति ॥
त्वं ध्येय इत्यपि मतं कमलोद्भवस्य वन्दामहेऽखिलगुरूं भगवन्तमाद्यम् ॥५॥
नानाकुतर्कविषपानविमूर्छितानां संजीवकोऽस्ति भवतश्च सतां प्रबोधः ॥

त्वं देहिनां हि परमः सुहृदन्तरात्मा वन्दामहेऽखिलगुरूं भगवन्तमाद्यम् ।।६।।
जीवान्वयं प्रतिदिशं प्रचरंतईश संसारिणो भुवि नमाम उताऽऽत्मपार्वम् ।।
संबोध्यभागवतधर्ममिहाऽऽगमोक्तं वन्दामहेऽखिलगुरूं भगवन्तमाद्यम् ।।७।।
यादक्त्वदीयवयुनं तनुधारिणां स्यात्ताद्दंनचान्यदिति वेदविदो वदन्ति ।।
श्रेयस्करं दिवि भुवीश तथा रसायां वन्दामहेऽखिलगुरूं भगवन्तमाद्यम् ।।८।।

*।। इति हरिप्रसादानन्दवर्णिविरचितं उन्मत्तगांगाष्टकं सम्पूर्णम् ।।*

## १८६ • ।। शिखरिणीवृत्तम् ।।

तपोऽदभ्रं तप्तं विजनविपिने किंच मयका श्रुतिश्चाधीता किं गुरूनिकटवासेन बटुना ।।
समर्च्चाभून्नरतेत्रिदशमुनिगीतेन विधिना कृता सम्यच्छ्रद्धायुतनियमना किं बहुतिथम् ।।१।।
द्विजा भक्त्या भोज्यैर्बहुविधरसैः किं नु सुहिताः कृता आम्नायानामधिजगति वेत्तारउत वा ।।
प्रणीता मीमांसा किमुतसुकृतस्योद्भवकारी गता हिंसावृर्तिर्नियमितवचोदेहमनसा ।।२।।
कृतं कन्यादानं निगमविधिना चाग्रजनुषे द्विजार्हः संस्कारोऽवनिसुरसुतेभ्यो नु मयका ।।
अहो संन्यासित्वं समधिगतमत्यन्तसुखदं प्रदत्ता गावः कि श्रुतिनिकरविद्भ्योऽत्र बहुलाः ।।३।।
कया संपत्त्या मे विपुलसुकृतिन्याऽत्र भवतः पदाम्भोजस्याप्तिर्भवति भगवन्वेद्मि नहि ताम् ।।
ऋते कारूण्यं ते जगति तव पदाम्बुरूहयोर्गतौ नान्यहेतुः प्रचुरसुयशाश्चिन्तय इति ।।४।।

यदा पुण्यव्रातो बहुलजनिषूपार्जित उत तदांघ्रि ते भक्त्या भजति मनुजो नान्य इह वा ॥
इदानीं कारूण्यादगणितनराः पुण्यधिषणा विदूरे दुःशीलं जहति विषयं दुःखजनकम् ॥५॥
कृतार्थित्वं यातोऽहमिह निजसंबंधिभिरहो रमासेव्यं पादं सुमतमनुपश्यामि भविकम् ॥
यदर्चां कुर्वन्ति प्रततधिषणा मुक्तनिकरास्तदेकाऽऽधारा वै क्षपितविषयाः कष्टशमनाः ॥६॥
मम प्राचीनं त्वं सफलय मनोवांच्छिततरूं प्रफुल्लं त्वात्पार्श्वे सुमतिविटपव्रातनिभृतम् ॥
समाम्नायार्थालिध्वनितमनिशं बोधविततममुष्यव्युष्टिं ये ह्यधिजगति भक्षेयुरनघाः ॥७॥
खिलप्राचीनार्थस्यजनुरिहपूर्त्यां उपयता स्वधीता मे विद्या तव चरणयोः प्रीतिजनका ॥
नवाकांक्षे भूमन्विषयविषपानंक्वचिदहं चरामि त्वद्भक्तैः प्रतिदिनमिहामुत्र मुनिभिः ॥८॥

*॥ इति श्रीहरिप्रसादानन्दवर्णिविरचितं उन्मत्तगंगाष्टकं सम्पूर्णम् ॥*

## १८७ ● ॥ शार्दूलविक्रीडितं वृत्तम् ॥

स्वस्ति श्रीमदनेकसद्गुणगणैर्नित्यं महासिद्धिभिर्नानाशक्तिभिरप्युपाश्रितपदं सद्भक्तलक्षैर्नुतम् ॥
स्वेच्छाविष्कृतमानुषाकृतिमहं श्रीस्वामिनं सद्गुरूं मुक्तानन्दमुनिर्भुजंगनगरानन्दं नमामीश्वरम् ॥१॥
अत्र त्वत्कृपयैव लोजनगरे नस्त्वत्पदाब्जात्मानां भक्तानां परिवर्त्तिसौख्यमथतल्लेख्यं च यौष्माककम् ॥
आज्ञायां तवसर्व एव हि वयं वर्त्तामहेऽत्र प्रभो पत्रप्रेषणकारणं भवति यत्तच्छ्रव्यमेवादरात् ॥२॥

॥ स्वागता वृत्तम् ॥

अत्र कश्चन महामुनिवर्यः संगतोऽस्ति खलु कोसलदेशात् ।

वर्त्तते धमनिसन्ततदेहो मूर्तिमत्तपइवोत्तमकान्तिः ॥३॥

नीलकण्ठ इति स प्रथिताख्यो नीलकण्ठसमभूरिविरक्तिः ।

निलकण्ठसखवत्सकलार्थ्यो नीलकण्ठरिपुदर्पहरेक्षः ॥४॥

वर्णिवेषधर एष महात्मा ब्रह्मरूपसततस्थितिमाप्तः ।

निर्निमेषनयनः स्थिरगात्रो निष्परिग्रह उदारमतिश्च ॥५॥

प्राप्त एष च किशोरवयोन्तं पुण्यतीर्थपरिशीलनदक्षः ।

सूक्ष्मवक्रलघुमंजुकेशः स्पष्टकोमलमनोहरवाक्च ॥६॥

स्त्रैणगन्धमपि सोढुमशक्तो मानमत्सरविवर्जितचित्तः ।

नस्पृहां हृदि तु कस्यचिदेष कृष्णमेकमपहाय करोति ॥७॥

जीर्णवल्कलमृगाजिनवासा मालिकाकर ऋजुक्रिय एषः ।

शिक्षयन्नपिमुनीन्मुनिधर्माञ्छिष्यतां भजति नोऽत्र मुनीनाम् ॥८॥

किञ्चिदन्नमरसं क्वचभुंक्ते क्वापि किंचनफलं च दलं वा ।

नीरमात्रमपिच क्वच पीत्वा वर्त्तते क्वचन वायुमशित्वा ॥९॥

भैक्ष्यभुंक्षतिचिदेष दिनानि क्वपि कर्हिचिदयाचितवृत्तिः ।
नक्तभुंक्च तृतीयदिनाशी दुश्चरं चरति कर्म मनुष्यैः ॥१०॥
अस्य वास ऋतुषु द्रुममूले षट्स्वपि ध्रुवमभीष्टतरोऽस्ति ।
एष सौधवसतिं तु निजान्तर्वेत्ति बन्दि भुवनेन समानाम् ॥११॥
ग्रीष्म एष उरूधाग्निनिषेवीस्थण्डिले स्वपिति चाम्बुदकाले ।
शैशिरे शिशिरतोयनिवासाच्छोपपयत्यविरतं निजदेहम् ॥१२॥
बालखेलोचितं क्व वयो वा दुर्लभा क्वच सुसिद्धदशा वा ।
वीक्ष्य तत् द्वयमपि ध्रुवमस्मिन्संशया बहुविधा हि भवन्ति ॥१३॥
अस्य निर्मलतपोमयधाम्नि ह्यस्मदुग्रतपसां रूचयस्तु ।
व्योममध्यगतभास्करदीप्तौ दीपकान्तिसमतामुपयान्ति ॥१४॥
वेत्ति यः सकलयोगकला वा सोऽपि शिष्यपदवीं भजतेऽस्म ।
कौशलं किमपि नरोऽस्मै नैव दर्शयितुमात्मन ईष्टे ॥१५॥
शास्त्रजालकमनेन कियद्वा सद्गुरोरधिमगतं भवतीति ।
निश्चयं तु विदधीत पुमान् यः सोऽत्र कश्चन न भाति पुरे वै ॥१६॥
प्रश्नमल्पमपि कुर्वति चास्मिन्कुण्ठिता इव धियो विदुषां वै ।

क्षीणतर्कततयः प्रतिवादे शून्यभावमुपयान्ति सभायाम् ॥१७॥
संशयं कमपि शास्त्रविदापि पृष्ठ एव झटिति त्वमिवैषः ।
युक्तियुग्मबहुविधोत्तरदानैरेष किंप्रभुरिति भ्रमकृन्नः ॥१८॥
ध्यानमास्थितवतां च मुनीनां सुस्थिरासनदृढस्थितिभाजाम् ।
मानसं बहिरितः क्वच निर्यद्वेत्त्यसाविव निजान्तरसाक्षी ॥१९॥
तीक्षणदुर्जनवचःशरवृन्दैर्भिद्यते न हृदयं किल चास्य ।
संवृतं दृढतरक्षमयातद्वज्रसारसमतामुपयाति ॥२०॥
अन्यदुःखलवदर्शनमात्रात्तत्क्षणे द्रवत एव हृदोऽस्य ।
मार्द्दवस्य कणिका किमु लेभे पद्मकोश नवनीत शिरिपैः ॥२१॥
साधुता तु निखिला निजदष्ट्या वीक्ष्यते मुनिवरेऽत्रयथा वै ।
न श्रुता खलु तथा क्वचनर्षौ त्वां विहायजनतागुरूमेकम् ॥२२॥
एतदीयचरितं निखिलं वैवीक्ष्य चेतसि ममेत्यपि भाति ।
अस्मदीयमतिदार्ढ्यपरीक्षां कर्त्तुमागत इहास्ति भवान्किम् ॥२३॥
दर्शनोत्सुकमनास्तवचासावुद्यतोपि समयानिषिषेधे ।
प्रेषये यतमहं तव पार्श्वे साम्प्रतं किमु न वेत्ति तु लेख्यम् ॥२४॥

इत्येतत्सूचनाहेतोः पत्रमेतद्यथामति । लिखितं तद्विलोक्यैव प्रेष्यं शीघ्रं तदुत्तरम् ॥२५॥
सुज्ञेषु बहुना किंस्याल्लेखनेन ततः प्रभो । एतावदेव लिखितं कृपा कार्या सदा मयि ॥२६॥

*॥ इति मुक्तानन्दमुनिलिखितपत्री समपूर्णा ॥*

## १८८ • ॥ शार्दुलविक्रीडितं वृत्तम् ॥

श्रीवृत्तालयसन्निधौ कलिमलप्रध्वंसिनी संस्थितासद्भक्तैरमितैः प्रसन्नवदनैः स्नानात्सह श्रीहरेः ॥
सर्वेशस्य गृहितमानवतनोर्नानाविधैर्विभ्रमैर्वन्द्येशैरिहगोमती क्षितितले वर्वर्त्ति सर्वोपरि ॥१॥
सोपानैरूचिरावताररचितै रम्यैः श्रियं बिभ्रतीं कीर्तिर्यामवगाहते वृषजनेर्नारायणस्योज्वला ॥
हंसीव प्रतिवासरं भगवतो धर्मान्वयं रक्षतो वन्द्येशैरिह गोमती क्षितितले वर्वर्त्ति सर्वोपरि ॥२॥
यत्रस्नानकृतां भवत्यतुलितं पुण्यं जनानां सदा पूर्वेषां द्युसदां च यज्जलकृतात्तृप्तिभृर्शं तर्पणात् ॥
यत्तीरेविहितैस्तपोवृतजपैः सिद्धिर्मनोवांच्छिता वन्द्येशैरिह गोमती क्षितितले वर्वर्त्ति सर्वोपरि ॥३॥
स्नानादप्युरूजन्मजात दुरितव्रतो व्रजत्यस्ततां यस्यां भास्वरसूनुकिंकमहात्रासावमुक्तिर्ध्रुवम् ॥
शुद्धान्तः करणैर्मुनीन्द्रनिकरैर्यासेविता सर्वदा वन्द्येशैरिह गोमती क्षितितले वर्वर्त्ति सर्वोपरि ॥४॥
आम्रैर्दाडिम नालिकेरपनसैराम्रातकैरागमै रम्भाद्यैः फलभारनम्रविटपैर्मन्दारवृन्दैर्युतैः ॥
या रम्योपवनैः कदम्बतिलकैः संराजते स र्वदा वन्द्येशैरिह गोमती क्षितितले वर्वर्त्ति सर्वोपरि ॥५॥
निर्धौतैरभिषेकतश्च तिलकैः काश्मीरचन्द्रैः सतां वर्ण मात्यरूणं वलक्षसलिलैर्या पिंगलं बिभ्रती ॥

चैलक्षालनतो यति व्रति सतां काषायरागंभृशं वन्द्येशैरिह गोमती क्षितितले वर्वर्त्ति सर्वोपरि ॥६॥
नीपैश्चन्दन पारिजात बकुलैराम्रवज्रैः केतकैः शालैर्मंजुल वंजुलैः कुरवकैः पुन्नागचाम्पेयकैः ॥
वृक्षैर्या फलमाल्यभारविनतैस्तीरस्थितै राजिता वन्द्येशैरिह गोमती क्षितितले वर्वर्त्ति सर्वोपरि ॥७॥
आयान्तं समधिष्ठितं गतिवरां माणिक्यवर्णां वृतं वाहां चारूविभूषणाम्बधरं श्रीस्वामिनारायणम् ॥
भक्तैराह्वयतीव यासुललितैः स्नानाय पक्षिस्वनैं वन्द्येशैरिह गोमती क्षितितले वर्वर्त्ति सर्वोपरि ॥८॥
श्रीनारायणमाह्वन्त इव तं वातेरितैः पल्लवैः सेवन्ते तरूजन्महेतुदुरितव्रातक्षयाय द्रुमाः ॥
छाट्टयाभिर्निखिलेश्वरं भवहरं यत्तीरदेशोद्भवा वन्द्येशैरिह गोमती क्षितितले वर्वर्त्ति सर्वोपरि ॥९॥
पीतंचेदपिदूरसंस्थितजनैर्यस्याः पयः पावनं देहान्ते शमनानुगव्रजभयात्तीव्राद्विमुक्तैर्द्रुतम् ॥
लभ्या यज्ञतपोव्रतैः सुविहितैः द्यौरंजसा प्राप्यते वन्द्येशैरिह गोमती क्षितितले वर्वर्त्ति सर्वोपरि ॥१०॥
श्रीमद्भक्तिवृषात्मजस्य सहजानन्दस्य संतुष्टये साधूनां विमलात्मनां भगवतस्याश्रितानां हरेः ॥
कृष्णानन्दसंमाद्वयेन रचितं सन्मंगलं वर्णिना गोमत्यस्तवनं शुभं वितनुतां वा श्रृण्वतां गायताम् ॥११॥

*॥ इत्यचिन्त्यानन्दवर्णिविरचितं गोमतीमाहात्म्यस्तोत्रम् समाप्तम् ॥*

## १८९ ● ॥ अनुष्टप्च्छन्दः ।

नमस्त आंजनेयाय वायुपुत्राय धीमते । रामदूताय महते सुग्रीवसचिवाय च ॥१॥
नमोस्तु ते महावीर महाबलपराक्रम । वैरि भीषणरूपाय रावणत्रासदायिने ॥२॥

नमो हरावताराय शिलावृक्षयुधाय च । रक्षः सैन्यविमर्दाय नमस्तुभ्यं यशस्विने ॥३॥
नमो हनुमते तुभ्यं लंकानगरदाहिने । दशग्रीवसुतघ्नाय सीताशोकविनाशिने ॥४॥
नमोस्तु ते महायोगिन्सदाशुद्धान्तरात्मने । सीतारामातिहृद्याय नमस्ते चिरजीविने ॥५॥
नमः कपीन्द्र ते नित्यं सर्वरोगविनाशिने । भूतप्रेतपिशाचादि भयविद्रावणाभिध ॥६॥
नमस्तुभ्यं रामभद्र पुरूप्रेष्ठाय भूयसे । नमोऽतिस्थूलरूपाय सूक्ष्मरूपधराय च ॥७॥
नमोऽखिलभयघ्नाय निर्भयाय महात्मने । बालार्कद्युतिदेहाय मुष्टिप्रहरणाय च ॥८॥
नमो लंकेश्वरोद्यानभंगवित्रासिताऽऽप । रामनामानुर्क्ताय लक्ष्मणप्राणदाय ते ॥९॥
नमस्ते विश्वन्द्याय विजयाय वरीयसे । भक्तसंकष्टसंहर्त्रे धर्मनिष्ठाय जिष्णवे ॥१०॥
नमो नैष्ठिकवर्याय विजनारण्यवासिने । भक्ताभीष्ट दात्रे च पाण्डवप्रियकारिणे ॥११॥
नमो धर्मारिनाशाय विमलाय च भास्वते । नित्यं रामायणकथाश्रवमोत्सुकचेतसे ॥१२॥
नमो धार्मिकसेव्याय ब्रह्मण्याय सुरार्चित । तुभ्यं बृहद्व्रतप्रेष्ठ सर्वपापापहारिणे ॥१३॥
नमो दारिर्द्यदुःखघ्न मारूते बन्धखण्डन । सुखदायशरण्याय नमस्ते ऋषिवृत्तये ॥१४॥
नमो वरद ते नित्यं रामध्यानाद्यनाकुल । सुखाराध्य दुराराध्य नमस्ते दिव्यरूपिणे ॥१५॥
नमोऽर्कसूनहाराय तुभ्यं मामभयं कुरू । दर्शनं देहि साक्षात्ते नमस्ते सर्वदर्शिने ॥१६॥

*॥ इति श्रीशतानन्दमुनिविरचितं हनुमत्स्तोत्रं सम्पूर्णम् ॥*

## १९० ● ॥ स्त्रग्धरावृत्तम् ॥

अथ राजयोगसंसिद्धीकृत सदग्रगण्य श्रीसद्गुरू गोपालानन्दमुनिगुणैश्वर्यवर्णनात्मकस्तोत्रं लिख्यते.

श्रीमद्धार्मांगजातांघ्रिकमलयुगले भृंगराजं मनोज्ञं वैराग्योत्कृष्टवेगोज्झितविषयविषाम्भोधिमिथ्यानुरागम् ॥
स्वान्तर्बाह्ये च नित्यं वृषकुलजलजाहस्करं वीक्ष्यमाणं गोपालानन्दसंज्ञं मुनिवरमनघं योगिराजं नमामि ॥१॥
साष्टांगं योगमार्गं तदनुगतकलाः शीलयन्तं समग्राः शान्ताकारं सुबोधं सकलगुणनिधिं ब्रह्मनिष्ठं शरण्यम् ॥
संसारध्वन्तहारं मदनमदहरं निर्मलं निष्कलंकं गोपालानन्दसंज्ञं मुनिवरमनघं योगिराजं नमामि ॥२॥
योगाभ्यासश्रमोणोर्जितधमनिचयव्याप्तगात्रं प्रसन्नं फुल्लाम्भोजन्मनेत्रं सुललितवदनं गौरवर्णं प्रशान्तम् ॥
आजानूद्दामराजद्भुजयुगलमशेषात्मबन्धुं महान्तं गोपालानन्दसंज्ञं मुनिवरमनघं योगिराजं नमामि ॥३॥
मुद्रापुण्ड्रोपवीतं वृषतनुजमनुस्रग्धरं कार्तिशसालं लंकेशत्रासकारार्पितसकलवरात्मीयसामर्थ्यजालम् ॥
वातापत्यप्रतिष्ठासुखितपरमसारंगपुर्याप्तराजं गोपालानन्दसंज्ञं मुनिवरमनघं योगिराजं नमामि ॥४॥
गोपालं सिद्धराजं विशदगुणगणैः सर्वथोल्लंघयन्तं गोपालं वासुदेवं विमलनिजमनोभूमिकायां स्मरन्तम् ॥
गोपालं कार्ष्णिबन्धुं तदभिलषितकामेन संहर्षयन्तं गोपालानन्दसंज्ञं मुनिवरमनघं योगिराजं नमामि ॥५॥
आदेशं धर्मसूनोरनवरतमतिश्रद्धया पालयन्तं तन्द्राहीनं निरीहं भवदवदहनाद्दग्धजीवार्तिहारम् ॥
सद्वृन्दैः पूज्यमानं परगुणमणुमप्युन्नतं मन्यमानं गोपालानन्दसंज्ञं मुनिवरमनघं योगिराजं नमामि ॥६॥
जीवानां तीव्रतापानुडुप इव सुधासारसूक्तैर्हरन्तं सर्वेषां चोपकारं विदधतमनिशं कायवांगमनसैर्वै ॥

दान्तं कान्तं नितान्तं परमसुखनिधिं सागरं साधुताया गोपालानन्दसंज्ञं मुनिवरमनघं योगिराजं नमामि ॥७॥
स्वेक्षामात्रेण पुंसामगणितजनिजं पातकं नाशयन्तं निर्वैरं निर्विकारं विरजमतिवरं सत्यसन्धं कवीन्द्रम् ॥
नित्यानन्दं दयार्द्रं सुखदमभयदं सर्वलोकाऽभिरामं गोपालानन्दसंज्ञं मुनिवरमनघं योगिराजं नमामि ॥८॥
निष्णातं वेदवेदांगनिगमशिरसां गोपनीयान्तरंगे तन्त्रज्ञं तर्कसूत्रस्मृतिविदमितिहासागमार्थाभिविज्ञम् ॥
जेतारं पण्डितानाममरगुरूसमं भाषणे भारतीनां गोपालानन्दसंज्ञं मुनिवरमनघं योगिराजं नमामि ॥९॥
सुज्ञानायैव लोके विरलमतिमतां भूरिकारूण्यतो यो गीताशारीरकब्रह्मकमुखविविधग्रन्थभाष्यानि चक्रे ॥
योगज्ञानेशसांख्याश्रितसुरसवरासेव्यसंदर्भमालं गोपालानन्दसंज्ञं मुनिवरमनघं योगिराजं नमामि ॥१०॥

॥ शार्दूलविक्रीडितं वृत्तम् ॥

काणादीं समजीगणच्च परमां यो भारतीं चाऽन्वशाद्व्यासस्यैवमरंस्त तन्त्रनिवहे चागागरीत्पान्नगे ॥
दृक्पादीयगिरां रहस्यमखिलं लेभे पुरो गोविदां तं गोपालमुनिं मुदा मनसि मे संचिन्तयाम्यन्वहम् ॥११॥
यत्कारूण्यसुधालवादधिगता विद्याः समस्ता मयायत्पादाम्बुजसेवयाऽधिगतवान्भावं परं ब्रह्मणि ॥
यस्यानुग्रहसुप्लवोऽहमतरत्संसारवारान्निधिं तं गोपालमुनिं गतोऽस्मि शरणं योगीश्वरं सद्गुरूम् ॥१२॥

॥ बहिर्लापिकेयम् ॥

धत्ते किं निजमस्तकैः फणधरः को मेदिनीवल्लभोदण्डः कीदृश आग्रजन्मविहितः को नीलकण्ठाहितः ॥
उत्फूल्लाम्बुजयामिनीश्वरशशिभ्यां चोपमीयते किं मत्पृच्छाप्रतिवाक्यमध्यमपदं तस्मै नमः स्वामिने ॥१३॥

॥ मालिनीवृत्तम् ॥

कलिकलुषविदारं तापसंतापहारं भवभयलयकारं स्तोत्रसंदोहसारम् ॥
घनतिमिरनिवारं शोकमोहादिमारं स्तवनमिदमुदारं वर्णिनिष्कामगीतम् ॥१४॥

*॥ इति निष्कामानन्दवर्णिविरचितं गोपालानन्दमुनिगुणवर्णनाष्टकं स्तोत्रं सम्पूर्णम् ॥*

## १९१ ● ॥ अथ गोमतीमहिमाष्टपदी प्रारम्भः ॥

श्रीहरेर्वल्लभां सर्वार्थादुर्ल्लभां मुक्तवृन्दाश्रितां देवदेवेडिताम् ॥
सद्व्रजैर्मण्डितां दैविजीवेप्सितां तीर्थमात्रेश्वरीं त्वां नुमोगोमतीम् ॥१॥

सेविनां स्वां सदा मुक्तिमाशुप्रदामुत्तमां सर्वतः क्षेत्रतस्तीर्थतः ॥
याम्यदूतैः कदा नेक्षितां शर्मदां तीर्थमात्रेश्वरीं त्वांनुमोगोमतीम॥२॥

पापतापौघहां शर्ममात्रवहां स्वच्छमीष्टोदकामान्तरक्षालकाम् ॥
चारूकान्तिप्रदां निर्भरं तृप्तिदां तीर्थमात्रेश्वरीं त्वां नुमोगोमतीम् ॥३॥

देहिनां दर्शनाच्चात्मनः सेवनात्पापसंहारिणिं संसृतेस्तारिणीम् ॥
वासनाक्षालिनीं ब्रह्मणोलाडिनीं तीर्थमात्रेश्वरीं त्वांनुमोगोमतीम् ॥४॥

घोरतिष्पोद्भवं दुःखभीत्यर्णवं दुष्कृतं घातुकीं शुद्धताप्रापिकाम् ॥
मोक्षबुद्धीरिणीं शर्मकृत्तीरिणीं तीर्थमात्रेश्वरीं त्वां नुमोगोमतीम ॥५॥

अन्यतीर्थव्रजैः सर्वशः स्वर्गजैर्नाशितुं चाक्षमां खातवज्रोपमाम् ॥
पापपुंजाटवीं दाहितुं पाटवीं तीर्थमात्रेश्वरीं त्वां नुमो गोमतीम् ॥६॥
पापिनां पातकैः प्राप्तसंतापकैः सर्वतः संहतैर्लोकमात्रऽऽनतैः ॥
शुद्धतालब्धये नोऽर्चितां प्रीतये तीर्थमात्रेश्वरीं त्वां नुमोगोमतीम् ॥७॥
भक्तवत्क्रोद्दतैश्चावतारिप्रभोः स्वामिनारायणाद्यैरूदाराद्वयैः ॥
नादितां सर्वदा नैव शून्यां कदा तीर्थमात्रेश्वरीं त्वां नुमोगोमतीम ॥८॥

*॥ इति श्रीअखण्डानन्दवर्णिविरचिता श्रीगोमतीमहिमाष्टपदी सम्पूर्णा ॥*

## १९२ • ॥ शार्दूलविक्रीडितं वृत्तम् ॥

कृष्णात्प्रार्थय मेदिनीं धनपतेर्बीजं बलाल्लांगलं पित्रीशान्महिषं तवास्ति वृषभः फलं त्रिशूलादपि ॥
शक्ताऽहं तव चांबुपानकरणे स्कदश्च गोरक्षणे दग्धाऽहं हर भिक्षया कुरू कृषिं गौरीवचः पातु वः ॥१॥
भिक्षुः क्वास्ति बलेर्मखे पशुपतिः क्वास्ति चेद्गोकुले क्वास्ते पन्नगभूषणः सखि सदा शेते हि तस्योपरि ॥
मुग्धे मुंज विषादमाशु कमले नाहं प्रकृत्या चला चेत्थं सिंधुसुतागिरीशसुतयोः संभाषणं पातुः वः ॥२॥
आखुर्वाच्छति भस्मसूत्रवसनं व्यालस्तथा भूखनं व्यालेबर्हिभयं वृषे हरिभयं गंगाऽगजाभीस्तथा ॥
वासोभोजनहीनदीनभवनं दुष्टैश्च संमेलनं भव्यं मे भगवन्कुतः प्रतिदिनं दैव शरण्यं मम ॥३॥

अत्तुं वांच्छति वाहनं गणपतेराखुं क्षुधार्त्तः फणी तं च क्रौंचपतेः शिखीच गिरिजासिंहोपि नागाननं ॥
गौरी जह्नुसुतामसूयतिकलानाथं कपालानलो निर्विण्णः स पपौ कुटुंबकलहादीशोऽपि हालाहलम् ॥४॥
विष्णोश्चागमनं निशम्य सहसा कृत्वा फणीन्द्रं गुणं कौपीनं परिधायचर्म करिणः शम्भुः पुरो धावति ॥
दृष्ट्वा विष्णुरथं सकम्पहृदयः सर्पोऽपतद्भूतले कृत्तिर्विस्खलिता हिया नतसुखो नग्नो हरः पातु वः ॥५॥

*॥ इति शंकरविनेदपंचकं सम्पूर्णम् ॥*

## १९३ ● ॥ भीष्मस्तुति। पुष्पिताग्रावृत्तम् ॥

इति मतिरूपकल्पिता वितृष्णा भगवति सात्वतपुंगवे विभूम्नि ।
स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥१॥
त्रिभुवनकमनं तमालवर्णं रविकरगौरवराम्बरं दधाने ।
वपुरऽलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्याः ॥२॥
युधि तुरगरजोविधूम्रविष्वक्वचलुलितश्रमवार्यलंकृतास्ये ।
मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा ॥३॥
सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य ।
स्थितवति परसैनिकायुरक्ष्णा हृतवति पारथसखे रतिर्ममास्तु ॥४॥

व्यवहितपृतनामुखं निरीक्ष्य स्वजनवधाद्विमुखस्य दोषबुद्ध्या ।
कुमतिमहरदात्मविद्यया यश्चरणरतिः परमस्य तस्यमेऽस्तु ॥५॥
स्वनिगममपहाय मत्प्रतिज्ञामृतमधिकर्तुमवप्लुतो रथस्थः ।
धृतरथचरणोऽभ्ययाच्चलद्‌गुर्हरिरिव हन्तुमिभं गतोत्तरीयः ॥६॥
शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे ।
प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान्गतिर्मुकुन्दः ॥७॥
विजयरथकुटुम्ब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये ।
भगवति रतिरस्तु मे मुमूर्षोर्यमिह निरीक्ष्य हता गताः स्वरूपम् ॥८॥
ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरूमानाः ।
कृतमनुकृतवत्य उन्मदान्धाः प्रकृतिमगन् किल यस्यगोपवध्वः ॥९॥
मुनिगणनृपवर्यसंकुलेऽन्तः सदसियुधिष्ठिरराजसूय एषाम् ।
अर्हणमुपपेद ईक्षणीयो मम दृशिगोचर एष आविरात्मा ॥१०॥
तमिममहमजंशरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानाम् ।
प्रतिदृशमिव नैकधार्कमेकं समधिगतोऽस्मि विधूतभेदमोहः ॥११॥

*॥ इति भीष्मकृतास्तुतिः सम्पूर्णा ॥*

## १९४ • ॥ स्वगतावृत्तम् ॥

वामबाहुकृतवामकपोलो वल्गितभ्रुरधरार्पितवेणुम् । कोमलांगुलिभिराश्रितमार्गं गोप्य ईरयति यत्र मुकुन्दः ॥१॥
व्योमयानवनिताः सह सिद्धैर्विस्मितास्तदुपधार्य सलज्जाः । काममार्गेणसमर्पिताचित्ताः कश्मलं ययुरपस्मृतनीव्यः ॥२॥
हन्त चित्रमवलाः श्रृणुतेदं हारहास उरसि स्थिरविद्युत् । नन्दसूनुरयमार्त्तजनानां नर्मदो यर्हि कूजितवेणुः ॥३॥
वृन्दशोव्रजवृषा मृगगावो वेणुवाद्यहृतचेतसः आरात् । दन्तदष्टकवला धृतकर्णा निद्रिता लिखितचित्रमिवासन् ॥४॥
बर्हिणस्तवकधातुपलाशैर्बद्धमल्लपरिबर्हविडम्बः । कर्हिचित् सबल आलि सगोपैर्गाः समाह्वयति यत्र मुकुन्दः ॥५॥
तर्हि भग्नगतयः सरितो वै तत्पदाम्बुजरतोऽनिलनीतम् । स्पृहयतीर्वयमिवाबहुपुण्याः प्रेमवेपितभुजाः स्तिमितापः ॥६॥
अनुचरैः समनुवर्णितवीर्य आदिपूरूष इवाचलभूतिः । वनचरो गिरितटेषु चरन्तीर्वेणुनाऽऽह्वयति गाः स यदा हि ॥७॥
वनलतास्तरव आत्मनि विष्णुं व्यंजयन्त्य इव पुष्पफलाढ्याः । प्रणतभारविटपा मधुधाराः प्रेमहृष्टतनवः ससृजुः स्म ॥८॥
दर्शनीयतिलको वनमालादिव्यगन्धतुलसीमधुमत्तैः । अलिकुलैरलघु गीतमभीष्टमाद्रियन्  यर्हि संधितवेणुः ॥९॥
सरसि सारसहंसविहंगाश्चारूगीतहृतचेतस एत्य । हरिमुपासत ते यतचित्ताहन्त मीलितदृशो धृतमौनाः ॥१०॥
सहबलः स्रगवतं सविलासः सानुषु क्षितिभृतो व्रजदेव्यः । हर्षयन् यर्हिवेणुरवेण जातहर्ष उपरम्भितविश्वम् ॥११॥
महदतिक्रमणशंकितचेता मन्दमन्दमनुगर्जति मेघः । सुहृदमभ्यवर्षत् सुमनोभिश्छाययया च विदधत् प्रतपत्रम् ॥१२॥
विविधगोपचरणेषु विदग्धो वेणुवाद्य उरूधा निजशिक्षाः । तव सुतः सति यदाऽधरबिम्बे दत्तवेणुरनयत् स्वरजातीः ॥१३॥
सवनशस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः । कवय आनतकंधरचित्ताः कश्मलं ययुरनिश्चिततत्त्वाः ॥१४॥

निजपदाब्जदलैर्ध्वजवज्रनीरजांकुशविचित्रललामैः । व्रजभुवः शमयन् खुरतोदं वर्ष्मधुर्यगतिरीडितवेणुः ॥१५॥
व्रजति ते न वयं सविलासवीक्षणार्पितमनोभववेगाः । कुजगतिगमिता न विदामः कश्मलेन वसनं कवरं वा ॥१६॥
मणिधरः क्वचिदागणयन् गा मालया दयितगन्धतुलस्याः । प्रणयिनोऽनुचरस्य कदांसे प्रक्षिपन् भुजमगायत यत्र ॥१७॥
क्वणितवेणुरववंचित्ताः कृष्णमन्वयसत कृष्णगृहिण्यः । गुणगणार्णमनुगत्य हरिण्यो गोपिका इव विमुक्तगृहाशाः ॥१८॥
कुन्ददामकृतकौतुकवेषो गोपगोधनवृतो यमुनायाम् । नन्दसूनुरनघे तव वत्सोनर्मदः प्रणयिनां विजहार ॥१९॥
मन्दवायुरूपवात्यनुकूलं मानयन्मलयजस्पर्शेन । बन्दिनस्तमुपदेवगणा ये वाद्यगीतबलिभिः परिवव्रुः ॥२०॥
वत्सलोव्रजगवां यदगध्रो वन्द्यमानचरणः पथि वृद्धैः । कृत्स्नगोधनमुपोह्य दिनान्ते गीतवेणुरनुगेडितकीर्त्तिः ॥२१॥
उत्सवं स्मररूजास्तद्दशीनामुन्नयन् खुररजश्छुरितस्रक । दित्सयैति सुहृदाशिष एष देवकीजठरभूरूडुराजः ॥२२॥
मदविघूर्णितलोचन ईषान्मानदः स्वसुहृदां वनमाली । बदरपाण्डुलदनो मृदु गण्डं मण्डयन्कनककुण्डललक्ष्म्या ॥२३॥
यदुपतिर्द्विरदराजविहारो यामिनीपतिरिवैष दिनान्ते । मूदितवक्र उपयाति दुरन्तं मोचयन् व्रजगवां दिनतापम् ॥२४॥

*॥ इति गोपीभिरूक्तं युगलगीतं सम्पूर्णम् ॥*

## १९५ ● ॥ वसन्ततिलकावृत्तम् ॥

अक्षण्वतां फलमिदं न परं विदामः सख्यः पशूननुविवेशयतोर्वयस्यैः ॥
वक्रं व्रजेशसुतयोरनुवेणु जुष्टं यैर्वा निपीतमनुरक्तकटाक्षमोक्षम् ॥१॥
चूतप्रवालबर्हस्तबकोत्पलाब्जमालानुपृक्तपरिधानविचित्रवेषौ ॥

मध्ये विरेजतुरलं पशुपालगोष्ठ्यां रंगे यथा नटवरौ क्व च गायमानौ ॥२॥
गोप्यः किमाचरदयं कुशलं स्म वेणुर्दामोदराधरसुधामपि गोपिकानाम् ॥
भुंक्तेस्वयं यदवशिष्टरसं ह्रदिन्यो हृष्यत्त्वचोऽश्रु मुमुचुस्तरवो यथाऽऽर्याः ॥३॥
वृन्दावनं सखि भुवो वितनोति कीर्त्तिं यद्देवकीसुतपदाम्बुजलब्धलक्ष्मि ॥
गोविन्दवेणुमनु मत्तमयूरनृत्यं प्रेक्ष्याद्रिसान्वपरतान्यसमस्तसत्त्वम् ॥४॥
धन्याः स्म मूढमतयोऽ हरिण्य एता या नन्दनन्दनमुपात्तविचित्रवेषम् ॥
आकर्ण्यवेणुरणितं सहकृष्णसाराः पूजां दधुर्विरचितां प्रणयावलोकैः ॥५॥
कृष्णं निरीक्ष्य वनितोत्सवचारूशीलं श्रुत्वा च तत्क्वणितवेणुविचित्रगीतम् ॥
देव्योविमानगतयः स्मरनुन्नसारा भ्रश्यत्प्रसूनकबरा मुमुहुर्विनीव्यः ॥६॥
गावश्च कृष्णमुखनिर्गतवेणुगीतपीयुषमुत्तभितकर्णपुटैः पिबन्त्यः ॥
शावा स्नुतस्तनपयः कवलाः स्म तस्थुर्गोविन्दमात्मनि दृशाश्रुकलाः स्पृशन्त्यः ॥७॥
प्रायो बताम्बविहगा मुनयो वनेऽस्मिन् कृष्णेक्षितं तदुदितं कलवेणुगीतम् ॥
आरूह्य ये द्रुमभुजान् रूचिरप्रवालान् श्रृण्वन्ति मीलितदृशो विगतान्यवाचः ॥८॥
नद्यस्तदा तदुपधार्य मुकुन्दगीतमावर्त्तलक्षितमनोभवभग्नवेगाः ॥
आलिंगनस्थगितमूर्मिभुजैर्मुरारेर्गृह्णन्ति पादयुगलं कमलोपहाराः ॥९॥

दृष्ट्वाऽऽतपे व्रजपशून् सहरामगोपैः संचारयन्तमनु वेणुमुदीरयन्तम् ॥
प्रेमप्रवृद्धः उदितः कुसुमावलीभिः सख्युर्व्यधात् स्ववपुषाम्बुदः आतपत्रम् ॥१०॥
पूर्णाः पुलिन्द्यः उरूगायपदाब्जरागश्रीकुंकुमेन दयितास्तनमण्डितेन ॥
तद्दर्शनस्मररूजस्तृणरूषितेन लिम्पन्त्य आननकुचेषु जहुस्तदाधिम् ॥११॥
हन्तायमद्रिरवला हरिदासवर्यो यद्रामकृष्णचरणस्पर्शप्रमोदः ॥
मानंतनोति सहगोगणयोस्तयोर्यत्पानीयसूयवसकन्दरकन्दमूलैः ॥१२॥
गा गोपकैरनुवनं नयतोरूदारवेणुस्वनैः कलपदैस्तनुभृत्सु सख्यः ॥
अस्पन्दनं गतिमतां पुलकस्तरूणां निर्योगपाशकृतलक्षणयोर्विचित्रम् ॥१३॥
इति वेणुरवंराजन् सर्वभूतमनोहरम् । श्रुत्वा व्रजस्त्रियः सर्वा वर्णयन्त्योऽभिरेमिरे ॥

*॥ इति गोपीभिरूक्तं वेणुगीतं सम्पूर्णम् ॥*

## १९६ ● ॥ मालिनीवृत्तम् ॥

मधुप कितवबन्धो मा स्पृशांघ्रिं सपत्न्याः कुचविलुलितमालाकुंकुमश्मश्रुभिर्नः ॥
वहतु मधुपतिस्तन्मानिनीनां प्रसादं यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक् ॥१॥
सकृदधरसुधां स्वां मोहिनीं पाययित्वासुमनस इव सद्यस्तत्यजेऽस्मान् भवादृक् ॥
परिचरति कथं तत्पादपद्मं नु पद्मा अपि बत हृतचेता ह्युत्तमश्लोकजल्पैः ॥२॥
किमिह बहु षडंघ्रे गायसि त्वं यदूनामधिपतिमगृहाणामग्रतो नः पुराणम् ॥

विजयसखसखीनां गीयतां तत्प्रसंगः क्षपितकुचरूजस्ते कल्पयन्तीष्टमिष्टाः ॥३॥
दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः कपटरूचिरहासभ्रूविजृम्भस्य याः स्युः ॥
चरणरज उपास्ते यस्य भूतिर्वयं का अपि च कृष्णपक्षे ह्युत्तमलोकशब्दः ॥४॥
विसृज शिरसिपादं वेद्म्यहं चाटुकारैरनुनयविदुषस्तेऽध्येत्य दौत्यैर्मुकुन्दात् ॥
स्वकृत इह विसृष्टाऽपत्यपत्यन्यलोका व्यसृजदकृतचेताः किं नु संधेयमस्मिन् ॥५॥
मृगयुरिवकपीन्द्रं विव्यधे लुब्धधर्मा स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम् ॥
बलिमपि बलिमत्त्वाऽवेष्टयद्धाध्वांक्षवद्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः ॥६॥
यदनुचरितलीलाकर्णपीयुषविप्रुट्सकृददनविधृतद्वन्द्वधर्मा विनष्टाः ॥
सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना बहव इव विहंगा भिक्षुचर्यां चरन्ति ॥७॥
वयमृतमिवजिह्मव्याहृतं श्रद्दधानाः कुलिकरूतमिवाज्ञाः कृष्णबध्वोहरिण्यः ॥
ददृशुरसकृदेतत्तन्नखस्पर्शतीव्रस्मररूज उपमन्विन् भण्यतामन्यवार्ता ॥८॥
प्रियसख पुनरागाः प्रेयसा प्रेषितः किं वरय किमनुरून्धे माननीयोऽसिमेंग ॥
नयसि कथमिहास्मान् दुस्त्यजद्वन्द्वपार्श्वं सततमुरसि सौम्य श्रीर्वधूः साकमास्ते ॥९॥
अपि बत मधुपुर्यामार्यपुत्रोऽधुनाऽऽस्ते स्मरति स पितृगेहान् सौम्य बन्धूंश्च गोपान् ॥
क्वचिदपि स कथां नः किंकरीणां गृणीते भुजमगुरूसुगन्धं मूर्ध्न्यधास्यत् कदानु ॥१०॥

*॥ इति गोपीभिरूक्तं भ्रमरगीतं सम्पूर्णम् ॥*

## १९७ ● ॥ दण्कच्छन्दः ॥ स्तुतिना श्लोको

प्रेमानन्दादयोमुनयऊचुः --

जयश्रीमहाराजमाराजसर्गादिकालस्वजाताज्वजातादिकात्मप्रजाजातजन्मादिदुःखापहृज्जन्मनैकेन्दुविद्यो-
तदोर्जद्युतिध्वंसितात्मीयहार्दांधकारादिदेवाद्य विद्युत्प्रभाभासवासस्सदानन्दगोविन्दसानन्द-
वन्दारूमन्दारपादारविन्दोत्तमक्षेमधामाक्षराध्यक्षलोके मुमुक्षायियक्षागमेक्षातितिक्षासमन्दाक्षता-
वर्जिताऽक्षीणविक्षोभणात्माक्ष्मपोषप्रसक्तातिरूक्षाक्षरालापदक्षोद्धतक्षुद्ररक्षोविपक्षक्षयोद्युक्तराधारमाम्भोज-
जन्मोक्षलक्ष्मार्चितऽतीक्ष्णवक्षः क्षमारक्षकर्त्यक्षभूभृद्वलक्षोत्तमश्लोक विष्णो वलक्षाख्यपक्षान्तनक्षत्र-
रक्षाकराभास्य दोषप्रशोष प्रकाशाश्रयाशेषशर्मेश शान्ताशयाशेषसिद्धेश सिद्धीश वृद्धीश बद्धोद्धरध्यान
नैकावताराधमोद्धारक श्रीहरे त्वं प्रसीद प्रभो दीनबंधो ॥१॥

॥ वसन्ततिलकावृत्तम् ॥

यः स्वेष्टदेवभगवत्यनुरक्तचेता ब्रह्मस्थितिह्यधिगतोऽतिविरक्तियुक्तः ॥
शान्तं सतां गुरूमुदारविशुद्धबोधं तं सुव्रतं मुनिमहं प्रणमाम्यजस्रम् ॥२॥

नानापद्यसुकाव्यशीघ्ररचनादक्षं स्वधर्मस्थिरं छन्दोभिः स्वकृतैर्हरिं वृषभुवं संप्रीणयामास यः ॥
मैत्रीं तेन गतं स्वनर्मवचनै संहासयन्तं स्थिरं ब्रह्मानन्दमुनिं नमामि तमहं देशाःद्यभिज्ञं मुदा ॥३॥

प्राप्तो वासमहर्निशं च सहजानन्दस्य यः सन्निधौ प्रीत्या तं संतोषयद्यतिपतिर्भक्त्यानुवृत्या भृशम् ॥
वैराग्योज्झितसर्वलोकविभवं चैकान्तधर्मप्रियं वन्दे तं विदुषां वरं शुकमुनिं शान्तस्वभावं सदा ॥४॥

॥ शिखरिणीवृत्तम् ॥

य ईशोऽपिस्वेच्छाधृतनृतनुरानन्दनिलयः कृपासिन्धुर्बन्धुर्भवजलनिधौ दुःखितनृणाम् ॥
सकामैर्निष्कामैरपि सुरनरैः सेव्यचरणं नमाम्यात्मात्मानं तमहमिह नारायणमुनिम् ॥५॥
महाध्यानाभ्यासं विदधतमजस्रं भगवतः पवित्रे संप्राप्तं स्थितिमतिवरैकान्तिकवृषे ॥
सदानन्दं सारं परमहरिवार्त्ताव्यसनिनं गुणातीतानन्दं मुनिवरमहं नौमि सततम् ॥६॥
अजस्रं संप्राप्तं परमसहजानन्दनिकटे स्थितिं तत्सेवायां निपुणमनवद्यं मतिमताम् ॥
सतां चाद्यं वन्दे सदयहृदयं नैष्ठिकवरं मुकुन्दानन्दाख्यं धृतशुभगुणाकल्पमनिशम् ॥७॥
उदारं निर्वैरं निगमगदिताचारनिरतं जितस्वान्तः शत्रुं पठितनिजविद्यं सुखकरम् ॥
अखण्डानन्दाख्यं वृषजहरिकृष्णस्मृतिपरं प्रशान्तं मुक्तेन्द्रं प्रतिदिनमहं नौमि सदयम् ॥८॥

॥ पंचचामरवृत्तम् ॥

स्वभक्तवृन्दपालिनं मणीन्द्रमाल्यमालिनं विमुक्तसंघशालिनं स्वशक्तियुक्तलालिनम् ॥
क्षमादयाधिमलिनं विनाशिताघजालिनं भवन्तमार्त्तिकन्दनं भजामि धर्मनन्दनम् ॥९॥

॥ स्त्रग्धरावृत्तम् ॥

रक्षन्वेदममन्दमन्दरगिरिं बिभ्रद्धरामाहरन्प्रल्हादं परिपालयन्बलिमनः क्षुभ्यन्क्षयन्क्षत्रियान् ॥
लंकेशान्तकरश्च कंसशमनः शान्तोऽसुरोन्मोहनो म्लेच्छोन्मूलनकारकस्तमनिशं श्रीनीलकण्ठं भजे ॥१०॥

प्राभूद्वार्ताप्रवाहो मितहरियशसां पापतापप्रणाशोदिव्यानां यन्मुखेन्दोरिव तु हिर्नागरेः पूर्णगंगाप्रवाहः ॥
तं निर्वेदातितुच्छईकृतसकलमहालोकभोगं पवित्रं मुक्तानन्दाभिधानं मुनिमनुदिवसं नौमि सद्वृंदमुख्यम् ॥११॥
वाक पीयुषाण्यजस्रं यतिपतिसहजानन्दसद्वत्क्रचन्द्रात्पीत्वा यो निःसृतानि श्रवणपुटगतान्यालिखत्पानानि ॥
नानाच्छन्दोभिरेव प्रतिदिनमुरूधासंजगौ तस्य कीर्तिं मुक्तानन्दं नमामि प्रियहितवचनं सुस्थिरैकान्तधर्मम् ॥१२॥
चक्रे नित्यं कथां यः प्रकटभगवतः सन्निधाने मनोज्ञां यस्मै प्रादात्प्रसन्नो निजधृतवसनादीन्यसौ पूर्णकामः ॥
जेता यः पण्डितानां जगति विवदतां देवताचार्यवक्ता नित्यानन्दं मुनीन्द्रं तमनुदिनमहं नौमि भक्तिप्रधानम् ॥१३॥
योगाभ्यासं नितान्तं कलितसुनिगमादिश्रुतार्थं कृतार्थं प्रीत्यै श्रीधर्मसूनोर्विदधतमनिशं स्वामिनारायणस्य ॥
गोपालानन्दसंज्ञं मुनिवरमनघं रक्षितेकान्तधर्मं वन्दे नित्यं शरण्यं प्रतिहृतजनताऽज्ञानसंज्ञान्धकारम् ॥१४॥

॥ पुष्पिताग्रावृत्तम् ॥

कुसुमितवनराजि शुष्मिभृंगद्विजकुलघुष्टसरः सरिन्महीध्रम् ।
मधुपतिरवगाह्य चारयन् गाः सहपशुपालबलश्चुकूज वेणुम् ॥१५॥
तद्व्रजस्त्रिय आश्रुत्य वेणुगीतं स्मरोदयम् । काश्चित् परोक्षं कृष्णस्य स्वसखीभ्योऽन्ववर्णयन् ॥१६॥
तद्वर्णयितुमारब्धाः स्मरन्त्यः कृष्णचेष्टितम् । नाशकन् स्मरवेगेन विक्षिप्तमनसोनृप ॥१७॥

॥ इन्द्रवज्रच्छच्दः ॥

भक्त्यानुवृत्या हरिकृष्णमीशं यस्तोषयामास विरक्तमूर्तिः ।
तद्भक्तिविघ्नप्रतिबोधदक्षं तं निष्कुलानन्दमहं नमामि ॥१८॥

धर्मात्मजश्रीहरिकृष्णभक्तौ जितेन्द्रयं तत्परमस्ततन्द्रिम् ।
नारायणानन्दमहं नमामि क्षमाधरं वर्णिवरं सुशीलम् ॥१९॥

॥ प्रहर्षणीयवृत्तम् ॥

आचार्यप्रवरमनेकशिष्यवर्गं शास्त्रोक्ते निजसुकृते प्रवर्तयन्तम् ।
सत्प्रज्ञं सुविततकीर्तिमार्यवन्द्यंवन्देऽहं प्रवरगुणंविहारिलालम् ॥२०॥
शास्त्रज्ञंवयुनविरक्तिभक्तियुक्तंसद्वन्द्यंमुकुटमणिं वृहद्व्रतानाम् ।
वन्देऽहं कविवरमत्र वासुदावानन्दाख्यं विनयदयाक्षमाद्युपेतम् ॥२१॥
तापत्रयोपशमनं प्रथितः प्रतापं कारूण्यपूर्णमखिलाश्रित जीवजातं ॥
आनन्दमूर्तिममलं सुखकारशिलं नारायणं गुरूवरं प्रणमाम्यहं त्वाम् ॥२२॥ जीवन
सततं निजमूर्तिचिन्तकानामधिक श्वेतमनोहरप्रकाशे ।
हृदि दर्शितरम्यदिव्यरूपं भगवन्तं तमहं हरिं नमामि ॥२३॥ जीवन १, २, १
मेघानां च घटाघटा घटघटा घाटाघटा घाट्यते वायूनां च चकीचकी चकचकी चाकीचकी चान्यते ॥
मामोकस्य मुकोमुको मुकमुको माकोमुको मामुको मासे भाद्रपदेशकर्दमपते गच्छन्ति ते शत्रवः ॥२४॥
श्रीमद्दूर्गपुराधिपस्य सदने स्वच्छे विशालांगणे प्रोत्तुंगेमणिरत्नहेमरचिते सिंहासने संस्थितः ॥
मुक्तानन्दमुकुन्दमुख्यमुनिभिर्भक्तैर्गृहस्थैरपि रेजे संपरिरिवेष्टितो हरिरजस्ताराभिरिन्दुर्यथा ॥२५॥

क्वाण्डं तिष्ठति वासुदेव गरलं चाक्ष्णां सहस्त्रं प्रभो जीह्वा व्यर्थतमा बलं हयमुखं तिक्ष्णप्रकाशोऽमृतम् ॥
अष्टावित्थमिमे कृता मुनिवरैः प्रश्नाः सभायां सहाष्टाभिस्तद्धरिणोत्तरं सुवचसा दत्तं हरावेकतः ॥२६॥

૧. સમગ્ર બ્રહ્માણ્ડમાં કોણ છો. ૨. મહાભંયકર ઝેર ક્યાં છે. ૩. હજાર આંખો કોને છે. ૪. કોની જીહ્વામાં બળ છે. ૫. બળવાન કોણ છે. ૬. ઘોડા જેવું મુખ કોનું છે. ૭. તીવ્ર તેજ કોનું છે. ૮. અમૃત ક્યાં છે. આ આઠ પ્રશ્નોના ઉત્તર એક જ શબ્દમાં હરિમાં મળે છે.

१ हरौ–भगवति २ हरौ – सर्पे ३ हरौ – इन्द्रे ४ हरौ – दर्दूरे ५ हरौ – सिंहे ६ हरौ हयग्रीवे ७ हरौ सूर्ये ८ हरौ चन्द्रे

॥ शार्दूलविक्रीडितं वृत्तम् ॥

को जिव्हाविषमो रविर्हरति किं शंभोधनुः किं च को दन्ताग्रे धृतवान धरां भजति को युद्धे धृतिं ज्याजवाम् ।
वेदाः सन्ति कुतः क्षमाभवति कः सीतापिता कोऽभवत्मत्प्रश्नोत्तरमध्यमाक्षरपदे भूयात् सतां मानसम् ॥२७॥

આ આઠ પ્રશ્નોના ઉત્તરના વચ્ચલા અક્ષરમાં સ્વામિનારાયણ પદે સત્પુરૂષોનું મન રહે છે.

१ आस्वादः २ तिमिरम् ३ पिनाक ४ वाराहः ५ सायकः ६ प्रणवात् ७ नृपतिः ८ विदेहः (मध्यम अक्षरे) ( स्वामिनरायणपदे)

कोऽस्त्याग्रे सुसखा क्व सन्ति हरिणाः कोस्त्याखुयानः सदा कः श्रुष्माणमृते दहत्यविरतं मारातुरान्विग्रहान् ।
कस्मिन्नातपति प्रकाममरूणः केनावृतं यज्जगत् मत्प्रश्नोत्तरमध्यमाक्षरपदेष्टार्थाय तस्मै नमः ॥२८॥

આ ૭ પ્રશ્નોના ઉત્તરના વચ્ચલા અક્ષરમાં જે સહજાનન્દાય પદને હું નમન કરું છું.

१ वासवः २ गहने ३ गजास्य ४ अनंगः ५ निदाधे ६ मायया: (मध्यम अक्षरे) (सहजानन्दाय)

आदौ रामतपोवनाभिगमनं हत्वा मृगं काञ्चनं वैदेहीहरणं जटायुमरणं सुग्रीवसम्भाषणम् ॥
वालीनिग्रहणं समुद्रतरणं लंकापुरीदाहनं पश्चाद्रावणकुम्भकर्णहननं चैतद्धि रामायणम् ॥२९॥
आदौ देवकिजन्मगर्भजननं गोपीगृहे वर्धनं मायापूतनजीवतापहननं गोवर्धनोद्धरणम् ॥
कंसच्छेदनकौरवादिहननं कुन्तीसुतापालनमेतद्भागवतं पुराणकथितं श्रीकृष्णलीलामृतम् ॥३०॥
आदौ पाण्डवधार्तराष्ट्रजननं लाक्षागृहे दाहनं द्यूतस्त्रीहरणं वने विहरणं मत्स्यालये वर्तनम् ।
लीलागोग्रहणं समुद्रतरणं सन्धिक्रियाजृम्भणं पश्चाद्भीष्मसुयोधनादिमरणं चेतन्महाभारतम् ॥३१॥
नत्वा सरस्वतीं देवीं शुद्ध्यां गुण्यां करोम्यहं । पाणिनीय प्रवेशाय लघुसिद्धान्त कौमुदिम् ॥३२॥
वागर्थौ विव संपृक्तौ वगर्थ प्रतिपत्तये । जगतःपितरौ वंन्दे पर्वतिपरमेश्वरौ ॥३३॥
ॐ मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः । यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥३४॥
रामायण

अखण्डमण्डालाकारं व्यप्तं येन चराचरम् । तत्पदं दर्शितं येन तस्मै श्रीगुरूवे नमः ॥३५॥
गुरूर्ब्रह्मा गुरूर्विष्णुर्गुरूर्देवो महेश्वरः । गुरूः साक्षात् परं ब्रह्म तस्मै श्रीगुरूवे नमः ॥३६॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया । चक्षुरून्मीलितं येन तस्मै श्रीगुरवे नमः ॥३७॥
सर्वमंगलमंगल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥३८॥
मुकं करोति वाचालं पंगुं लंघयते गिरिम् । यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥३९॥
अस्वस्थामा बलिर्व्यासो हनूमांश्च विभीषणः । कृपः परशुरामश्च सप्तैते चिरजीविनः ॥४०॥
नाहं वसामि वैकुण्ठे योगिनां हृदये न च । मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ॥ ४१॥

पद्मपुराण उ. ९४,२३

यं प्रव्रजन्तमनुपेतमपेतकृत्कृत्यं द्वैपायनो विरहकातर आजुहाव ॥
पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥४२॥

भ.१,२,२,

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ॥
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥४३॥
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सतस्वतीं ततो व्यासं जयमुदिरयेत् ॥४४॥
ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥४५॥
ॐ ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥४६॥

ईशोपनिषद

वसुदेवसुतं देवं कंसचाणूरमर्दनम् । देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरूम् ।।४७।।
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ।।४८।।
हरेर्नाम हरेर्नाम हरेर्नामैव केवलम् । कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ।।४९।।
प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्षमुच्यते । अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ।।५०।।
कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः । द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात ।।५१।।
श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।।५२।।
भा.७,५,२३
आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरूक्रमे । कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः ।।५३।।
भ.
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च । जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ।।५४।।
सच्चिदानन्दरूपाय विश्वोत्पत्त्यादिहेतवे । तापत्रयविनाशाय श्रीकृष्णाय वयं नुमः ।।५५।।

## १९८ • ॥ श्रीघनश्याम स्तुति

जय जय श्रीघनश्याम दया निधे ।
स्वामिनारायण भक्तपरायण, सहजानन्दसुखधाम ॥ जय जय.. ।।१।।
असुरनिकन्दन वृषकुलनन्दन, हृतनिजजनमदकाम ॥ जय जय.. ।।२।।

तापनिवारण मंगलकारण, तारण आत्माराम ।। जय जय.. ।।३।।
कलिबल कंदन पण्डितमंडन, खण्डन कृतधनवाम ।। जय जय.. ।।४।।
निजजनपालक दोष निवारक, याजक परम अकाम ।। जय जय.. ।।५।।
श्रितसुखदायक सज्जननायक, प्रेक्षक नयनाभिराम ।। जय जय... ।।६।।
अखिलविभावन बहुजनपावन, स्तवन पूरितकाम ।। जय जय... ।।७।।
बालकृष्णानन्द भवसागर, तारय कृपानिधान ।। जय जय... ।।८।।

## १९९ ● ।। अवतार स्तोत्र - सत्संगिभूषण ।।

धरातलस्योद्धरणाय कौर्लीं बिभ्रतनूमीश उपागतं भोः । यदोद्यतांतर्जल आदिदैत्यं तं दष्टुंयार्द्रिं मधवादृणाद्वा ।।१।।
रुचियोषिति जात इश्वरो द्विजयज्ञः सुयमान्सुरान्स्त्रियाम् । इति सो जनयद्धरिर्नृणां मनुनोपि तदार्ति माहरत् ।।२।।
नवभिः सह कर्दमस्त्रियाः कपिलोऽभूत्स्वसृभिः स्वमातरम् । स उवाच निजात्मसंविदं गति मैत्तस्य हरे र्यया चसा ।।३।।
सुसुतंत्वभिकांक्षतो मुनेर्ननु तुष्टो भगवान्मयाहि ते । यत आह स दत्त इत्यहं भुविदत्ताभिधया भवन्ततः ।।४।।
रजसा त्वति पूर्ति बिग्रहाः पदयो र्यस्य । भवापहारिणः यदुहैहयमुख्यका नृपा उभयो योग समृद्धिमाप्नुवन् ।।५।।
जगतोऽस्य सिसृक्षयाग्रतो विधिना तप्त मतस्तप स्ततः । अभवत्स चतुः सनो वदल्लय नष्टं स इहात्मतत्वमे ।।६।।
सुतपा वृषतोहि तत्स्त्रियां नरनारायणईशिताऽजनि । पूतना मदनस्य नाशकघटितुं यस्य ब्रृहद्व्रतात्परम् ।।७।।
वचनैः परमातृतोंतिके नृपतेर्विद्धमनाध्रुवोप्यगात् । तपसे गहनं ध्रुवां गतिं द्विज तस्मै स ददे प्रसन्नकः ।।८।।

कुपथं गत मर्हितो यदा निपतंतं निरये निजे द्विजैः । पितरं परिपालय स्ततो भुवि पुत्राख्यपदं ययौ श्रुतम् ॥९॥
ऋषभश्च सुदेविकात्मजो द्विजनाभेः समदृग्ह्यसावभूत । स्थित आत्मनि यो निजे सदा जडवद्योग मिहाचरच्छ्रयन् ॥१०॥
विदधेर्भगवान्महाक्रतौ हयशीर्षाऽऽसहिरण्यरोचिषः । श्वसतोऽस्यनसो गिरो भवन्कवयो या न्निगमान्वदंतिहि ॥११॥
मनुनोपगतो वृहत्तिभिः सयुगांते सलिले भयाधिके । पतितान्निगमान्प्रगृह्य वै विधिवक्राद्विजहार तत्र च ॥१२॥
सुरदानवतः प्रमथ्नतां पृथुपुष्टेन गिरिं दधारय । अमृताय पयोदधिं दधत्कमठाकारमलौकिकंकदा ॥१३॥
सविधाय सुरार्तिनाशनो नृरसिंहाकृतिमाशु भीषणाम् । गदयाभिपतंतमंतिकेऽसुरराजं विददार लीलया ॥१४॥
बलिना द्विरदोंगनक्रतः प्रगृहीतः पदि सारसे यदा । स्मृत आशु हरि स्तदंतिके समगातं समयान्तन्नि हत्य तम् ॥१५॥
अदितेरधियज्ञ आसवै तनयानां प्रवरोनुजोगुणैः । अग्रहीदपिलोकतस्त्विमामन्क्षितिमाक्रम्यबलेः पदैस्त्रिभिः ॥१६॥
भृशमात्मनि वृद्धभावतः परितुष्टो मुनिनारदाय सः । तमुवाच स योगमंजसा वयुनंयद्विदुरच्युतं बुधाः ॥१७॥
मनुवंशधरोबिभर्त्यलम् निजतेजोतंरतो दधाति यः । दशदिवक्ष्वहतं निजंदमं कुनृपेषु प्रथयन् यशोऽमलम् ॥१८॥
नृरुजोत्र विधाय योहरद्द्विज धन्वंतरिरुपमद्भूतम् । स मखे स्वविभागमात्पवानप्रतिरुद्धं दितिजैः पुनर्बलात् ॥१९॥
क्षयाय लोकस्य विवर्धितं यो दैवेन हंतुं जमदग्नितोऽभूत् । क्षात्रं च घोरं तमहंश्च रामस्त्रिसप्तकृत्वः स परश्वधेन ॥२०॥
इक्ष्वाकुवंशेह्यतीर्यतिष्टन् गुरोर्निदेशेकलयाकलेशः । वनं ससीतानुज फेट्दशास्योयत्राविशत्तेन विरुद्धय चार्तिम् ॥२१॥
भारं धराया विधिनो पहर्तुं समर्थितोयः कलया रमेश । प्रकट्यभारं वसुदेवगेहे हत्वाहर दुष्टनृपांश्च तस्याः ॥२२॥
पराशराद्वाडव सत्यवत्यां जातः स्त्रियां व्यास उरुप्रभावः । बोधाय नृणां व्यभजच्चतुर्धा वेदद्रुमने कंच विभागशो सः ॥२३॥

जज्ञे कलावत्र स यः परेशो बुद्धोऽसुराणां श्रुति कर्मभाजम् । विधाय वेषं मतिमोहकारं तेनापधर्म बहुधा बभाषे ॥२४॥
स एव साक्षाद्वचनं स्वकीयं सत्यं विधातुं सुखयन्स्वभक्तान । धर्मादुदक्कोसलतोऽधुना कौजज्ञैऽत्र भक्तौ हरिकृष्णनामा ॥२५॥
तस्येशितुः पापहराणि सद्यो दिव्यानि विष्णोश्चरितानि विप्र । नानाप्रबन्धैः कवयस्त्यगायन्मुदा शतानंदमुखा महांतः ॥२६॥
यस्याऽजनेर्गुह्यमिदं सलीलं धन्यं यशस्यं जननं हरे र्यः प्रातश्चसायं प्रगृणाति भक्त्या समुच्यते दुस्तरदुःखसंद्यान् ॥२७॥

*॥ इति वासुदेवानन्दवर्णिविरचितमवतारस्तोत्रं समाप्तम् ॥*

## २०० ● ॥ अर्चावतार स्तोत्रम् ॥

हरि ॐ अस्य श्रीसर्वोपरी श्रीअर्चावतारस्तोत्रमन्त्रस्य गोपालानन्दः ऋषिः । अनुष्टुप छन्दः । अक्षराधिपतिः श्रीहरिर्देवता। परब्रह्म भक्तिधर्मात्मजः इति बीजम्। षडैश्वर्य संपन्नः भगवान् श्री स्वामिनारायणः इति शक्तिः भुक्तिमुक्तिप्रदायकः । परमात्मा श्रीहरिकृष्णः इति कीलकम् । मम साक्षात भगवति श्रीहरौ । असाधारणप्रेमस्वरूपासांगपराभक्तिप्राप्त्यर्थे सर्वोपद्रवशमनपूर्वकसकलमनोरथ सिद्ध्यर्थे जपे विनियोगः ।

॥ अथ ध्यानम् ॥

अक्षराधिपति दिव्यं षडैश्वर्यसमन्वितम् । वन्दे स्वेष्टदेवं तं स्वामिनारायणं प्रभुम् ॥१॥
अक्षरे धाम्नि सदृक्षे स्थितं हरिमंडपे । वन्देहं साधुसंयुक्तं प्रत्यक्षं पुरूषोत्तमम् ॥२॥
चिन्तासंतापहृन्नित्यं हरिकृष्णपदाम्बुजम् । वन्देहं तत् तरिभूतं भवार्णवे सुखप्रदम् ॥३॥

॥ इति ध्यानम् ॥

धर्मभक्तिवासुदेवं भक्तदोषनिवारकम् । वन्देहं दुःखहर्तारं विद्याशक्तियशः पदम् ॥४॥
श्रीकान्तं द्वारिकाधीशं लक्ष्मीनारायणं तथा । वन्देहं स्वेष्टदातारं देशवृत्तालयस्थितम् ॥५॥
उद्धवज्ञानदातारं धर्मभक्तिवरप्रदम् । वन्देहं राधिकायुक्तं वृन्दावनविहारिणम् ॥६॥
सर्वावतारधर्तारं भुक्तिमुक्तिप्रदायकम् । वन्दहं स्वेष्टदेवं तं हरिकृष्णं मनोहरम् ॥७॥
उत्सवे राजते नित्यमुत्सवानन्ददायकम् । वन्देहं श्रीहरिकृष्णं बालमुकुन्दसंयुतम् ॥८॥
त्रेतायां भरतं दद्यात् द्वापरे चोद्धवं तथा । वन्देहं पादुकां नित्यं कलौ वृत्तपुरे स्थिताम् ॥९॥
शयनं सुखशय्यायां करोति वै सुखप्रदम् । वन्देहं श्रीमहाराजं सुखसागरमव्ययम् ॥१०॥
सत्यव्रतमृषीणां च रक्षार्थं धृतविग्रहम् । वन्देहं मत्स्यदेहं तं हरिहस्तप्रतिष्ठितम् ॥११॥
लोककल्याणकर्तारं स्वपत्नीपृथिवीयुतम् । वन्देहं श्रीवराहं च हरिहस्तप्रतिष्ठितम् ॥१२॥
भक्तप्रहलादरक्षार्थं धृतरूपमलौकिकम् । वन्देहं श्रीनृसिंहं च हरिहस्तप्रतिष्ठितम् ॥१३॥
शेषनारायणं देवं प्राप्यं च ब्रह्मविद्यया । वन्देहं लक्ष्मीसंयुक्तं हरिहस्तप्रतिष्ठितम् ॥१४॥
लक्षयोजनविस्तारं सागरे धृतविग्रहम् । वन्देहं कूर्मदेवं तं हरिहस्तप्रतिष्ठितम् ॥१५॥
सर्वदारोग्यदातारं सर्वलोकप्रकाशकम् । वन्देहं सूर्यदेवं तं हरिहस्तप्रतिष्ठितम् ॥१६॥
पार्वतीमंकमारोप्य वृत्तपुरे विराजते । वन्देहं श्रीमहादेवं हरिहस्तप्रतिष्ठितम् ॥१७॥

सर्वमंगलकर्तारं सर्वविघ्नविनाशकम् । वन्देहं गणनाथं च हरिहस्तप्रतिष्ठितम् ।।१८।।
भक्तसंकटहर्तारं दास्यभक्तिविद्यायकम् । वन्देहं श्रीकपीन्द्रं तं हरिहस्तप्रतिष्ठितम् ।।१९।।
हरिहृदयसंकाशान् भगवद्मूर्तिसदृशान् । वन्देहं साधुवर्यास्तान् मुमुक्षुन्भवतारकान् ।।२०।।
धर्मवंशे समुत्पन्नान् धर्मपिठे नियोजितान् । वन्देहं परमाचार्यान् पूर्वपुण्यविभूषितान् ।।२१।।
राजन्ते सर्वतीर्थानि यत्र च सर्वदेवताः । वन्देहं तीर्थराजं तत् धामवृत्तालयाभिधम् ।।२२।।
यज्जले सर्वतीर्थाजातं तत् हरिणा पावनं कृतम् । वन्देहं गोमतीतीर्थं वृत्तालयपुरे स्थितम् ।।२३।।
वृत्तपुरे समागत्य यो नरः प्रतिपौर्णिमम् । पठेत् स्तोत्रमिदं भक्त्या फलिष्यन्ति मनोरथाः ।।२४।।
नवधाभक्तिसंबंधे स्तोत्रपाठे करोति यः । सो अक्षयं फलमाप्नोति तस्मिन् तुष्टो भवेद्धरिः ।।२५।।
यः पठेच्छृणृयान्नित्यं पूजनान्ते कृतांजलिः । इहैव सुखमाप्नुयात् देहान्ते सुगतिर्भवेत् ।।२६।।
ऋणदारिद्रय दुःखं च रोगशोकभयादिकम् । नित्यमेकादशावृत्या तत्सर्वं नाशमाप्नुयात् ।।२७।।
सर्वसुखकरं स्तोत्रं सर्वारिभयनाशनम् । गृहित्यागिजनानां च भुक्तिमुक्तिप्रसाधकम् ।।२८।।
धर्मार्थकाममोक्षाणामिदं स्तोत्रं सुनिश्चितम् । प्राप्त्यर्थे सेवनान्नित्यं तत्र कार्योन संशयः ।।२९।।
तस्मादर्चावताराणां स्तोत्रमेतद्धरिप्रियैः । गृहित्यागिजनैः सर्वैः पठनीयं प्रयत्नतः ।।३०।।
जयति जयति धन्यं तत्स्थितं देववृन्दम् । जयति जयति धन्यं तत्स्थितं साधुवृन्दाम् ।।३१।।

*।। इति श्री गोपालानन्दमुनि विरचितं श्रीसर्वोपरि श्रीअर्चावतार स्तोत्रम् ।।*

## २०१ • ॥ श्रीनरनारायणदेव प्रार्थनाष्टकम् ॥

सितश्याममनोज्ञरम्यमूर्ते निजपादाब्जश्रिताभिसौखपूर्ते ।
वृषपुत्रसुस्थापितस्वरुपो नरनारायणदेव पाहि नित्यम् ॥१॥
परिधारित श्वेतरम्यवस्त्रो मणिरत्नादिकहारसंकिरीटी ।
शुभचन्दनचर्चितो मुनिशैः नरनारायणदेव पाहि नित्यम् ॥२॥
तिलके च सुकुम्कुमाभिचन्द्रो निजभाले च त्रिरेखरम्यसुभ्रुः ।
शरदाब्जसुधाभिपूर्णनेत्रो नरनारायणदेव पाहि नित्यम् ॥३॥
श्रवणे धृत कुण्डलाभिगुच्छः शुकनासश्च कपोल रम्यबुट्टः ।
शर्देन्दुमुखाब्जमन्दहास्यो नरनारायणदेव पाहि नित्यम् ॥४॥
मणिमालसुकम्बुरम्यकण्ठो मृदुवक्षः स्थल श्रीनुतः सुधाढ्यः ।
चतुरायुधहस्तयुग्मद्वन्द्वो नरनारायणदेव पाहि नित्यम् ॥५॥
धृतनेपुर पुष्पहैमपादस्तुलसीचन्दनकुम्कुमाभि लिप्तः ।
स्वनृणां भवसागरैकनौका नरनारायणदेव पाहि नित्यम् ॥६॥
निगमागमगीतरम्यकीर्तिर्निजभक्तार्ति हरः सुखा अमृताब्धिः ।
भुविकल्पतरूर्निजाश्रितानां नरनारायणदेव पाहि नित्यम् ॥७॥

तव पादकजे रतिर्ममस्यादिव मीनस्य जले शिवेह्युमायाः ।
हरिणस्य रहे कजस्या सूर्य इति देवेन्द्रप्रसाद आर्य आह ॥८॥

*॥ इति श्रीनरोत्तम सुनु गीरीजाशंकरशर्मणा विरचितम नरनारायणाष्टकम् सम्पूर्णम् ॥*

## २०२ ● ॥ स्रग्धरावृत्तम् ॥

वन्दे श्रीधर्मपुत्रं सकलसुखनिधिं ब्रह्मभिः सेव्यपादम्,
वेदैः शास्त्रैः पुराणैः समुदितयशसं कोटिचन्द्रार्ककान्तिम् ।
सर्वात्मानं शरण्यं भुविध्रुतनृतनुं कल्पवृक्षं श्रितानाम्,
सर्वाविर्भावहेतुं स्वशरणगतपं रम्यषाडक्षरं त्वाम् ॥१॥
श्वेतांगं श्वेतवस्त्रं सतिलकविधुकं रम्यभाले त्रिरेखम्,
पीयूषआपूर्णनेत्रं शुकवरसुनसं भूकजागुच्छकर्णम् ।
गौरे रम्ये कपोले त्रयतिलमधुरं वामकर्णे सुबिन्दुम्,
पद्मास्यं लज्जितेन्दुं मुखमितहसनं स्वामिनारायणेशम् ॥२॥

*॥ इति गीरीजाशंकर त्रीवेदी विरचितं ॥*

## २०३ ● ॥ लावणी रागेण गीयते अष्टपदीयम् ॥

मंगलमूलीगतंगुणवन्तं सत्कुर्वन्तं गततृष्णम् ।
ब्रह्ममुनिं दर्शित निजभावं तमनुस्मरामिहरिकृष्णम् ॥ ध्रुवपदम्॥
सुरनरमुनिजनकृतानित्यपूजन लिंबतरुतलवितिराजम् ।
रामसिंहवसुमतीपतिचर्चित चरणकमलवरवरदाजम् ॥ मंगल.....१॥
शुकसनकादिकविधिसुतवंदित स्वलर्कवापिकृतरमणम् ।
भोगवतीरक्ताभिधकूपआप्लव समुचितकीर्तनश्रवणम् ॥ मंगल.....२॥
नवतमनिजभवनं कारयितुं कृतरजनिक्षितितलमानम् ।
दर्शितसरलशिलाकरस्वादु शम्बरदीर्घिकवनदानम् ॥ मंगल.....३॥
श्रीहरिकृष्णनामांकितमूर्तिं स्थापयितुं किलकृतदेशण् ।
श्रितसुखकारीभवभयहारी संततप्रीयसौभिरदेशम् ॥ मंगल.....४॥
परमपवित्रअलर्कवापिकांतिक परिषद् विष्टरभाजम् ।
चतुराननचित्तज सनकादीरितनिजरूपं मुनीराजम् ॥ मंगल.....५॥
भक्तिधर्मयुतवयुनवार्तया दारितजनदुरमतिवादम् ।
रामकृष्णमुखरुपधर्त्तारं प्रकटितपुरुषौत्तमभवाम् ॥ मंगल.....६॥

भानुभानुपींबरधारि पुरिजनरंजनकृतहासम् ।

सौभिरजनपदजनताहुत तत्तन्नगराश्रितकृतवासम् ॥ मंगल.....७॥

स्ववदनवर्णितमूलीमाहात्म्यं सज्जनसदसिसुखपुर्तिम् ।

ब्रह्मानन्दानन्दवहंतं ब्रह्मपुराधिपगुरूमूर्तिम् ॥ मंगल.....८॥

*॥ इति श्रीनन्दकीशोरदासविर चितामूलीमाहात्म्वर्णनाष्टपदी समाप्ता ॥*

## २०४ ● ॥ शरणाष्टकम् ॥ वसन्ततिलकावृत्तम् ॥

ध्येयं वदन्ति शिवमेह हि केचिदन्ये, शक्तिं गणेशमपरे तु दिवाकरं वै ।

रूपेस्तुतैरपरि विभासि यतस्त्वमेव, तस्मात्त्वमेव शरणं मम दीनबन्धो ॥१॥

नो सोदरो न जनको जननी न जाया, नैवात्मजो न च कुलं विपुलं बलं वा ।

संदृश्यते न किलकोअपिसहायको मे, तस्मात्त्वमेव शरणं मम दीनबन्धो ॥२॥

नो पोसिता मदमापस्य मया महान्तः, तीर्थानि चास्तिकधिया नहि सेवितानि ।

देवार्चनं च विधिवन्न कृतं कदापि, तस्मात्त्वमेव शरणं मम दीनबन्धो ॥३॥

दुर्वासना मम सदा परिकर्षयन्ति, चित्तं शरीरमपिरोगगणा दहन्ति ।

संजीवनं च परहस्तगतं सदैव, तस्मात्त्वमेव शरणं मम दीनबन्धो ॥४॥

पूर्वा कृतानि दुरितानि मया तु यानि, स्मृत्वाखिलानि हृदयं परिकम्पते मे ।

ख्याता च ते पतितपावनातु यस्मात्, तस्मात्त्वमेव शरणं मम दीनबन्धो ॥५॥

दुःखं जराजननजं विविधाश्चरोगाः, काकश्वसूकरजनिनिरिये च पातः ।

त्वद्विस्मृतेः फलमिदं बिततं हि लोके, तस्मात्त्वमेव शरणं मम दीनबन्धो ॥६॥

नीचे अपिपापवलितोअपिनिन्दितोअपि, ब्रूयात्तवाहभितियस्तुकिलैकवारम् ।

तं यच्छसीशनिजलोकमितिव्रतं ते, तस्मात्त्वमेव शरणं मम दीनबन्धो ॥७॥

वेदेषु धर्मवचनेषु तथागमेषु, रामायणेअपि च पुराणकदम्बके वा ।

सर्वत्रसर्वविधिना गदितस्त्वमेव, तस्मात्त्वमेव शरणं मम दीनबन्धो ॥८॥

*॥ इति शरणाष्टकम् ॥*

## २०५ ● ॥ अष्टकम् ॥

दिव्याकारं शान्तिदं दासकानां ज्ञातृज्ञेयं कामदं धार्मिकाणां ।

ध्यातृध्येयं दैवतं तापसानां ध्यायेनित्यं स्वामिनारायणं त्वां ॥१॥

सर्वाधारं नाशकं पातकानां सेवाकारैः प्रैष्टरूपे ह्येकानां स्व ।

भासं तं मुक्तिदं भक्तिभाजं ध्यायेनित्यं स्वामिनारायणं त्वां ॥२॥

यस्सेवास्त्वं त्रिधा तापदग्धंजीवं शान्तं शान्ति मे तं करोषि ।

वेदैः सर्वैः कथ्यतेयस्यरूपं ध्यायेनित्यं स्वामिनारायणं त्वां ॥३॥

पापारातिं मोक्षभाजां जनानां लोकालोकेपुज्यमाने प्रधानं ।
श्रीसाकारं यस्यरूपं सुखं तं ध्यायेनित्यं स्वामिनारायणं त्वां ॥४॥
सर्वाशासुस्थापितो येन धर्मो दैत्याचारे विद्यते यस्य रोषः ।
हर्याधारेप्रीतिमांश्चास्तियस्तं ध्यायेनियं स्वामिनारायणं त्वां ॥५॥
विद्यालाभं ज्ञानगम्यं स्वरूपं सारासारं ज्ञानदं स्वप्रकाशं ।
योगाधीशं देवदेवं मनोज्ञे ध्यायेनित्यं स्वामिनारायणं त्वां ॥६॥
धर्मारीणां दण्डदं धर्मपुत्रं मेधांभोधिकंजनेत्रं सुसंज्ञं ।
नित्यानन्दमानन्द वर्णिवेषो ध्यायेनित्यं स्वामिनारायणं त्वां ॥७॥
मायाहीनोयस्यदेहः परस्तं सर्वज्ञताव्यापको धामवासी ।
श्रेष्टो देहस्वेछायायेनलब्धो ध्यायेनित्यं स्वामिनारायणं त्वां ॥८॥
श्री गोलोकनिवासी कृष्णमनसां स्वानां जनानां भुवां मांगल्याय कृत्वावतारमरिहं प्राप्यं सदा सेवकैः ।
भक्तानां भयनाशकं कुमतिहं कोपादिनाशाशयं वंदेहं कमलाननं सुवरदं त्वां सर्वदा स्वामिनम् ॥९॥

## २०६ ● ॥ साभ्रमति माहात्म्यम् ॥

जनानां या दात्री प्रचुरपुरुषार्थस्य स मुने हरेराप्लावेनानुदिनमघराशेर्गतमुदा ।
नृणांहंत्रिविष्णोः पदकमलजातामपिभुवं पुनाती मां गंगामिव न गणयती सुरनदी ॥१॥

तटं यस्यावांभो अमलममृततुल्यं श्रमयुतं स्मरंति प्रातर्ये निजहृदिसकृद्योजनशते ।
स्थिताः स्मात्रे येषां पतितमपियत्रास्थिशकलं प्रमुचाशेषाघात्सपदिलघुविष्णोः पदगताः ॥२॥
शिवं भिन्नं भिन्नं प्रतियुगमुशन्नाम दधतीसुरैर्दैत्यैर्नागैर्नरमुनिनृपैश्चानुदिवसं ।
नता दृष्टा स्पृष्टातिचपल तरंगात्मकरतः स्पृशन्ति या नारायणपदसरोजंत्विवहृदि ॥३॥
व्रतैर्नानादार्विध जपयज्ञर्विधियमैस्तपोभिः प्राप्यंयद्भवतिमनुजैस्तच्चवतुफलं ।
लभंते स्नानातारोयडुदनिविनातत्कृतिमयिड्डुतंकान्यासेव्यानृभिरिहसमातद्यवनया ॥४॥
स्वनीरेकुर्वाणधृतनरतनूकेलिमृषिभिर्ज्वलंती येक्षित्वाहृदि हरिपदी धर्मजहरि ।
सपन्नीमेहित्वं सखिसुरसरित स्वैर्जलरवैर्ब्रवीतीवोच्चैस्त्वाआरुह्यतिदयितोअत्रेति भगवान् ॥५॥
पिशाचप्रेताद्याः सुतटपरे वीक्ष्यचपलं पलायंते यस्याहरिकुलमिवैभानृभिरणुं ।
पयोपिस्यात्पीतं तनु पतनकाले यदिसुरैः स्वराराध्यत्वं ते पतितवपुपीषो यान्ति सपदि ॥६॥
शतैः प्रायश्चितैरपितनुभृतः शुद्धिरहितानिकृष्टायत्तीरे प्रजहति शरीरं यमभटान्यदा ।
आयाताद्यात्वाकटितिहरिदूता इहतनुं वदन्तो अतो अमीतान्न वहति नयंते अजनपदं ॥७॥
सदायस्याः पूतेमृदुलसितसिक्तिसु पुलिनेनिषणाः स्वंनारायणमुनिमधीशं च मुनयः ।
कतिध्यायं संतः कतिवसनमर्चति तमजं प्रमार्जत्पार्द्ध तत् पयसि बहिरस्यंति कतिच ॥८॥
निसर्गोयं कस्तेमलिन जनवच्चातिविगुणे महापापान्यैवाप्लवतनुरूगायालयमपि ।
न यस्येज्ञेत्वं यामिनि परिशर्यते अग्रजननानुपस्थानं प्रातर्विदधतिरवेयत्रशतशः ॥९॥

गुणान् भाव्यान्यस्य हरिचरणा संपूतपयसः प्रभुर्वक्तुं कार्तोलिखितुमहिराजश्चनृपतिः ।
वृषाद्रृष्टुंयस्याः क्वतंद्रनगुणाः क्वाहमगुणस्तदेशो अस्याग्रस्या तवहिपुरतांश्चकथये ॥१०॥
सुधवलसुधासौपानांलिंस्थितां निकटेप्रभुः कमलनयनः सौधस्याह्यावृत्तोगृहिसाधुभिः ।
मृदुलरूचितेतस्यास्तस्यामुपाविशदासनेक्षितिरूह घनछायां शर्मदे कुंमुदोयथा ॥११॥

*॥ भूषणे द्वीतीये अंशे ॥*

## २०७ ● ॥ अष्टकम् ॥

मदननाशनेक्तभासने शुद्धहृदासने भूरिशासने । ललितलोचने मोहमोचने फणतु मे मनो भक्तिधर्मजे ॥१॥
वयुनकारके धर्मधारके स्वजनतारकेरोषमारके । विघ्नवारके दोषदारके फणतु मे मनो भक्तिधर्मजे ॥२॥
कुपथकर्षणे मोदवर्षणे सुपथपोषणे शोकशोषणे । सुमतिजोषणे दुःखमोषणे फणतु मे मनो भक्तिधर्मजे ॥३॥
सुस्वदशेखरेयाधृतारवरेदमननोधरेशोभनाधरे । गुणगणाकरे मालिकाकरे फणतु मे मनो भक्तिधर्मजे ॥४॥
कलिकलापहे नित्यशंवहे सुरशुभाचरे स्नेहसागरे । मणिमयांगदे शिक्षणंगदे फणतु मे मनो भक्तिधर्मजे ॥५॥
जलदसुंदरे सज्जनादरे सिततरांशुके मोक्षकारके । कृतजगल्लयेव्यंजनालये फणतु मे मनो भक्तिधर्मजे ॥६॥
निगमशोधने सांख्यबोधने तिमिररोधने गर्भनोदने । सुगतिसाधने कालबोधने फणतु मे मनो भक्तिधर्मजे ॥७॥
धरणिचालके लोकपालके चपलयाद्रके सत्यवाद्रके । निजदयासुदेषासनासु फणतु मे मनो भक्तिधर्मजे ॥८॥

*॥ इति योगानन्दमुनि विरचितं प्रार्थना ॥*

## २०८ • ॥ अष्टकम् ॥ साभ्रमति महात्म्यम् ॥

पदपंकजेरूचिरं चक्रमणेत्वं चलयन्प्रभो व्रजसि यर्हि च तर्हि ।
मुनिमंडलंधृतकमंडलु कंथं हृद्यभितो अनुधावति समिक्ष्य भवंतं ॥१॥
तव गांगवारिणि हरेस्त्रपनार्थं गमनं त्वशेषतनुभृश्चरवहेतोः ।
भवतीतियास्युषसि यश्यजनेभ्यो भुविधन्यता प्रदमिदंहि वपुस्ते ॥२॥
सदयत्वदीक्षणहतात्मतमस्कार त्वयिभावतो मधुमिषस्त्रवदनाः ।
तरवोः अप्युपातफलपुष्पविनम्र । ऋषयस्त्वर्छनपरा इवधन्याः ॥३॥
बहवः खगा अपिसमीक्ष्य भवन्तं ह्यकृतात्मजातिरवणाः श्रीत्तमोनाः ।
अवलंबितद्रुमभुजाः स्थिरगात्राभवदंगचिंतनसुरवा ननु धन्याः ॥४॥
हरिणादयोवनभवाः पशवोपित्वद्रदीक्षणैकमनस अस्मृतनैजाः ।
नचलंति तर्हि मुनयः स्थितिगावासुखिनस्त्वया अचलदृशो भुवि धन्याः ॥५॥
पथिवीक्ष्य भिल्लवनिता वनचर्यः सहसाविसृष्टगृहदेहिक कृत्याः ।
कृत्तधावना भुवि पत्यनमंत्योदधतीहधन्यतरतां हि भवन्तम् ॥६॥
निजतीरमागतमवेक्ष्य भवन्तं भृतभूरिभक्तिरसविद्रवदंगा ।
स्वतरंग भंगि चपला किल धन्याविवशा भवत्यतिसुखेन च गंगा ॥७॥
गतिलाघवंस्वकमुदस्यमरालस्त्वद्रुदारचक्रंण चिन्तन सक्ताः ।

बहिरंतरासभवदीक्षणधन्या यतयो महांतद्रवसंति विमुक्ताः ॥८॥
स्नपनं विधायमुनिभिश्च सलीलं धृतश्चुक्त वाससमहं निजगेहे ।
स्थितमद्रवपत्र नयनं स्मित वक्रं दधदस्मि धन्य उरसीहवन्तम् ॥९॥
भूमाअव्यकृतधाम्रिचामृतपदे त्वंवै महापुरुषोवैकुंठेपि च विष्णुरस्य अथपयांभोधौ च योगेश्वरः ।
वहनौ यज्ञपतिर्हिरण्यमयवपुश्चादित्यबिंबांतरे मेदिन्यां बदरीवनेपि च नरोनारायणो वर्त्तसे ॥१०॥

## २०९ ● ॥ प्रार्थना ॥

श्रीधर्मनन्दनदयालदीनबन्धोसधर्मसाधुजनरक्षणतत्परेश ।
संसारसिंधुपतितोत्तरणावलंब कामाद्धि मां त्वमव तैष्ठिक नीलकंठ ॥१॥
कामादिदोषदमनप्रभुतप्रतापपाषंडपाप पुरूखंडन पुण्यपुष्टे ।
धर्मिष्ठदेव मुनिमंडललालितांघ्रेकामाद्धि मां त्वमव नैष्ठिक नीलकंठ ॥२॥
योगेश्वराव्ययविभोम्बुददिव्यमूर्ते निर्दंभभक्त जनवल्लभ ।
वर्णिवेशापहारक हरे करूणाः द्रष्टेकामाद्धि मां त्वमव नैष्ठिक नीलकंठ ॥३॥
सत्यव्रतप्रियतपः प्रियसाधुशीलसच्छास्त्रसाररसपोषित साधुलोक ।
सत्यस्वरुपनिजदर्शनदानयि कामाद्धि मां त्वमव नैष्ठिक नीलंकठ ॥४॥
सर्वोपकारक सदा श्रयणीयशिक्षब्रह्मेशशेष सुरनरनायकगीतकीर्त्ते ।
स्वर्गापवर्गपदवी प्रदापय कामाद्धि मां त्वमव नैष्ठिक नीलकंठ ॥५॥

संतोषसाम्यशमकौशलकान्तिकीर्त्तिक्षांत्यार्जवोपरतिमार्दवधैर्यजुष्ट ।
स्वांतं प्रशौचदमदानगुणाद्युपेत्त कामाद्धि मां त्वमव नैष्ठिक नीलकंठ ॥६॥
पूर्णावतारपुरुषोत्तमपुण्यबोधबुद्धिपटंकाशक सदास्तिक सत्यवादिन ।
यज्ञोपवित्तयुत्त योगकला प्रवृर्त्ते कामाद्धि मां त्वमव नैष्ठिक नीलकंठ ॥७॥
सत्यप्रतिज्ञसुखसाकगरशोकहारिन् हे कृष्ण हे मकललोचन हे परात्मन् ।
हे भक्तनाथ भवमोचननामधेय कामाद्धिमां त्वमव नैष्ठिकनीलकंठ ॥८॥

*॥ इति योगानन्दमुनि विरचित प्रार्थना ॥*

## २१० ● ॥ अष्टकम् ॥

योबाल्ये अप्यखिलर्द्धिवैभवभृतेः अनासक्तएवात्मनोगेहे, स्वेष्टबृहद्व्रतोचित्तमवाप्याश्रूपनायंपितुः ।
हित्वातीव्रबिरक्तितः सहनिजैः संबंधिभिस्तद्गृहं, चर्त्तुतीव्रतपांस्यरण्यमगमद्योगश्चरात्मप्रियः ॥१॥
स्वाभाविक्य अभवच्चयस्य सततं ब्रह्मस्वरूपस्छिति, ह्मर्मोभक्तिरपि स्वकैः सहचयद्भृत्ययमध्यूषतुः ।
शब्दाद्या नृपदुर्लभाश्चविषयाः पंचापियन्मानंसं नाक्रष्टुं, क्वचनापिशेकुरनलंयेभ्योः स्तिभिस्त्यागिनाम् ॥२॥
भक्तानस्वान्नरनाटनेनबहुधायः प्रीणयन्भूतले, रामानन्दगुरोरवापमहन्तीं दीक्षामुदारश्रवाः ।
विख्यातश्च ततो बभूवसहजानन्दाहवया सद्गुरुः, शुष्कज्ञानिकुलायनास्तिकमतध्वान्तैक चंडांश्रुमान् ॥३॥
यश्चाअधर्मकुलान्निजाश्रित जनांस्तूर्णं विमोच्याः, अखिलाल्लोभेर्ष्यामदमानमत्सरकलिक्रोधात्मभूसैन्यः ।

नैजंधामतमः परंनयतितान्देहावसाने अक्षरं, ब्रह्माधिक्षितिसप्रभूर्विजते भूरिप्रतापो हरिः ॥४॥

क्वचननिजमुखारविन्ददृष्टेन्द्र निजमुढजं परिवेष्टय मंडलेन ।

स्थितमृषिगणामाकल्यतूर्णं बहिरुपगच्छतिमेमनो अस्तु तस्मिन् ॥५॥

क्वचनमुनिगणागमनं निशम्य द्रुतमभिसंचलनास्मृतोत्तरीये ।

नवनलिन दृशाभितोनिजांस्तन् सुखयतिमे अत्रमनो अस्तु चैकचैले ॥६॥

क्वचसदसिमहासनोपविष्टेकरविलसत्तुलसंधनस्त्रग्जीशम् ।

स्मरतिभगणमध्येन्दुशोभेमुनिनयनैकपदेमनोस्तुतस्मिन् ॥७॥

क्वचमुनिजनमाननान्तशुक्लाम्बरतिलकाक्षतचित्रपुष्पमाले ।

स्थितवतिधृतपादुकेस्तु चेतोभगवति मे कटिदत्तपाणिपद्मे ॥८॥

अजनजनिमुखोत्सवेषु नानाजनपद संगत भुरिभक्तसंघैः ।

विविधवसनभूषणैः सुगन्धैरपचित्तएषमुदेः स्तुपुष्पहारैः ॥९॥

क्वचनमुनिजनतिथिक्रियायां दृढकटिबन्धपिनद्धपीतवासाः ।

स्वमपिपरिवेषयन्मुद्रुस्तानतिसुहितान विदथेत्सुमेस्तुसिद्धैः ॥१०॥

ध्वजकमलांकुशोर्ध्वरेखारीचिरपदक्रमणैरिमां धरित्रीम् ।

विदधतिदिवं सधर्मसूनुर्निजसखिनर्मकरीददातुबुद्धिं ॥११॥

इहजडमतयश्चपापिजीवा अपियदुदारसदाश्रयेणनैके ।
द्रुततरपरिहात्तदुःखभावाः सुकृतिवराः स्युरसौसमेस्तुपुष्टः ॥१२॥
क्वचननिजजनान् यथाधिकांर ननुनिगमस्मृतिसमं तं स्वधर्मम् ।
यदुपतिभजनाढ्यमादिसं स्तं विदधदथ स्वमीश एष तुष्यात् ॥१३॥
क्वचनविदधदिष्टकर्मश्रुद्धं क्वचविदधद्भुविपूर्तकर्मचेशः ।
अगणितमुखजान् यथेष्टभोज्यैरति सुहितान् विदधे स मेस्तुतुष्टः ॥१४॥
क्वचनिशिमुनिवृन्दमध्यसंस्थः स्वयमुरुं संशयप्रछ्यमुद्विभाव्य ।
प्रतिपदमुरुधोत्तरप्रदाता हरिरिहसाधु तनोतु मंगलं मे ॥१५॥
अकृतविविधयोगसाधनोपिध्रुवमणुवीक्षणमाणमात्रतोपि यस्य ।
इह सकलसमाधिसिद्धिमेतिप्रभुरखिले मम मंगलं क्रियात्सुः ॥१६॥

## २११ ● ॥ दशावतार स्तोत्रम् ॥

प्रलयपयोधिजले धृतवानसिवेदंविहितचरित्रमखेदं । केशवधृत मीनशरीर जय जगदीश हरेः ॥१॥
क्षितिरतिविपुलतरे तवतिष्टतिपृष्टे धरणिधरणकिण । चक्रगरिष्टे केशवधृत कच्छपरूप जयजगदीश हरेः ॥२॥
वसतिदशनिखरे धरणी त्ववलग्रा शशिनिलकंठ । कलेवनिमग्ना केशव धृत शूकररूप जयजगदीश हरेः ॥३॥
तवकरकमलवरे नखमद्भुतश्रृंगं दलितहिरण्यकशिपु । तनुभृंगंकेशव धृत नरहरिरूप जयजगदीश हरेः ॥४॥

छलयसिवीक्रमणे बलिमद्‌भुतवामन पदनखनीरजनीत । जनपावन केशव धृत वामन रूप जयजगदीश हरेः ॥५॥
क्षत्रियरूपधिरमयेजगदपगतपापंस्त्रपयसिपयसि । शमितभवतापं केशव धृत भृगुपति रूपं जयजगदीश हरेः ॥६॥
वितरसिदिक्षमणेदिक्पति कमनीयं दशमुखर्मि बलिं । रमणीयं केशव धृत रघुपति रूप जयजगदीश हरेः ॥७॥
विहसिवपुषिविशदिवसनं जलदाभं हलहति भीतिमीलित । यमुनाभं केशव धृत हलधर रूप जयजगदीश हरेः ॥८॥
नंदसियज्ञविधेरह डश्रुतिजातं सदयहृदय दर्शितपशुघाते । केशव धृत बुद्ध शरीर जयजगदीश हरेः ॥९॥
म्लेच्छनिवहनिधनेकलयसिकलवालं धूमकेतुमिव । किमपि करालं केशव धृत कल्कि शरीर जयजगदीश हरेः ॥१०॥
श्रीजयदेवकवेरिदंमुदितमुदारं श्रृणुसुखदं भवसारं । केशव धृत दशविधी रूप जयजगदीश हरेः ॥११॥

*॥ इति जयदेव कवि कृत दशावतार स्तोत्रम् ॥*

## २१२ ● ॥ अपराधनिवारण स्तोत्रम् ॥

गर्भेमातुः स्थितस्यापिनरसखकदानार्चित ब्रह्मसाधो,
र्वहिनज्वालाकुलस्याकृत मम बहुधारक्षणं तत्र तस्याः ।
यस्तं हित्वा अपरोस्त्वांपर इहविषयानदुःखदान्संभजेहं,
क्षंतव्यस्तेपराधः प्रिय मम सहजानन्द कृष्णेनचैषः ॥१॥
माया पुंभ्यांपरस्य प्रभुविधिगिरिशैर्धैर्यमूर्तेः स,
दांडाधीशैर्नारायणस्याजिततव वयुनं निश्चलंयामियेभ्यः ।

भक्तेभ्योहं यज्ञाक्वचतवभगवंस्तैर्विवादं सहे,
क्षंतव्यस्तेपराधः प्रिय मम सहजानन्द कृष्णेनचैषः ॥२॥
यायाराधादयो यत्पदकमलरजोनंतमुक्ताः स्वभक्ता,
प्रीत्यानित्यं धरंते निजशिरसि यतः सर्वशास्त्राण्यभूवन् ।
वेदादीनिशकार्येप्यहमकृ नतेनरितस्तत्वयाधीः,
क्षंतव्यस्तेपराधः प्रिय मम सहजानन्द कृष्णेनचैषः ॥३॥
राज्यं हित्वा च भूपः कतिसुरदनुजाः स्वंवनं तत्रगत्वा
यस्येक्षायैतपोद्यापिरमकगुरोदुष्करं कुर्वतेहम् ।
त्यक्ताः अलभ्यांक्रियास्तांमनुदिनमपराः संव्यधांदुर्मनीष्टः
क्षंतव्यस्तेपराधः प्रिय मम सहजानन्द कृष्णेनचैषः ॥४॥
लक्ष्मीनारायणस्यास्ति च नरबदरीशस्यपक्षो
अव्ययान्यस्त्वच्छिष्टैकः कृतस्तेस्थित इव इहावान्यत्रयत्नंतयोर्मे ।
पुष्ठ्यैस्वस्येतरस्यानिशमतिकुरूते तस्यतंधीर्यथा न
क्षंतव्यस्तेपराधः प्रिय मम सहजानन्द कृष्णेनचैषः ॥५॥
प्रातः पूज्यस्वरूपं क्वचतवसमदृक्यपूज्यते प्रत्यहं मे
काले अन्यस्मिन्प्रभोतत्क्वच तवकुसुमैर्धुपदीपैः क्वहीनम् ।

मन्त्रैः पंचामृतैस्तल्ल्घुमनसाक्वापिनैवेद्यतस्ते
क्षंतव्यस्तेपराधः प्रिय मम सहजानन्द कृष्णेनचैषः ॥६॥
आचार्यः स्थापितस्ते अवलसतवहरेरासनेधर्मशालीशिक्षापत्र्यस्ति
तेतेतनुरपिचतयो अस्थपिता आधिक्यतोनः ।
शिक्षायैतावकानां क्वचनमजयतुप्यतोहंधिया मे
क्षंतव्यस्तेपराधः प्रिय मम सहजानन्द कृष्णेनचैषः ॥७॥
प्रत्यंदंव्यापकस्यागणितगुणनिधेर्दिव्यमूर्तेर्महात्मन भक्ता
अभिष्टप्रदातुर्धृतबहुवपुषोवातवत् वज्जनानाम् ।
द्रोहः कश्चित्कृतः स्याज्जननइह यदामे अपरस्मिन्सवाचेत्
क्षंतव्यस्तेपराधः प्रिय मम सहजानन्द कृष्णेनचैषः ॥८॥
एतेभ्योन्येपराधा अपितव सुगतेः कोटिशः कोटिशामेकृष्णोक्तेभ्यः
क्रियन्तेजलदसमतनो अहर्निसं तान्मयायम् ।
दासोमत्वास्तिचैतांस्तव मम हृदिमां क्षमस्वेत्यनन्योयाचे
सेवापिदेयेत्यचलतवपदोर्वासुदेवाय मे ते ॥९॥

*॥ इति श्री वासुदेवानन्दवर्णिविरचितं भगवदपराधनिवारणस्तोत्रम् ॥*

## २१३ ● ॥ गुरूपरंपरा स्तोत्रम् ॥ श्री नरनारायणस्वामिनेनमः॥

आदावुद्धवमाह नैज ममलं ज्ञानं तदात्माततश्चात्मानन्दमुवाच तेनैवपुषागोविंद मूचे च यः ।
आनन्दाख्यमुर्नि जगादच ततो गोपालयोगीश्वरंह्यात्मानन्दमुवाच मद्गुरूमथोतं दासुदेवंभजे ॥१॥
द्वारिकायां पुरा कृष्णस्तिरोधास्यन्निजं पदम् उद्धवेस्थापयामासपरमैकान्तिकेप्रभुः ॥२॥
कृष्णात्मकस्यतस्या अथशिष्या आसन्सहस्रशः ब्राह्मणाः क्षत्रियावैश्याः शूद्राश्चापिमुमुक्षवः ॥३॥
इक्ष्वाकुवंश्याभूपालास्त्रयोविंशतिरेवचतावन्तः कालकाभूपास्तवंतश्चापिहैह्याः ॥४॥
चतुर्विशतिः पांचालास्तावंतश्चशकाभिधाः एकत्रिंशत्कलिंगाश्चवीतिहोत्राश्चर्विशतिः ॥५॥
द्वाविंशतिः शूरसेनामैथिलाः सप्तर्विंशतिः । पंचत्रिंशुच्चकौरवोनृपा उद्ध्वस्वामाश्रिताः ॥६॥
महापुरुषविद्यायाः प्राप्तायाभगवन्मुखात् । उपदेशेन तान्सर्वान्संसृतेः सद्यमोचयत् ॥७॥
ततः कालेनकियतादाक्षिणात्योद्विजोत्तमः सोमशर्मा अभवत्तस्यशिष्योविद्वजनाग्रणीः ॥८॥
तन्मूर्तिध्यानयोगेनमहापुरुषविद्यया । समाधिनिष्ठांपरमां प्राप्तवान्समहामतिः ॥९॥
आत्मानन्दः इति ख्यातः स बभूवगुरोः समः । महान्परमहंसेद्धार्मान्भागवतांछ्रितः ॥१०॥
शिष्याबभूवुः शतशस्तस्य नैष्ठिकव्रताः । मुमुक्ष्वो ये गृहिणस्त्यागिनश्चतथाविधाः ॥११॥
नरसिंहद्विजाद्याश्चजीर्णदुर्गनिवासिनः । गृहस्थास्तस्य शिष्याः स्वैर्यशोभिर्भुविविश्रुताः ॥१२॥
गोविन्दानन्दमुख्याश्च त्यागिनोविजितेन्द्रियाः । शिष्यास्तस्या अभवत्त्रिलोकेख्याता भागवतोत्तमाः ॥१३॥

गोविन्दानन्दनामात्रतेषांमुख्यो अभवद्गुणैः । प्रतापवान्भागवतसंप्रादयप्रवर्त्तकः ॥१४॥
तस्यशिष्यो अभवद्धीमानानन्दमुनिसंज्ञकः । स समाधौस्वतन्त्रो अभूत्सर्वशास्त्रविशारदः ॥१५॥
गोपालानन्दसंज्ञो अभूच्छिष्यस्तस्याथयोगिराट् । गुरुतुल्यप्रतापश्च धृतनैष्ठिकसद्व्रतः ॥१६॥
आत्मानन्दाभिधस्तस्यशिष्योजयतिसांप्रतम् । अखंडस्वस्वरूपस्थोयतीन्द्रोमद्गुरुः प्रभुः ॥१७॥
यन्नामगुरूणास्वस्यपरमैष्ठिगुरोर्मुदा । चक्रेतद्गुणयुक्तत्वात्प्रीयतां मे स सद्गुरुः ॥१८॥
येनेयंकृपयास्वस्यसद्गुरूणां परंपरा प्रोक्ता । मे श्रेयसेभूयात्स आत्मानन्दसद्गुरुः ॥१९॥
श्रीकृष्णमुद्धवंचात्मानन्दंगोविन्दायोगिनम् । आनन्दमथगोपालमात्मानन्दं नमाम्यहम् ॥२०॥
शकाब्देर्थरववाहेन्दुप्रमिते श्रावणासिते । अष्टम्यामक्षयग्रामेगीतागुरूपरंपरा ॥२१॥

*॥ इति श्री आत्मानन्दमहमामुनिशिष्याग्रगण्यधर्ममर्यादापालनधुरंधर श्रीरामानन्दमुनिविरचितं गुरूपरंपरास्तोत्रम् सम्पूर्णम् ॥*

## २१४ ● ॥ उपजातिवृत्तम् ॥

उत्फुल्लहृन्नीरजकर्णिकायां तेजोमहामंडलमध्यसंस्थम् ॥
अम्भोदनीलंशकदिन्दुकान्तं नारायणं प्रातरहं स्मरामि ॥१॥
अकारणात्यन्तदयानिधानं धर्मेणभक्त्यामुदितं मुनीशम् ॥
अधर्मसर्गासुरवंशकालं नारायणं प्रातरहं स्मरामि ॥२॥

स्वधर्मविज्ञानविरक्तियुक्तां भक्तिं निजान्तः परिपोषयन्तम् ॥
कामाद्यरित्रासदनामधेयं नारायणं प्रातरहं स्मरामि ॥३॥
सिताम्बरं चन्दनचर्चितांगस्मेराननं लम्बितशेखरालिम् ॥
सत्पुष्पहारावलिदर्शनियं नारायणं प्रातरहं स्मरामि ॥४॥
वराभये पाणियुगे दधानं चतुष्पटीमंसयुगे वसानम् ॥
महामुनीनामपिपूजनीयं नारायणं प्रातरहं स्मरामि ॥५॥
शरत्सुराजाताम्बुजपत्रनेत्रं विलोलदृष्टीक्षितभक्तमात्रम् ॥
भवप्रवाहोपरमप्रतापं नारायणं प्रातरहं स्मरामि ॥६॥
भक्तोत्तमप्रांगणमाश्रयन्तं वरानभीष्टानभियाचयन्तम् ॥
निजानशेषानपिमानयन्तं नारायणं प्रातरहं स्मरामि ॥७॥
भक्तेनदत्तं परमाणुमानं नगेशतुल्यं हृदिमन्यमानम् ॥
दीनं पतन्तं द्रुतमाददानं नारायणं प्रातरहं स्मरामि ॥८॥

*॥ इति दीनानाथभट्टविरचितं श्रीनारायणमुनेः स्मरणाष्टकं संपूर्णम् ॥*

## २१५ • ॥ वसन्ततिलकावृत्तम् ॥

वज्राम्बुजध्वजघटाभ्रयवोर्ध्वरेखाखण्डेन्दुमुख्यशुभलक्ष्मपदारविन्दम् ॥
वृत्तानुपूर्वपृथुलप्रसृतातिरम्यं प्रातर्हरिं वृषभुवं हृदिचिन्तयामि ॥१॥

दिव्येन्द्रनीलमणिदर्पणजानुयुग्मं सन्तर्जितद्विरदराजकरोरूलक्ष्मीम् ।।
श्रीमत्कटीतटविलज्जितरंकुराजं प्रातर्हरिं वृषभुवंहृदिचिन्तयामि ।।२।।
बोधिद्रुमच्छदवितर्जनकारितुन्दं तद्राजितोन्नतगंभीरसुनाभिकूपम् ।।
ध्यानाधिहृद्वरवलीत्रयराजमानं प्रातर्हरिं वृषभुवंहृदिचिन्तयामि ।।३।।
नीलोत्पलद्युतिशुभस्तनदर्शनीयं श्रीवत्सकौस्तुभललामसुबाहुमध्यम् ।।
तारानुकारिविसरद्रुचितारहारं प्रातर्हरिं वृषभुवंहृदिचिन्तयामि ।।४।।
पीनाहिराजशुभभोगभुजाभिरामं ग्रैवेयभूषणदरातिमनोज्ञकण्ठम् ।।
बिम्बोत्तमोष्ठमितहासविलासभासं प्रातर्हरिं वृषभुवंहृदिचिन्तयामि ।।५।।
चारूप्रदीपकलिकाशुकाचञ्चुशोभासं तर्जयत्तिलसमोत्तमवीक्ष्यनासम् ।।
कारूण्यपूर्णशतपत्रनेत्रं प्रातर्हरिं वृषभुवंहृदिचिन्तयामि ।।६।।
संपूर्णशारदनिशाकरनूत्नफुल्लपाथोजतर्जनकरास्यमनोभिरामम् ।।
भूचापचारूसमकर्णविचमानं प्रातर्हरिं वृषभुवंहृदिचिन्तयामि ।।७।।
दीर्घललाटपटलेललितेललामं काश्मीरचन्द्रकयुतंतिलकंदधानम् ।।
ऊर्ध्व सुगन्धिवरकेसर चन्दनस्य प्रातर्हरिं वृषभुवंहृदिचिन्तयामि ।।८।।
वासांसिहंसगरूदर्जुनभास्वराणिसंबिभ्रतं प्रतिदिनंक्वचिदुत्सवेषु ।।
स्वर्णानिसंश्रितमुदे अर्ककरस्फुरन्ति प्रातर्हरिं वृषभुवंहृदिचिन्तयामि ।।९।।

हैमानिहंसकसुनूपुर चारुकाञ्ची केयुरहारवलयप्रमुखानिसन्ति ॥
आभूषणानिदधतं क्वचसत्किरीटं प्रातर्हरिं वृषभुवंहृदिचिन्तयामि ॥१०॥
कुन्दस्थलाब्जमुखचित्रसुगन्धिमाल्यकेयूरहारवरशेखरकर्णपूरम् ॥
जिघ्रन्तमात्मकरगं वरमाल्यगुच्छं प्रातर्हरिं वृषभुवंहृदिचिन्तयामि ॥११॥

*॥ इत्यचिन्त्यानन्दमुनिविरचितं श्रीप्रातर्हरिमूर्तिध्यानस्तोत्रम् ॥*

## २१६ • ॥ अथ मानसूपजनम् ॥ स्त्रग्धरावृत्तम् ॥

शीते ग्रीष्मे गुहान्तर्ह्युपवनभवने मन्दिरोर्द्धस्थलायां ध्या, येद्वर्षासुधार्मिस्थित इति च हरिंचोष्णनीरैः हिमर्तौ ॥
तं संस्नाप्यातिशुभ्रं शुचिरूचिरतरं धारयेद्वस्त्रयुग्मं, भक्तः कुर्यात्तदीक्षां विदधदघहरां श्रीहरेः स्वान्तपूजाम् ॥१॥
तं मञ्चेचोपवेश्यातिमृदुसितपटोतूलिकाद्यैरूपेते, बौसुम्भं चारूचेलं वर पुरटमयं धारयेत्प्रीतियुक्तः ॥
नीशारं श्रोणिबन्धं वसनमपि ततस्तादृशंचोत्तरीयं, भक्तः कुर्यात्तदीक्षां विदधदघहरां श्रीहरेः स्वान्तपूजाम् ॥२॥
कौसुम्भं स्वर्णसूत्रं विविधमणिलतं धारयेद्वेष्टनं, सत्तस्यांगेष्वच्छमुक्तामणिगणकिरणस्वर्णभूषाश्चकुर्यात् ॥
भाले काशमीरचन्द्रं सुविमलगुलिकामालिकां धारयेद्वै, भक्तः कुर्यात्तदीक्षां विदधदघहरां श्रीहरेः स्वान्तपूजाम् ॥३॥
दध्याद्भाले स्वकीये हृदिशिरसिपदे तस्य काश्मीरलिप्ते, धूपंरम्यं च दिपान्वरतरहरये चार्प्य चित्रं निजेष्टम् ॥
भोज्यंनीराजयेत्तं प्रणतिमतिमुदाष्टांगयुक्तां विदध्यात्, भक्तः कुर्यात्तदीक्षां विदधदघहरां श्रीहरेः स्वान्तपूजाम् ॥४॥
ग्रीष्मेसंस्नाप्य शीतैर्हरिमथसलिलैर्धारयेच्छुभ्रसूक्ष्मं, सान्द्रं सद्वस्त्रयुग्मं वरकुसुमयुते चोपवेश्योच्चपीठे ॥

तत्सर्वांगेषु कुर्याल्ललितमलयजालेपनं भूरिभक्त्या, भक्तः कुर्यात्तदीक्षां विदधदघहरां श्रीहरेः स्वान्तपूजाम् ॥५॥
टोपींभूषाः सुगन्धिप्रवरसुमनसां धारयेच्चारुचेलं, प्रावारोत्तंसहारान् कुसुमविरचितान् सुप्रसूनावतंसौ ॥
कुन्दश्वेतं च सूक्ष्मं शिरसि च वसनं धारयेदुत्तरीयं, भक्तः कुर्यात्तदीक्षां विदधदघहरां श्रीहरेः स्वान्तपूजाम् ॥६॥
आलिंग्येश यथास्वप्रणयमथमुहुः स्वंगलग्रान् हरेः, सद्वंधाद्यंकान् स्मरेत्प्रावृषिसहमुनिभिस्तं शुभोन्मत्तसिन्धौ ॥
स्नात्वाग्रामान्तराद्वागत इति नितरां क्लिन्नसुश्वेतचेलं, भक्तः कुर्यात्तदीक्षां विदधदघहरां श्रीहरेः स्वान्तपूजाम् ॥७॥
उत्तार्याद्राणिवासांस्यथवपुषि हरेर्धारयेदम्बराणि, कौसुम्भान्येवनानातिसुरभि कुसुमौत्तंसहारावतंसान् ॥
सद्भालेकेसराच्र्चां विलसतिविदधच्चोपचारं च सर्वं, भक्तः कुर्यात्तदीक्षां विदधदघहरां श्रीहरेः स्वान्तपूजाम् ॥८॥

॥ द्रुतविम्बितवृत्तम् ॥

ऋतुषुयोविदधातिपृथक्तया शिवकरं हरिमानसपूजनम् ॥ सकिलशान्तिमुपैतिमहारतिं प्रणतसंसरणक्षपणेहरौ ॥९॥

*॥ इत्याचिन्त्यानन्दवर्णिविरचितं श्रीहरिमानसपूजनाष्टकं समाप्तम् ॥*

## २१७ ● ॥ स्त्रग्धरावृत्तम् ॥

ध्यात्वासौधोभूम्यांजलधरसमये चान्तरे शीतकाले,
गेहस्यारामसंस्थातिललितनिलये तंशुचौचिन्तनीयम् ॥
शुद्धोभूत्वानुरक्त्याभवदवशमनीं सर्वदास्वान्तपूजां,
भक्तो अधीशस्यकुर्यादिहसुवृषभुवः श्रीहरेर्दिव्यमूर्त्तेः ॥१॥

शीतेसंस्नाप्यकट्यां सितमहिमजलैर्धारयित्वाम्बरं,
केकौसुम्भं मञ्चकेतुलपटमृदुसिताच्छादनेतं निचोलम् ॥
नीशारं चांसयुग्मेपुरटगुणमुपवेश्य भालेवरेन्दुं,
भक्तो अधीशस्यकुर्यादिहसुवृषभुवः श्रीहरेर्दिव्यमूर्त्तेः ॥२॥
अंगेषुस्वर्णमुक्ताविविधमणिमयालंकृतीः स्वेतदीक्षां,
धृत्वाकाश्मीरलिप्तेगलउरसिपदेमूर्न्धितल्लक्ष्मचिन्ताम् ॥
मुक्तालिं धारयित्वा जनयति ललितकल्पलीलांललाटे,
भक्तो अधीशस्यकुर्यादिहसुवृषभुवः श्रीहरेर्दिव्यमूर्त्तेः ॥३॥
भक्ष्यंभोज्यं च लेह्यं परतरहरये स्वर्प्य चोष्यंनिजेष्टं,
धूपादींश्चोपचारानवहितहृदयश्चारूनीराजनं च ॥
स्तोत्रंसाष्टप्रतीकप्रणतिमतिमुदा प्रार्थनांतीर्थकीर्त्ते,
भक्तो अधीशस्यकुर्यादिहसुवृषभुवः श्रीहरेर्दिव्यमूर्त्तेः ॥४॥
ग्रीष्मेसंस्नाप्यचेलं शुचिसुरभिहिमाद्भिः सितंधारयित्वा,
सूक्ष्मंसान्द्रं सुपीठेरूचिरमलयजालेपनं चोपवेश्य ॥
हस्तोरस्तुंदसक्थिन्यधिपदमलिकेजंघयोस्तंतदीक्षां,
भक्तो अधीशस्यकुर्यादिहसुवृषभुवः श्रीहरेर्दिव्यमूर्त्तेः ॥५॥

मल्लिजातिस्थलाब्जाद्यकुसुमविलसट्टोपिकाकर्णपुर,
प्रावारोत्तंस हारांगदवलयमुखालकृतीर्धारयित्वा ॥
भूषाकल्पप्रतीकेष्वतिनिभृतहृदाचैवसम्यक् तदीक्षां,
भक्तो अधीशस्यकुर्यादिहसुवृषभुवः श्रीहरेर्दिव्यमूर्त्तेः ॥६॥
भूयः प्रेष्ठंयथास्वं प्रणयमथपरिष्वज्य चात्मांगसक्त,
श्रीमन्मालादिलक्ष्मस्मरणमतिमुदा तं शुचौ धारणीयौ ॥
मल्लीमाल्योद्वलक्षौतनुमृदुलतरौवेष्टनप्रोन्तरीयौ,
भक्तो अधीशस्यकुर्यादिहसुवृषभुवः श्रीहरेर्दिव्यमूर्त्तेः ॥७॥
स्नात्वाग्रामान्तराद्वागत इति मुनिभिश्चार्द्रवासास्तटिन्यां,
ध्यात्वोत्तार्यार्द्रशुभ्राणि सहसदलिकेकेसरालेपनं तम् ॥
कौसुम्भान्येव वासांस्यथघनसमये धारयित्वा तदीक्षां,
भक्तो अधीशस्यकुर्यादिहसुवृषभुवः श्रीहरेर्दिव्यमूर्त्तेः ॥८॥

॥ द्रुतविलम्बतवृत्तम् ॥

ऋतुषुयोविदधातिपृथक्तयाशिवकरं हरिमानसपूजनम् ॥
सकिलशान्तमुपेतिहरौरर्तिप्रणतसंसरणच्छिदिभुयसीम् ॥९॥

*॥ इत्य चिन्त्यानंदवर्णिविरचितं श्रीहरिमानसपूजनाष्टकं समाप्तम् ॥*

## २१८ • ॥ वसन्ततिलकावृत्तम् ॥

श्रीभक्तिधर्मतनयंमुनिचिन्तनीयं सर्वेश्वरेशमवतारगणैकबीजम् ॥
अप्राकृताद्भुतगुणादिमहापयोधिभक्त्या नमामि हरिकृष्णमनन्यतुल्यम् ॥१॥
ग्रीष्मेनिदाघविरतौशिशिरेतथर्त्तौ स्नानादिभिः समुचितैर्विविधोपचारैः ॥
धार्मेर्हरेरतिशुभांमनसासपर्च्यां भक्तोन्वहं भगवतो विदधीत भक्त्या ॥२॥
तत्रोष्णकालउरूशीतसुगन्धिनीरैरास्नाप्यतं शुचिवरान्यपटेन भक्तः ॥
अंगानितस्यपरिमार्ज्यनवं पवित्रं वासः सितंतनुघनं परिधापयेत्तम् ॥३॥
सूक्ष्मं ततः सिततरंरूचिरं महार्हं संधारयेच्छिरसि तस्य शिरः पटं सः ॥
आच्छादयेत्तमथतादृशमुत्तरीयं स्वर्णासने अतिललिते अथनिषादयेत्तम् ॥४॥
अंगानि तस्य सततोबहु सौरभेण संचर्च्चयेत्त मलयागरू चन्दनेन ॥
घृष्ट्वा स्वयं च निभृतं वसुवाटिकायां प्राक चर्च्चयेत्तदतिशालिनितल्ललाटे ॥५॥
सम्यक् ततः सतदवेक्ष्य भुजौ तदीयौ संचर्च्चयेदथ विलोक्य भुजौ हि सम्यक् ॥
वक्षो अथ तस्य जठरं च समर्च्यपश्येत्संचर्च्चयेच्चचरणौ वरकुंकुमेन ॥६॥
तौवीक्ष्यसम्यगथचित्रसुगन्धिपुष्पैर्भक्त्यार्च्चयेदथमनोहरमाल्यहारान् ॥
संधारयेच्चवरकौसुमशेखरांस्तं सन्माल्यशालिवलयांगदा कर्णपूरान् ॥७॥

तंवीक्ष्यसादरतरंवरधूपदीपौ कृत्वायथास्वरूचिचारूरसंयथार्हम् ॥
प्रीत्यार्पयेत्सरूचिरं विविधं च तस्मै नैवेद्यमुत्तमत्तरं मुखवासमेव ॥८॥
निराज्यसप्रमुदितो अथपरिष्वजेत्तंद्विर्वासकृच्चबहुशोपियथानुरागम् ॥
संधारयेद्हृदि च मुर्न्धितदंघ्रिपद्मेतल्लग्नकुंकुमनिजांगमथाभिपश्येत् ॥९॥
तस्याथपुण्यपरिरम्भतदंगभद्रसन्माल्यहारवलयादिभिरंकितंस्वम् ॥
वीक्ष्येतगात्रमथतं विहरन्तमिक्ष्यं सार्द्धं विचित्रकुसुमोपवने स्वभक्तैः ॥१०॥
वर्षास्वथेष्टमितितं हृदिभावयेत्प्राक् स्नात्वा सहाखिलमुनिप्रकरैर्हृदिन्याम् ॥
स्वीयान्तिकागतमवेक्ष्यभृशार्द्रचेलंकौसुम्भसर्ववसनानि च धारयेत्सः ॥११॥
सिंहासनस्थमथ केसरसौरभेण तं चन्दनेन रूचिरेण सचर्च्यित्वा ॥
संपूजयेत्प्रथमवत्कुसुमप्रमुख्यैर्नानाविधैर्वरतरैरितरोपचारैः ॥१२॥
भक्तो अथ तं परमसौधविराजमानं वीक्षेत भक्तगण वेष्टितमादरेण ॥
उष्णाम्बुनाथशिशिरेस्नपयेत्ततस्तं धोत्रं सितंतनुघनं परिधारयेत्सः ॥१३॥
छन्नेततोमृदुलतूलिकयासुमञ्चे सूक्ष्मोत्तरच्छदयुते सनिषाद्य भक्त्या ॥
कौसुम्भीपट्टकमुरूत्तम हेमसूत्रं संवेष्टयेच्छिर सितस्यवरं महार्हम् ॥१४॥
नीशारमेवरूचिरामथकच्छनी तं संधारयेत्कटितटे स पटंसुशोणम् ॥

सौवर्णसूत्रमतिमूल्यवदुत्तरीयं तस्यांसयोर्ललित भंगिविभासमानम् ।।१५।।
अंकेषु तस्यनिखिलेष्वथ भास्वरेषु नानामणीन्द्र खचितावरहेमभूषाः ।।
प्रीत्यायथार्हमुपधाप्य महादरेण प्रेक्षेत तं च बहुलप्रणयेनभक्तः ।।१६।।
कृत्वा अथ तस्य विपुले ललिते ललाटे काशमीरचन्द्रकमवेक्ष्यतरं सुवृत्तम् ।।
प्राग्वत्समर्च्यनिकिलैरितरोपचारैस्तं मानसेक्षणमहोत्सवमेव पश्येत् ।।१७।।
अन्तर्गृहेथ निजभक्तजनैरूपेतं राजन्महासननिषण्णमवेक्षणीयम् ।।
स्मेराननं विविधभूषणांगं वीक्ष्येत कोटिमदनस्मयहारिणं तम् ।।१८।।

॥ शार्दुलविक्रिडीतंवृत्तम् ॥

येप्रीत्यैवमृतुत्रयेविदधतेपुजाहरेर्मानसीं तेष्वेवातितरां प्रसीदति हरिस्तेषां स्थिरा भूयसी ॥
प्रीतिर्भक्तसुखप्रदे अत्र सहजानन्दे हरौ जायते देहान्ते च तपस्विदुर्लभतरा मुक्तिस्तथैकान्तिकी ॥१९॥

*॥ इत्यचिन्त्यानन्दवर्णि विरचितां धार्मी श्रीहरिकृष्णमानसपूजनस्तोत्रं समाप्तम् ॥*

## २१९ ● ॥ मालिनीवृत्तम् ॥

प्रकटभगवतः श्रीमूर्त्तिमात्मेक्षणाग्रे करूणरसमयेक्षां सर्वदैवेक्षमात्रः ॥
विशदसमनुवृत्यातोषिताकिञ्चनेष्टो जयति स रघुवीराचार्यवर्यौ अत्र कार्ष्णिः ।।१।।

इह भुवि जनताया उत्तमं क्षेममिच्चञ्जनक इव शिशूनां शश्वदेवाखिलानाम् ॥
हितमसुखविहीनं चिन्तयन्सर्वविद्यो जयति स रघुवीराचार्यवर्यौ अत्र कार्ष्णिः ॥२॥
मुनिगृहिजनहृद्योत्कृष्टचारूस्वभावः सदयमधुरदृष्ट्याविक्षितश्रीशभक्तः ॥
भ्रूकुटिविलसितातित्रासिताधर्मसर्गो जयति स रघुवीराचार्यवर्यौ अत्र कार्ष्णिः ॥३॥
प्रणयरशनयावै यस्यबद्धांघ्रिपद्मः क्षणमपि हरिकृष्णो हृत्सरोजं विहाय ॥
सलिलमिव रसो न स्तातुमन्यत्र शक्तो जयति स रघुवीराचार्यवर्यौ अत्र कार्ष्णिः ॥४॥
जगति जनचयानां सद्गुणैश्वर्यहार्दैः स्वयमयमवतीर्णः किं प्रभु रामचन्द्रः ॥
भ्रममिति जनयन् यो रञ्जनैश्चाखिलानां जयति स रघुवीराचार्यवर्यौ अत्र कार्ष्णिः ॥५॥
प्रियमुनिरूपरिष्टान्नामतो वै गृहस्थः सहजजितशिवारिः सर्वदैवोर्ध्वरेतः ॥
प्रणतउरूसुरेशैः सिद्धिभिर्योगिवृन्दैः जयति स रघुवीराचार्यवर्यौ अत्र कार्ष्णिः ॥६॥
क्वचिदपि नहि सक्तो यो विनाधार्मिमेकं तनुभृतहृदविद्याध्वान्तनाशे अर्कतुल्यः ॥
अतिशयवरयोगैश्वर्यविस्मापितांगो जयति स रघुवीराचार्यवर्यौ अत्र कार्ष्णिः ॥७॥
सकलजनमनोद्दक्कर्षक प्रौढमूर्तिर्भगवदभिमुकं नृन्नाशु दक्षो विधातुम् ॥
जनसुखकरशीलः साधुतायाः खनिर्यो जयति स रघुवीराचार्यवर्यौ अत्र कार्ष्णिः ॥८॥

*॥ इत्यचिन्त्यानन्दवर्णि वरचितं श्रीहरिकृष्णनन्दन गुणवर्णनाष्टकम् ॥*

## २२० ● ॥ शार्दुलविक्रिडीतम् वृत्तम् ॥

स्वीयाचार्यपदं दिदेश भगवान् यस्मै प्रसन्नः स्वयं दक्षं धैर्यगुणाधरीकृतमहापाथौनिधिं धार्मिकम् ॥
सेव्यं श्रीरघुवीरमानतपदं भक्तव्रजैः सादरं वन्दे श्रीहरिकृष्णसूनुमनिशं तं देशिकेन्द्रं मुदा ॥१॥
श्रीमद्भक्तिवृषात्मजेन सहजानन्देन सत्प्रेयसा यस्मै श्रीहरिणा स्वकीयजनता धर्मावनाय क्षितौ ॥
दत्तं भक्तजनैर्नतंतमुरूभिः सद्देशिकत्वं वन्दे अहं सुधियं गुरुं विपुलया अयोध्याप्रसादं मुदा ॥२॥
पुण्येधर्मकुलेस्वकीयजननं तत्रापि धर्मज्ञता प्रीतिः साधुजने भवाब्धितरणे भक्तिश्च धर्मात्मजे ॥
तत्रापीह हरेः स्वरूपवयुनं प्राग् जन्मपुण्योदयाद्योनारायणदत्तनामविदितो जीयात्स धर्मान्वये ॥३॥
यो बाल्ये वयसि स्वकीयभवनं हित्वा जनान् शिक्षयन्योगाभ्यासमचीकरत्स्वहृदये स्वं रूपमाचिन्तयत् ॥
सत्संगं स्वमपीपृथन्निजजनेभ्योदात्स्वबोधं परं तं नारायणदत्त एष नमति स्नेहातिभक्त्यान्वहम् ॥४॥

॥ उपजाति ॥

श्री स्वामिनारायणदेवदेवं कलौ युगे पामरजीवसंधान्। कृपार्द्रदृष्ट्यपि समुद्धरन्तं नमामि नारायणदत्तनामा ॥५॥

## २२१ ● ॥ उपजातिवृत्तम् ॥

श्रीकोसलान्तः पतितेप्रसिद्धेयः छुप्पयस्तीर्थ्थपुरेपवित्रे । जन्मग्रहीन्निर्ज्जरधर्मगेहे धर्मात्मजं तं हृदयेस्मरामि ॥१॥
सद्धर्मनाशावृषपवृद्धिहेतूसद्रक्षणंदुष्टनिबर्हणञ्च । शापंमुनेः प्रादुरभूद्विचिन्त्य धर्मात्जं तं हृदये स्मरामि ॥२॥

आबालदुष्टासुरवृन्दपृथ्वीभारंहरन्कौतुकमादधद्यः । स्वानां सदारक्षणमत्रकर्त्तुं धर्मात्मजं तं हृदये स्मरामि ॥३॥
कृतोपवितः पितृदत्तमोक्षः वनेवसन्योगमशिक्षदाद्यम् । तीर्थेषुसर्वेषुपरिभ्रमन्योधर्मात्मजं तं हृदये स्मरामि ॥४॥
रामानुजं मुक्तमुनिं च रामानन्दं तथा अवाप्यतदीयपीठम् । सत्संगवृद्धिसकलां व्याधाद्यो दर्मात्मजं तं हृदये स्मरामि ॥५॥
विनाश्रमेणैवसमाधितिष्ठान्सतो असतोजीवगणान्विधाय । करोतिदिव्याक्षरेधामभाजो धर्मात्मजं तं हृदये स्मरामि ॥६॥
आचार्यसन्मन्दिर देशपीठद्वयं तथा आम्नायसुरक्षणाय । ग्रन्थान्विधाया अक्षरधामयो अगाद् धर्मात्मजं तं हृदये स्मरामि ॥७॥
स्वल्पं गुणं शैलसमं विधायरंकनिरातंकसमृद्धिभाजम् । यस्यानुकम्पानहि किं प्रकुर्यात् धर्मात्मजं तं हृदये स्मरामि ॥८॥
लक्ष्मीप्रसादाव्हयदेशिकेनमयाकृतंस्तोत्रमिहास्त्वविघ्नम् । श्रीनीलकण्ठोमयितेनतुष्टः स्तान्मंगलंपाठकृतांनविघ्नः ॥९॥

*॥ इति श्रीसहजानन्दस्वामिसंस्थापित श्रीलक्ष्मीनारायणदेवपीठस्थानचार्यवर्य श्रीविहिरिलालात्मज श्रीलक्ष्मीप्रसादाचार्य विरचितंस्तोत्रादावविघ्नाष्टकं समाप्तम् ॥*

## २२२ ● ॥ माँता सरस्वतिनी आरती ॥

जय भगवती वाणी, २. निजजन शर्मकारीत्वं बहुतरकल्याणी । जय.. ॥१॥
सुन्दरगौरसुवर्णा त्रीभुवनकमनीया, २. दुरवृतैश्चदुरापा सुरमुनी नमनीया । जय.. ॥२॥
ताप व्रात निहंत्री त्वमसिश्रुतिवंद्या, २. पुण्य समुच्चय तंत्री शश्वन्नीरवद्या । जय.. ॥३॥
शारदचन्द्र सुवदना सुरूचिरगतीभंगी, २. चंचल खंजन नेत्रा विलसित सारंगी । जय.. ॥४॥

नूपुर मंजु पदाब्जी जनमोहनकर्त्री, २. सुकलित कांची कलपा कलिकल्मष हन्त्री । जय.. ॥५॥
शर्मकरं चरणं ते शरणं करवाणी, २. मातस्त्वत्पादसेवा ददह करुमाणि । जय.. ॥६॥
विलस्त्य दिव्य सुधनामणि मौतिक हारा, २. कृष्णानन्द मनोज्ञाभवमथ संहारा । जय... ॥७॥

## २२३ ● ॥ श्रीविष्णुगायत्री महामन्त्र ॥

अस्य श्रीविष्णुगायत्रीमन्त्रस्य नारद ऋषिः । गायत्री छन्दः । श्रीविष्णुपरमात्मा देवता । ज्ञानं बीजम् । ध्यानं शक्तिः । आज्ञा कीलकम् । श्रीविष्णुदेवताप्रीत्यर्थे जपे । विनियोगः ।

॥ अथ ऋष्यादिन्यासः ॥

ॐ नारद ऋषये नमः शिरसि । ॐ गायत्री छन्दसे नमः मुखे । ॐ श्रीविष्णुपरमात्मदेवतायै नमः हृदये । ॐ ज्ञानबीजाय नमः नाभौ । ॐ ध्यानशक्तये नमः पादयोः । ॐ आज्ञाकीलकाय नमः सर्वंगे ॥

॥ अथ करन्यासः ॥

ॐ नारायणाय इति अंगुष्ठाभ्यां नमः । ॐ विद्महे इति तर्जनीभ्यां नमः । ॐ वासुदेवाय इति मध्यामांभ्यां नमः । ॐ धीमहि इति अनामिकाभ्यां नमः । ॐ तन्नो विष्णुः इति कनिष्ठिकाभ्यां नमः । ॐ प्रचोदयात् इति करतलकरृष्ठाभ्यां नमः ॥

॥ अथ षडंग न्यासः ॥

ॐ नारायणाय इति हृदयाय नमः । ॐ विद्महे इति शिरसे नमः । ॐ वासुदेय इति शिखायै नमः । ॐ

धीमहि इति कवचाय नमः । ॐ तन्नोविष्णुः इति नेत्राभ्यां नमः । ॐ प्रचोदयात् इति अस्त्राय नमः ।

॥ अथ ध्यानम् ॥

श्रीविष्णुवामपार्श्वस्थां सर्वकालमनुवृत्ताम् । कोटिशारदपूर्णेन्दुप्रभैकैकांगसुन्दराम् ॥१॥
कौसुम्भवसनां गौरीं नानालंकारशोभनाम् । शान्तां सहासवदनां महापुरूषलक्षणाम् ॥२॥
कमलं दक्षिणे पाणौ वामेऽमृतघंटं करे । दधतीं देवदेवीभिर्वन्दितां पूजितां मुहुः ॥३॥
मुक्तिमेकान्तिकीं तूर्णं भक्तेभ्यो ददतीं श्रियम् । ध्यायामि हृदये नित्यं गायत्रीं वैष्णवीमहम् ॥४॥

॥ श्रीविष्णुगायत्रीमन्त्रः ॥

ॐ नारायणाय विद्महे वासुदेय धीमहि, तन्नो विष्णुः प्रचोदयात् ॥

અર્થ :- નારાયણને અમે જાણીએ છીએ, વાસુદેવનું ધ્યાન કરીએ છીએ, તો તે ધ્યાનમાં વિષ્ણુ ભગવાન અમને પ્રેરણા કરો.

अनेन यथाशक्तिकृतेन श्रीविष्णुगात्रीमन्त्रस्यजपेन भगवान श्रीस्वामिनारायणः प्रीयताम् ।

एम बोलीने करेलो जप भगवान श्रीस्वामिनारायणने निवेदन करवो.

॥ अन्य मन्त्राः ॥

द्वादशाक्षरमन्त्रः। ॐ नमो भगवते वासुदेवाय ।

अष्टाक्षरमन्त्रः ॐ नमो नारायणाय ।

षडक्षरमन्त्रः । ॐ विष्णवे नमः ।

अष्टाक्षरमन्त्रः। श्रीकृष्ण त्वं गतिर्मम ।

ब्रह्माहंकृष्णदासोऽस्मि ॥ (स.जी.प्र.१अ.१६)

षडक्षरीनाममन्त्रः स्वामिनारायण

शरणमन्त्रः कालमायापापकर्मयमदूतभयादहम् । श्रीकृष्णदेवं शरणं प्रपन्नोऽस्मि स पातु माम ॥

आवाहनमन्त्रः उत्तिष्ठोत्तिष्ठगोविन्द उत्तिष्ठ गरूडध्वजः । उत्तिष्ठ कमलाकान्त त्रैलोक्यं मंगलं कुरू ॥

उत्तिष्ठोत्तिष्ट हे नाथ स्वामिनारायण प्रभुः । धर्मसूनो दयासिंधो स्वेषां श्रेयः परं कुरू ॥

आगच्छ भगवन् देव स्वस्थानात् परमेश्वर । अहं पूजां करिष्यामि सदा त्वं सम्मुखो भव ॥

विसर्जनमन्त्रः। स्वस्थानं गच्छदेवेश पूजामादायमामकीम् । ईष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥

तुलसीमालामन्त्रः तुलसीकाष्ठसम्भूते माले कृष्णजनप्रिये । बिभर्मित्वामहंकण्ठेकुरूमांकृष्णवल्लभम् ॥

तुलसीग्रहणमन्त्रः तुलस्यामृतजन्मासि सदा त्वं केशवप्रिये । केशवार्थे विचिन्वामि वरदा भव शोभने ॥

क्षमायाचनमन्त्रः अपराधसहस्त्राणि क्रियतेऽहर्निशं मया ।दासोऽयमिति मां मत्वा क्षमस्व पुरूषोत्तमः ॥

॥ अथाष्टोत्तरशतार्णः श्रीहनुमन्मंत्रः ॥

ॐ ह्राँ ह्रीँ ह्रूँ नमोहनुमते धर्मकुलेष्टदेव जय जय मम सकलवैरिभयं नाशय नाशय सर्पगोधा वृश्चिकादिविषं

निवारय निवारयाखिल रोगोपद्रवमुत्सादयोत्सादय भूतडाकिनी ब्रह्मराक्षसादि पीडांग्रसग्रस परमन्त्रयंत्र कृत्यांश्छिधिर्छिंधि घेघेघे हुंहुंहुं फटफट फटस्वाहा ॥

अष्टोत्तरशतार्णं यो मारूतेः प्रजपेन्मनुम् । स वैरिविषरूग्भूतमन्त्रात्ते मुच्यते द्रुतम् ॥१॥

॥ अथ चतुः पांचाशदर्णः श्रीहनुमन्मन्त्रः ॥

ॐ जय जय हनुमन्महावीरहरिप्रिय मम दारिर्द्यदुःखमुत्सारयोत्सारय वंशवृद्धिं कुरू कुरू मनोभीष्टकार्यं साधय साधय हुँ फट् स्वाहा ॥

चतुः पंचाशदर्णं यो जपेन्मंत्रं हनुमतः । स लभेत धनं पुत्रं यद्यच्चाभीष्टमात्मनः ॥२॥

अस्य न्यासध्यानं च कार्यम् ॥ अथसप्तविंशत्यर्ण श्रीहनुमन्मंन्त्रः ॥

ॐ नमो हनुमते भक्तिधर्मानंददायकाय श्रीहरिप्रियाय हुँ फट् स्वाहा ॥

गृहस्थोवाविरक्तो वा सप्तविशतिवर्णकम् । योजपेन्मारूतिर्मन्त्रं सस्वाभीष्टमवाप्नुयात् ॥

॥ इति गोपाळानन्दमुनि विरचित मन्त्राः ॥

॥ अथ श्री गोपालानन्द स्वामी कृत श्रीहरिनो महामन्त्रः ॥

ॐ हौँ हृँ ॐ श्रीँ ठँ हीँ पत्रे पत्रे देवानां ॐ भूते द्वीपे हीँ सौँ गौँ त्रीँ योग पीवात्मानं हाँ हृँ भगवते ग्लाँ महाष्टयोगसिद्धिं माँ प्रदात्रे श्री सहजानन्द परमात्मने नमः औँ ठँ भँ एँ हाँ ज्रूँ ॐ ॥

## २२४ ● ॥ अथ जनमंगल जपादौ संकल्पः ॥

ममसर्वारिष्ट प्रशमनार्थं सर्वाभीष्टफलाप्तये जनमंगलाख्य स्तोत्रपाठं जपमहं करिष्ये तदंगत्वेन न्यासध्यानादिकं करिष्ये ।

॥ श्रीजनमंगल स्तोत्रम् ॥

नमोनमः श्रीहरिये बुद्धिदायदयावते । भक्तिधर्मांगजाताय भक्तकल्पद्रुमाय च ।।१।।
सुगन्धपुष्पहाराद्यैर्विविधैरूपहारकैः । संपूतायभक्तौघैःसीताम्बरधरायच ।।२।।
नाम्नामष्टोत्तरशतं चतुर्वर्गमभीप्सताम् । सद्यःफलप्रदंनृणां तस्यवक्ष्यामिसत्पतेः ।।३।।

ॐ अस्यश्रीजनमंगलाख्य श्रीहर्यष्टोत्तरशतनामस्तोत्रमन्त्रस्य शतानन्दऋषिः ।
अनुष्टुप्छन्दः धर्मनन्दनः श्रीहरिर्देवता । धार्मिकइतिबीजम् । बृहद्व्रतधर इति शक्तिः । भक्तिनन्दन इतिकीलकम् । चतुर्वर्गसिध्यर्थेजपे विनियोगः ॥

॥ अथषडंग न्यासः ॥

ॐ शतानन्द ऋषये नमः शिरसि। ॐ अनुष्टुपछन्दसे नमः मुखे। ॐ धर्मनन्दनः श्रीहरि देवतायै नमः हृदये ।
ॐ धार्मिक बीजाय नमः नाभौ । ॐ बृहद्धधरशक्त्ये नमः गुह्ये । ॐ भक्तिनन्दन कीलकाय नमः पादयोः । चतुर्वर्ग सिद्ध्यर्थे जपे विनियोगाय नमः सर्वांगे ।

॥ अथ करन्यासः ॥

ॐ श्रीकृष्णोवासुदेवश्च इत्यंगुष्ठाभ्यां नमः । ॐ योगेश्वरोयोगकलाप्रवृत्ति रिति तर्जनीभ्यां नमः । ॐ अतिकारूण्यनयन उद्धवाध्वप्रवर्तकरिति मध्यमाभ्यां नमः । ॐ प्रकाशरूपो निर्दम्भःसर्वजीवहितावह इत्यनामिकाभ्यां नमः । ॐ कन्दर्पदर्पदलनः वैष्णवक्रतुकारकः इति कनिष्ठिकाभ्यां नमः । ॐ अजातवैरि निर्लोभः महापुरूष आत्मद इति करतलकरपृष्ठाभ्यां नमः ॥

॥ अथ हृदयादि न्यासः ॥

ॐ श्रीकृष्णो वासुदेवश्च इति हृदयाय नमः । ॐ योगेश्वरोयोगकलाप्रवृतिः इति शिरसे स्वाहाः । ॐ अतिकारूण्यनयन इति शिखायै वषट् ।

ॐ प्रकाशरूपोनिर्दम्भः इति कवचायहुम् । ॐ कन्दर्पदर्पदलनः इति नेत्रत्रयाय वौषट् । ॐ अजातवैरि निर्लोभः इति अस्त्राय फट् ।

॥ अथ ध्यानम् ॥

वर्णिवेषरमणीयदर्शनंमन्दहासरूचिराननाम्बुजम् । पूजितंसुरनरोत्तमैर्मुदाधर्मनन्दनमहंविचिन्तये ॥४॥
श्रीकृष्णोवासुदेवश्च नरनारायण प्रभुः । भक्तिधर्मात्मजोऽजन्मा कृष्णोनारायणोहरिः ॥५॥
हरिकृष्णोघनश्यामो धार्मिकोभक्तिनन्दनः । बृहद्व्रतधरःशुद्धो राधाकृष्णेष्टदैवतः ॥६॥
मरूतसुतप्रियःकालीभैरवाद्यतिभीषणः ।जितेन्द्रियोजिताहार स्तीव्रवैराग्य आस्तिकः ॥७॥

योगेश्वरोयोगकला प्रवृत्तिरतिधैर्यवान् । ज्ञानिपरमहंसश्च तीर्थकृत्तैर्थिकार्चितः ॥८॥
क्षमानिधिः सदोन्निद्रो ध्यननिष्ठस्तपःप्रियः । सिद्धेश्वरः स्वतन्त्रश्च ब्रह्मविद्याप्रवर्त्तकः ॥९॥
पाषण्डोच्छेदनपटुः स्वस्वरूपाचलस्थितिः । प्रशान्तमूर्तिर्निर्दोषः असुरगुर्वादिमोहनः ॥१०॥
अतिकारूण्यनयन उद्धवाध्वप्रवत्तर्कः । महावृत्तःसाधुशीलः साधुविप्रप्रपूजकः ॥११॥
अहिंसयज्ञप्रस्तोता साकारब्रह्मवर्णनः ।स्वामिनारायणः स्वामी कालदोषनिवारकः ॥१२॥
सच्छास्त्रव्यसनः सद्यः समाधिस्थितिकारकः। कृष्णार्चास्थापनकरः कौलद्विट् कलितारकः ॥१३॥
प्रकाशरूपोनिर्दम्भः सर्वजीवहितावहः । भक्तिसंपषकोवाग्मीचतुर्वगफलप्रदः ॥१४॥
निर्मत्सरोभक्तवर्माबुद्धिदातातिपावनः । अबुद्धिहृद् ब्रह्मधाम दर्शकश्चापराजितः ॥१५॥
आसमुद्रान्तसत्कीर्त्तिः श्रितसंसृतिमोचनः । उदारः सहजानन्दः साध्वीधर्मप्रवर्त्तकः ॥१६॥
कन्दर्पदर्पदलनो वैष्णवक्रतुकारकः । पञ्चायतनपूजाकृन्नैष्ठिकव्रतपोषकः ॥१७॥
प्रगल्भोनिःस्पृहःसत्यप्रतिज्ञोभक्तवत्सलः । अरोषणोदीर्घदर्शी षडूर्मिविजयः क्षमः ॥१८॥
निरहंकृतिरद्रोह रूजुः सर्वोपकारकः । नियामकश्चोपशम स्थितिर्विनयवान्गुरूः ॥१९॥
अजातवैरीनिर्लोभो महापुरूष आत्मदः । अखण्डितार्षमर्यादो व्याससिद्धान्तबोधकः ॥२०॥
मनोनिग्रहयुक्तिज्ञो यमदूतविमोचकः । पूर्णकामः सत्यवादी गुणग्राहीगतस्मयः ॥२१॥
सदाचारप्रियतरः पुण्यश्रवणकीर्त्तनः । सर्वमंगलसद्रूप नानागुणविचेष्टितः ॥२२॥

इत्येतत्परमंस्तोत्रं जनमंगलसंज्ञितम् ।यःपठेत्तेनपठितं भवेद्वैसर्वमंगलम् ।।२३।।
यःपठेच्छृणुयाद्भक्त्या त्रिकालंश्रावयेच्चवा । एतत्तस्यतु पापानि नश्येयुःकिलसर्वशः ।।२४।।
एतत्संसेवमानानां पुरूषार्थचतुष्टये । दुर्लभंनास्तिकिमपि हरिकृष्णप्रसादतः ।।२५।।
भूतप्रेतपिशाचानां डाकिनीब्रह्मरक्षसाम् । योगिनीनांतथाबालग्रहादीनांमुपद्रवः ।।२६।।
अभिचारोरिपुकृतो रोगश्चान्योप्युपद्रवः । अयुतावर्त्तनादस्य नश्यत्येव न संशयः ।।२७।।
दशावृत्त्याप्रतिदिनमस्याभीष्टंसुखंभवेत् । गृहिभिस्त्यागिभिश्चापि पठनीयमिदं ततः ।।२८।।

*।। इति श्रीशतानन्दमुनिविरचितम श्रीहर्यष्टोत्तरशतनामस्तोत्रं जनमंगलाख्यं संपूर्णम् ।।*

## २२५ • ।। अथ सर्वमंगलस्तोत्रम् ।।

स्वामिनारायणं कृष्णं भक्तिधर्मात्मजं भुवि । प्रादुर्भूतमहं वन्दे पातुं सद्धर्ममासुरात् ।।१।।
कलौ घोरेऽपि यद्भक्तोऽष्टांगयोगश्रमं विना । सद्यः समाधौ तद्धाम गोलोकादि समीक्षते ।।२।।
यन्नामोचारणादेव मलौघाः कलिसंभवाः । सद्यः एव विनश्यन्ति तमीडे धर्मनन्दम् ।।३।।
नाम्नां सहस्रं तस्याहं ब्रूवे सत्संगिजीवनात् । उद्धृतं यस्य पाठेन सर्वं तत्पठितं भवेत् ।।४।।

ॐ अस्य श्रीसर्वमंगलाख्यस्य श्रीहरिनामसहस्त्रस्य शतानन्द ऋषिः । अनुष्टुप छन्दः । धर्मनन्दनः श्रीहरिर्देवता । धर्मप्रिय इति बीजम् । नैष्ठिकेन्द्र इति शक्तिः । भक्तिपोषक इति कीलकम् । मम सकलमनोरथसिद्ध्यर्थे जपे विनियोगः ।।

॥ अथ करन्यासः ॥

ॐ श्रीहरये नमोंऽगुष्ठाभ्यां नमः । ॐ कृष्णाय नमस्तर्जनीभ्यां नमः । ॐ हरिकृष्णाय नमो मध्यमाभ्यां नमः । ॐ नीलकण्ठाय नमो अनामिकाभ्यां नमः । ॐ नारायणाय नमः कनिकष्ठिकाभ्यां नमः । ॐ स्वामिनारायणाय नमः करतलकरपृष्ठाभ्यां नमः ॥

॥ अथ षडंगन्यासः ॥

ॐ श्रीहरये नमो हृदयाय नमः । ॐ कृष्णाय नमः शिरसे स्वाहा । ॐ हरिकृष्णाय नमः शिखायै वषट् । ॐ नीलकण्ठाय नमः कवचाय हुम् । ॐ नारायणाय नमो नेत्राभ्यां वौषट् । ॐ स्वामिनारायणाय नमोऽस्त्राय फट् ॥

॥ अथ ध्यानम् ॥

श्रीमच्छारदपूर्णचन्द्रविलसत्स्मेराननं श्रीहरिं तुंगेपीठवरे स्थितं परिवृत्तं सद्भक्तवृन्दैर्यथा ॥
ताराभिर्विधुर्मर्च्यमानमुरूधा तैश्चन्दनैः कौसुमैहरिः शेखरपंक्तिभिश्च हृदये सुक्लांबरं चिन्तये ॥५॥
स्वामी ब्रह्म परब्रह्म श्रीकृष्णः पुरूषोत्तमः । ब्रह्मधामा वासुदेव ईशेशो दिव्यविग्रहः ॥६॥
सुव्रतात्मा जगन्नाथ इष्टदः करूणानिधिः । प्रतापसिहशरणं शतानन्दवरप्रदः ॥७॥
नारायणो नरसखो बदरीशस्तपः प्रियः । स्वधर्मस्थो मुनिध्येयो महर्षिगणपूजितः ॥८॥
अधर्मवैरी दुर्वासः सप्तधर्माद्यनुग्रहः । धर्मावतारो धर्मात्मा भक्तिधर्मानुशासनः ॥९॥

रामानन्दो जनानन्दः औद्धवाध्वप्रवर्तकः । विष्णुयागप्रियो भक्तिधर्माराधित ईश्वरः ॥१०॥
वृन्दावनेन्दुर्वरदोमुनिसंघहितावहः । द्रोण्यर्तिहर्ता विघ्नेशो धर्मसंकष्टनाशनः ॥११॥
भक्तिधर्मात्मजो भूमा भक्तिधर्मतपः फलम् । सावर्णिगोत्रतिलकोमध्वाद्यनवमीजनुः ॥१२॥
जनमंगलदिव्यांगो नराकृतिरलौकिकः । भूतलानन्दजनको द्विजेन्द्रकुलभूषणम् ॥१३॥
रामप्रतापावरजो हनूमदभिरक्षितः । हरिः कृष्णो हरिकृष्णो नीलकण्ठो वृषात्मजः ॥१४॥
स्त्रीवृन्दलालितो भक्तिनन्दनः प्रियदर्शनः । हरिप्रसादहर्षाब्धिधर्मपत्नीस्तनन्धयः ॥१५॥
क्रीडद्बालव्रजानन्दः कालीदत्तमदापनुत् । इच्छारामाग्रजोऽयोध्यावासो बाल्यमनोहरः ॥१६॥
सरयूनियतस्नातः सीतारामेक्षणोत्सुकः । प्रदक्षिणीकृतायोध्यः करात्तजपमालिकः ॥१७॥
वर्णिव्रतधरो दान्तो गुरूभक्तः उदारधीः । अधीताखिलसच्छास्त्रः सामगो निरहंकृतिः ॥१८॥
प्रसूपदिष्टसांगात्मभक्तिरज्ञानहारकः । पितृप्रत्तात्मविज्ञानः पितृदिव्यगतिप्रदः ॥१९॥
निराशस्तीव्रवैराग्यः सत्त्यक्तगृहबान्धवः । वर्णिवेषो महासत्त्वः स्वजनाज्ञातनिर्गमः ॥२०॥
असंलंबितसच्छास्त्रसारोद्धाराल्पपुस्तकः । गणेशस्मरणस्तीर्णसरयूदैत्यमोहनः ॥२१॥
वनवासरूचिः श्राद्धो विप्रेन्द्रो नैष्ठिकाग्रणीः । हिमाद्रिसानुचरणो निरभयो भीतभैरवः ॥२२॥
निःशंकस्थो हनूमद्दत्तस्वादुफलाशनः । पुलहाश्रमवासोऽर्कप्रीणनोऽर्कसमीक्षणः ॥२३॥
ऊर्ध्वदोरेकपादस्थो विस्मापिततपोधनः । कृशो महातपाः शुद्धोभक्तिधर्मनिषेवितः ॥२४॥

गोपालयोगिसम्प्राप्तसांगयोगोऽतिधैर्यवान् । योगक्रियापटुः कर्ता कृतज्ञो भूरितीर्थकृत् ॥२५॥
ब्रह्मात्मसंस्थितिः शान्तः सिद्धवल्लभपूजितः । गोपालरक्षकः सिद्धदर्पहा मान्त्रिकार्चितः ॥२६॥
तैलंगविप्रदोषघ्नः कृत्याभीषणदर्शनः । पिबैकमानहाकालभैरवत्रासदेक्षणः ॥२७॥
जगन्नाथपुरावासः आसुरावेशहृद्विभुः । धार्मिकोऽसुरगुर्वोघोच्छेदहेतुरविक्रियः ॥२८॥
सत्रधर्मार्चितः कान्तः स्वप्रतापाक्षितासुरः । नानातीर्थकृतावासः प्रावृडभ्रावकाशकृत् ॥२९॥
ग्रीष्मसाधितपंचाग्निः शिशिराम्बुस्थितिः शुचिः । निर्मानो निर्ममोऽस्नेहो निष्कामो निर्जितेन्द्रियः ॥३०॥
जितनिद्रो जितक्रोधो निर्मदो निःस्पृहोऽचलः । कृच्छ्रव्रती सत्यवादी क्षमी धमनिसन्ततः ॥३१॥
जितत्र्यवस्थो मेधावी दम्भहीनस्तपोधनः । उपवीतीवल्कवासास्तरूमूलनिकेतनः ॥३२॥
अहिंसवृत्तिस्तेजस्वी निर्निमेषविलोचनः । धनुर्मुक्तेषुगमनो ब्रह्मदर्शी महामतीः ॥३३॥
अयाचिताहारो निर्द्वन्द्वो निष्परिग्रहः । वाय्वाहारो जलाहारो मिताहारोऽक्षतांगः ॥३४॥
ज्ञानी ध्यानी जितस्वादः प्रत्याहारहठोऽस्मयः । पावनस्तैर्थिकगुरूर्वणिराजो दयाकरः ॥३५॥
जटी कौपीनवासनः शालग्रामतृषाहरः । शिवाप्तसक्तुरक्षोभ्यो निःसंगोऽध्यात्मवित्तमः ॥३६॥
सदासमाधिरानन्दी निर्दोषो दोषनाशनः । कान्तारगतिरेकाकीसर्वसाधुगुणालयः ॥३७॥
तैर्थिकस्तीर्थधर्मज्ञसतीर्थस्थाधर्मनाशनः । अनादृतवपुः सौख्यः प्राणायामपरो व्रती ॥३८॥
ऋषिवृत्तिर्मुनिर्मौनीनिर्विकल्पोऽल्पभाषणः । वस्त्रापूतोदकपिबो यावदर्थांगचेष्टितः ॥३९॥

ब्रह्माज्ञस्वैरवर्जित्वबोधिग्रन्थविवर्जनः । निरूपानदपृष्ध्वाघोरारण्यचरोऽभ्रमः ॥४०॥
स्त्र्यंगगन्धासहोऽसक्तो जडांगिरसवर्तनः । ऊर्ध्वरेताः ब्रह्मचारी योगी योगज्ञसन्नतः ॥४१॥
योगीन्द्रदुश्चराचारः सौराष्ट्रजनपावनः । लोजलोकमहानन्दः साधुः साधुप्रपूजितः ॥४२॥
अनुच्चारितदुर्वाक्यो मधुराक्षरभाषणः । त्यागिमान्यो महायोगी सदाश्चर्यक्रियः स्थिरः ॥४३॥
ध्याता ध्यातृमनोदर्शीमनस्वी मानदो मृदु । प्रश्नोत्तरपटुर्वेदतत्त्वज्ञो बुद्धिमान्बुधः ॥४४॥
उद्धवेक्षोत्सुकोऽनन्तः पत्रीलेखपटुः प्रभुः । पत्र्युत्तरज्ञातनिजैश्वर्यसाध्वतिमानितः ॥४५॥
रामानन्दस्वामिवीक्षानन्दः साधुप्रियः । बोधन्याप्तमहादिक्षो गुरूसेवापरो यमी ॥ ४६॥
भक्तो नारायणमुनिः सहजानन्द आत्मदृक् । गुरूमान्यो गुरूप्रेष्टो गुर्वन्तिककृतांजलिः ॥४७॥
गुर्वाज्ञाकृततत्पार्श्वोपवेशगमनक्रियः । नारायणानन्यमतिरेकान्तिकमुनिप्रियः ॥४८॥
वर्णीन्द्रो नैष्ठीकप्रेष्ठ एकान्तिकसदर्चकः । यशस्वी भूरितेजस्वी वैदिको ब्रह्मवर्चसी ॥४९॥
सन्न्यायवर्ती निर्दोषो भक्तिहर्षविवर्धनः । गृहीतहितवाक्सर्वभूततत्त्वविदूहवान् ॥५०॥
सत्यप्रियः सत्यपरो निष्कामनरवल्लभः । अद्रोहकः सदोद्योगी षडूर्मिविजयक्षमः ॥५१॥
धर्मकार्यक्षिप्रकारी दीर्घदर्शी विचारवान् । देशकालाद्यविहतस्वस्वरूपाचलस्थितिः ॥५२॥
सत्तमो दमधृद्दक्षो विनीतः स्मृतिमान् ऋजुः । सच्छास्त्रव्यसनोऽव्यग्रीऽभिमानिपुरूषारूचिः ॥५३॥
अतिसर्वमतिर्वाग्मी सत्संगिजनवल्लभः । अप्रमतोऽतिप्रगल्भोऽनलसोऽन्यगुणग्रहः ॥५४॥

सदाचारप्रियः शुष्कज्ञानिवादतमोरविः । कृष्णार्पितान्नगन्धादिदेवतापितृयाजकः ॥५५॥
सद्यः प्रश्नसमाधानविस्मापितसभाजनः । अजातशत्रुः समदृक्धर्मनिष्ठामहादरः ॥५६॥
अनसूयोऽचलप्रज्ञः कामशास्त्रविवर्जनः । दीनाल्पविक्लवत्वेक्षाजाततीव्रव्यथाकुलः ॥५७॥
स्वधर्मादिगुणोपेतहर्यभक्तजनारूचिः । सन्मण्डलावासरूचि सन्मण्डलपरायणम् ॥५८॥
सच्छास्त्रनिन्दितत्यागी प्रशस्तार्थनिषेवकः । सम्पदापत्समो मोक्षधिषणः प्रतिभानवान् ॥५९॥
सुचिरश्रुतसच्छास्त्रो नापमानितसज्जनः । वाक्यार्थक्षिप्रविच्छत्रुमित्रदत्तसमोत्तरः ॥६०॥
अग्राह्यावस्त्वनाकांक्षी नष्टवस्तुशुचोज्झितः । यथोचितसमारम्भः सफलारब्धसत्क्रियः ॥६१॥
सच्छास्त्रानुगतप्रज्ञो दैवपित्र्यस्वकर्मकृत् । अपैशुन्यकृदद्यूतः पापिसंसर्ग्यनादरः ॥६२॥
ब्रह्मनिन्दाश्रवःखेदः स्त्रीप्रसंगभृशारूचिः । अकार्याचरणरहीतः समयोचितभाषणः ॥६३॥
निर्लज्जानतसद्विप्रगुरूदेवप्पदाम्बुजः । मुक्तानन्दानुगस्तुष्टो गुणाब्धि सन्मनोहरः ॥६४॥
गुरूदत्तजनस्वाम्यः सुरम्यविषयारूचिः । गुरूयाचितभक्तान्तदुःखस्वप्राप्तिसद्वरः ॥६५॥
अतिमानुषसत्कर्मा सुखसेव्योऽखिलेष्टदः । प्रपन्नाभयदः श्रीमानुत्तमोत्तम आत्मवान् ॥६६॥
तापत्रयत्रितयहृद्वार्तः सदसद्व्यक्तिवित्तमः । सत्पतिः सर्वहितकृज्ज्ञानदो भवमोचकः ॥६७॥
भूरिप्रतापो निर्मोहो महाराजो नृपार्चितः । अधृष्योऽविकृतोऽजयो शरण्यो भक्तवत्सलः ॥६८॥
अतर्क्योऽनुपमोऽपारोऽप्रमादोऽव्यय उज्ज्वलः । धर्मशंसी धर्महेतुर्वेदगूढार्थबोधकः ॥६९॥

कालमायाभयत्राता भक्तवर्म सुमंगलः । उपासनारीतिवक्ता ब्रह्मधामप्रदर्शकः ॥७०॥
ब्रह्मभूतपरब्रह्मोपासनास्थापकोऽक्षरः । कन्दर्पदर्पदलनो नैष्ठिकव्रतपोषकः ॥७१॥
अदीनदिव्यचरितो मनोनिग्रह्युक्तिदः । वरणीयोऽन्यदुःखज्ञः संसारार्णवनाविकः ॥७२॥
स्वामिनारायणो वाक्यसुधातर्पितसत्सभः । विधवास्पर्शदोषातिप्रख्यातोपशमस्थितिः ॥७३॥
प्रतिबिम्बांशवादादिमततूलदवानलः । सभक्तिधर्मधर्माढ्यभक्तियोगप्रवर्तकः ॥७४॥
प्रोक्तासद्देशकालादिदोषो निष्कपटप्रियः । सद्देशकालादिगुणज्ञापकः सत्प्रशंसकः ॥७५॥
स्वधर्मशिथिलाप्रीतिर्भक्तकल्पमहीरूहः । धर्महीनज्ञानभक्तिदोषभूयस्त्वबोधकः ॥७६॥
स्वधर्महीनपुरूषत्यागी सत्यप्रतिश्रुतः । बह्वन्नसत्रो विष्ण्वादिपंचायतनमाननः ॥७७॥
विप्रापराधसहनः सत्यसंकल्प आशुदः । सान्वयाधर्ममूलघ्नः यज्ञकृद्ब्राह्मणप्रियः ॥७८॥
विष्णुस्वरूपाविष्कारो निर्मायः सर्वदर्शनः । जनसाहस्त्रयुगपत्समाधिस्थितिकारकः ॥७९॥
स्वेक्षायातनरस्त्र्यौघान्योऽन्यसम्मर्दसद्यशाः । विप्रभोजनसंहृष्टो विप्रात्मा विप्रपूजितः ॥८०॥
वेदैकवेद्यो दिव्यांगो मेघजिद्दर्पभंजनः । सर्वयोगकलोद्भासी स्वतंत्रः सर्वदर्शी ॥८१॥
कृष्णात्माऽऽकृष्टहृदयो देशिको दिव्यदर्शनः । गोलोकरमणो ब्रह्मक्रीडो वैकुणठनायकः ॥८२॥
अनेकमूर्तिरण्डस्थो बहिःस्थो योगशिक्षकः । पुरःसरो मनोवेगः स्वनेता दर्शितामरः ॥८३॥
विष्णुयागसमारंभः षण्मासाशितवाडवः । नानादेशगतिर्नानायज्ञकृद्भूरिदक्षिणः ॥८४॥

सद्यःसमाधिः सर्वात्मा निरीशमतखण्डनः । मकारपंचकोच्छेत्ता धर्मसर्गप्रपोषकः ॥८५॥
पापिकृतान्तः परमः पुण्यकीर्तिः पृथुश्रवाः । कृशोध्वाध्वसम्पोष्टाः साध्वीधर्मप्रवर्तकः ॥८६॥
दैत्यांशगुरूखद्योतभास्करो धर्मधारकः । लोभादिदोषगदिता तामसव्रतवर्जनः ॥८७॥
सुव्रतः सिद्धिदः सिद्धः सिद्धेशः सिद्धिपोऽच्युतः । कौलाध्वशापदः प्रोक्तासुरलक्ष्माऽसुरातिगः ॥८८॥
भुजंगनगरानन्दो निजभक्तस्तुतो महान् । अहिंसास्थापको भूरिनिजैश्वर्यप्रदर्शकः ॥८९॥
दूरदेशस्थात्मभक्त दत्त साक्षात्स्वदर्शनः । सच्छास्त्रोदितसत्कीर्तिरात्यन्तिकगतिप्रदः ॥९०॥
परापकारसाहस्त्रविस्मृतिः कोमलान्तरः । पाषण्डरक्षितात्मीयो दैत्यमोहनचेष्टितः ॥९१॥
अखण्डितार्षमर्यादः परगुह्याप्रकाशकः । पात्रार्पितबहुद्रव्योः यथायुक्तोपदेशकः ॥९२॥
अविग्रहप्रियो वाणीदण्डपारूष्यवर्जितः । ब्रह्मण्यदेवो देवेज्यो दशरूपप्रदर्शकः ॥९३॥
अकुण्ठितवाचा देशाचारज्ञोऽनादृतोद्धतः । शिक्षार्थक्षणरूङ् नित्यमैत्रः सच्छास्त्रसंग्रही ॥९४॥
धर्मिपक्षः साधुसेवी पुण्यश्रवणकीर्तनः । प्रणतार्तिहरः पूज्यो विषयासक्तनिन्दकः ॥९५॥
भक्तदेहान्तसमयदत्तदिव्यस्वदर्शनः । यमदूतावितस्वीयो नरकार्तिनिवारकः ॥९६॥
सन्मार्गवर्तिताशेषस्वाश्रितः शीघ्रसिद्धिदः । अनाथरोगिवृद्धार्भभिक्षुपोषणकारकः ॥९७॥
गूढाशयो गूढमन्त्रः सर्वजीवाप्रतारकः । भक्तासद्वासनोच्छेत्ताऽसदाग्रहविवर्जनः ॥९८॥
पोष्यवर्गानुविहिततत्समानमिताशनः । आपत्कालात्यक्तनिजः पंचकालार्चिताच्युतः ॥९९॥

योगेश्वरो मुनिपतिर्नित्यमुक्तो महामुनिः । बौद्धादिनास्तिकमतखण्डनः पण्डितार्चितः ॥१००॥
अहिंसयज्ञप्रस्तोता वैष्णवक्रतुकारकः । मद्यमांससुरागन्धाघ्राणशुद्धिविधापकः ॥१०१॥
मत्तोन्मत्तखलावादी पुरस्कृतगुणाधिकः । नानाभक्तजनानन्दः सदसद्व्यक्तिदर्शकः ॥१०२॥
भृगुनान्दीशशापार्तजनरक्षकउत्तमः । वेदविच्छास्त्रविद्वादिदुर्जेयो हृतसंशयः ॥१०३॥
खट्वांगात्मा हृदम्भोजध्येयो ध्यातृमनोहरः । ज्योतिः संस्थोऽतिरम्यांगः सुरेखारूणपत्तलः ॥१०४॥
चार्वांगुलिर्नखेन्द्वालिर्प्रभापहृतहृत्तमाः । पद्मकोशातिमृदुलचरणस्तुंगगुल्फकः ॥१०५॥
ह्रस्वजंघो वृत्तजानुः समोरूः सत्सितांशुकः । गम्भीरनाभिराजानुभुजस्ततभुजान्तरः ॥१०६॥
कण्ठल्बितहारालिः कम्बुकण्ठोऽरूणाधरः । प्रफुल्लपद्मवदनः कुन्ददन्तो मितस्मितः ॥१०७॥
तिलपुष्पाभनासान्तश्यामबिन्दुः समश्रवाः । वामश्रवोऽन्तरश्यामबिन्दुः पद्मदलेक्षणः ॥१०८॥
विशालभालतिलकः सूक्ष्मवक्रशिरोरूहः । शिरः पटलसत्पुष्पापीडराजिः स्वभक्तदृक ॥१०९॥
अवतारी भयत्राताऽभयराजवरप्रदः । कृतदुर्गपुरावासः क्रोधयन्ताऽद्भुतक्रियः ॥११०॥
नानादेशप्रेषितस्वभक्तनाशितदुष्क्रियः । असुरक्लिष्टसत्संघसान्त्वनः साधुवल्लभः ॥१११॥
सद्रोहिगुरूभूपालशिक्षकक्ष्मेशराज्यदः । गवेन्द्रार्चितपादाब्जो गवेन्द्वरदोऽनघः ॥११२॥
भक्तत्रातोद्धवस्वामिसम्प्रदायप्रकाशकः । विप्रप्रशंसनस्तीर्थविधिबोधक आर्तिहृत् ॥११३॥
विप्रसन्तर्पणो नानाव्रतवक्ता महायशा । कौलोच्छिद्द्विजयो वर्ण्यविष्णुयागमहोत्सवः ॥११४॥

भक्तिगम्यो भक्तवशः कृतदिग्विजयोऽक्षयः । भक्तिधर्मकृतानन्दः सर्वमंगलदर्शनः ॥११५॥
उत्तमात्मा जयाप्रेष्टो ललितेष्टवरप्रदः । मुकुन्दसेवासन्तुष्टो जयानीतपयःपिबः ॥११६॥
नारायणधृतामंत्रो वासुदेवादत्तचन्दनः । गोपालमंजितामंत्रोऽखण्डाप्तार्चनसाधनः ॥११७॥
उमानाथाप्तपुष्पादिर्जयप्रक्षालिताम्बरः । ललितासंस्कृतान्नादिः पंचाल्यालिप्तपाकभूः ॥११८॥
अवरामार्जितवासः शिवोपानितपादुकः । दयगोविन्दाप्तवन्यो मयरामाविताम्बरः ॥११९॥
प्रयागोक्तपुराणादिर्निशानित्यकथादरः । मुक्तब्रह्मास्तुतयशाःप्रेमगीतगुणश्रुतिः ॥१२०॥
महानुभावमुदितः शुकरक्षितपुस्तकः । आनन्दकल्पितावासः विजयोत्सवतोषितः ॥१२१॥
यथार्हकारितात्मीयसेवनो भक्तकामधुक । निबद्धोत्सवपर्यायो विजयोत्सवतोषितः ॥१२२॥
अन्नकूटकृतानुज्ञो महासम्भारहारकः । पत्रदूताहूतभक्तः पाकशालावलोकनः ॥१२३॥
प्रत्युद्गतमुनिव्रातो मानिताखिलवैष्णवः । सत्प्रीणनः क्षणस्वापो दीपावलीमंगलाप्लवः ॥१२४॥
ब्रह्मक्षणाशुविहितनैत्यकोऽखिलधर्मवित् । चारूचक्रकपीठस्थ उत्तमक्ष्मेशपूजितः ॥१२५॥
भक्तस्वेक्षाप्रदानोत्को मयारामेक्षणस्मितः । भक्तसम्प्रीणनधृतनूतनांशुकभूषणः ॥१२६॥
अनर्घ्यपीतकौशेयपरिधानविचक्षणः । मुकुटाकृतिसम्बद्धशोणशीर्षपटद्युतिः ॥१२७॥
सस्वर्णबिन्दुकौसुम्भसत्कंचुकधृतिप्रभः । स्कन्धोल्लसद्धैमपटः कटिबद्धारूणांशुकः ॥१२८॥
हैमांगदलसद्बाहूः कर्णशोभितकुण्डलः । कण्ठलम्बितसस्वर्णमुक्ताहारालिशोभनः ॥१२९॥

चंचत्सुवर्णकटकशृंखलाभकरद्वयः । सद्रत्नखचितस्वर्णमुद्रिकाशोभितांगुलिः ॥१३०॥
सत्केसरोर्ध्वतिलकः सरक्ताक्षतचन्द्रकः । अवतंसोल्लसत्कर्णश्चलत्कौसुमशेखरः ॥१३१॥
सुगन्धिपुष्पहारालिदर्शनीयो मनोहरः । गजेन्द्रगमनोऽर्काशुचंचद्वासाः स्मिताननः ॥१३२॥
उच्चरम्यासनासिनो मुनिमण्डलमध्यगः । सोमवर्मोद्धृतछत्रो मुकुन्दधृतनक्तकः ॥१३३॥
अलयभृगुजिद्रत्नदण्डचामरवीजितः । सूरनांजात्तव्यजनो जपमालालसत्करः ॥१३४॥
स्वेक्षणानन्दितस्वीयः श्रुतकीर्तिर्निजार्चितः । विप्रसात्कृतवित्तौघो दानशूरो निरेषणः ॥१३५॥
उन्मत्तगंगाप्लवनो दीपावलिमहोत्सवः । नित्यकर्मादरो नूत्नवसनो दीनवत्सलः ॥१३६॥
सदर्चितोऽन्नकूटेक्षो रमारंजनभोजनः । सदाशनो बद्धकटिः स्वभक्तपरिवेषणः ॥१३७॥
भक्तभुक्तीक्षणानन्दः सदानन्दो महाशयः । सत्संगदीपको भक्तशिक्षादक्ष उरूक्रमः ॥१३८॥
धर्मरक्षाकरः स्पर्शविवेको धर्मसिद्धिदः । निष्कामसिद्धिदस्त्यागिसेव्योऽद्वैतो जपप्रियः ॥१३९॥
एकादशीव्रतविधिप्रवक्तैकादशीश्वरः । प्रबोधिनीव्रताचारो महादानप्रतोषितः ॥१४०॥
मुनिप्रतोषो विदुरनीतिशास्त्रप्रशंसनः । अक्षरस्थो मुनिव्रातस्तुतो योषिद्गणेडितः ॥१४१॥
भक्तेकतोष्यो भक्त्यात्मा भक्तग्राममहोत्सवः । वृत्तालयपुरावासो भक्तसंघसुखप्रदः ॥१४२॥
प्राप्तस्वबन्धुसन्मानो भूरितर्पितपार्षदः । गंगार्पितफलाहारो भक्तसंघसमर्चितः ॥१४३॥
नानादेशीयभक्तौघार्पितवित्तौघदानकृत् । भक्तभ्रातृद्वयावासपर्यायकृतभोजनः ॥१४४॥

दोलोत्सवविधानज्ञो नरनारायणार्चकः । रंगक्रीडनकृन्मुक्तकामचारनिषेधकः ॥१४५॥
स्त्रीपुंसप्रसंगभूर्यापद्दर्शको धर्मदेशिकः । साष्टांगब्रह्मचर्यैकस्थापको धर्मवित्तमः ॥१४६॥
गृहीतनरस्त्र्यंगस्पर्शदोषप्रकाशकः । स्त्रीपुंसान्योन्यसंस्पर्शव्यवस्थाकृद्विदां वरः ॥१४७॥
आहारशुद्धिकृत् सद्यः पापनिष्कृतिकारकः । वेदान्ततत्त्वप्रथनः सांख्ययोगार्थदर्शकः ॥१४८॥
अदांभिकप्रियोऽतृष्णो गुणग्राहीगुणप्रियः । पुराणश्रवणौत्सुक्यः पुराणविधिबोधकः ॥१४९॥
श्रीमद्भागवतश्रोता श्रीमद्भागवतार्चकः । श्रीमद्भागवताभिज्ञः श्रीमद्भागवतार्पकः ॥१५०॥
श्रीमद्भागवतोत्कृष्टपुरश्चरणकारकः । जन्माष्टम्युत्सवापूर्णजीववर्ममनोरथः ॥१५१॥
कार्यायननरानन्दो वास्तुवेश्मनिकेतनः । सूरसम्भावनः शाकसंस्कारानन्दितस्वकः ॥१५२॥
नागटंकजनप्रितः शुकप्रश्नकृतोत्तरः । चान्द्रायणव्रताराध्यः पंचालजनपावनः ॥१५३॥
शिवरात्रिव्रताचारः कृतदोलामहोत्सवः । द्वैताद्वैतार्थनिगमहार्दबोधी महोदयः ॥१५४॥
दिव्यांगभक्तिधर्मादिरूपप्रेक्षयिताऽमृतः । हेमन्तार्चास्तुतिप्रितो जीर्णदुर्गजनार्चितः ॥१५५॥
कृततीर्थविधिर्विप्रभोजनो भूरिदोऽभव । दुर्गभक्तातिसुखदः कृतकृत्यो जगत्पतिः ॥१५६॥
रहःस्थो गूढसंकल्पो हरिमन्दिरकारकः । महारम्भः सदास्वस्थः कलिदोषहरोद्यमः ॥१५७॥
कृतश्रीनगरवासो महासम्भारसाधकः । श्रीपुरेशार्हितः सभ्यः पूर्तकर्मप्रशंसकः ॥१५८॥
नरनारायणाद्यर्चा स्थापकः पौरमानितः । क्षेत्रमाहात्म्यगदिता महोत्सवविधापकः ॥१५९॥

एकाहभोजिताशेषपौरविप्रो बहुप्रदः । पूजोत्सवव्यवस्थाकृद्गांगेयप्रार्थितोमनुः ॥१६०॥
मूलीपुःस्थापितश्रीमद्राधाकृष्णोऽक्षरप्रदः । निबद्धोत्सवमर्यादो भक्ताभीष्टफलप्रदः ॥१६१॥
भुजंगपुरभक्तातिप्रीतः पौरप्रपूजितः । नरनारायणप्रतिष्ठापको विप्रपूजकः ॥१६२॥
वृत्तालयाक्षिपद्मार्कः शिल्पिसन्मानकारकः । लक्ष्मीनारायणाद्यर्चास्थापकोऽर्चितभूसुरः ॥१६३॥
धवलमुरलीमनोहरसंस्थापकोऽर्थदः । संस्थापितजयतल्प रेवतीबलदेवकः ॥१६४॥
मुक्तादिष्टोत्पथच्छेदश्चित्रार्चार्चाप्रवर्तकः । द्वारिकाप्रेषितसुहृत्तीर्थवास्यघदर्शकः ॥१६५॥
सत्राता द्वारिकेशात्मा भक्तापद्दर्शनाक्षमः । सच्चिदानन्दवरदो लक्ष्मीनारायणात्मकः ॥१६६॥
वर्धितक्षेत्रमाहात्म्यस्तप्तमुद्रांकितस्वकः । मुक्तात्मा त्रियुगो वादिजेताऽनुयुगसम्भवः ॥१६७॥
असुराविदितेशत्वः प्रकटेश्वरलक्षणः । अन्तः संशयहृद्वार्तो दुराचारविमोचनः ॥१६८॥
अशस्त्रो धिषणास्त्र आसुरावेशकर्षणः । लडुकादीष्टगणपः सिन्दूरादिष्टमारूतिः ॥१६९॥
वृत्तालयप्रियो धर्मजन्माहार्चितसद्द्विजः । महासभासनो दत्तविध्युपात्तसुतद्वयः ॥१७०॥
पुत्रविन्यस्तगुरूतः पुत्रसात्कृतसंश्रितः । सदोविभक्तदेशादिः सम आचार्यशिक्षकः ॥१७१॥
भक्तिजन्माहभक्तौघतर्पणश्चित्रिताधिप । नृपामात्यार्थितः पौरप्रीतो वटपुरागमः ॥१७२॥
मन्त्रिप्रत्युद्गतो नानावाद्यवादकसंवृतः । सालंकारगजारूढश्चारूचामरवीजितः ॥१७३॥
दृक्पावितजनव्रतः सिंहजिन्नृपपूजितः । स्वप्रतापपराभूत विद्वद्वैरिकृतानतिः ॥१७४॥

सिंहजित्संशयच्छेत्ता भक्तिरीतिप्रदर्शकः । रघुवीरार्पितस्वीयभूषावित्तनवांशुकः ॥१७५॥
सर्वजीवहितः सर्वसच्छास्त्ररसदोहनः । अनाकुलमनाः शिक्षापत्रीलेखनकृत्स्वभूः ॥१७६॥
सामान्यधर्मवचनो विशेषवृषवर्णनः । निगमाद्यष्टसच्छास्त्रातिरूचिः शास्त्रसारवित् ॥१७७॥
विशिष्टाद्वैतमतधृत् साकारब्रह्मवर्णनः । रामानुजकृतग्रन्थ श्रुतिपाठप्रवर्तकः ॥१७८॥
गृहितविठ्ठलेशोक्तव्रतोत्सवविधिः सुधीः । यथाधिकारसद्धर्मवक्ता वैदिकसम्मतः ॥१७९॥
शिक्षापत्रीस्थापितस्वमाहात्म्यः पाठसिद्धिदः । सद्धर्मातिप्रवृत्तीच्छुः शिक्षापत्रीप्रवर्तकः ॥१८०॥
प्रमोदिताश्रितजनो नरनारायणेक्षणः । महादोलोत्सवोऽयोध्याप्रसादार्पितसद्वसुः ॥१८१॥
धौरेयस्थापितश्रीमद्राधामदनमोहनः । पुत्रोपदिष्टश्रीकृष्णमन्त्रदीक्षाविधिक्रमः ॥१८२॥
प्रोक्तदीक्षितसद्धर्मः कृष्णपूजाविधापकः । प्रोक्तापराधनिर्हारः क्षमासारः सदर्चनः ॥१८३॥
स्त्र्याचार्यपत्नीशिष्यत्वस्थापकः शिष्यशासनः । पुत्रदत्तमहादीक्षः पुत्रदीक्षितपूरूषः ॥१८४॥
स्नुषादीक्षितयोषः श्रीराधाकृष्णेष्टदेवतः । सत्संगिध्येयसन्मूर्तिरेकान्तिकपरायणम् ॥१८५॥
पुत्रप्रोक्ताब्दिकाशेषव्रतोत्सवविधिक्रमः । गोपालप्रश्नसंहृष्टस्त्यागिधर्मोपदेशकः ॥१८६॥
लोभोन्मूलनधीदाता कामोत्खननयुक्तिदः । दुर्जेयरसजिद्बोधो निःस्नेहत्वविधापकः ॥१८७॥
मानसर्पविषत्राता कृष्णैकान्तिकशंसनः । सधर्मज्ञानवैराग्यभक्तिबोधनपाटवः ॥१८८॥
ज्ञानस्वरूपनिर्णेता नियन्ता पुरूषात्मकः । प्रकृतिशो महाकालो मायेशोऽव्याकृतात्मकः ॥१८९॥

हिरण्यगर्भस्तत्त्वात्मातत्त्वलक्षणलक्षकः । वैराजोऽखिलविश्वात्मा बुद्धिप्रेरक ईशिता ॥१९०॥
जीवेश्वरब्रह्ममायारूपयाथार्थ्यबोधकः । निर्गुणो गुणवृत्तिज्ञो बद्धजीवविमोचनः ॥१९१॥
भक्त्याराध्यो महादेवो ज्ञेयो ध्येयः प्रकाशकः । शेषीकृताक्षरपरश्रीकृष्णः कालकालनः ॥१९२॥
कृष्णसेवाहीनमुक्तिचतुष्कोच्छापहापकः । आदिष्टसांख्यसिद्धान्तो निजज्ञानफलप्रदः ॥१९३॥
ऋष्यात्मकश्चतुर्वर्णाश्रमधर्मनिरूपकः । षट्कर्मविधिनिर्णेता गायत्रीमन्त्रदैवतः ॥१९४॥
स्मार्तवक्ता श्रौतवक्ता विप्रधर्मविशेषवित् । जीविकावृत्तिनिर्णेता हेयोपादेयबोधकः ॥१९५॥
आशौचनिर्णयः श्राद्धविधिवक्ता विधिप्रियः । कलिहेयार्थनिर्णेता राजधर्मनिरूपकः ॥१९६॥
पतिव्रताधर्मवक्ता विधवाधर्मरक्षकः । नानाव्रतसमाराध्यः पूजाविध्युपदेशकः ॥१९७॥
स्पर्शनिर्णयकृद्दानप्रस्थधर्मप्रदर्शकः । सन्न्यासधर्मगदिता सांगनिष्कृतिबोधकः ॥१९८॥
जीर्णदुर्गस्थापित श्रीद्वारिकेशादिरात्मदः । ब्रह्मचारिधर्मवक्ता बृहद्धर्ममहादरः ॥१९९॥
दुर्गालयस्थापित श्रीगोपीनाथोऽखिलार्थदः । सहांगयोगोपदेष्टा पिण्डब्रह्माण्डनिर्णयः ॥२००॥
भूतस्वरूपनिर्णेता वायुभेदनिरूपकः । कालज्ञानवदो योगसिद्धिहेतुप्रदर्शकः ॥२०१॥
शतानन्दस्तुतः स्तुत्यो भक्तवांछितपूरकः । शिक्षापत्रीग्रन्थनकः शिक्षापत्रीविधिब्रुवः ॥२०२॥
शिक्षापत्र्यर्थसन्तुष्टो लीलासन्दर्भकारकः । निर्वासनस्तिरोधानलीलासम्मोहितासुरः ॥२०३॥
वैमानिकवृतो हृष्टदेववृन्दसमर्चितः । स्वार्चाप्रादुष्कृतैश्वर्यो दत्तप्रत्यक्षदर्शनः ॥२०४॥

भक्तेक्षाहसितः पुष्पाद्युपाहर्ताऽन्नभोजनः । क्षीरपो नीरपः स्वोपयाचकोष्टाशुसिद्धिदः ॥२०५॥
पुत्रदो वित्तदो विद्याप्रदो वैरिभयापहः । अपमृत्युहरो भुक्तिप्रदो मुक्तिद आश्रयः ॥२०६॥
ऐश्लर्यदो रोगहरो ज्ञानकृद्भक्तिदोऽधिपः । समाधिदस्तमोहर्ता सर्वमंगलमंगलम् ॥२०७॥
इत्येतच्छ्राहरेर्नाम्नां सहस्रं परिकीर्तितम् । स्वरूपगुणचारित्रानुबन्धीप्सितसिद्धिदम् ॥२०८॥
एतद्धि परमं स्तोत्रं सर्वमंगलसंज्ञितम् । यः पठेच्छ्णुयाद्वाऽसौ नित्यं मंगलमाप्नुयात् ॥२०९॥
धर्मसर्गे मतिस्तस्य स्थिरा स्यान्मुक्तिदायिनी । जयेदधर्मसर्गं च बन्धहेतुं स सत्वरम् ॥२१०॥
भुक्तं मुक्तिं तथैकान्तभक्तिं चास्य प्रभावतः । देहान्ते च हरेर्धाम गोलोकं प्राप्नुयाद्धि सः ॥२११॥
तस्मादेतत्सदा भक्त्या पठनीयमिहोद्धवैः । भक्तैः पुंभिर्द्विजैः स्त्रीभिः सच्छूद्रैरपि दीक्षितैः ॥२१२॥
नैतत्खलाय दातव्यं न धर्मशिथिलाय च । नाभक्ताय क्वचिद्देयं देयं भक्ताय सर्वथा ॥२१३॥
एतत्सदामंगलकारि पुंसां तथाऽखिलामंगलनाशकारि । स्तोत्रं भवत्युद्धववर्मभाजां यतोऽधिकं किंचन्नास्ति पाठ्यम् ॥२१४॥

*॥ इति श्रीमदुद्धवसम्प्रदायाचार्यप्रवर श्रीसहजानन्दस्वामिशिष्य शतानन्दमुनिविरचितं सर्वमंगलाख्यं श्रीहरिसहस्रनामस्तोत्रं समाप्तम् ॥*

## २२६ ● ॥ अथ श्रीनारायण कवच ॥

आत्मानं परमं ध्यायेत्ध्येयं षट्शक्तिभिर्युतम् ।विद्या तेजस्तपोमूर्तिमिमं मन्त्रमुदाहरेत् ॥१॥
ॐ हरेर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मपतगेन्द्रपृष्ठेदरारिचर्मासिगदेषुचापपाशान् दधानोऽष्टबाहुः ॥१॥

जलेषुमां रक्षतुं मत्स्यमूर्तिर्यादोगणेभ्यो वरूणस्य पाशात् ।
स्थलेषु मायाबटुवामनोऽव्यात्रिविक्रमः खेऽवतुविश्वरूप ॥२॥
दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथपारिः ।
विमुंचतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः॥३॥
रक्षत्वसौ माध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः ।
रामोऽद्रिकुटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद्भरताग्रजो मम् ॥४॥
मामुग्रधर्मादखिलात्प्रमादान्नारायणः पातु नरश्च हासात् ।
दत्तस्त्वयोगादथ योगनाथः पापादगुणेशः कपिलः कर्मबन्धात् ॥५॥
सनत्कुमारोऽवतु कामदेवाद्धशीर्षा मां पथिदेवहेलनात् ।
देवर्षिवर्यः पुरूषार्चनान्तरात्कूर्मो हरिर्मां निरयादशेषात् ॥६॥
धन्वन्तरिर्भगवान् पात्वपथ्याद‌द्वन्द्वाद्‌भयादृषभो निर्जितात्मा ।
यज्ञश्च लोकादवताज्जनान्ताद्बलो गणात्क्रोधवशादहीन्द्रः ॥७॥
द्वैपायनो भगवानप्रबोधाद् बुद्धस्तु पाखण्डगणात् प्रमादात् ।
कल्किः कलेः कालमलात् प्रपातु धर्मावनयोरूकृतावतारः ॥८॥
मां केशवो गदया प्रातरव्याद् गोविन्द आसंगवमात्तवेणुः।

नारायणः प्राह्ण उदात्तशक्तिर्मध्यन्दिने विष्णुरीन्द्रपाणिः ॥९॥
देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामावतु माधवो माम् ।
दोषे हृषीकेश उत्तरार्धेरात्रेनिशीथ एकोऽवतु पद्मनाभः ॥१०॥
श्रीवत्सधामापरात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः ।
दामोदरोऽव्यादनुसन्ध्यं प्रभाते विश्वेश्वरो भगवान् कालमूर्तिः ॥११॥
चक्रं युगान्तानलतिग्मनेमि भ्रमत् समन्ताद् भगवत्प्रयुक्तम् ।
दन्दग्धि दन्दग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः ॥१२॥
गदेऽशनिस्पर्शनविस्फुलिंगेनिष्पिण्ढि निष्पिढ्य जितप्रियासि ।
कूष्माण्डवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन् ॥१३॥
त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् ।
दरेन्द्र विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कम्पयन् ॥१४॥
त्वं तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम छिन्धि छिन्धि ।
चक्षुंषि चर्मंछतचन्द्र छादय द्विषामघोनां हर पापक्षुषाम् ॥१५॥
यन्नोभयं ग्रहेभ्योऽभूत् केतुभ्यो नृभ्य एवच । सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंऽघेभ्य एव वा ॥१६॥
सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात् । प्रयान्तु संक्षयं सद्यो ये नः श्रेयःप्रतिपकाः॥१७॥

गरूडो भगवान् स्तोत्रस्तोभश्छन्दोमयः प्रभुः । रक्षत्वशेषकृच्छ्रेभ्यो विश्वक्सेनः स्वनामभिः ॥१८॥
सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः । बुद्धीन्द्रियमनः प्राणान् पान्तु पार्षदभूषणाः ॥१९॥
यथा हि भगवानेव वस्तुतः सदसच्च यत् । सत्येनानेन नः सर्वे यान्तु नाशमुपद्रवाः ॥२०॥
यथैकात्म्यानुभावानां विकल्परहितः स्वयम् । भूषणायुधलिंगाख्या धत्ते शक्तीः स्वमायया ॥२१॥
तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः । पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥२२॥
विदिक्षु दिक्षूर्ध्वमधः समन्तादन्तर्बहिर्भगवान्नारसिंहः । प्रहापयँलोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः ॥२३॥

*॥ इति नारायण कवच समाप्त ॥ ॐ नारायणाय नमः*

## २२७ ● ॥ अथश्रीविष्णुसहस्त्रनामस्तोत्रम् ॥

यस्यस्मरणमात्रेणजन्मसंसारबन्धनात।विमुच्यतेनमस्तस्मैविष्णवेप्रभिवष्णवे ॥१॥
नमःसमस्तभूतानामादिभूतायभूभृते।अनेकरूपरूपायविष्णवेप्रभिवष्णवे ॥२॥
वैशम्पायनउवाच–श्रुत्वाधमार्नशेषेणपावनानिचसवर्शः।युधिष्ठीरःशान्तनवंपुनरेवऽभ्यभाषत ॥१॥
किमेकंदैवतंलोकेकिंवाप्येकंपरायणमस्तुवन्तःकंकमचर्न्तःप्राप्नुयुमार्नवाःशुभम् ॥२॥
कोधर्मःसवर्वधर्माणार्ंभवतःपरमोमतः।किंजपन्मुच्यतेजन्तुर्जन्मसंसारबंधनात् ॥३॥
भीष्मउवाच – जगत्प्रभुंदेवदेवमनन्तंपुरूषोत्तममस्तुवन्नामसहस्त्रेणपुरूषःसततोत्थितः ॥४॥
तमेवचाचर्यिन्नत्यंभक्त्यापुरूषमव्ययम।ध्यायन्स्तुवन्नमस्यंश्चयजमानस्तमेवच ॥५॥

अनादिनिधनंविष्णुंसवर्लोकमहश्वेरमलोकोध्यक्षंस्तुविन्नत्यंसवर्दुःखातिगोभवेत् ॥६॥
ब्रह्मण्यंसर्वधर्मज्ञंलोकानांकीर्तिवधर्नमलोकनाथंमहद्भूतंसवर्भूतभवोद्भवम् ॥७॥
एषमेसवर्धमार्णांधर्मोअधिकतमोमतः।यद्भक्त्यापुण्डरीकाक्षंस्तवैरचेर्न्नरःसदा ॥८॥
परमंयोमहत्तेजःपरमंयोमहत्तपः।परमंयोमहद्ब्रह्मपरमंयःपरायणम् ॥९॥
पवित्राणांपवित्रंयोमंगलानांचमंगलमदैवतंदेवतानांचभूतानांयोअव्ययःपिता ॥१०॥
यतःसवार्वाणिभूतानिभवन्त्यादियुगागमे।यिस्मंश्चप्रलयंयान्तिपुनरवेयुगक्षये ॥११॥
तस्यलोकप्रधानस्यजगन्नाथस्यभूपते।विष्णोनार्मसहस्त्रंमेश्रृणुपापभयापहम् ॥१२॥
यानिनामानिगौणानिविख्यातानिमहात्मनः।ऋर्षिभःपिरगितानितानिवक्ष्यामिभूतये ॥१३॥

अस्यश्रीविष्णोर्दिव्यसहस्त्रनामस्तोत्रमन्त्रस्य भगवान् वेदव्यास ऋषिः । श्रीविष्णुः परमात्मादेवताः । अनुष्टुप् छन्दः । अमृतांशूद्भवो भानुरिति बीजम् । देवकीनन्दनः सृष्टेति शक्तिः । त्रिसामा सामगः सामेति हृदयम् । शंखभृन्नन्दकीचक्रीति कीलकम् । शार्गंधनवा गदाधरः इत्यस्त्रम् । रथांगपाणिरक्षोभ्य इति कवचम् । उद्भवः क्षोभणो देव इति परमो मन्त्रः । श्रीमहाविष्णुप्रीत्यर्थे जपे विनियोगः ॥

अथन्यासः । – ॐ विश्वंविष्णुर्वषट्कारइत्यंगुष्ठाभ्यांनमः । ॐ अमृतांशूद्भवोभानुरितितर्जनीभ्यांनमः । ॐ ब्रह्मण्योब्रह्मकृद्ब्रह्मेतिमध्यामाभ्यांनमः । ॐ सुवर्णबिन्दुरक्षोभ्यइत्यनामिकाभ्यांनमः। ॐ निमिषोऽनिमिषः स्रग्वीति कनिष्ठिकाभ्यां नमः । ॐ सवर्प्रहरणायुधायनमःइति करतलकरपृष्टाभ्या नमः ॥

अथहृदयादिन्यासः – ॐ विश्वंविष्णुर्वषट्कारइतिहृदयेनमः। ॐ अमृतांशूद्भवोभानुरितिशिरसेस्वाहा। ॐ ब्रह्मण्योब्रह्मकृद्ब्रमेतिशिखायैवषट्। ॐ सुवर्णबिन्दुरक्षोभ्यइतिकवचायहुंम्। ॐ निमिषोऽनिमिषः स्त्रग्वीति नेत्राभ्यां वौषट्। ॐ सवर्प्रहरणायुधायनमःइति अस्त्राय फट्॥

॥ अथध्यानम्॥

शान्ताकारंभुजगशयनंपद्मनाभंसुरेशं, विश्वाधारंगगनसदृशंमेघवर्णंशुभांगम्।
लक्ष्मीकान्तंकमलनयनंयोगिभिर्ध्यानगम्यंवन्देविष्णुंभवभयहरंसवर्लोकैकनाथम्॥

ॐ श्रीपरमात्मनेनमः॥ ॐ नमो भगवते वासुदेवाय॥

ॐ विश्वंविष्णुवर्षट्कारोभूतभव्यभवत्प्रभुः। भूतकृद्भूतभृद्भावोभूतात्माभूतभावनः॥१४॥
पूतात्मापरमात्माचमुक्तानांपरमागितः। अव्ययः पुरूषः साक्षीक्षेत्रज्ञोअक्षरएवच॥१५॥
योगोयोगिवदांनेताप्रधानपुरूषेश्वरः। नारिसंहवपुः श्रीमान्केशवः पुरूषोत्तमः॥१६॥
सर्वः शर्वः शिवः स्थाणुभूर्तादिनिधिरव्ययः। सम्भवोभावनोभर्ताप्रभवः प्रभुरीश्वरः॥१७॥
स्वयम्भूः शम्भुरादित्यः पुष्कराक्षोमहास्वनः। अनादिनिधनोधाताविधाताधातुरूत्तमः॥१८॥
अप्रमेयोहृषीकेशः पद्मनाभोअमरप्रभुः। विश्वकर्मामनुस्त्वष्ठास्थविरोध्रुवः॥१९॥
अग्राह्यः शाश्वतः कृष्णोलोहिताक्षः प्रतदर्नः। प्रभूतस्त्रिककुब्धामपवित्रंमंगलंपरम्॥२०॥
ईशानः प्राणदः प्राणोज्येष्ठः श्रेष्ठः प्रजापितः। हिरण्यगर्भोभूगर्भोमाधवोमधुसूदनः॥२१॥

ईश्वरोविक्रमीधन्वीमेधावीविक्रमः क्रमः । अनुत्तमोदुराधर्षः कृतज्ञः कृतिरात्मवान् ॥२२॥
सुरशेः शरणंशर्मविश्वरेताः प्रजाभवः । अहः संवत्सरोव्यालः प्रत्ययः सवर्दशर्नः ॥२३॥
अजः सवेर्श्वरः सिद्धः सिध्धिः सर्वादिरच्युतः । वृषाकिपरमेयात्मासवर्योगिविनः सृतः ॥२४॥
वसुवर्सुमनाः सत्यः समात्मासम्मितः समः । अमोघः पुण्डरीकाक्षोवृषकर्मावृषार्कृतिः ॥२५॥
रूद्रोबहुशिराबभ्रुर्विश्वयोनिः शुचिश्रवाः । अमृतः शाश्वतः स्थाणुवर्रारोहोमहात्तपाः ॥२६॥
सवर्गः सर्वविद्भानुर्विष्वक्सेनोजनादर्नः । वेदोवेदविदव्यंगोवेदांगोवेदवित्कविः ॥२७॥
लोकाध्यक्षः सुराध्यक्षोधमार्ध्यक्षः कृताकृतः । चतुरात्माचतुव्युर्हश्चतुर्दंष्ट्रश्चतुभुर्जः ॥२८॥
भ्राजिष्णुर्भोजनंभोक्तासिहष्णुजर्गदादिजः । अनघोविजयोजेताविश्वयोनिः पुनर्वसुः ॥२९॥
उपेन्द्रोवामनः प्रांशुरमोघः शुचिरूर्जितः । अतीन्द्रः संग्रहः सर्गोधृतात्मानियमोयमः ॥३०॥
वेद्योवैद्यः सदायोगीवीरहामाधवोमधुः । अतीन्द्रियोमहामायोमहोत्साहोमहाबलः ॥३१॥
महाबुद्धिमर्हावीर्योमहाशिक्तमर्हाद्युतिः । अनिर्देश्यवपुः श्रीमानमेयात्मामहाद्रिधृक् ॥३२॥
महश्वोसोमहीभर्ताश्रीनिवासः सतांगतिः । अनिरूद्धः सुरानन्दोगोविन्दोगोविन्दांपतिः ॥३३॥
मरीचिदर्मनोहंसः सुपर्णोभुजगोत्तमः । हिरण्यगर्भः सुतपाः पद्मनाभः प्रजापितः ॥३४॥
अमृत्युः सवर्दृक्सिंहः सन्धातासिन्धमान्स्थिरः । अजोदुमर्षर्णः शास्ताविश्रुतात्मासुरारिहा ॥३५॥
गुरूगुरूत्तमोधामः सत्यः सत्यपराक्रमः । निमिषोनिमिषः स्रग्वीवाचस्पितरूदारधीः ॥३६॥

अग्रणीर्ग्रामणीः श्रीमान्न्यायोनेतासमीरणः । सहस्रामूर्धाविश्वात्मासहस्राक्षः सहस्रपात् ॥३७॥
आवतर्नोनिवृत्तात्मासंवृतः सम्प्रमदर्नः । अहः संवतर्कोवह्निर्निलोधरणीधरः ॥३८॥
सुप्रसादः प्रसन्नात्माविश्वधग्विश्वभुग्विभुः । सत्कर्तासत्कृतः साधुजर्ह्नुनार्रायणोनरः ॥३९॥
असंख्येयोअप्रमेयैत्माविशिष्टः शिष्टकृच्छुचिः । सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः ॥४०॥
वृषाहीवृषभोविष्णुवृर्षपर्वावृषोदरः । वर्धनोवर्धमानश्चविविक्तः श्रुतिसागरः ॥४१॥
सुभुजोदुधरोर्वाग्मीमहोन्द्रोवसुदोवसुः । नैकरूपोबृहद्रुपः शिपिविष्टः प्रकाशनः ॥४२॥
ओजस्तेजोद्युतिधरः प्रकाशात्माप्रतापनः । ऋद्धः स्पष्टाक्षरोमन्त्रश्चन्द्रांशुभास्र्करद्युतिः ॥४३॥
अमृतांशूद्भवोभानुः शशिवन्दुः सुरश्वेरः । औषधंजगतः सेतुः सत्यधर्मपराक्रमः ॥४४॥
भूतभव्यभवन्नाथः पवनः पावनोअनलः । कामहाकामकृत्कान्तः कामप्रदः प्रभुः ॥४५॥
युगादिकृद्युगावतारोनैकामायोमहाशनः । अदृश्योअव्यक्तश्चसहस्त्रजिदनन्तजित् ॥४६॥
इष्टोविशिष्टः शिखण्डीनहुषोवृषः । क्रोधहाक्रोधकृत्कर्ताविश्वबाहुमर्हीधरः ॥४७॥
अच्युतः प्रथितः प्राणः प्राणदोवासवानुजः । अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥४८॥
स्कन्दः स्कन्दधरोधुर्योवरदोवायुवाहनः । वासुदेवोबृहद्भानुरादिदेवः पुरन्दरः ॥४९॥
अशोकस्तारणस्तारः शूरः शौरिजर्नेश्वरः । अनुकूलः शतावर्तः पद्मीपद्मनिभेक्षणः ॥५०॥
पद्मनाभोअरविन्दाक्षः पद्मगर्भः शरीरभृत् । महिद्धर्रऋद्धोवृद्धात्मामहाक्षोगरूडध्वजः ॥५१॥

अतुलः सरभोभीमः समयज्ञोहविहरिः । सवर्लक्षणलक्षण्योलक्ष्मीवासमितिंजयः ॥५२॥
विक्षरोरोहितोमार्गोहेतुर्दामोदरः सहः । महीधरोमहाभागोवेगवानमिताशनः ॥५३॥
उद्भवः क्षोभणोदेवः श्रीगर्भः परमेश्वरः । करणंकारणंकर्ताविकर्तागहनोः गुहः ॥५४॥
व्यवसायोव्यवस्थानः संस्थानः स्थानदोध्रुवः । परर्द्धिपरमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥५५॥
रामोविरामोविरजोमार्गोनेयोनयोअनयः । वीरः शिक्तमतांश्रेष्ठोधर्मोधर्मविदुत्तमः ॥५६॥
वैकुण्ठः पुरूषः प्राणः प्राणदः प्रणवः पृथुः । हिरण्यगर्भः शत्रुघ्नोव्याप्तोवायुरधोक्षजः ॥५७॥
ऋतुः सुदशर्नः कालः परमेष्ठीपिरग्रहः । उग्रः संवत्सरोदक्षोविश्रामोविश्वदक्षिणः ॥५८॥
विस्तारः स्थावरस्थाणुः प्रमाणंबीजमव्ययम् । अर्थोअनर्थोमहाकोशोमहाभोगोमहाधनः ॥५९॥
अनिर्विण्णः स्थिवष्ठोअभूधर्मयूपोमहामखः । नक्षत्रनेमिनर्क्षत्रीक्षमः क्षामः समीहनः ॥६०॥
यज्ञइज्योमहज्येश्चक्रतुः सत्रंसतांगितः । सर्वदर्शिविमुक्तात्मासवज्ञोज्ञानमुत्तमम् ॥६१॥
सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् । मनोहरोजितक्रोधोवीरबाहूर्विदारणः ॥६२॥
स्वपनः स्ववशोव्यापीनैकात्मानैककर्मकृत् । वत्सरोवत्सलोवत्सीरत्नगर्भोधनेश्वरः ॥६३॥
धमर्गुब्धमकृद्धर्मीसदसत्क्षरमक्षरम् । अविज्ञातासहस्रांशुर्विधाताकृतलक्षणः ॥६४॥
गभस्तिनेमिसत्त्वस्थः सिंहोभूतमहश्वेरः । आदिदेवोमहादेवोदेवेशोदेवभृग्दुरूः ॥६५॥
उत्तरोगोपिर्गोप्ताज्ञानगम्यः पुरातनः । शरीरभूतभृद्भोक्ताकपीन्द्रः भूरिदक्षिणः ॥६६॥

सोमपोअमृतपः सोमः पुरूजित्पुरूसत्तमः । विनयोजयः सत्यसंधोदाशार्हः सात्वतांपतिः ॥६७॥
जीवोविनियतासाक्षीमुकुन्दोअमितविक्रमः । अम्भोनिधिरनन्तात्मामहोदिधशयोअन्तकः ॥६८॥
अजोमहार्हः स्वाभाव्योजितामित्रः प्रमोदनः । आनन्दोनन्दनोनन्दः सत्यधर्मात्रिविक्रमः ॥६९॥
महर्षिः किपलाचार्यः कृतज्ञोमेदिनीपतिः । त्रिपदस्त्रिदशाध्यक्षोमहाश्रृंगः कृतान्तकृत् ॥७०॥
महावराहोगोविन्दः सुषेणः कनकांगदी । गुह्योगंभीरोगहनोगुप्तश्चक्रगदाधरः ॥७१॥
वेधाः स्वांगोअजितः कृष्णोदृढः संकषर्णोअच्युतः । वरूणोवारूणोवृक्षः पुष्कराक्षोमहामनाः ॥७२॥
भगवान्भगहानन्दीवनमालीहलायुधः । आदित्योज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥७३॥
सुधन्वाखण्डपरशुदारूर्णोद्रविणप्रदः । दिविस्पृक्सर्वद्दग्व्यासोवाचस्पतिरयोनिजः ॥७४॥
त्रिसामासामगः सामनिवार्णभेषजंभिषक् । संन्यासकृच्छमः शान्तोनिष्ठाशान्तिः परायणम् ॥७५॥
शुभांगः शान्तिदः स्रष्टाः कुमुदः कुवलेशयः । गोहितोगोपतिर्गोप्तावृषभाक्षोवृषिप्रयः ॥७६॥
अनिर्वर्तीनिवृत्तात्मासंक्षेप्तोक्षेमकृच्छिवः । श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतांवरः ॥७७॥
श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः । श्रीधरः श्रीकरः श्रेयः श्रीमांल्लोकत्रयाश्रयः ॥७८॥
स्वक्षः स्वंगः शतानन्दोनन्दिर्ज्योतिगर्णेश्वरः । विजितात्माविधेयात्मासत्कीर्तिः छिन्नसंशयः ॥७९॥
उदीर्णः सवर्तश्चक्षुरनीशः शाश्वतस्थिरः । भूशयोभूषणोभूतिर्विशोर्कः शोकनाशनः ॥८०॥
अर्चिष्मानर्चितः कुम्भोविशुद्धात्माविशोधनः । अनिरूद्धोअप्रतिरथः प्रद्युम्नोअमितविक्रमः ॥८१॥

कालनेमिनिहावीरः शौरिः शूरजनेश्वरः । त्रिलोकात्मात्रिलोकेशः केशवः केशिहाहरिः ॥८२॥
कामदेवः कामपालः कामीकान्तः कृतागमः । अनिर्देश्यवपुर्विष्णुर्वीरोअनंतोधनंजयः ॥८३॥
ब्रह्मण्योब्रह्मकृद्ब्रह्माब्रह्मब्रह्मविवधर्नः । ब्रह्मविदब्राह्मणोब्रह्मीब्रह्मज्ञोब्राह्मणप्रियः ॥८४॥
महाक्रमोमहाकर्मामहातेजोमहोरगः । महाक्रतुमर्हायज्वामहायज्ञोमहाहविः ॥८५॥
स्तव्यः स्तवप्रियः स्तोत्रंस्तुस्तुः स्तोतारणप्रियः । पूर्णः पूरयितापुण्यः पुण्यकीर्तिरनामयः ॥८६॥
मनोजवस्तीथर्करोवसुरेतावसुप्रदः । वसुप्रदोवासुदेवोवसुवर्सुमनाहविः ॥८७॥
सद्गतिः सत्कृतिः सत्तासद्भूतिः सत्परायणः । शूरसेनोयदुश्रेष्ठः सन्निवासः सुयामुनः ॥८८॥
भूतावासोवासुदेवः सर्वासुनिलयोअनलः । दपर्हादपर्दोदृप्तोदुधर्रोअथापराजितः ॥८९॥
विश्वमूर्तिमर्हामूर्तिदीर्प्तमूर्तिरमूर्तमान् । अनेकमूर्तिव्यक्तः शतमूर्तिः शताननः ॥९०॥
एकोनैकः सवः कः किंयत्तत्पदमनुत्तमम् । लोकबन्धुलोर्कनाथोमाधवोभक्तवत्सलः ॥९१॥
सुवर्णवर्णोहमांगोवरांगश्चन्दनांगदी । वीरहाविषमः शून्योघृताशीरचलश्चलः ॥९२॥
अमानीमानदोमान्योलोकस्वामीत्रिलोकधृक । सुमेधामेधजोधन्यः सत्यमेधाधराधरः ॥९३॥
तेजोवृषोद्युतिधरः सवर्शस्त्रभृतांवरः । प्रग्रहोनिग्रहोव्याग्रोनैकश्रृंगोगदाग्रजः ॥९४॥
चतुर्मूर्तिश्चतुबार्हुश्चव्युर्हश्चगर्गति । चतुरात्माचतुभार्वश्चतुवेर्दविदेकपात् ॥९५॥

समावर्तो अनिवृत्तात्मादुजर्यो दुरितक्रमः । दुलभो दुगमो दुर्गो दुरावासो दुरारिहा ॥९६॥
शुभांगोलोकसारगः सुतन्तुस्तन्तुवधर्नः । इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥९७॥
उद्भवः सुन्दरः सुन्दोरत्ननाभः सुलोचनः । अर्कोवाजसनः श्रृंगीजयन्तः सर्वविज्जयी ॥९८॥
सुवर्णबिन्दुरक्षोभ्यः सववार्गीश्वरेश्वरः । महाह्रदो महागर्तो महाभूतो महानिधिः ॥९९॥
कुमुदः कुन्दरः कुन्दः पजर्न्यः पावनोअनिलः । अमृतांशोअमृतवपुः सवर्ज्ञः सवर्तोमुखः ॥१००॥
सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः । न्यग्रोधोदुम्बरोअश्वत्थश्चाणूरान्ध्रनिषूदनः ॥१०१॥
सहस्त्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः । अमूर्तिः रनघोअचिन्त्यभयकृद्भयनाशनः ॥१०२॥
अणुर्बृहत्कृशः स्थूलोगुणभृन्निगुर्णोमहान् । अधृतः स्वधृतः स्वास्यः प्राग्वंशोवंशवर्धनः ॥१०३॥
भारभृत्कथितोयोगीयोगीशः सर्वकामदः । आश्रमः श्रमणः क्षामः सुपर्णोवायुवाहनः ॥१०४॥
धनुर्धरो धनुर्वेदो दण्डो दमियतादमः । अपराजितः सवर्सहो नियन्तानियमो यमः ॥१०५॥
सत्त्ववान्सात्त्विकः सत्यः सत्यधमर्परायणः । अभिप्रायः प्रियार्होअर्हः प्रियकृत्प्रीतिवधर्नः ॥१०६॥
विहायसगितज्योर्तिः सुरूचिर्हुतभुग्विभुः । रविविरोचनः सूर्यः सिवतारविलोचनः ॥१०७॥
अनन्तोहुतभुग्भोक्तासुखदोनैकजोअग्रजः । अनिर्विण्णः सदामर्षीलोकाधिष्ठानमद्भुतः ॥१०८॥
सनात्सनातनतमः कपिलः कपिरप्ययः । स्वस्तिदः स्वस्तिकृत्स्वस्तिस्विस्तभुक्स्वस्तिदक्षिणः ॥१०९॥

अरौद्रः कुण्डलीचक्रीविक्रम्यूर्जितशासनः । शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥११०॥
अक्रूरः पेशलोदक्षोदक्षिणः क्षमिणांवरः । विद्वत्तमोवीतभयः पुण्यश्रवणकीतर्नः ॥१११॥
उत्तारणोदुष्कृतिहापुण्योदुः स्वप्ननाशनः । वीरहारक्षणः सन्तोजीवनः पर्यवस्थितः ॥११२॥
अनन्तरूपोअनन्तश्रीर्जितमन्युर्भयापहः । चतुरस्रोगभीरात्माविदिशोव्यादिशोदिशः ॥११३॥
अनादिभूर्भुर्वोलक्ष्मीः सुवीरोरूचिरांगदः । जननोजनजन्मादिर्भीमोभीमपराक्रमः ॥११४॥
आधारिनलयोधातापुष्पहासः प्रजागरः । ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥११५॥
प्रमाणंप्राणनिलयः प्राणभृत्प्राणजीवनः । तत्त्वंतत्त्विदेकात्माजन्ममृत्युजरातिगः ॥११६॥
भूभुर्वः स्वस्तरूस्तारः सविताप्रपितामहः । यज्ञोयज्ञपतिर्यज्वायज्ञांगोयज्ञवाहनः ॥११७॥
यज्ञभृद्यज्ञकृद्यज्ञीयज्ञभुग्यज्ञसाधनः । यज्ञान्तकृद्यज्ञगुह्यमन्नादएवच ॥११८॥
आत्मयोनिः स्वयंजातोवैखानः सामगायनः । देवकीनन्दनः स्रष्टाक्षितीशः पापनाशनः ॥११९॥
शंखभृन्नन्दकीचक्रीशारंगधन्वागदाधरः । रथांगपाणिरक्षोभ्यः सवर्प्रहरणायुधः ॥१२०॥

॥ ॐ सवर्प्रहरणायुधायनमः इति ॥

इतिदंकीर्तनीयस्यकेशवस्यमहात्मनः । नाम्नांसहस्रांदिव्यानामशेषेणप्रकीर्तितम् ॥१२१॥
यइदंश्रृणुयान्नित्यंयश्चापिपरिकीर्तयेत् । नाशुभंप्राप्नुयर्त्किचित्सोअमुत्रेहचमानवः ॥१२२॥

वेदान्तगोब्राह्मणः स्यात्क्षत्रियोविजयीभवेत् । वैश्योधनसमृद्धिः स्याच्छूद्रः सुखमवाप्नुयात् ॥१२३॥
धर्मार्थीप्राप्नुयाद्धर्ममर्थार्थीचार्थमाप्नुयात । कामानवाप्नुत्कामीप्रजार्थीप्राप्नुयात्प्रजाम् ॥१२४॥
भक्तिमान्यः सदोत्थायशुचिस्तद्गतमानसः । सहस्रंवासुदेवस्यनाम्नामेतत्प्रकीतर्येत् ॥१२५॥
यशः प्राप्नोतिविपुलंज्ञातिप्राधान्यमेवच । अचलांश्रियमाप्नोतिश्रेयः प्राप्नोत्यनुत्तम् ॥१२६॥
नभयंक्विचदाप्नोतिवीर्यंतेजश्चविन्दति । भवत्यरोगीद्युतिमान्बलरूपगुणान्वितः ॥१२७॥
रोगार्तोमुच्यतेरोगाद्बद्धोमुच्येतबन्धनात् । भयान्मुच्येतभीतस्तुमुच्येतापन्नआपदः ॥१२८॥
दुर्गाण्यतितरत्याशुपुरूषः पुरूषोत्तमम् । स्तुवन्नामसहस्रेणनित्यंभक्तिसमिन्वतः ॥१२९॥
वासुदेवाश्रयोमृत्योवासुदेवपरायणः । सवर्पापिवशुद्धात्मायातिब्रह्मसनातनम् ॥१३०॥
नवासुदेवभक्तानामशुभंविद्यतेक्वचित् । जन्ममृत्युजराव्याधिभयंनैवोपजायते ॥१३१॥
इमंस्तवमधीयानः श्रद्धाभक्तिसमन्वितः । युज्यतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः ॥१३२॥
नक्रोधोनचमात्सर्यंनलोभोनाशुभामतिः । भक्तानांकृतपुण्यानांप्रभवेत्पुरूषोत्तमे ॥१३३॥
द्यौः सचन्द्रार्क नक्षत्रा खंदिशो भूमर्होदधिः । वासुदेवस्य वीर्येर्ण विधृतानि महात्मनः ॥१३४॥
ससुरासुरगन्दर्वसयक्षोरगराक्षसम् । जगद्वशे वरर्तेदं कृष्णस्य सचराचरम् ॥१३५॥
इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः । वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ॥१३६॥

सर्वागर्मानामाचरः प्रथमं पिरकल्पते । आचारप्रभवो धर्मो धर्मस्य प्रमुरच्युतः ॥१३७॥
ऋषयः पितरो देवा महाभूतानि धातवः । दंगमाजंगमं चेदं जगन्नारायणोद्भवम् ॥१३८॥
योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादि कर्म च । वेदाः शास्त्राणि विज्ञानमेतत्सर्वजनादर्नात् ॥१३९॥
एको विष्णुमर्हद्भुतं पृथग्भूतान्यनेकशः । त्रींल्लोकान्व्याप्य भूतात्मा भुंक्ते विश्वभुगव्ययः ॥१४०॥
इमं स्तवं भगवतो विष्णोव्यार्सेन कीर्तितम् । पठेद्यः इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥१४१॥
विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम् । भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ॥१४२॥
पद्मपत्रविशाक्ष पद्मनाभ सुरोत्तमः । भक्तानामनुरक्तानां त्राता भव जनार्दनः ॥१४३॥
यो मां नामसहस्त्रेण स्तोतुमिच्छति पाण्डव । तेन चैकेन श्लोकेन स्तुत एव न संशयः ॥१४४॥
नमोस्त्वनन्ताय सहस्त्रमूर्तये सहस्त्रपादाक्षिशिरोरुबाहवे । सहस्त्रनाम्ने पुरुषाय शाश्वते सहस्त्रकोटियुगधारिणे नमः ॥१४५॥
नमः कमलनाभाय नमस्ते जलशायिने । नमस्ते केशवानन्त वासुदेव नमोऽस्तुते ॥१४६॥
वासनाद्वासुदेवस्य वासितं भुवनत्रयम् । सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते ॥१४७॥
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च । जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥१४८॥
आकाशात्पतितं तोयं यथा गच्छति सागरम् । सर्वदेवनमस्कारः केशवं प्रति गच्छति ॥१४९॥
एष निष्कण्टकः पन्था यत्र सम्पूज्यते हरिः । कुपथं तं विजानीयाद्गोविन्दरहितागमम् ॥१५०॥

सर्ववेदेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् । तत्फलं समवाप्नोति स्तुत्वा देवं जनार्दनम् ॥१५१॥
यो नरः पठते नित्यं त्रिकालं केशवालये । द्विकालमेककालं वा क्रूरं सर्वे व्यपोहति ॥१५२॥
दह्यन्ते रिपवस्तस्य सौम्याः सर्वे सदां ग्रहाः । विलीयन्ते च पापानि स्तवे ह्यस्मिन् प्रकीर्तिते ॥१५३॥
येन ध्यातः श्रुतो येन येनायं पठितेः स्तवः । दत्तानि सर्वदानानि सुराः सर्वे समर्चिताः ॥१५४॥
इह लोके परे वापि न भयं विद्यते कचित् । नाम्नां सहस्त्र योऽधीते द्वादश्यां मम सन्निधौ ॥१५५॥
शनैर्दहति पापानि कल्पकोटिशतानि च ।अश्वत्थसन्निधौ पार्थ तुलसीसन्निधौ तथा ॥१५६॥
पठेन्नामसहस्त्रं तु गवां कोटिफलं लभेत् । शिवालये पठेन्नित्यं तुलसीवनसंस्थितः ॥१५७॥
नरो मुक्तिमवाप्नोति चक्रपाणेर्वचो यथा । ब्रह्महत्यादिकं घोरं सर्वपापं विनश्यति ॥१५८॥

*॥ ॐ तत्सत्सदिति श्रीमहाभारते शतसाहस्त्ररुयां संहितायां वैयासिक्यामानुशासिनके पर्वणि भीष्मयुधिष्ठीर संवादे श्रीविष्णोर्दिव्य सहस्त्रनामस्तोत्रम् ॥*

●

## महापूजा

### अथ भगवत् स्मरण ।

हस्ते अक्षत पुष्पानि गृहीत्वा

वाणी मंगल रुपिणी च हसितं यस्यास्ति वै मंगलम् नेत्रे मंगलदे च दोर्विलसितं नृणां परं मंगलम् ।
वक्त्रं मंगलकृच्च पादचलितं यस्याखिलं मंगलम् सोऽयं मंगल मूर्तिराशु जगतो नित्यं क्रियान् मंगलम् ॥

(પુષ્પ ભગવાનને ચડાવી દેવાં)

### शिखाबंधनम्

श्रीधर श्रीपते स्वामिन् भक्तानामभयंकर । तिष्ठ देव शिखाबन्धे स्वामिनारायण प्रभो ॥

(પછી હાથ ધોઈ નાંખવા)

### अथ यजमान भाले तिलकं कुर्यात् ।

卐 हरिः ॐ स्वस्ति नऽ इन्द्रो वृध्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्ताक्ष्योंऽ अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥ 卐

हस्ते रक्षाबन्धनम्

मंत्रार्थाः सफलाः संतु संतु पूर्णा मनोरथाः । शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥

## अथ यज्ञोपवीत धारण विधि ।

卐 हरिः ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतं श्रृणुयाम शरदः शतं प्रब्रवाम शरदः शतं अदीनाः स्याम शरदः शतं भूयश्य शरदः शतात् ॥ 卐

यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ।
आयुष्यमग्रं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥

## अथ आचमन विधिः ।

वारत्रयं आचमनं कुर्यात्

ॐ अवतारिणे श्री स्वामिनारायणाय नमः । ॐ अवतारिणे श्रीहरिकृष्णाय नमः ।
ॐ अवतारिणे श्री सहजानंदाय नमः । ॐ माधवाय नमः हस्त प्रक्षालतम्

## अथ प्राणायाम विधिः

वारत्रयं प्राणायमं कुर्यात्,
ॐ श्री स्वामिनारायणाय नमः ।

## अथ शांतिपाठ ।

हस्ते अक्षत पुष्पाणि गृहीत्वा अधोनिर्दिष्ठाः मंत्राः पठेत्

卐 ॐ द्यौः शान्तिरन्तरिक्ष (गूं) शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्व (गुं) शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ 卐

हरिः शान्तिं हरिकृष्णः शान्तिं कृष्णः प्रयच्छतु । भक्तिधर्मात्मजस्तुभ्यं चैवं शान्तिं प्रयच्छतु ॥
शांति यच्छतु ते देवः स्वमिनारायणः प्रभुः । नारायणमुनिस्तुभ्यं शांतिं यच्छतु सर्वदा ॥
ॐ शान्तिः शान्तिः शान्तिः । सुशान्तिर्भवतु । सर्वारिष्टसर्वोपद्रवशान्तिर्भवतु ।

(પુષ્પ, ચોખા ભગવાનને ચડાવી દેવા)

## सर्वविघ्नोपशान्तये अथ गणपति स्मरणाम्

सुमुखश्चैक दंतश्च कपिलोगजकर्णकः । लंबोदरश्च विकटो विघ्ननाशो विनायकः ॥
धूमकेतुर्गणाध्यक्षो भालचंद्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि ।
विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा । संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥
शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशान्तये ।
ॐ श्री सिद्धि बुद्धि सहित श्रीमन्महागणाधिपतये नमः ।

## अथ भगवत् स्मरण ।

वर्णिवेषरमणीय दर्शनं मन्दहासरुचिरान नाम्बजम् । पूजितं सुरनरोत्तमैर्मुदाधर्मनंदनमहं विचिन्तये ॥
मंगलं भगवान् विष्णुर्मंगलं गरुडध्वजः । मंगलम् पुण्डरीकाक्षो मंगलायतनो हरिः ॥
तदेव लग्नं सुदिनं तदेव, ताराबलं चंद्रबलं तदेव । विद्याबलं दैवबलं तदेव, लक्ष्मीपते तेंऽघ्रियुगं स्मरामि ॥

(આ પ્રમાણે ભગવત્ સ્મરણ કરી પૂજા નિમિત્તનો સંકલ્પ કરવો)

## अथ संकल्प ।

ॐ विष्णुर्विष्णुर्विष्णुः । श्रीमद् भगवतो महापुरुषस्य, विष्णोराज्ञया प्रवर्तमानस्य, अद्य ब्रह्मणो, द्वितीये परार्धे, श्री श्वेतवाराह कल्पे, सप्तम वैवस्वतमन्वन्तरे, ्अष्टाविंशतितमे कलियुगे, कलि प्रथम चरणे, भूर्लोके, जंबूद्वीपे, भारतवर्षे आर्यावर्तान्तर्गत, ब्रह्मावर्तैकदेशे, गुजरात प्रान्ते, साभ्रमत्यास्तीरे श्रीनगरे अत्राद्य नारायण संवत्सरे नारायण अयने नारायण ऋतौ महामांगल्य फलप्रद मासोत्तम मासे, नारायण मासे, नारायण पक्षे नारायण तिथौ नारायण वासरे यथायथं राशिस्थान स्थितेषु सर्वेषु ग्रहेषु अहं मम आत्मनः श्रुति स्मृति पुराणोक्त फल प्राप्त्यर्थं धर्मार्थ काममोक्षाख्य चतुर्विध पुरुषार्थ फल प्राप्त्यर्थं श्री स्वामिनारायण देवता पीत्यर्थं यथाशक्ति यथा मिलीतोपचारद्रव्यैः अनेक कोटि ब्रह्मांडाधीश्वरस्य पूर्ण पुरुषोत्तमस्य भगवतः श्री स्वामिनारायणस्य पूजनं करिष्ये ॥

## अथ पृथ्वी पूजन ।

हस्ते गन्धाक्षत पुष्पाणि गृहीत्वा

पृथ्वी त्वया धृता लोका देवि ! त्वं विष्णुना धृता । त्वं च धारय मां देवि ! पवित्रं कुरु चासनम् ॥

ॐ पृथ्वी कूर्मानंतवाराह देवताभ्यो नमः । सकलोपचारार्थे गंधाक्षतपुष्पैः संपूजयामि ॥

## अथ दिक् रक्षण विधिः

वाम हस्ते गौर सर्सपान् गृहीत्वा

अपसर्पन्तु ते भूता ये भूता भूमि संस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥
अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशम् । सर्वेषामविरोधेन पूजाकर्म समारभे ॥

उपरिस्थितान्मंत्रात् पठित्वागौर सर्सपान् चतुर्दिक्षुवि किरेत्

१. वारत्रयंतालीदानम् । २. वारत्रयं वामपादं भूर्मोता्नम् ।

३. दक्षिणहस्तेन चक्षुषोः जल स्पर्शः

द्रव्याक्षत पुष्पाणि गृहीत्वा

ॐ स्वामिनारायणाय परमात्मने नमः । ॐ लक्ष्मीनारायणाय नमः ।

ॐ नरनारायणाय नमः । ॐ श्रीमन्महागणाधिपतये नमः ।

ॐ उमामहेश्वराभ्यां नमः । ॐ वाणीहिरण्यगर्भाभ्यां नमः ।

ॐ कुलदेवेभ्यो नमः । ॐ ईष्टदेवाय नमः ।

ॐ सर्वेभ्यो देवेभ्यो नमः ॥

(भगवतः चरणयोः समर्पयेत्)

**अथ कलश पूजन विधि :**

स्ववामभागे अक्षतपुंजोपरि कलशं निधाय

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥

कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुंधरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥
गंगे च यमुने चैव गोदावरि सरस्वति । कावेरि नर्मदे सिन्धु जलेऽस्मिन् सन्निधिंकुरु ॥
सर्वे समुद्राः सरितस्थीर्थानि जलदा नदाः । आयान्तु देव पूजार्थं दुरितक्षयकारकाः ॥

**अथ कलशे वरुणावाहान विधिः ।**

गन्धाक्षतपुष्पाणि गृहीत्वा कलशे वरुण मावार्हयेत्

आवाहयामि देवेश वरुणं यादसां पतिम् । पापनाशकरं दिव्यम् कलेशऽस्मिन् शुभावहम् ॥
नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमंगलाय । सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥
अस्मिन् कलशे वरुणं सांगं सपरिवारं सायुधं सशक्तिकं सतीर्थमावाहयामि स्थापयामि ॥

(वम्, वम् इत्थमष्टौ वारंमुक्तवा पुष्पाणि कलश मध्ये क्षिपेत् कलशस्य चतुर्दिक्षु ऋग्वेदादीन पूजयेत् । इन्द्रादीन पूजयंत्)

अथ पूर्वे ॐ इन्द्राय नमः । दक्षिणे ॐ यमामय नमः। पिश्चमे ॐ वरुणाय नमः । उत्तरे ॐ कुबेराय नमः । कलशमध्ये – अपांपतये वरुणाय नमः ॥ सर्वोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ।

卐 ॐ आपो हिष्ठा मयोभुवस्तानऽऊर्जेदधातन । महेरणाय चक्षसे ॥ यो वः शिवतमो रसस्तस्य भाजयतेहनः उशतीरिव मातरः । तस्माऽ अरंगमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा । यः स्मरे त्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः ॥

(कलश पूजनं विधाय भगवतः सन्निकटेस्थापयेत्)

## अथ शंख पूजन विधिः

(पाञ्चजन्याय विद्महे पावमानायधीमहि तन्नो शंखः प्रचोदयात्)

त्वं पुरा सागरोत्पन्न विष्णुना विधृतः करे । नादितः शत्रुनाशार्थं पांचजन्य ! नमोऽस्तु ते ॥

卐 ॐ शंखस्थ देवतायै नमः । प्रार्थना पूर्वक नमस्कारान् समर्पयामि – सकलोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि।

(इति मंत्रेण शंखं पूजयेत्)

## अथ घंटा पूजन विधिः

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् । घंटानादं प्रकुर्वीत पश्चाद् घंटां प्रपूजयेत् ॥

ॐ घंटास्थ गरुडदेवतायै नमः स्नानं समर्पयामि । सकलोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ॥

## अथ दीप पूजन विधि ।

भो दीप देवरुपस्त्वं कर्मसाक्षी ह्यविघ्नकृत् । यावत् कर्म समाप्तिः स्यात्तावदत्रस्थिरो भव ॥

ॐ दीपाधिष्ठित परमात्मने श्री स्वामिनारायणाय नमः। प्रार्थना पूर्वक नमस्कारान् समप्रयामि ।

सकलोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ।

## अथ सूर्य पूजन विधिः ।

(हस्ते गन्धाक्षत पुष्पाणिगृहीत्वा)

ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः सरिसजासनसंनिविष्टः ।
केयूरवान्मकरकुंडलवान्किरीटी हारी हिरण्मयवपुर्धृत शंखचक्रः ॥

ॐ सूर्य मंडलान्तर्वर्तिने भगवते श्री स्वामिनारायणाय नमः । ध्यायामि ।

ॐ त्रिभुवन भास्कराय नमः ।

यथाशा विमलाः सर्वाः सूर्य भास्करभानुभिः । तथाशाः सफला मह्यं कुरु नित्यं ममार्घ्यतः ॥

ॐ सूर्य मंडलान्तर्वर्तिने भगवते श्री स्वामिनारायणाय नमः हस्तयोः अर्घ्यं समर्पयामि ।

## अथध्यानम् ।

(हस्ते दुर्वाक्षतान् गृहीत्वा)

卐 ॐ गणानान्त्वा गणपति गूं हवामहे प्रियाणान्त्वा प्रियपति गूं हवामहे
नीधीनान्त्वा निधिपति गूं हवामहे वसो मम आहमजानिगर्भघमा त्वमजासि गर्भधम् ॥ 卐

ॐ श्री गं गणपतये नमः ॥

श्वेतांगं श्वेतवस्त्रंसितकुसुमगणैः पूजितं श्वेतगंधैः क्षीराब्धौ रत्नदीपैः सुरतरुविमले रत्नसिंहासनस्थम् ।
दोर्भिः पाशां कुशेष्टाभयधृतिविशदं चंद्रमौलिं त्रिनेत्रं ध्यायेच्छान्त्यर्थमीशं गणपतिममलं श्रीसमेतं प्रसन्नम् ॥

ॐ श्री सिद्धि-बुद्धि सहित श्रीमन् महागणाधिपतये नमः । ध्यायामि ।

अथ आवाहनम् ।

आगच्छ देवदेवेश तेजोराशे ! जगत्पते । क्रियमाणं माया पूजां गृहाण सुरसत्तम ॥

**अथ आसनम् ।**

दुर्वांकुरैः सुहरितैः आनीतैः सुकुमारिभिः । निर्मितं ब्रह्मणा पूर्वमासनं प्रतिगृह्यताम् ॥

**अथ पाद्यम् ।**

तीर्थात् संगृह्य यत्नेन सुगंधि मिश्रितं मया । पाद्यार्थमुदकं दत्तं संगृहाण सुरेश्वर ॥

ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः पाद्यम् समर्पयामि ।

**अथ अर्घ्यम् ।**

(फल पुष्प चंदन युतं जलं)

फलमर्ध्यं गृहाण त्वं गंधपुष्पजलान्वितम् । भक्त्या तुभ्यं प्रदास्यामि प्रसीद गणनायक ॥

ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः हस्तयोः अर्घ्यम् स्मर्पयामि ।

**अथ आचमनम्**

आचम्यतां गणाधीश मयानीतं सुवासितं । जलं सुमधुरं देव तीर्थस्थानसमाश्रितम् ॥

ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः अर्घ्यांन्ते आचमनीयं समर्पयामि ।

## अथ स्नानम् ।

मयानीतं जलं पुण्यं सागरेभ्यः सुयत्नतः । स्नानार्थं गृह्यतां देव शांतिं मे कुरु सर्वतः ॥
ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः स्नानाम् समर्पयामि ।

## अथ पंचामृत स्नानम् ।

दधिदुग्धघृतं चैव शर्करा मधुसंयुक्तम् । पंचामृतं गृहाणेदं स्नानार्थं कल्पितं मया ॥
ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः मिलित पंचामृत स्नानं समर्पयामि ।
पंचामृत स्नानांते शुद्धोदक स्नानं समरप्यामि शुद्धोदक स्नानांते आचमनीयं समर्पयामि ।

## अथ शुद्धोदक स्नानम् ।

सुवासितं जलं शुद्धं देहशुद्धि विधायकं । प्रीत्या तुभ्यं प्रयच्छामि प्रसीद गणनायक ॥
ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः शुद्धोदक स्नानं समर्पयामि ।
शुद्धोदक स्नानांते आचमनीयं समर्पयामि ।

## अथ वस्त्रोपवस्त्रे ।

लोक लज्जाहरं शुभ्रं वस्त्र संपत्तिदायकम् । गृहाण देवदेवेश प्रसीद परमेश्वर ॥
ॐ सांगाय सपरिवाराय भगवते श्रीमान् महागणाधिपतये नमः वस्त्रोपवस्त्रं समर्पयामि ।
वस्त्रोपवस्त्रान्ते आचमनीयं समर्पयामि ।

## अथ यज्ञोपवीतम् ।

यज्ञोपवीतं परमं पवित्रं पापनाशनम् । बलं शुध्धं व्रतानां यत् तत्ते दत्तं गृहाण ह ॥
ॐ सांगाय सपरिवाराय भगवते श्रीमान् महागणाधिपतये नमः यज्ञोपवीतं समर्पयामि ।
यज्ञोपवीतांते आचमनीयं समर्पयामि ।

## अथ चंदनम् ।

केशरादि युतं दिव्यं गोरोचन समन्वितं । चंदनं च मया दत्तं गृहाण गणनायक ॥
ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः चंदनम् समर्पयामि ।

## अथ अक्षताः ।

गृहाण देवदेवेश अक्षतानाहृतान् मया । प्रसीद परमेश त्वं धनं धान्यं च देहि मे ॥
ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः अक्षतान् समर्पयामि ।

## अथ उद्वर्तनम् ।

उद्वर्तनार्थं दत्तं ते मया प्रीत्या गणेश्वर । सुगंधितैलं कार्पासं संगृहाण सुरेश्वर ॥
ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः उद्वर्तनम् समर्पयामि ।

## अथ पुष्पाणि ।

पुष्पाणि विविधान्ये–तान्याहृतानि प्रयत्नतः । मालां चैव तथानीतां गृहाण गणनायक ॥

ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः पुष्पाणि पुष्पमालां च समर्पयामि ।

**अथ सौभाग्यद्रव्याणि ।**

अबीलं च गुलालं च चोवा चंदनमेव च । नाना परिमलद्रव्यैः प्रीयतां परमेश्वर ॥

ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः सौभाग्यद्रव्याणि समर्पयामि ।

**अथ धूपः ।**

धूपं गृहाण देवेश चंदनागरुसंयुतम् । गुग्गुलेन समायुक्तं मयानीतं हि भक्तितः ॥

ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः धूपमाघ्रापयामि ।

**अथ दीपः ।**

कार्पासवर्तिना युक्तं गोघृतेन प्रपूरितम् । दीपं गृहाण देवेश मम गृहं प्रकाशय ॥

ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः दीपंर्शयामि ।

**अथ नैवैद्यम् ।**

आधारे स्वर्णादिपात्रे भक्ष्य भोज्य लेह्यचोष्यात्मकं अन्नं परिवेष्य तदुपरि तुलसीपत्रं निधाय ।

ॐ भूभुर्वः स्वः । तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि । धियो यो नः प्रचोदयात् ॥

शर्कराखण्डखाद्यादि, दधिक्षीर घृतादिभिः । आहारै र्भक्ष्यभोजयैश्च, नैवेद्यं प्रतिगृह्यताम् ॥

ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः । नैवेद्यं निवेदयामि ।

देवाधिदेव विश्वेश श्री गजानन प्रभो । गृहाणेदं जलं पूर्वापोशनार्थं दयानिधे ॥
ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः । समर्पयामि ।
ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ उदानाय स्वाहा । ॐ समानाय स्वाहा ।
एलोशीरलवंगादि कर्पूरागरुवासितम् । अति तृप्तिकरं तोयं, स्वेच्छया त्वं पिब प्रभो ॥
ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः । मध्ये पानीयं समर्पयामि ।

अथ पुनः पंच प्राणाहुतीर्दद्यात् :-

ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ उदनाय स्वाहा । ॐ समानाय स्वाहा ।

जमो थाळ जीवन जाउं वारी, धोवुं कर चरण करो त्यारी, जमो०.... टेक
बेसो मेल्या बाजोठिया ढाळी, कटोरां कंचननी थाळी, जळे भर्या चंबु चोखाळी, जमो थाळ०....१
कारी काठा घउंनी पोळी, मेली घृतसाकरमां बोळी, काढ्य रस केरीनो घोळी, जमो थाळ०....२
गळ्या साटा घेबर फुलवडी, दुधपाक मालपुवा कढी, पुरी पोची थई छे घीमां चढी, जमो थाळ०....३
अथाणां शुक सुंदर भाजी, लावी शुं तरत करी ताजी, दहीं भात साकर छे झाझी, जमो थाळ०....४
चळु करो लावुं जळ झारी, एलची लविंग सोपारी, पानबीडी बनावी सारी, जमो थाळ०....५
मुखवास मनगमता लईने, प्रसादी थाळ तणी दईने, भूमानंद कहे राजी थईने, जमो थाळ०....६

उत्तरापोशनं समर्पयामि । हस्तप्रक्षालनं समर्पयामि। मुख प्रक्षालनं समर्पयामि ।

कस्तूरी कुंकुमोपेतं, गोरोचन समन्वितम् । करांगोद्धर्तनं गंधं, गृहाण गणनायक ॥

ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः करोद्वर्तनार्थे चंदनं समर्पयामि ।

ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः । नैवेद्यान्ते आचमनीयं समर्पयामि ।

**अथ ताम्बूलम् ।**

तांबूलं गृह्यतां देव एलाचूर्ण समन्वितम् । पूगीफलयुतं दिव्यं मया दत्तं च भक्तितः ॥

ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः । मुखवांसं समर्पयामि ।

**अथ फलार्घ्यम् ।**

इदंफलं मयादेव, स्थापितं पुरतस्तव । तेन मे सफलावाप्ति, र्भवेज्जन्मनि जन्मनि ॥

ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नः । फलार्घ्यं समर्पयामि ।

**अथ दक्षिणा ।**

हिरण्यपुष्पं मद्दतं दक्षिणार्थं प्रयत्नतः । गृहाण देवदेवेश प्रसीद परमेश्वर ॥

ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नः । दक्षिणां समर्पयामि ।

**अथ नीराजनम् ।**

कार्पासवर्ति संयुक्तं दीपं प्रज्वाल्य प्रेमतः । निराजनमहं कुर्वे प्रसीद गणनायक ॥

## गणपतिजीकी आरती

जय गणपति प्यारा, जय गणपति प्यारा विघ्नविनायक मूर्ति, सुखगायक सारा–जय ०१
जय जय शंभुकुमार शोक सदा हरता, देव विशेष विचक्षण, रक्षणना कर्ता–जय–०२
गौरी पुत्र गणेश, वंदु कर जोडी, स्मरण करे छे तेना, दुःख नाखो तोडी–जय०३
लचपचतां लाडुनुं, भोजन बहु भावे, आप बिराजो छो त्यां संकट नव आवे–जय०४
सिद्धि बुद्धि बेउ, शुभ पत्नी संगे, शुभ कामे विचरो छो, अतिशय उछंरंगे–जय०५
सुरनर मुनिवर सर्व, सेवे छे तमने मंगळकारी मूर्ति, आपो सुख अमने–जय०६
जय संकट हर सुखकर, अरजी उर धरजो, शरणागत सेवकनो अभ्युदय करजो–जय०७
ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नमः । नीराजनं समर्पयामि ।
देवाभिवन्दनम् । आत्माभिवन्दनम् । हस्तप्रक्षालयनम् ।

### अथ प्रदिक्षणा ।

देवाधिदेव देवेश ममार्तिनाशनाय च । प्रदक्षिणां कृतामेतां स्वीकुरु गणनायक ॥
ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नः । प्रदक्षिणां समर्पयामि ।

### अथ मंत्रपुष्पांजलि ।

विघ्नेश्वराय वरदाय सुरप्रियाय  लांबोदराय सकलाय जगद्धिताय ।

नागाननाय श्रुतियज्ञविभूषिताय गौरी सुताय गणनाथ नमो नमस्ते ॥

ॐ सांगाय सपरिवाराय भगवते श्रीमन् महागणाधिपतये नः । मंत्रपुष्पांजलिं समर्पयामि ।

रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक। भक्तानामभयंकर्ता त्राता भव भवार्णवात् ।

ॐ श्री सिद्धि बुद्धि सहित श्रीमन् महागणादिपतये नमः । विशेषार्घ्यं समर्पयामि ।

नमस्ते ब्रह्मरुपाय विष्णुरुपाय ते नमः । नमस्ते रुद्ररुपाय करिरुपाय ते नमः ॥

लंबोदर नमस्तुभ्यं सततं मोदकप्रिय । निर्विघ्नं कुरु मे देव ! सर्व कार्येषु सर्वदा ।

ॐ श्री सिद्धि बुद्धि सहित श्रीमन् महागणादिपतये नमः । प्रार्थनापूर्वक नमस्कारान् । समर्पयामि ।

अनया पूजया श्री गणेशः सांगः सपरिवारः प्रीयतां न मम ।

## अथ पूजाधिकार सिध्यर्थं देहन्यास विधि ।

अस्य श्री त्रयोदशाक्षरं मंत्रस्य अखंडानंद ऋषिः । गायत्री छंदः । अवतारी श्री हरिकृष्ण भगवद्देवता । धर्मपुत्रेति बीजम् नैष्टिकव्रतधरेति शक्तिः । भक्ति प्रवर्तकेति कीलकम् । श्री स्वामिनारायण प्रीत्यर्थं न्यासे विनियोगः ।

ॐ श्रीहरये नमोऽगुष्ठाभ्यां नमः ।

ॐ कृष्णाय नमस्तर्जनीभ्यां नमः ।

ॐ हरिकृष्णाय नमो मध्यमाभ्यां नमः ।

ॐ नीलकंठायनमो अनामिकाभ्यां नमः ।

ॐ नारायणाय नमः कनिष्ठिकाभ्यां नमः ।

ॐ स्वामिनारायणाय नमः करतल करपृष्ठाभ्यां नमः ।

## अथ हृदयादि न्यास विधि ।

ॐ श्रीहरये नमो हृदयाय नमः । ॐ कृष्णाय नमः शिरसे स्वाहा ।
ॐ हरिकृष्णाय नमः शिखायै वषट् । ॐ नीलकंठाय नमः कवचाय हुम् ।
ॐ अवतारिणे श्री स्वामिनारायणाय नमः नेत्राभ्यां वौषट् ।

## भगवतः श्री स्वामिनारायणस्य ध्यानम्

卐 हरिः ॐ सहस्त्र शीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात् ।
स भूमि गूं सर्वतस्पृत्वा त्यतिष्ठद्दशांगुलम् ॥१॥ 卐

श्रीकृष्णं द्विभुजं किशोरवयसं धार्मि सुपद्मेक्षणं सस्मेराब्जमुखं स्वभक्त समितौ सिंहासने राजितम् ।
भक्तैः केसर चन्दनैर्बहुविधैर्हारावतंसादिभिः पुष्पैः पूजितमादरेण हृदये शुक्लांबरं चिन्तये ॥
अक्षरधाम मध्यस्थं ह्यनंत मुक्त सेवितम् । नैकेन्दु सुप्रभं रम्यं श्रीहरिं चितयाम्यहम् ॥११॥
ॐ साङ्गं सपरिवारं भगवंतं श्री स्वामिनारायणं ध्यायामि ।

## अथ आवाहनम् ।

(अक्षत पुष्पाणि गृहीत्वा)

भक्तानामभयंकरं प्रियतमं स्वानां स्वमूर्तिप्रदं धार्मे त्वां पुरुषोत्तमं सुखनिधिं चावाहनीयं सदा ।
स्वीयं भागवताख्य धर्ममवितुं प्राकट्यमाप्तं क्षितौ सर्वेषां पुरुमंगलस्य विधये ह्यावाहयामि प्रभो ।

उत्तिष्ठोत्तिष्ठ गोविन्द ! उत्तिष्ठ गरुडध्वज ! उत्तिष्ठ कमलाकान्त ! त्रैलोक्यं मंगलं कुरु ॥
उत्तिष्ठोतिष्ठ हे नाथ । स्वामिनारायण प्रभो । धर्मसूनो दयासिंधो । स्वेषांश्रेयः परं कुरु ॥
आगच्छ भगवन् देव ! स्वस्थानात् परमेश्वर । अहं पूजां करिष्यामि सदा त्वं सम्मुखो भव ।
ॐ साङ्ग सपरिवारं भगवंतं श्री स्वामिनारायणं आवाहयामि स्थापयामि पूज्यामि ।

## अथ आसनम् ।

卐 पुरुषऽ एवेद गूं सर्वं यद्भूतं यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ 卐
रत्नेन्द्रैः खचिते सुवर्ण रचितं, सिंहासने भासुरे, रम्येदेवविनिर्मितेऽतिवितते, सोपानसंराजिते ।
सिंहाकार पदाष्टकेऽतिमृदुले, दासेन दत्ते मया, सद्भिर्हृत्कमले निवासित उरु प्रेम्णानिषीद प्रभो ।
रम्यं सुशोभनं दिव्यं, सर्व सौख्यकरं शुभम् । आसनं च मया दत्तं, गृहाण पुरुषोत्तम् ॥
ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । आसनं समर्पयामि ।

## अथ पाद्यम् ।

卐 ॐ एतावानस्य महिमातो ज्यायाँश्च पूरुषः । पादोस्य विश्वाभूतानित्रिपादस्या । मृतन्दिवि ॥ 卐
मुक्तैः सेवति पादपंकजयुगः पुष्पात्मजः श्रीपते, कारुण्येन निजेन तारित जनस्त्वं नीलकंठाभिधः ।
गंगाया जलमुत्तमं सुरपते गंधेन पुष्पाक्षतै, र्युक्तं पाद्यमिदं सुवर्णकलशे संस्थं गृहाण प्रभो ॥
उष्णोदकं निर्मलं च सर्व सौगन्ध्य संयुतम् । पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । पाद्यं समर्पयामि ।

## अथ अर्घ्यम् ।

卐 त्रिपादूर्ध्वऽ उदैत्पुरुषः पादोस्येहाभवत्पुनः । ततो विष्वङ्व्यक्रामत्साशनानशनेऽ अभि ॥ 卐

नित्यं शेष विधीशदेवमुनिभिः प्रेम्णार्चिताङ्घ्रिर्हरे जातः साधुजनान्वृषस्य पुखिनः कर्तुं गृहेत्वं स्वयम् ।

दुर्वापद्य पवित्र सर्षपयव श्रीखंड पुष्पाक्षतै-र्युक्तं कांचन भाजनस्थमुदकं ह्यर्घ्यं गृहाणत्विदम् ॥

अर्घ्यं गृहाण देवेश गंधपुष्पाक्षतैः सह । करुणाकर मे देव । स्वामिनारायण प्रभो ।

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । हस्तयोः अर्घ्यं समर्पयामि ।

## अथ आचमनम्

卐 ततो विराडजायत विराजोऽ अधि पूरुषः । स जातोऽ अत्यरिच्चत पश्चाद् भूमि मथो पुरः ॥ 卐

जीवान्यांतिक मोक्षमीक्ष कृपया, कर्तुं भुवि त्वं हरे प्रादुर्भूय जनेषुसत्सु सदसश्चैकान्त धर्मं दधत् ।

प्रीत्या वासितमुत्तमं सुनलदैः गंगोदकं शीतलं स्वामिन्नाचमनीयकं शुभमिदंगृह्णीष्व दत्तं मया ॥

सर्वतीर्थ समायुक्तं, सुगन्धि निर्मलं जलम् । आचम्यतां मया दत्तं, स्वामिनारायण प्रभो ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । अर्घ्यान्ते आचमनीयं समर्पयामि ।

## अथ स्नानम् ।

卐 तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम् । पशूँस्ताँश्चक्रे वायव्या नारण्या ग्राम्याश्च ये ॥ 卐

स्वासक्तैः स्ववृषेस्थितैश्चमुनिभिः साकं स्वगंगा जले, कर्तुं स्नानमहर्निशं सुनिरतस्त्वं स्वामिनारायणः ।
उष्णं शीतलमेव वांबुकलशे, संस्थं यथर्तु प्रभो, भक्ताधीन मलक्षयाय च मया, दत्तं हरे स्वीकुरु ॥
गंगा सरस्वती रेवा, पयोष्णी नर्मदा जलैः । स्नापितोऽसि मया देव, स्वामिनारायण प्रभो ॥
ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । मलापकर्ष स्नानं समर्पयामि ।

**अथ पंचामृत स्नानम् ।**

卐 ॐ पंच नद्यः सरस्वतीमपियन्ति सस्नोतसः । सरस्वती पु पंचधा सो देशेभवत्सरित् ॥ 卐
ब्रह्माख्ये निजधाम्नि दिव्य विभवैर्युक्तः स्थितः सर्वदा मुक्तैः सेवित पादपल्ल्वयुगो नैकावतारान्दधत् ।
धर्मागप्रभवः पयोदधि घृतं क्षौद्रं सितां कृष्ण मे प्रीत्यर्थं स्नपनं गृहाण कृपया पंचामृतेन प्रभो ॥
पयोदधि घृतं चैव, मधु शर्करान्वितम् । पंचामृतं मयानीतं, स्नानार्थं प्रति गृह्यताम् ॥
ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । मिलित पंचामृत स्नानं समर्पयामि ।
पंचामृत स्नानान्ते शुध्धोदक स्नानं समर्पयामि । शुद्धोदक स्नानान्ते आचमनीयं समर्पयामि ॥

**अथ पयः स्नानम् ।**

卐 ॐ पयः पृथिव्यां पयऽ ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः । पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ 卐
कामधेनु समुद्भूतं, सर्वेषामपि जीवनम् । यज्ञहेतुं पयस्तुभ्यं, स्वामिन् स्नानार्थमर्पये ॥
ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । पयः स्नानं समर्पयामि ।

पयः स्नानान्ते शुद्धोदक स्नानं समर्पयामि । शुद्धोदक स्नानान्ते आचमनीयं समर्पयामि ॥

**अथ दधि स्नानम् ।**

卐 ॐ दधिक्राव्णोऽ अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखाकरत्प्रण आयू गूंषि तारिषत् ॥ 卐

पयसस्तु समुद्भूतमम्लद्रव्यं संयोगतः । दध्यानीतं मया धार्मे, स्नानार्थ प्रति गृह्यतामा् ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । दधि स्नानं समर्पयामि ।

दधि स्नानान्ते शुद्धोदक स्नानं समर्पयामि । शुद्धोदक स्नान्ते आचमनीयं समर्पयामि ॥

**अथ घृत स्नानम् ।**

卐 ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।

अनुष्वधमावह मादयत्स्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥ 卐

नवनीत समुद्भूतं सर्व संतोषकारकम् । यज्ञांगं देवताहारं, घृतंस्नानार्थमानीतम् ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । घृतस्नानं समर्पयामि ।

घृत स्नानाते शुद्धोतक स्नानं समर्पयामि । शुद्धोदक स्नानान्ते आचमनीयं समर्पयामि ॥

**अथ मधु स्नानम् ।**

卐 ॐ मधु वाताऽऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ।

मधु नक्तमुतोषसो मधुमत्पार्थिव गूं रजः ।

मधुद्यौरस्तुनः पिता । मधुमान्नो वनस्पतिर्मधुमा अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः । 卐

वृक्षसारसमुद्भूतं, सर्व तेजो विविर्धनम् । सर्व पुष्टिकरं कृष्ण, मधुस्नानंसमर्पये ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । मधु स्नानं समर्पयामि ।

मधुस्नानाते शुध्धोतक स्नानं समर्पयामि । शुध्धोदक स्नानान्ते आचमनीयं समर्पयामि ॥

अथ शर्करा स्नानम् ।

卐 ओम् अपगूं रसमुद्वयसगूं सूर्ये सन्तगूं समाहितं । अपागूं रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपया–
मगृहीतो सीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिंद्राय त्वां जुष्टतमम् ॥ 卐

ईक्षुसारसमुद्भूतां शर्करां सुमनोहराम् । मलापहारिणी वार्षे गृहाण स्नातुमानीताम् ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । शर्करा स्नानं समर्पयामि ।

शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि । शुद्धोदक स्नानान्ते आचमनीयं समर्पयामि ॥

**अथ गंधोदक स्नानम् ।**

मलयाचल संभूतं, चंदनागुरुसम्भवम् । चंदनं देवदेवेश, स्नानार्थं प्रतिगृह्यताम् ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । गंधोदक स्नानं समर्पयामि ।

गंधोदक स्नानान्ते शुद्धोदक स्नानं समर्पयामि । शुद्धोदक स्नानान्ते आचमनीयं समर्पयामि ॥

## अथ उद्वर्तन स्नानम् ।

नाना सुगन्धि द्रव्यं च, चंदनं रजनी युतम् । उद्वर्तनं मयादत्तं, स्नानार्थं प्रतिगृह्यताम् ॥
ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नम : । उद्वर्तनस्नानं समर्पयामि ।
उद्वर्तनस्नानान्ते शुद्धोदक स्नानं समर्पयामि । शुद्धोदक स्नानान्ते आचमनीयं समर्पयामि ॥

अथ महाभिषेकम् ।

चन्दनकेशर इत्यादि द्वारा ।

## ॥ श्री पुरुष सूक्त्तम् ॥

卐 हरिः ॐ सहस्त्र शीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात् । स भूमि गूं सर्वतस्पृत्वा त्यतिष्ठद्दशांगुलम् ॥१॥
पुरुष एवेद गूं सर्वं यद्भूत् यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥२॥
एतावानस्य महिमातो ज्यायांश्च पूरुषः । पादोस्य विश्वाभूतानित्रिपादस्या मृतन्दिवि ॥३॥
त्रिपादूर्ध्वऽ उदैत्पुरुषः पादोस्येहाभवत्पुनः । ततो विष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥४॥
ततो विराऽजायत विराजो ऽअधि पूरुषः । स जातो ऽअत्यरिच्यतपश्चाद् भूमि मथो पुरः ॥५॥
तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम् । पशूंस्तांश्चक्रे वायव्या नारण्या ग्राम्याश्च ये ॥६॥
तस्माद्यज्ञात्सर्वहुतऋचः सामानिजज्ञिरे । छन्दां गूं सिजज्ञिरे तस्माद्यजुस्तस्मादजायत ॥७॥
तस्मादश्वाऽअजायन्त के चोभयादत : । गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽअजावयः ॥८॥

तंयज्ञम्बर्हिषि प्रोक्षन्पुरुषं जातमग्रत : । तेनदेवा ऽ अयजन्तसाध्याऋृषयश्य ये ॥९॥
यत्पुरुषंव्यदधुः कतिधाव्यकल्पयन् । मुखंकिमस्यासीत्किम्बाहूकिमूरुपादाऽउच्येते ॥१०॥
ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः । ऊरुतदस्ययद्वैश्यः पद्भ्या गूं शूद्रोऽअजायत ॥११॥
चन्द्रमा मनसोजातश्चक्षोः सूर्योऽअजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्नि रजायत ॥१२॥
नाभ्याऽआसीदन्तरिक्ष गूं शीष्णो द्यौः समवर्तत। पद्भ्यांभूमिर्दिशःश्रोत्रात्तथा लाकांऽअकल्पयन् ॥१३॥
यत्पुरू षेण हविषा देवा यज्ञमतन्वत । वसन्तोऽस्यासीदाज्यं ग्रीष्मऽ इध्मःशरद्धविः ॥१४॥
सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्वाना ऽअबध्नन् पुरुषम्पशुम्॥१५॥
यज्ञेन यज्ञमयजन्तदेवास्तानि धर्माणिप्रथमान्यासन् ।
ते ह नाकम्महिमानः सचन्त यत्रपूर्वेसाध्या सन्ति देवाः ॥१६॥ 卐

॥ इति पुरुष सूक्तम्॥

## अथ शुद्धोदक स्नानम् ।

卐 ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्य ऋृतसदन्यसि वरुणस्य ऋृतसदनमसि वरुणस्य ऋृतसदनमासीद ॥ 卐

गंगायां मुनिभिः सहैवबहुभिर्नित्यं स्वतंत्रः स्वयं स्वामिन् स्नानकरः सुकेलि सहितं भक्तैस्तथापार्षदै :। शीतं वोष्णर्मिदं यथर्तु सुखदं ह्युन्मत्तगंगाजलं कृष्ण त्वं विशदं गृहाण च मया स्नानीयमत्रार्पितम् ॥

कावेरी नर्मदा वेणी तुंगभद्रा सरस्वती । गंगा च यमुना तोयं मया स्नानार्थमर्पितम् ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । शुद्धोदक स्नानं समर्पयामि ।

शुद्धोदक स्नानान्ते आचमनीयं समर्पयामि

## अथ वस्त्रोपवस्त्रे

卐 तस्माद्यज्ञात्सर्वहुत ऋचः सामानिजज्ञिरे । छन्दां गुं सिजज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ 卐

निष्कामैर्निज सेविभिः स्वनिरतैर्दत्तानिभक्त्याजनैः कृष्ण त्वं धृतवान्प्रभोऽतिकृ पयावस्त्राणि रम्याणि वै ।

कार्पासेन विनिर्मितं घनतरं सूक्ष्मं च वस्त्रद्वयं सौवर्णेन विराजितं शुभमिदं दत्तं मया स्वीकुरु ॥

सर्व भूषाधिके सौम्ये लोकलज्जानिवारणे । मयोपपादिते तुभ्यं वाससी प्रति गृह्यताम् ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । वस्त्रोपवस्त्रे समर्पयामि ।

वस्त्रोपवस्त्रान्ते आचमनीयं समर्पयामि ।

## अथ यज्ञोपवीतम्

तस्मादश्वाऽ अजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽ अजावयः॥

वर्णीन्द्राय नमोऽस्तु ते वरदराट् श्री नीलकंठ प्रभो दासं मां करुणानिधेऽव भगवन् ब्रह्मव्रतस्य क्षतेः ।

भूमौ नैष्ठिक धर्म पोषणकरस्त्वं सोत्तरीयं सितं दत्तं तुभ्यमिदं गृहाण कृपया यज्ञोपवीतं मया ॥

नवभिस्तंतुभिर्युक् तं त्रिगुणंदेवतामयम् । उपवीतं मयादत्तं गृहाण परमेश्वर ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । यज्ञोपवीतं समर्पयामि ।
यज्ञोपवीतान्ते आचमनीयं समर्पयामि ।

## अथ आभूषणानि

रत्नाढ्यै रसना किरीटकटकस्त्रक् कुंडलैश्योर्मिका मंजीरांगद शृंखलादिभिरहं जाम्बूनदाभूषणैः । हारैर्मौक्तिकनिर्मितैश्च विविधैर्गुच्छादिभिः शेखरै स्त्वां भक्त्यात्मज पूजयामि कृपया त्वं श्रीहरे स्वीकुरु॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । आभूषणानि समर्पयामि ।

## अथ चंदनम् ।

卐 तंयज्ञम्बर्हिषिप्रौक्षन्पुरुषं जातमग्रतः तेनदेवाऽअयजन्तसाध्या ऋषयश्च ये ॥ 卐

सद्भिः प्रेमभरेण नित्यमनद्यैः स्वेच्छानुकूलं विभो सर्वांगे ऽगरुचन्दनैः सुरभिभिर्ब्रह्मात्मभिः पूजितः । कर्पूरागरुकेसरैर्मुगमदैः संमिश्रितं सुंदरम् कृष्णत्वं शुभ चंदनं मलयजं गृह्णीष्व दत्तं मया ॥ श्रीखंडं चंदनं दिव्यं गन्धाढ्यं सुमनोहरम् । विलेपनं सुरश्रेष्ठ । चन्दनं प्रतिगृह्यताम् ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । चन्दनं समर्पयामि ।

## अथ अक्षताः ।

सौरभ्येण युतांश्च चंदनयुतान् काश्मिरमिश्रान्महा व्रीहिभ्यो जनिताँश्च मंगलमया नन्वर्थ युक्ताक्षतान् । सर्वेषांपुरु तृप्तिकारकतया सद्धान्यमात्रोत्तमान् स्वामिंस्त्वं कृपयागृहाण च मया भक्त्यार्पितान्श्रीपते ॥

अक्षताश्च सुरश्रेष्ठ ! कुङ्कुमाक्ताःसुशोभिताः । मया निवेदिता भक्त्या गृहाण परमेश्वर ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । अक्षतान् समर्पयामि ।

**अथ पुष्पाणि ।**

卐 यत्पुरुषंव्यदधुः कतिधाव्यकल्पयन् । मुखंकिमस्यासीत्किम्बाहूकिमूरूपादाङ्उच्येते ॥ 卐

जाती चम्पक कर्णिकार कमलैः सन्मल्लिका यूथिका मन्दार स्थल पद्मकेतक महाकुन्दैश्च पुन्नागजै : पुष्पैर्दूषण वर्जितै र्बहुविधैस्त्वां पूजयामि प्रभो तानि त्वां सदयं गृहाण कुसुमालंकार धृच्छ्रीहरे ॥

माल्यादीनि सुगंधीनि मालत्यादीनि वै प्रभो । मयानीतानि पुष्पाणि गृहाण परमेश्वर ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । पुष्पाणि पुष्पमालां च समर्पयामि ।

**हस्ते अक्षतान् गृहीत्वा**

ॐ वराहाय नमः । पादौ पूजयामि ।

ॐ कूर्माय नमः । गुल्फौ पूजयामि ।

ॐ ऋषभाय नमः । जंघे पूजयामि ।

ॐ मत्स्याय नमः । जानुनी पूजयामि ।

ॐ वामनाय नमः । उरु पूजयामि ।

ॐ नृसिंहाय नमः । कटिं पूजयामि ।

ॐ नारायणाय नमः । नाभिं पूजयामि ।

ॐ बुध्धाय नमः । हृदयं पूजयामि ।

ॐ कल्किने नमः । कंठं पूजयामि ।

ॐ कूर्मुराय नमः । बाहू पूजयामि ।

ॐ रामाय नमः । हस्तौ पूजयामि ।

ॐ यज्ञनारायणाय नमः । मुखं पूजयामि !

ॐ कपिलाय नमः । नेत्रे पूजयामि ।

ॐ कृष्णाय नमः । ललाटं पूजयामि ।

ॐ हरये नम : । श्रोत्रे पूजयामि ।

ॐ इष्टदेवाय श्री स्वामिनारायणाय नमः । सर्वांगाणि पूजयामि॥

॥ इत्यंग पूजा ॥

**हस्तेअक्षतपुष्पाणि गृहीता**

ॐ मध्ये भक्ति धर्मान्वतावतारिणे श्री स्वामिनारायणाय नमः तं.आ.स्था. पूजयामि ।

ॐ पृष्ठभागे छत्रधारिणे रामप्रतापाय नमः तं आ.स्था.पू. ।

ॐ श्री हरिदक्षपार्श्वे गृहीत चामराय अयोध्याप्रसादाय नमः तं आ. स्था. पू. ।

ॐ श्री हरि वामपार्श्वे गृहीत चामराय रघुवीराय नमः तं आ. स्था. पू. ।

ॐ नंदरामाय नमः तं आ. स्था. पू. ।

ॐ गोपाळजिते नमः तं आ.स्था. पू. ।

ॐ सीतारामाय नमः तं आ. स्था. पू. ।

ॐ ठाकुररामाय नमः तं आ. स्था. पू. ।

ॐ सर्वोपचारार्थे गंधाक्षत पुष्पाणि धूपं दीपं नैवैद्यं फलं तांबूलं दक्षिणां आरार्तिक्यं पुष्पांजलिं समर्पयामि ।

अनेन प्रथमावरणार्चनेन श्री हरिकृष्णादि प्रथमावरण देवताः प्रीयंतां न मम ।

। इति प्रथमावरण पूजा समाप्ता ।

**अथ द्वितीयावरण पूजा ।**

द्वितीयावरणे गुरु रामानंद स्वामी, मुकुन्दानंद स्वामी इत्यादि वर्णीन्द्रानां पूजा हस्ते अक्षतान् गृहीत्वा आवाहनम्

ॐ उद्धव संप्रदाय प्रवर्तक श्री रामानंद स्वामिने नमः, तं आ. स्था. पूजयामि ।

ॐ मुकुंन्दानंद वर्णीन्द्राय नमः तं आ. स्था. पूजयामि ।

ॐ जयानंद वर्णीन्द्राय नमः तं आ. स्था. पूजयामि ।

ॐ अखंडानंद वर्णीन्द्राय नमः तं आ. पूजयामि ।

ॐ वासुदेवानंद वर्णीन्द्राय नमः तं आ. स्था. पूजयामि ।

ॐ वैकुंठानंद वर्णीन्द्राय नमः तं आ. स्था. पूजयामि ।

ॐ मुक्तानंद मुनीन्द्राय नमः तं आ. स्था. पूजयामि ।

ॐ मूळ अक्षर मूर्तये गोपाळानंद मुनीन्द्राय नमः तं आ. स्था. पूजयामि

ॐ ब्रह्मानंद मुनीन्द्राय नमः तं आ. स्था. पूजयामि ।

ॐ नित्यानंद मुनीन्द्राय नमः तं आ. स्था. पूजयामि ।

ॐ व्यापकानंद मुनीन्द्राय नमः तं आ. स्था. पूजयामि ।

ॐ स्वरुपानंद मुनीन्द्राय नमः तं आ. स्था. पूजयामि ।

ॐ कृपानंद मुनीन्द्राय नमः तं आ. स्था. पूजयामि ।

ॐ आनंदानंद मुनीन्द्राय नमः तं आ. स्था. पूजयामि ।

ॐ चैतन्यानंद मुनीन्द्राय नमः तं आ. स्था. पूजयामि ।

ॐ परमानंद मुनीन्द्राय नमः तं आ. स्था. पूजयामि ।

ॐ महानुभावानंद मुनीन्द्राय नमः तं आ. स्था. पूजयामि।

ॐ शुकानंद मुनीन्द्राय नमः तं आ. स्था. पूजयामि ।

ॐ ध्यानानंद मुनीन्द्राय नमः तं आ. स्था. पूजयामि ।

ॐ सांख्यानंद मुनीन्द्राय नमः तं आ. स्था. पूजयामि ।

ॐ अग्निकोणे धर्ममूर्तये आत्मानंद मुनीन्द्राय नमः तं. आ. स्था. पूजयामि ।

ॐनैऋत्यकोणे ज्ञान मूर्तये स्वयंप्रकाशानंद मुनीन्द्राय नमः तं आ.स्था. पूजयामि ।

ॐ वायुकोणे वैराग्यमूर्तये निष्कुळानंद मुनीन्द्राय नमः तं आ. स्था. पूजयामि ।

ॐ इशानकोणे ऐश्वर्यमूर्तये सच्चिदानंद मुनीन्द्राय नमः तं आ. स्था. पूजयामि ।

एतेभ्यः सर्वोपचारार्थे गंधाक्षत पुष्पाणि धूपदीपं नैवेद्यं फलं तांबूलं दक्षिणां आरार्तिक्यं पुष्पांजलिं समर्पयामि ।

अनेन द्वितीयावरणार्चनेन मुकुंदानंदादि द्वितीयावरण देवताः प्रीयंतां न मम ।

इति द्वितीयआवरण पूजा समाप्ता ।

**अथ तृतीयावरण पूजा ।**

तृतीयावरणे प्रेमानंद स्वामी इत्यादि मुनीनां पूजनम्

हस्ते अक्षतान् गृहीत्वा

ॐ प्रेमानंदमुनये नमः, तं आ. स्था. पूजयामि ।

ॐ देवानंदमुनये नमः तं आ. स्था. पूजयामि ।

ॐ ज्ञानानंद मुनये नमः तं आ. स्था. पूजयामि ।

ॐ गुणातीतानंद मुनये नमः तं आ. स्था. पूजयामि ।

ॐ आत्मानंद मुनये नमः तं आ. स्था. पूजयामि ।

ॐ योगानंद मुनये नमः तं आ. स्था. पूजयामि ।

ॐ प्रज्ञानानंद मुनये नमः तं आ. स्था. पूजयामि ।

ॐ त्यागानंद मुनये नमः तं आ. स्था. पूजयामि ।

ॐ विरक्तानंद मुनये नमः तं आ. स्था. पूजयामि ।

ॐ आधारानंद मुनये नमः तं आ. स्था. पूजयामि ।

ॐ निरंजनानंद मुनये नमः तं आ. स्था. पूजयामि ।
ॐ अभेदानंद मुनये नमः तं आ. स्था. पूजयामि ।
ॐ निर्गुणानंद मुनये नमः तं आ. स्था. पूजयामि ।
ॐ भूधरानंद मुनये नमः तं आ. स्था. पूजयामि ।
ॐ सुखानंद मुनये नमः तं आ. स्था. पूजयामि ।
ॐ विज्ञानानंद मुनये नमः तं आ. स्था. पूजयामि ।

एतेभ्यः सर्वोपचारार्थे गंधाक्षत पुष्पाणि धूपं दीपं नैवेद्यं फलं तांबूलं दक्षिणां आरार्तिक्यं पुष्पांजलिं समर्पयामि ।

अनेन तृतीयावरणार्चनेन प्रेमानंदादि तृतीयावरण देवताः प्रीयंतां न मम ।

। इति तृतीयावरण पूजा समाप्ता ।

## अथ चतुर्थावरण पूजा

चतुर्थावरणे भगवतः चतुर्विंशति अवताराणां पूजनम् ।

दक्षिणेन पाणिना अक्षतान् समर्पयेत् ।

ॐ आदिनारायणाय नमः तं आ. स्था. पूजयामि ।
ॐ मत्स्याय नमः तं आ. स्था. पूजयामि ।

| | |
|---|---|
| ॐ हंसाय नमः | तं आ. स्था. पूजयामि । |
| ॐ यज्ञाय नमः | तं आ. स्था. पूजयामि । |
| ॐ कूर्माय नमः | तं आ. स्था. पूजयामि । |
| ॐ वराहाय नमः | तं आ. स्था. पूजयामि । |
| ॐ नृसिंहाय नमः | तं आ. स्था. पूजयामि । |
| ॐ वामनाय नमः | तं आ. स्था. पूजयामि । |
| ॐ हयग्रीवाय नमः | तं आ. स्था. पूजयामि । |
| ॐ धन्वंतरिणे नमः | तं आ. स्था. पूजयामि । |
| ॐ दत्तात्रेयाय नमः | तं आ. स्था. पूजयामि । |
| ॐ नारदाय नमः | तं आ. स्था. पूजयामि । |
| ॐ सनकादिकाय नमः | तं आ. स्था. पूजयामि । |
| ॐ श्री नरनारायणाय नमः | तं आ. स्था. पूजयामि । |
| ॐ ऋषभदेवाय नमः | तं आ. स्था. पूजयामि । |
| ॐ कपिलाय नमः | तं आ. स्था. पूजयामि । |
| ॐ श्री हरये नमः | तं आ. स्था. पूजयामि । |

ॐ वैन्याय नमः तं आ. स्था. पूजयामि ।
ॐ परशुरामाय नमः तं आ. स्था. पूजयामि ।
ॐ रामचंद्राय नमः तं आ. स्था. पूजयामि ।
ॐ श्री व्यासाय नमः तं आ. स्था. पूजयामि ।
ॐ श्री कृष्णाय नमः तं आ. स्था. पूजयामि ।
ॐ श्री बुद्धाय नमः तं आ. स्था. पूजयामि ।
ॐ श्री कल्किने नमः तं आ. स्था. पूजयामि ।

एतेभ्यः सर्वोपचारार्थे गंद्याक्षत् पुष्पाणि धूपं दीपं नैवैद्यं फलं तांबूलं दक्षिणां आरार्तिक्यं पुष्पांजलिं समर्पयामि ।

अनेन चतुर्थावरणार्चनेन आदिनारायणादि चतुर्थावरण देवताः प्रीयंतां न मम ।

। इति चतुर्थावरण पूजा समाप्ता ।

**अथ पंचमावरण पूजा**

पंचमावरणे वेद, धर्म शास्त्र, योगशास्त्र धारिणां संतवराणां पूजनम् ।

अक्षतात् गृहीत्वा आवाहनम्

ॐ ऋग्वेद धारिणे नारायणानंद वर्णीन्द्राय नमः तं आ. स्था. पूजयामि ।

ॐ यजुर्वेद धारिणे आनंदानंद वर्णीन्द्राय नमः तं आ. स्था. पूजयामि ।
ॐ सामवेद धारिणे गोपालानंद वर्णीन्द्राय नमः तं आ. स्था. पूजयामि ।
ॐ अथर्ववेद धारिणे वैकुण्ठानंद वर्णीन्द्राय नमः तं आ. स्था. पूजयामि ।
ॐ धर्मशास्त्र धारिणे शतानंद मुनीन्द्राय नमः नमः तं आ. स्था. पूजयामि ।
ॐ योगशास्त्र धारिणे योगानंद मुनीन्द्राय नमः तं आ. स्था. पूजयामि ।
ॐ सांख्यशास्त्र धारिणे भगवदानंद मुनीन्द्राय नमः तं आ. स्था. पूजयामि ।
ॐ पंचरात्रशास्त्र धारिणे शिवानंद मुनीन्द्राय नमः तं आ. स्था. पूजयामि ।
ॐ कृष्णानंद मुनये नमःतं आ. स्था. पूजयामि ।
ॐ अक्षरानंद मुनये नमःतं आ. स्था. पूजयामि ।
ॐ सर्वज्ञानानंद मुनये नमः तं आ. स्था. पूजयामि ।
ॐ अद्‍भुतानंद मुनये नमःतं आ. स्था. पूजयामि ।
ॐ शून्यातीतानंद मुनये नमः तं आ. स्था. पूजयामि ।
ॐ तद्रूपानंद मुनये नमःतं आ. स्था. पूजयामि ।
ॐ पुरुषानंद मुनये नमः तं आ. स्था. पूजयामि ।
ॐ शान्तानंद मुनये नमः तं आ. स्था. पूजयामि ।

एतेभ्यः सर्वोपचारार्थे गंधाक्षत पुष्पाणि धूपं दीपं नैवेद्यं फलं तांबूलं दक्षिणां
आरार्तिक्यं पुष्पांजलिं समर्पयामि ।

अनेन पंचमावरणार्चनेन नारायणानंदादि पंचमावरण देवताः प्रीयंतां न मम ।

। इति पंचमावरण पूजा समाप्ता ।

**अथ षष्ठावरण पूजा**

षष्ठावरणे उत्तमराजादि पार्षदानां आवाहनम्

हस्ते अक्षतान् गृहीत्वा

ॐ उत्तमाय नमः तं आ. स्था. पूजयामि ।

ॐ हेमन्तसिंहाय नमः तं आ. स्था. पूजयामि ।

ॐ सोम वर्मणे नमः तं आ. स्था. पूजयामि ।

ॐ सुरवर्मणे नमः तं आ. स्था. पूजयामि ।

ॐ भृगुजिते नमः तं आ. स्था. पूजयामि ।

ॐ रत्नजिते नमः तं आ. स्था. पूजयामि ।

ॐ नांजाय नमः तं आ. स्था. पूजयामि ।

ॐ अलयाय नमः तं आ. स्था. पूजयामि ।

ॐ नान्नाय नमः तं आ. स्था. पूजयामि।

ॐ गालवाय नमः तं आ. स्था. पूजयामि।

ॐ लक्षाय नमः तं आ. स्था. पूजयामि।

ॐ कुबेरसिंहाय नमः तं आ. स्था. पूजयामि।

ॐ मानसिंहाय नमः तं आ. स्था. पूजयामि।

ॐ भीमाय नमः तं आ. स्था. पूजयामि।

ॐ अर्जुनाय नमः तं आ. स्था. पूजयामि।

ॐ माणक्यै नमः तं आ. स्था. पूजयामि।

एतेभ्यः सर्वोपचारार्थे गंधाक्षत पुष्पाणि धूपं दीपं नैवैद्यं फलं ताबूलं दक्षिणां आरार्तिक्यं पुष्पांजलिं समर्पयामि।

अनेन षष्ठावरणार्चनेन उत्तमादि षष्ठावरण देवताः प्रीयंतां न मम।

। इति षष्ठावरण पूजा समाप्ता।

## अथ सप्तमावरण पूजा

सप्तमावरणे भक्त, ब्रह्मदेव, हरिभक्त, स्त्री भक्तानां पूजनम् दक्षिण हस्ते अक्षतान् गृहीत्वा आवाहनम्

ॐ मयारामाय नमः तं आ. स्था. पूजयामि।

| | |
|---|---|
| ॐ प्राणगोविंदाय नमः | तं आ. स्था. पूजयामि। |
| ॐ लक्ष्मीरामाय नमः | तं आ. स्था. पूजयामि। |
| ॐ शिवयाज्ञिकाय नमः | तं आ. स्था. पूजयामि। |
| ॐ मोहनरामाय नमः | तं आ. स्था. पूजयामि। |
| ॐ हरिशर्मणे नमः | तं आ. स्था. पूजयामि। |
| ॐ कृपाशंकराय नमः | तं आ. स्था. पूजयामि। |
| ॐ खट्वांगाय नमः | तं आ. स्था. पूजयामि। |
| ॐ जीववर्मणे नमः | तं आ. स्था. पूजयामि। |
| ॐ काशीदासाय नमः | तं आ. स्था. पूजयामि। |
| ॐ पर्वताय नमः | तं आ. स्था. पूजयामि। |
| ॐ नाथजिते नमः | तं आ. स्था. पूजयामि। |
| ॐ नाचिकेताय नमः | तं आ. स्था. पूजयामि। |
| ॐ नंदुभयायय नमः | तं आ. स्था. पूजयामि। |
| ॐ नरोत्तमाय नमः | तं आ. स्था. पूजयामि। |
| ॐ गोवर्धनाय नमः | तं आ. स्था. पूजयामि। |

ॐ हेमन्तरामाय नमः तं आ. स्था. पूजयामि ।

ॐ दक्ष पार्श्वे नृसिंहानंद मुनीन्द्रादिभ्यो नमः तान् आ. स्था. पूजयामि ।

ॐ पृष्ठ भागे रामसिंहादि पार्षद गंगादत्तादि मुख्य हरिभक्तेभ्यो नमः तान् आ.स्था. पूजयामि ।

ॐ वामपार्श्वे जया, रमा, ललितादि सर्व भक्ताभ्यो नमः ताः आ. स्था. पूजयामि ।

ॐ श्रीहरि दक्षाग्रभागे गजाननाय नमः तं आ. स्था. पूजयामि ।

ॐ श्री हरि वामाग्रभागे कष्टभंजनाय नमः तं आ. स्था. पूजयामि ।

एतेभ्यः सर्वोपचारार्थे गंधाक्षत पुष्पाणि धूपं नैवैद्यं फलं ताबूलं दक्षिणां आरार्तिक्यं पुष्पांजलिं समर्पयामि ।

अनेन सप्तमावरणार्चनेन मयारामादि सप्तमावरण देवताः प्रीयंतां न मम ।

। इति सप्तमावरण पूजा समाप्ता ।

## अथाष्टसिद्धि पूजनम्

दक्षिण करे अक्षतान् गृहीत्वादेवीन् आह्वयेत्

ॐ पूर्व केसरबहिः अणिम्ने नमः तां आ. स्था. पूजयामि ।

ॐ अग्निकोण केसरबहिः लघिम्ने नमः तां आ. स्था. पूजयामि ।

ॐ दक्षिणकोण केसरबहिः प्राप्तयै नमः तां आ. स्था. पूजयामि ।

ॐ नैऋत्यकोण केसरबहिः अस्त्यै नमः तां आ. स्था. पूजयामि ।

ॐ पश्चिमकोण केसरबहिः महिम्ने नमः तां आ. स्था. पूजयामि ।

ॐ वायुकोण केसरबहिः इशित्रे नमः तां आ. स्था. पूजयामि ।

ॐ उत्तरकोण केसरबहिः वशित्रे नमः तां आ. स्था. पूजयामि ।

ॐ इशानकोण केसरबहिःकामवसायित्रे नमः तां आ. स्था. पूजयामि ।

एताभ्यः सर्वोपचारार्थे गंधाक्षत पुषपाणि धूपं दीपं नैवेद्यं फलं ताबूलं दक्षिणां आरार्तिक्यं पुष्पांजलिं समर्पयामि ।

अनेन अर्चनेन अणिमादि देवताः पीयंतां न मम ।

इति अष्ट सिध्धिपूजा समाप्ता

**अथ दिग्पाल पूजनम् !**

दक्षिण हस्ते अक्षतान्गृहीत्वा आवाहह्येत्

ॐ तत्र पूर्वे इन्द्राय नमः तं आ. स्था. पूजयामि ।

ॐ अग्निकोणे अग्नये नमः तं आ. स्था. पूजयामि ।

ॐ दक्षिणे यमाय नमः तं आ. स्था. पूजयामि ।

ॐ नैऋत्यकोणे निऋतये नमः तं आ. स्था. पूजयामि ।

ॐ पश्चिमे वरुणाय नमः तं आ. स्था. पूजयामि ।

ॐ वायुकोणे वायवे नमः तं आ. स्था. पूजयामि ।

ॐ उत्तरे कुबेराय नमः तं आ. स्था. पूजयामि ।

ॐ इशानकोणे रुद्राय नमः तं आ. स्था. पूजयामि ।

एतेभ्यः सर्वोपचारार्थे गंधाक्षत पुष्पाणि धूपं दीपं नैवैद्यं फलं ताबूलं दक्षिणां आरार्तिं पुष्पाजलिं समर्पयामि ।

अनेन अर्चनेन इन्द्रादि देवताः प्रीयंतां न मम ।

। इति दिग्पाल पूजा समाप्ता ।

अथ ग्रहपूजनम् ।

डाबा हाथमां चोखा लो, देवने नमस्कार करी जमणा हाथथी अक्षत वडे देवनुं पूजन करो) दक्षिण हस्ते अक्षतान् गृहीत्वा आवहयेत्

ॐ पूर्वे सूर्याय नमः तं आ. स्था. पूजयामि ।

ॐ अग्निकोणे शुक्राय नमः तं आ. स्था. पूजयामि ।

ॐ दक्षिणे भौमाय नमः तं आ. स्था. पूजयामि ।

ॐ नैऋृत्यकोणे राहु केतुभ्यां नमः तं आ. स्था. पूजयामि ।

ॐ पश्चिमे शनैश्चराय नमः तं आ. स्था. पूजयामि ।
ॐ वायुकोणे चंद्राय नमः तं आ. स्था. पूजयामि ।
ॐ उत्तरे बुधाय नमः तं आ. स्था. पूजयामि ।
ॐ इशानकोणे गुरवे नमः तं आ. स्था. पूजयामि ।

एतेभ्यो सर्वोपचारार्थे गंधाक्षत पुष्पाणि धूपं नैवेद्यं फलं ताबूलं दक्षिणां आरार्तिक्यं पुष्पांजलिं समर्पयामि ।

अनेन अर्चनेन सूर्यादि देवताः प्रीयंतां न मम ।

। इति ग्रह पूजा समाप्ता ।

आयुधपूजनम् : शंखाय नमः । पद्माय नमः ।
चक्राय नमः । गदायै नमः ।

द्वारपालो : ज्वरभाय नमः । केशवाय नमः ।
वीराय नमः । देवाय नमः ।
रत्नजिते नमः । वैरजिते नमः ।
मातराय नमः । अमराय नमः ।

इति परिवारार्चनं कृत्वाजनमंगल नामावलि प्रोक्तश्री हर्यष्टोत्तरशत नामोच्चारण पूर्वं तुलसी दलादिभिः श्री हरिं पूजयेत् ।

## अथ जनमंगल नामावली

अनंतरं तुलसीदलं, पुष्पादि वा प्रतिनामान्ते समर्पयेत् ।

### अथ तुलसीपत्रम् ।

हस्ते तुलसीपत्रं गृहीत्वा

तुलसी हेमरुपां च रत्नरुपां च मंजरीम् । भवमोक्षप्रदां तुभ्यमर्पयामि हरिं प्रियाम् ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । तुलसीपत्रं समर्पयामि ।

### अथ सौभाग्य द्रव्याणि ।

सिंदूरं वर कुंकुमं मृगमदाबीरे हरिद्रां तथा सौभाग्यं त्वमिदं गृहाण भगवन् सर्वगुलालादिकम् ।
नित्यं स्वीय जनान्कृपाजलनिधे सौभाग्यमूर्ते सदा दोषेभ्यो विरहय्य नोऽति सुभगान्कुर्वात्मशर्म प्रद ॥
अबीलं च गुलालं च चोवा चंदनमेव च । नाना परिमलद्रव्यैंप्रीयतां परमेश्वर ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । सौभाग्य द्रव्याणि समर्पयामि ।

### अथसुगंधितैलम् ।

सुंगिधद्रव्यवासाढ्यं विष्णुतैलं मनोहरं । वांछितं सर्वलोकानां भगवन् ! प्रतिगृह्यताम् ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः सुगंधितैलं समर्पयामि ।

## अथ धूपः ।

卐 ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यःकृतः । ऊरु तदस्य यद्वैश्यः पद्भ्या गूं शूद्रोऽअजायत ॥ 卐
यन्मूर्तौ सुरभित्वमस्ति सहजं यादृङ्मानोरंजनं कस्मिंश्चिज्जगतीह नास्ति हि तथा लेशोऽपि तस्यक्वचित् ।
स त्वं कृष्ण दशांगसंज्ञितमिमं धूपं सुगन्धि हरे भक्त्या मेऽर्पितमुत्तमं हृदयगं घ्राणप्रियं स्वीकुरु ॥
वनस्पति रसोद्भूतो गन्धाढ्यो सुमनोहरः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रति गृह्यताम् ॥
ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । धूपमाघ्रापयामि ।

## अथ दिपः।

卐 चन्द्रमा मनसोजातश्चक्षोः सूर्योऽअजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ 卐
सूर्याग्नित्रिसुतादयः सुरगणा यद्धाम्न एवाक्षरात् तेजोलेशमवाप्य विश्वमखिलं ह्युद्भासयन्ति प्रभो ! ।
तद्धामाधिपतिस्त्वमेव भगवन्दीपं कृपांभोनिधे सामोदेव गवां घृतेन विहितं गृह्णीष्व वर्तिद्वयम् ॥
आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया । दीपं गृहाण देवेश त्रैलोक्यतिमिरापह ॥
ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । दीपं दर्शयामि ।

## अथ नैवेद्यम् ।

आधारे स्वर्णादिपात्रे भक्ष्यभोज्यलेह्यचोष्यात्मकं अन्नं परिवेष्य तदुपरि तुलसीपत्रं निधाय ।
गायत्री मंत्रान् पठेत्
ॐ घनश्यामाय विद्महे । हरिकृष्णाय धीमहि । तन्नः स्वामी प्रचोदयात् ॥

ॐ नारायणाय विद्महे । वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥

ॐ भूर्भुवः स्वः । तत्सवितुवरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥

卐 नाभ्याऽ आसीदन्तरिक्ष गूं शीर्ष्णो द्यौः समवर्तन । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथालोकांऽअकल्पयन् ॥ 卐

नैवेद्यं परमान्नसक्तुवटकान्संयावपूरीस्तया दोहित्रान्धृतपूरसूपसुखदाफेणीरसालोदनान् ।
रम्यां शष्कुलिकां बिरंजगुडकापूपान्सितान्पिन्डकान् कृष्ण त्वं धृतशर्करादधिपयश्चेत्यादिकं स्वीकुरु ॥

शर्कराखण्डखाद्यादि, दधिक्षीर घृतादिभिः । आहारैर्भक्ष्यभोज्यैश्च, नैवेद्यं प्रतिगृह्यताम् ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । नैवेद्यं निवेदयामि ।

देवाधिदेव विश्वेश स्वामिनारायण प्रभो । गृहाणेदं जलं पूर्वापोशनार्थं दयानिषधे ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । पूर्वापोशनं समर्पयामि । ग्रास मुद्रां प्रदर्शयेत्

ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ उदानाय स्वाहा । ॐ समानाय स्वाहा ।

एलोशीरलवंगादि कर्पूरागरुवासितम् । अति तृप्तिकरंतोयं, स्वेच्छया त्वं पिब प्रभो ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । मध्ये पानीयं समर्पयामि ।

अथ पुनः पंच प्राणाहुतीर्दद्यात्

ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ उदानाय स्वाहा । ॐ समानाय स्वाहा ।

भगवतः भोजन गीतम्

जमो थाळ जीवन जाउं वारी, धोवुं कर चरण करो त्यारी. जमो........टेक.
बेसो मेल्या बाजोठिया ढाळी, कटोरा चनती थाळी, जळे भर्या चंबु चोखाळी. जमो थाळ.......१.
करी काठा घउंनी पोळी, मेली धृतसाकरमां बोळी, काढ्यो रस केरीने घोळी. जमो थाळ.............२
गळ्या साटा घेबर फुलवडी, दूधपाक मालपुवा कढी, पुरी पोंची थइ छे घीमां चढी. जमो थाळ...........३.
अथाणां शाक सुंदर भाजी, लावी छुं तरत करी ताजी दहीं भात साकर छे झाझी. जमो थाळ................४.
चळु करो लावुं जळ झारी, एलची लविंग सोपारी, पानबीडी बनावी सारी. जमो थाळ...........५.
मुखवास मनगमता लइने प्रसादी थाळ तणी दइने, भूमानंद कहे राजी थइने, जमो थाळ.........६.

उत्तरापोशनं समर्पयामि । हस्तप्रक्षालनं समर्पयामि । मुख प्रक्षालनं समर्पयामि ।

कस्तूरी कुंकुमोपेतम् गोरोचन समन्वितम् । करांगोद्वर्तनं गंधं, गृहाण धर्मनंदन ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । करोद्वर्तनार्थे चंदनं समर्पयामि ।

नैवेद्यान्ते आचमनम् ।

गृह्णीष्वाचमनीयमुत्तमजलंस्वच्छं करोद्ववर्तनं कर्तुं तच्छुभचन्दनं सुरभिमत्कृष्णस्तथांगीकुरु ।

पानार्थम् च तथाऽतिमिष्टममलं ह्युन्मत्तगंगाजलं स्वप्रेष्टं नलदैःसुवासितमिदं भक्त्यात्मज स्वीकुरु ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । नैवेद्यान्ते आचमनीयं समर्पयामि ।

## अथ ताम्बूलम् ।

卐 यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तोऽस्यासीदाज्यं ग्रीष्मऽइध्मः शरद्धविः ॥ 卐

नित्यं ब्राह्मणसाधुपोषणरतः सांगात्मभक्तेदृढं पंथानं विद्दधन्मिताशनरतस्त्वं नागवल्लीदलम् ।
जातीपुष्पलवंगपूगखदिरैर्जातीफलैलासुधा त्वक्कर्पूर समन्वितं हरइदं गृह्णीष्व दत्तं मया ॥

पूगीफलं महद् दिव्यं, नागवल्लीदलैर्युतम् । एलादि चूर्ण संयुक्तं, तांबूलं प्रतिगृह्यताम् ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । मुखवासं समर्पयामि ।

## अथ फलार्ध्यम् ।

प्रेम्णा पूजित पादपल्लुवयुगो राधारमाभ्यां सदा भूमौ भक्तसुखाय रम्यनगरे वृत्तालयाख्ये वसन् ।
कृष्णत्वं पनसाम्रपूगकदलीखर्जूरसीताफलं नालीकेरफलं तथाऽमृतफलं दिव्यं गृहाण प्रभो ॥

इदंफलं मयादेव, स्थापितं पुरतस्तव । तेन मे सफलावाप्ति, र्भवेज्जन्मनि जन्मनि ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । फलार्घ्यं समर्पयामि ।

## अथ दक्षिणा ।

ब्रह्मेन्द्रादिसुरैरनन्तभुवनाध्यक्षैर्निजं मस्तकं मुक्त्वा भुर्युपदाश्च पादकजयोः पीठेन तस्या निशम् ।

पूजोनात्यतिरिक्तदोषहृतये तत्पूर्तये श्री हरे स्वामिन्कांचनदक्षिणा महमिमां ते स्थापयाम्यग्रतः ॥
हिरण्यगर्भ गर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शांतिं प्रयच्छ मे ॥
ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । दक्षिणां समर्पयामि ।

**अथ नीराजनम् ।**

卐 ॐ अग्निर्देवता वातो देवता सूर्योदेवता चंद्रमा देवता वसवो देवता रुद्रादेवतादित्या देवता मरुतो देवता विश्वदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥ 卐

शैषाद्यैर्विबुधैःप्रणामसमये स्वैः स्वैः शिरोभिः सदा चंचत्स्वच्छकिरीटरत्नकिरणैर्नीराजितांघ्रिद्वयः ।
कृष्णत्वं बहुवर्तिभिर्ददयगं नीराजनं श्रीहरे लोकानन्दकरःप्रकाश बहुलो दत्तं मया स्वीकुरु ॥
चतुर्वर्ति समायुक्तं घृतेन च सुपूरितम् । नीराजनेन संतुष्टो भवत्येव जगत्पते ॥

**आरती**

जय सदगुरु स्वामी, प्रभु जय सदगुरु स्वामी,
सहजानंद दयाळु (२) बळवंत बहुनामी .....जयदेव जयदेव........१
चरणसरोज तमारां, वंदु कर जोडी, (२) चरणे शीश धर्याथी (२) दुःख नाख्यां तोडी०..........जय..२
नारायण नरभ्राता, द्विजकुळ तनु धारी, (२) पामर पतित उद्धार्या (२) अगणित नरनारी.........जय..३
नित्य नित्य नौतम लीला, करता अविनाशी, (२) अडसठ तीर्थ चरणे (२) कोटि गया काशी........जय..४

पुरुषोत्तम प्रगटनुं जे दर्शन करशे, (२) काळ करमथी छूटी (२) कुटुंब सहीत तरशे.....जय..५
आ अवसर करुणानिधि, करुणा बहु कीधी, (२) मुक्तानंद कहे मुक्ति (२), सुगम करी सिधी......जय..६

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । नीराजनं समर्पयामि ।

देवाभिवन्दनम् । आत्माभिवन्दनम् । हस्तप्रक्षालनम् ।

**अथ प्रदक्षिणा ।**

卐 सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्वाना अबन्धन् पुरषम्पशुम् ॥ 卐

सावर्णाण्डचया भ्रमन्ति विवरे रोम्णः सदा यस्य वै तेष्वएडेषु च बिभ्रतो ह्यगणितान् लीलावतारान्हरे ।
भक्ताघौघ विनाशिनीः प्रतिपदं बध्वा करौत्वन्मनाः कुर्वे नाथ परिक्रमां वृषजनै स्तेऽहं भवात्पाहि माम् ॥
यानि कानि च पापानि ज्ञाताज्ञातकृ तानि च । तानि सर्वाणि नश्यन्तु प्रदक्षिणा पदे पदे ॥
पदे पदे या परिपूजकेभ्यो सद्योऽश्वमेधादि फलं ददाति ।
तां सर्व पापक्षय हेतुभूतां प्रदक्षिणां ते परितः करोमि ।

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । प्रदक्षिणां समर्पयामि ।

**अथ नमस्कारान् ।**

दृग्वाणी मन उत्तामांगचरणोरोजानु हस्तैरहं साष्टांगं प्रणामाम्युताक्षिकरवाक्स्वान्तोत्त मांगैर्हरि ।
पंचांगं शनकै र्यथार्थमवनौत्वद्दक्षपार्श्वे मनाक् तुभ्यं त्वद्भवदीयपादरजसां निर्वेतनः किंकरः ॥

नमः सर्वहितार्थाय जगदाधार हेतवे । साष्टांगोऽयं प्रणामस्तुप्रयत्नेन मयाकृतः ॥
स्वामिनारायणं देवं वंदेहं कामदं विभुम् । लीलया वर्तते विश्वं यस्य तस्मै नमोनमः ॥
ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । नमस्कारं समर्पयामि ।

**अथमहामंत्र जाप ।**

यजमाने स्वामिनारायण महामंत्रनी माळा भगवत् स्वरुपनां अनुसंधाने सहित यथासमय (समयावकाश) फेरववी

**अथ मंत्रपुष्पांजलि ।**

卐 यज्ञेनयज्ञमयजन्तदेवास्तानि धर्माणिप्रथमान्यासन् । ते ह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥ 卐

ॐ राजाधिराजाय प्रसह्य कल्याण कारिणे नमो नारायणाय पावितात्मीयजनाय
श्री वासुदेवाय स्वाश्रितानन्तजन्म पापघ्ने वयं वै नमस्कुर्महे कृष्णाय भूयो हरिकृष्णाय
नीलकण्ठाय नमोनमः । स त्वं कामान्कामकामाय मह्यं कामेश्वरः पुष्पपुत्रो दधातु ।
देवाधिदेवाय वै श्रवणस्पत्प्रदात्रे महाराजाय नमः । देहि साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं
राज्यादधिं महाराजमहाधिपत्यं त्वदीयं मे दास्यं समुद्रपर्यन्तायाः सार्वभौमश्रियः ।
आव्दिपरार्धायुर्विधिपदाप्तेरप्यधिकमेकराडाख्यं सत्यमेव त्वदापधिपत्यं मन्ये ब्रह्मण्डाधीशास्त्व

दासैश्वर्यास्तस्मान्नान्यत्वत्त: कामयामहे । तत्राप्येष श्लोकोडभिगीत : ।

देवाधिदेव: सर्वात्माक्षर धामाधिप: स्वयम् । तं स्तुवंस्तं नमस्कुर्वन्न भूय: कल्पसेऽध्वने ॥

ब्रह्माख्यैं पुरुषैश्च दिव्यतनुभिर्वेदै: सदासंस्तुत: शेषाद्यैरमरै: किरीटपटलैर्व्याघट्टितांघ्र्यासन: ।

मन्वाद्यैश्य नराधिपै: सुगहनं गत्वा वनं चिन्तितो धार्मिस्त्वं च गृहाण पुष्पनिकरं दासांजलिस्थं हरे ॥

नाना विधानि पुष्पाणि यथाकालोद्भवानि च । पुष्पांजलिं मयादत्तं गृहाण परमेश्वर ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नम: । मंत्र पुष्पाजंलिं समर्पयामि ।

## अथ राजोपचारा: ।

मुक्तादामविभूषितं शशिनिभं छत्रं ह्युभे चामरे चादर्शं व्यजनं दिवाकरमुखी नृत्यं सुगीतं तथा ।

षट्त्रिंशद्विधवाद्यमुत्तममहं राजोपचारानिमान् सर्वेशाय समर्पयामि हरये राजाधिराजाय ते ॥

(छत्रं समर्पयामि आदि आठेय उपचार बोलती वखते दरेकनी पाछळ समर्पयामि शब्द बोलीने चोखा चडाववा.)

छत्रं, चामरं, दर्पणं, व्यंजनं, सूर्यमुखी, नृत्यं, गीतं, वाद्यं समर्पयामि ।

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नम: । अष्टराजोपचारान् समर्पयामि ।

## अथ प्रार्थना ।

भवसंभवभी तिभेदनं सुख संपत्करुणानिकेतनं । व्रतदानतप: क्रियाफलं सजानंद गुरु भजेसदा ॥१

करुणामयचारुलोचनं, शरणायातजनार्तिमोचनम् । पतितोद्धोरणाय तत्परं सहजानंदगुरुं भजे सदा ॥२
निजतत्व पथावबोधनं, जनतायाः स्वत एव दुर्गमम् । इति चिन्त्य गृहीतविग्रहं सहजानंदगुरुं भजेसदा ॥३
विधिशंभुमुखैर निग्रहं, भवपाथोधिपरिभ्रमाकुलम् । अपिधार्यमनो नरप्रभं, सहजानंदगुरुं भजे सदा ॥४
निजपादपयोजकीर्तनं, सततं स्याद्भवजीवगोचरम् । इति यः कुरुते क्रतूत्सवं,सहजानंदगुरुं भजे सदा ॥५
बहिरीक्षणलोकमानुषं, निजदत्तांबकदर्शिनां हरिम् । भजनीयपदं जगद्गुरुं, सहजानंदगुरुं भजे सदा ॥६
शरणागतपापपर्वतं, गणयित्वा न तदीय सद्गुणम् । अणुमप्यतुलं हि मन्यते, सहजानंदगुरुं भजे सदा ॥७
भववारिधिमोक्षसाधनं, गुरुराज्यप्रकटस्वसंगमम् । प्रकटीकृतवान् कृपावशः सहजानंदगुरुं भजे सदा ॥८
भगवन् कृपया त्वया कृतं, जनतायामुपकारमीद्दशम् । क्षमते प्रतिकर्तुमत्र कः कुरुते दीनजनस्ततोंऽजलिम् ॥९

त्वमेव माता च पिता त्वमेव, त्वमेव बंधुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव, त्वमेव सर्वं मम देवदेव ॥
निजाश्रितानां सकलार्तिहन्ता, सधर्मभक्तेरवनं विधाता ।
दाता सुखानां मनसेप्सितानां, तनोतु कृष्णोऽखिल मंगलं नः ॥
कायेन वाचा मनसेन्द्रियैर्वा, बुद्धयाऽऽत्मना वाऽनुसृतस्वभावात् ।
करोमि यद्यत् सकलं परस्मै, नारायणायेति समर्पयामि ॥

ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । प्रार्थनापूर्वक नमस्कारं समर्पयामि ।

## क्षमायाचनम ।

आवाहनं न जानामि, न जानामि तवार्चनम् । पूजां चैव न जानामि, क्षमस्व परमेश्वर ॥
अन्यथा शरणं नास्ति त्वमेव शरणं मम् । तस्मात्कारुण्य भावेन रक्ष मां पुरुषोत्तम ॥
गतं पापं गतं दुःखं गतं दारिद्रयमेव च । आगता सुख संपत्तिः पुण्योऽहं तव दर्शनात् ॥
मंत्रहीनं क्रियाहीनं भक्ति हीनं सुरेश्वर । यत्पूजितं मया देव परिपूर्ण तदस्तु मे ॥
यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् । तत्सर्वं क्षम्यतां देव चप्रसीद परमेश्वर ॥
नमः सर्वहितार्थाय जगदाधार हेतवे । साष्टांगोऽयं प्रणामस्ते, प्रयत्नेन मया कृतः ॥
यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु । न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
अपराध सहस्त्राणि क्रियन्तेऽहर्निशं मया । दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर ॥
ॐ सांगाय सपरिवाराय भगवते श्री स्वामिनारायणाय नमः । क्षमापनं समपर्यामि ॥

## अथ अर्पणम् ।

ॐ भारतवर्षे आर्यावर्तान्तर्गत, ब्रह्मावर्तैकदेशे, गुजरात प्रान्ते,
साभ्रमत्या तीरे अत्राद्य नारायण संवत्सरे नारायण अयने नारायण ऋ तौ
महामांगाल्यफलप्रद मासोत्तम मासे, नारायण मासे, नारायण
पक्षे नारायण तिथौ नारायण वासरे यथायथं राशिस्थान स्थितेषु सर्वेषु ग्रहेषु

मम सकल शुभ मनोरथ सिद्धयर्थं अनेन यथा ज्ञानेन यथा शक्ति यथा

मिलितोपचारद्रव्यैः कृतेन श्री स्वामिनारायण महापूजाख्येन कर्मणा भगवान्

श्री स्वामिनारायणः सांगः सपरिवारः प्रीयतां न मम ।

कृतेऽस्मन् श्री स्वामिनारायण महापूजाख्ये कर्मणिन्यूनातिरिकतं यत्कर्म तत्सर्वं श्री स्वामिनारायण प्रसादात्परिपूर्णमस्तु ।

## अथ विसर्जनम् ।

श्रद्धा पूर्वमनेन चारुविधिना शश्वन्महापूजनं स्वश्येवाचरते स्वधर्मरतये भक्ताय सर्वात्मना ।
दिव्यं भूरि तदीप्सितं प्रददतं सर्वोत्तमं सत्सुखं त्वामात्मेश विसर्जयामि हृदि मे सर्वांगदेवैः सह ॥
स्वस्थानं गच्छ देवेश पूजामादाय मामकीम् । इष्टकाम प्रसिद्धयर्थं पुनरागमनाय च ॥

## आचमनम् ।

ॐ श्री स्वामिनारायणाय नमः ।

ॐ श्री हरिकृष्णाय नमः ।

ॐ श्री पूर्ण पुरुषोत्तमाय नमः ।

ॐ सांग : सपरिवार : श्री स्वामनारायण : सदा मम हृदये वसतु । प्रीयतां न मम ।

इति श्री स्वामिनारायण महापूजा विधिः समाप्तः ॥ श्री हरिः प्रसन्नोंऽस्तु ।

## आशीर्वादना श्लोको ।

स्वस्त्यस्तु ते कुशलमस्तु चिरायुरस्तु गोवाजिहस्ति धनधान्य समृद्धिरस्तु ।
ऐश्वर्यमस्तु विजयोऽस्तु रिपुक्षयोऽस्तु वंशे सदैव भवतां हरिभक्तिरस्तु ॥
सर्वे भवन्तु सुखिनः सर्वे सुन्तु निरामया । सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ॥
स्वस्तिस्तु या विनाशाख्या पुण्य कल्याणवृद्धिदा । विनायकप्रिया नित्यं तां च स्वर्स्ति ब्रुवन्तु नः (१)
नारदाद्या ऋषिगणा : ये चान्ये च तपोधनाः । भवन्तु यजमानस्य आशीर्वादपरायणा : ॥ (२)
आदित्या वसवो रुद्रा : विश्वदेवा मरुद्गणाः । लोकपाला :प्रयच्छन्तु मंगलानि श्रियं यश : ॥ (३)
गायत्री सती सावित्री शची लक्ष्मी : सरस्वती । मृडानी मातर : सर्वा भवन्तु वृद्धिदा : सदा ॥ (४)
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः । ब्रह्मवाक्यं सदानित्यं घ्नन्ति तव शत्रवः ॥ (५)
यावद् भागीरथी गंगा यावद्देवो महेश्वरः । यावद्वेदाः प्रवर्तन्ते तावत्वं विजयी भव ॥ (६)
मन्त्रार्थाः सफलाः सन्तु सन्तु पूर्णा मनोरथाः । शत्रूणां बुद्धिनाशोऽस्तु । मित्राणामुदयस्तव ॥ (७)
बहुधनधान्यं पशुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥ आराद्ध्यदेवः प्रसन्नोऽस्तु ॥

## देव चरणोदक ग्रहणम् ।

अकाल मृत्यु हरणं सर्व व्याधि विनाशनम् । हरिपादोदकं तीर्थं जठरे धारयाम्यहम् ॥

पादोदकं धर्मपुत्रं पिबति यो नरस्तव । तस्यान्तर्गतजं पापं नश्यति नात्र संशयः ॥

हस्त प्रक्षालनम् ।

**अथ प्रसाद भक्षणम् ।**

नारायणप्रसादं तु गृहीत्वा चभक्तिभावतः । सर्वान्कामानवाप्नोति प्रेत्य सायुज्यमाप्नुयात् ॥

सहजानंद स्वामी महाराजनी जय

श्रीपतिं श्रीधरं सर्वदेवेश्वरं भक्ति धर्मात्मजं वासुदेवं हरिम् ।

माधवं केशवं कामदं कारणं स्वामिनारायणं नीलकण्ठं भजे ॥

अथ पुराणोक्तविधिना यज्ञोपवीत धारण विधिर्ळख्यते ॥

**अथ आचमन विधि ।**

ॐ अवतारिणे श्री स्वामिनारायणाय नमः ।

ॐ अवतारिणे श्री हरिकृष्णाय नमः ।

ॐ अवतारिणे श्री सहजानंद स्वामिने नमः ।

**अथ प्राणायाम विधि ।**

प्राणायाम त्रयं कुर्यात् ।

ॐ श्री स्वामिनारायणाय नमः ।

**अथ संकल्पः ।**

अद्येत्यादि मम श्रौतस्मार्तकर्मानुष्ठान सिद्ध्यर्थं तथा च अमुककर्माङ्गत्वेन विहितं नूतन यज्ञोपवीत धारणमहं करिष्ये ।

**अथ सूत्रत्रिगुणीकरणं प्रक्षालनं मार्जनम् ।**

संकल्प करीने पछी पहेला सूत्रत्रिगुणीकरणं तत्र मंत्रः ॐ नारायणाय नमः एम आनावडे प्रक्षालन करी फरीथी दश वखत विष्णुनाम मंत्र वडे मार्जन करवुं.

## अथ तन्तुदेवानां आवाहनम् ।

शार्दूलवि क्रिडीत वृन्त :

श्रीजुष्टे वटपत्तने नृपपथे भूपस्य हर्म्याङ्गणे नागेन्द्रो परिरुढ मीडितपदं भूपेन भक्तया भृशम् । नानारत्नमणीन्द्र मौक्तिकलितं हेमोद्भवं भूषणम्, मुर्धाग्रे दधतं नमामि रुचिरं श्री स्वामिनारायणम् ॥१॥

प्रथमतन्तौ ॐ श्री स्वामिनारायणाय नमः श्री स्वामिनारायणम् आवाहयामि स्थापयामि पजयामि सकलोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ॥

वसन्ततिलकाः

उद्दामदारमचितं शुभमूलिपूर्याम्, तद्वच्छुपयसि पुरेऽप्यकरोन्नवीनम् ।
प्रेम्णा प्रबोध्य जनतां जगदीशधामा, योध्याप्रसादमति नौमि गुरुं मुनीनाम् ॥२॥

ॐ द्वितीयतन्तौ श्रीदेशिकेन्द्राय अयोध्याप्रसादाय नमः अयोध्याप्रसादम् आवाहयामि स्थापयामि पूजयामि सकलोपचारार्थे गंधाक्षत पुष्पाणिसमर्पयामि ॥२॥

शिखरिणी :

जनानामाप्तानां स्वमिह शरणं स्थापनतया, हरेरैकान्तिक्यं जगति ननु भक्तौ वृषभवः ।
हरि र्यस्मिन् प्रीतः स भृशमभवत्तं शुभगुणं, नमाम्याचार्येन्दुं मम हि रघुवीरं गुरुमहम् ॥३॥

ॐ तृतीयतन्तौ श्री देशिकेन्द्रायरघुवीराय नमः रघुवीरम् आवाहयामि स्थापयामि
पूजयामि सकलोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ॥३॥

शिखरिणी :

अजस्त्रं सम्प्राप्तं परमसहजानन्दनिकटे स्थितिं तत्सेवायां निपुणमनवद्यं मतिमताम् ।
सतां चाद्यं वन्दे सदयहृदयं नैष्ठिकवरं, मुकुन्दानन्दाख्यं धृतशुभगुणाकल्पमनिशम् ॥४॥

ॐ चतुर्थतन्तौ मुकुन्दानन्दवर्णिने नमः मुकुन्दानन्दवर्णिनम् आवाहयामि
स्थापयामि पूजयामि सकलोपचारार्थे गंधाक्षत पुष्पाणि समर्ययामि ॥४॥

प्रहर्षिणी :

शास्त्रंज्ञं वयुन विरक्तिभक्तियुक्तम्, सद्वन्द्यं मुकुटमणिं बृहद्व्रतानाम् ।
वन्देंऽ हं कविवरमत्रवासुदेवा, नन्दाख्यं विनयदयाक्षमाद्युपेतम् ॥५॥

ॐ पंचमतंतौ श्रीवासुदेवानन्दवर्णिने नमः वासुदेवानन्दवर्णिनम् आवाहयामि
स्थापयामि पूजयामि सकलोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ॥५॥

स्रग्धरा :

श्रीमद्धर्माङ्गजातांघ्रिकमलं युगले भृंगराजं मनोज्ञं, वैराग्योतत्कृष्टवेगोज्झितविषयविषाम्भोधि मिथ्यानुरागम् ।

स्वान्तर्बह्येव नित्यं वृषकुल जलजाहस्करं वीक्ष्यमाणं, गोपालानन्दसंज्ञं मुनिवर मनघं योगिराजं नमामि ॥६॥

ॐ षष्ठंतन्तौ गोपलानन्दमुनये नमः गोपालानन्द मुनिम् आवाहयामि स्थापयामि
पूजयामि सकलोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ॥६॥

शार्दूल विक्रिडीत :

नानापद्यसुकाव्यशीघ्ररचना दक्षं स्वधर्मस्थिरं छन्दोभिः सुकृतैर्हरिं वृषभुवंसंप्रीणयामास यः ।
मैत्रीं तेन गतः स्वनर्मवचनैः संहासयन्तं स्थिरं, ब्रह्मानन्दमुनिं नमामि तमहं देशाद्यभिज्ञं मुदा ॥७॥

ॐ सप्तमंतन्तौ ब्रह्मानन्दमुनये नमः ब्रह्मानन्द मुनिम् आवाहयामि स्थापयामि
पूजयामि सकलोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ॥७॥

शार्दूल विक्रिडीत :

प्राप्तोवासमहर्निशं च सहजानन्दस्य यः सन्निधौ, प्रीत्या तं समतोषयद्यतिपतिः भक्त्यानुवृत्या भृशम् ।
वैराग्योज्झितसर्वलोकविभवं चैकान्तधर्मप्रियम्, वन्दे तं विदुषांवरं शुकमुनिं शान्तस्वभावं सदा ॥८॥

ॐ अष्टमतन्तौ श्रीशुकानन्दमुनये नमः शुकानन्दमुनिम् आवाहयामि स्थापयामि
पूजयामि सकलोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ॥८॥

स्रग्धरा :

चक्रे नित्यं कथां यः प्रकटभगवतः सन्निधाने मनोज्ञां, यस्मै प्रादात् प्रसन्नो निजधृतवसनादीन्यसौ पूर्णकामः ।
जेतायः पण्डितानां जगति विवदतां देवताचार्यभक्तं, नित्यानन्दं मुनीन्द्रं तमनुदिनमहं नौमि भक्तप्रधानम् ॥९॥

ॐ नवमतन्तौ श्रीनित्यानन्दमुनये नमः नित्यानन्दमुनिम् आवाहयामि स्थापयामि
पूजयामि सकलोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ॥९॥

**अथ यज्ञोपवीतग्रंथि देवतानामावाहनम् ।**

शार्दूल विक्रिडीत :

श्रीमद्धर्मधुरंधरं सुखकरं कारुण्य पाथोनिधिम्, सन्नाथं निगमान्तगीतयशसं पाथोदनील प्रभम् ।
धर्मस्वीकृतभूषणं स्वमहसा धर्मात्मजं स्वामिनं, सद्धाम्नः पतिमक्षरस्य सहजानन्दं हरिं तं भजे ॥९॥

ॐ ग्रन्थिमध्ये श्रीसहजान्दस्वामिने नमः श्री सहजान्दस्वामिनम् आवाहयामि
स्थायपामि पूजयामि सकलोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ॥१॥

वसन्ततिलका :

श्रीमन्नवीनजलजासितसुन्दरांगम्, रत्नांगुलीयवलयांगदहस्त युग्मम् ।
मन्दारकु न्दसुरभिस्थलपद्महारं, वन्दे विशुद्धहरिकृष्णमहं सदीशम् ॥२॥

ॐ ग्रन्थिमध्ये श्रीहरिकृष्णाय नमः श्री हरिकृष्णम् आवाहयामि स्थापयामि
पूजयामि सकलोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ॥२॥

रक्षन् वेदममन्द मन्दरगिरिं बिभ्रद्धरामाहरन्, प्रह्लादं परिपालयन् बलिमनः क्षुभ्यन् क्षयन् क्षत्रियान् ।
लंकेशान्तकरश्चकंसशमनः शान्तो सुरोन्मोहनः, म्लेच्छोन्मूलनकारकस्तमनिशं श्रीनीलकण्ठं भजे ॥३॥

ॐ ग्रन्थिमध्ये श्रीनलकण्ठाय नमः श्रीनीलकण्ठं आवाहयामि स्थापयामि पूजयामि ।

श्री स्वामिनारायणाद्यावाहित देवताभ्यो नमः यथास्थानमहं न्यसामि ।

## अथ ध्यानम् ।

उपजाति :

प्राजपतेर्यत्सहजं पवित्रं, कार्पाससूत्रोद्भवब्रह्मसूत्रम् ।

ब्रह्मत्वसिद्ध्यै च यशः प्रकाशं, जपस्य सिद्धिं कुरु ब्रह्मसूत्र ॥१॥

## अथ यज्ञोपवीतधारणम् ।

दक्षिण हस्ते जलं निधाय ।

ॐ यज्ञोपवीतमिति मन्त्रस्य "नारायणऋषिः"त्रिष्टुप्छन्दः "भक्तिधर्मनन्दनः"

श्रीहरिर्देवता यज्ञोपवीतधारणे विनियोगः

(यज्ञोपवीतने बंने हाथनां अंगुठा अने कनिष्ठिका आंगळीमां धारण करी हाथ ऊंचा करी सूर्यनारायण तरफ राखी हाथ ऊंचा राखवा अने नीचेनो मंत्र बोलवो.)

ॐ यज्ञोपवीतं परंम पवित्रं, प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमड्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥१॥

ॐ "यज्ञोपवीतमसि यज्ञस्य त्वां यज्ञोपवीतत्वेनोपनह्यामि"

(आ मंत्र वडे पृथक पृथक यज्ञोपवीत धारण करवी जेम के ब्रह्मचारीए त्रण सूत्रवाळी तथा गृहस्थोएत्रण सूत्र वाळी बे जनोइ धारण करवी).

**अथ जीर्णसूत्रत्याग ।**

(शरुआतमां आचमन करी हाथ धोइ पछी नीचेनो श्लोक बोलो.)

एतावत्‌दिनपर्यन्तं ब्रह्मत्वं धारितं मया । जीर्णत्वात् त्वत् परित्यागो गच्छ सूत्र यथा सुखम् ॥

(आ मंत्र वडे जीर्ण यज्ञोपवीतने शिरोमार्गथीः मस्तकेथीः पृथक् पृथक् काढीने शुद्ध भूमिमां त्यागकरी आचमन करी हाथ धोइ यथा शक्ति भगवानना नाम मंत्र जापादिक करवां.)

**अथ समर्पणम् ।**

(जमणा हाथमां पाणी लइ लो.)

अनेन नूतन यज्ञोपवीतधारणाख्यकर्मकृतेन यथाशक्ति
श्री भगवन्नाममन्त्रजापादि कर्मणा श्रीपरमेश्वरः प्रीयतां न मम ।

(जमणा हाथनुं पाणी नीचे मूकी दो.)

फरी एक वखत आचमन करी हाथ धोइ नाखो.

श्रीरस्तु शुभमस्तु ॥

। इति यज्ञोपवीत धारण विधिसंपूर्ण ।

## श्री जनमंगल नामावली

१ ॐ श्री कृष्णाय नमः ।
२ ॐ श्री वासुदेवाय नमः ।
३ ॐ श्री नरनारायणाय नमः ॥
४ ॐ श्री प्रभवे नमः ।
५ ॐ श्री भक्तिधर्मात्मजाय नमः ।
६ ॐ श्री अजन्मने नमः ।
७ ॐ श्री कृष्णाय नमः ।
८ ॐ श्री नारायणाय नमः ।
९ ॐ श्री हरये नमः ।
१० ॐ श्री हरिकृष्णाय नमः ।
११ ॐ श्री घनश्यामाय नमः ।
१२ ॐ श्री धार्मिकाय नमः ।
१३ ॐ श्री भक्तिनन्दनाय नमः ।
१४ ॐ श्री बृहद्व्रतधराय नमः ।
१५ ॐ श्री शुद्धाय नमः ।
१६ ॐ श्री राधाकृष्णेष्टदैवताय नमः ।
१७ ॐ श्री मरुत्सुतप्रियाय नमः ।
१८ ॐ श्री कालीभैरवाद्यतिभीषणाय नमः ।
१९ ॐ श्री जीतेन्द्रियाय नमः ।
२० ॐ श्री जीताहाराय नमः ।
२१ ॐ श्री तीव्रवैराग्याय नमः ।
२२ ॐ श्री अस्तिकाय नमः ।
२३ ॐ श्री योगेश्वराय नमः ।
२४ ॐ श्री योगकलाप्रवृत्तये नमः ।
२५ ॐ श्री अतिधैर्यवतेनमः ।
२६ ॐ श्री ज्ञानिने नमः ।

२७ ॐ श्री परमहंसाय नमः ।
२८ ॐ श्री तीर्थकृते नमः ।
२९ ॐ श्री तैर्थिकार्चिताय नमः ।
३० ॐ श्री क्षमानिधये नमः ।
३१ ॐ श्री सदोन्निद्राय नमः ।
३२ ॐ श्री ध्याननिष्ठाय नमः ।
३३ ॐ श्री तपः प्रियाय नमः ।
३४ ॐ श्री सिद्धेश्वराय नमः ।
३५ ॐ श्री स्वतन्त्राय नमः ।
३६ ॐ श्री ब्रह्मविद्याप्रवर्तकाय नमः ।
३७ ॐ श्री पाषंडोच्छेदनपटवे नमः ।
३८ ॐ श्री स्वस्वरुपाचलस्थितये नमः ।
३९ ॐ श्री प्रशान्तमूर्तये नमः ।
४० ॐ श्री निर्दोषाय नमः ।
४१ ॐ श्री असुर गुर्वादिमोहनाय नमः ।
४२ ॐ श्री अतिकारुण्यनयनाय नमः ।
४३ ॐ श्री उद्धवाध्वप्रवर्तकाय नमः ।
४४ ॐ श्री महाव्रताय नमः ।
४५ ॐ श्री साधुशीलाय नमः ।
४६ ॐ श्री साधुविप्रप्रपूजकाय नमः ।
४७ ॐ श्री अहिंसयज्ञप्रस्तोत्रे नमः ।
४८ ॐ श्री साकारब्रह्मवर्णनाय नमः ।
४९ ॐ श्री स्वामिनारायणाय नमः ।
५० ॐ श्री स्वामिने नमः ।
५१ ॐ श्री कालदोषनिवारकाय नमः ।
५२ ॐ श्री सच्छास्त्रव्यसनाय नमः ।
५३ ॐ श्री सद्यः समाधिस्थितिकारकाय नमः ।
५४ ॐ श्री कृष्णर्चास्थापनकराय नमः ।

५५ ॐ श्री कौलद्विषे नमः ।
५६ ॐ श्री कलितारकाय नमः ।
५७ ॐ श्री प्रकाशरुपाय नमः ।
५८ ॐ श्री निर्दम्भाय नमः ।
५९ ॐ श्री सर्वजीवहितावहाय नमः ।
६० ॐ श्री भक्तिसम्पोषकाय नमः ।
६१ ॐ श्री वाग्मिने नमः ।
६२ ॐ श्री चतुर्वर्गफलप्रदाय नमः ।
६३ ॐ श्री निर्मत्सराय नमः ।
६४ ॐ श्री भक्तवर्मणे नमः ।
६५ ॐ श्री बुद्धिदात्रे नमः ।
६६ ॐ श्री अतिपावनाय नमः ।
६७ ॐ श्री अबुद्धिहृते नमः ।
६८ ॐ श्री ब्रह्मधामदर्शकाय नमः ।
६९ ॐ श्री अपराजीताय नमः ।
७० ॐ श्री आसमुद्रान्तसत्कीर्तये नमः ।
७१ ॐ श्री श्रितसंसृतिमोचनाय नमः ।
७२ ॐ श्री उदाराय नमः ।
७३ ॐ श्री सहजानन्दाय नमः ।
७४ ॐ श्री साध्वीधर्मप्रवर्तकाय नमः ।
७५ ॐ श्री कन्दर्पदर्पदलनाय नमः ।
७६ ॐ श्री वैष्णवक्रतुकारकाय नमः ।
७७ ॐ श्री पंचायतनसन्मानाय नमः ।
७८ ॐ श्री नैष्ठिक व्रत पोषकाय नमः ।
७९ ॐ श्री प्रगल्भाय नमः ।
८० ॐ श्री निःस्पृहाय नमः ।
८१ ॐ श्री सत्यप्रतिज्ञाय नमः ।
८२ ॐ श्री भक्तवत्सलाय नमः ।

८३ ॐ श्री अरोषणाय नमः ।
८४ ॐ श्री दीर्धदर्शिने नमः ।
८५ ॐ श्री षडूर्मिविज्यक्षमाय नमः ।
८६ ॐ श्री निरहंकृतये नमः ।
८७ ॐ श्री अद्रोहाय नमः ।
८८ ॐ श्री ऋजवे नमः ।
८९ ॐ श्री सर्वोपकारकाय नमः ।
९० ॐ श्री नियामकाय नमः ।
९१ ॐ श्री उपशमस्थितये नमः ।
९२ ॐ श्री विनयवते नमः ।
९३ ॐ श्री गुरवे नमः ।
९४ ॐ श्री अजातवैरिणे नमः ।
९५ ॐ श्री निर्लोभाय नमः ।
९६ ॐ श्री महापुरुषाय नमः ।
९७ ॐ श्री आत्मदाय नमः ।
९८ ॐ श्री अखण्डितार्षमर्यादाय नमः ।
९९ ॐ श्री व्याससिद्धान्तबोधकाय नमः ।
१०० ॐ श्री मनोनिग्रहयुक्तिज्ञाय नमः ।
१०१ ॐ श्री यमदूतविमोचकाय नमः ।
१०२ ॐ श्री पूर्णकामाय नमः ।
१०३ ॐ श्री सत्यवादिने नमः ।
१०४ ॐ श्री गुणग्राहिणे नमः ।
१०५ ॐ श्री गतस्मयाय नमः ।
१०६ ॐ श्री सदाचारप्रियतराय नमः ।
१०७ ॐ श्री पुण्यश्रवणकीर्तनाय नमः ।
१०८ ॐ श्री सर्वमंगलसद्रूपनानागुण विचेष्टिताय नमः।

*॥ ईति श्रीजनमंगलनामावलि समाप्ता ॥*

●

## सर्वमङ्गलनामावलिः

१ ॐ स्वामिने नमः
२ ॐ ब्रह्मणे नमः
३ ॐ परब्रह्मणे नमः
४ ॐ श्रीकृष्णाय नमः
५ ॐ पुरुषोत्तमाय नमः
६ ॐ ब्रह्मधाम्ने नमः
७ ॐ वासुदेवाय नमः
८ ॐ ईशेशाय नमः
९ ॐ दिव्यविग्रहाय नमः
१० ॐ सुव्रतात्मने नमः
११ ॐ जगन्नाथाय नमः
१२ ॐ इष्टदाय नमः
१३ ॐ करुणानिधये नमः
१४ ॐ प्रतापसिंहशरणाय नमः
१५ ॐ शतानन्दवरप्रदाय नमः
१६ ॐ नारायणाय नमः
१७ ॐ नरसखाय नमः
१८ ॐ बदरीशाय नमः
१९ ॐ तपःप्रियाय नमः
२० ॐ स्वधर्मस्थाय नमः
२१ ॐ मुनिध्येयाय नमः
२२ ॐ महर्षिगणपूजिताय नमः
२३ ॐ अधर्मवैरिणे नमः
२४ ॐ दुर्वासःशप्तधर्माद्यनुग्रहाय नमः
२५ ॐ धर्मावताराय नमः
२६ ॐ धर्मात्मने नमः
२७ ॐ भक्तिधर्मानुशासनाय नमः
२८ ॐ रामानन्दाय नमः

२९ ॐ जनानन्दाय नमः
३० ॐ औद्धवाध्वप्रवर्तकाय नमः
३१ ॐ विष्णुयागप्रियाय नमः
३२ ॐ भक्तिधर्माराधिताय नमः
३३ ॐ ईश्वराय नमः
३४ ॐ वृन्दावनेन्दवे नमः
३५ ॐ वरदाय नमः
३६ ॐ मुनिसङ्घहितावहाय नमः
३७ ॐ द्रौण्यर्तिहर्त्रे नमः
३८ ॐ विध्नेशाय नमः
३९ ॐ धर्मसङ्कष्टनाशनाय नमः
४० ॐ भक्तिधर्मात्मजाय नमः
४१ ॐ भूम्ने नमः
४२ ॐ भक्तिधर्मतपःफलाय नमः
४३ ॐ सावर्णिगोत्रतिलकाय नमः
४४ ॐ मध्वाद्यनवमीजनुषे नमः
४५ ॐ जनमङ्गलदिव्याङ्गाय नमः
४६ ॐ नराकृतये नमः
४७ ॐ अलौकिकाय नमः
४८ ॐ भूतलानन्दजनकाय नमः
४९ ॐ द्विजेन्द्रकुल भूषणाय नमः
५० ॐ रामप्रतापावरजाय नमः
५१ ॐ हनूमदभिरक्षिताय नमः
५२ ॐ हरिकृष्णाय नमः
५३ ॐ हरये नमः
५४ ॐ कृष्णाय नमः
५५ ॐ नीलकण्ठाय नमः
५६ ॐ वृषात्मजाय नमः
५७ ॐ स्त्रीवृन्दलालिताय नमः
५८ ॐ भक्तिनन्दनाय नमः

| | | | |
|---|---|---|---|
| ५९ | ॐ प्रियदर्शनाय नमः | ७३ | ॐ गुरुभक्ताय नमः |
| ६० | ॐ हरिप्रसादहर्षाब्धये नमः | ७४ | ॐ उदारधिये नमः |
| ६१ | ॐ धर्मपत्नीस्तनन्धयाय नमः | ७५ | ॐ अधीताखिलसच्छास्त्राय नमः |
| ६२ | ॐ क्रीडद्बालव्रजानन्दाय नमः | ७६ | ॐ सामगाय नमः |
| ६३ | ॐ कालीदत्तमदापनुदे नमः | ७७ | ॐ निरहङ्कृतये नमः |
| ६४ | ॐ इच्छारामाग्रजाय नमः | ७८ | ॐ प्रसूपदिष्टसाङ्गात्मभक्तये नमः |
| ६५ | ॐ अयोध्यावासाय नमः | ७९ | ॐ अज्ञानहारकाय नमः |
| ६६ | ॐ बाल्यमनोहराय नमः | ८० | ॐ पितृप्रत्तात्मविज्ञानाय नमः |
| ६७ | ॐ सरयूनियतस्नानाय नमः | ८१ | ॐ पितृदिव्यगतिप्रदाय नमः |
| ६८ | ॐ सीतारामेक्षणोत्सुकाय नमः | ८२ | ॐ निराशाय नमः |
| ६९ | ॐ प्रदक्षिणीकृतायोध्याय नमः | ८३ | ॐ तीव्रवैराग्याय नमः |
| ७० | ॐ करात्तजपमालिकाय नमः | ८४ | ॐ सन्त्यक्तगृहबान्धवाय नमः |
| ७१ | ॐ वर्णिव्रतधराय नमः | ८५ | ॐ वर्णिवेषाय नमः |
| ७२ | ॐ दान्ताय नमः | ८६ | ॐ महासत्त्वाय नमः |

८७ ॐ स्वजनाज्ञातनिर्गमाय नमः
८८ ॐ अंसलंबितसच्छास्त्रसारोद्धाराल्प-
पुस्तकाय नमः
८९ ॐ गणेशस्मरणाय नमः
९० ॐ तीर्णसरय्वे नमः
९१ ॐ दैत्यमोहनाय नमः
९२ ॐ वनवासरुचये नमः
९३ ॐ श्राद्धाय नमः
९४ ॐ विप्रेन्द्राय नमः
९५ ॐ नैष्ठिकाग्रणये नमः
९६ ॐ हिमाद्रिसानुचरणाय नमः
९७ ॐ निर्भयाय नमः
९८ ॐ भीतभैरवाय नमः
९९ ॐ निःशङ्कसंस्थाय नमः
१०० ॐ हनुमद्दत्तस्वादुफलाशनाय नमः
१०१ ॐ पुलहाश्रमवासाय नमः
१०२ ॐ अर्कप्रीणनाय नमः
१०३ ॐ अर्कसमीक्षणाय नमः
१०४ ॐ ऊर्ध्वदोष्णे नमः
१०५ ॐ एकपादस्थाय नमः
१०६ ॐ विस्मापिततपोधनाय नमः
१०७ ॐ कृशाय नमः
१०८ ॐ महातपसे नमः
१०९ ॐ शुद्धाय नमः
११० ॐ भक्तिधर्मनिषेविताय नमः
१११ ॐ गोपालयोगिसंप्राप्तसाङ्गयोगाय नमः
११२ ॐ अतिधैर्यवते नमः
११३ ॐ योगक्रियापटवे नमः
११४ ॐ कर्त्रे नमः
११५ ॐ कृतज्ञाय नमः

११६ ॐ भूरितीर्थकृते नमः
११७ ॐ ब्रह्मात्मसंस्थितये नमः
११८ ॐ शान्ताय नमः
११९ ॐ सिद्धवल्लभपूजिताय नमः
१२० ॐ गोपालरक्षकाय नमः
१२१ ॐ सिद्धदर्पघ्न नमः
१२२ ॐ मांत्रिकार्चिताय नमः
१२३ ॐ तैलङ्गविप्रदोषघ्नाय नमः
१२४ ॐ कृत्याभीषणदर्शनाय नमः
१२५ ॐ पिबैकमानघ्ने नमः
१२६ ॐ कालभैरवत्रासदेक्षणाय नमः
१२७ ॐ जगन्नाथपुरावासाय नमः
१२८ ॐ आसुरावेशहृदे नमः
१२९ ॐ विभवे नमः
१३० ॐ धार्मिकाय नमः
१३१ ॐ असुरगुर्वोघोच्छेदहेतवे नमः
१३२ ॐ अविक्रियाय नमः
१३३ ॐ सत्रधर्मार्चिताय नमः
१३४ ॐ कान्ताय नमः
१३५ ॐ स्वप्रतापक्षितासुराय नमः
१३६ ॐ नानातीर्थकृतावासाय नमः
१३७ ॐ प्रावृडभ्रावकाशकृते नमः
१३८ ॐ ग्रीष्मसाधितपञ्चाग्नये नमः
१३९ ॐ शिशिरांबुस्थितये नमः
१४० ॐ शुचये नमः
१४१ ॐ निर्मानाय नमः
१४२ ॐ निर्ममाय नमः
१४३ ॐ अस्नेहाय नमः
१४४ ॐ निष्कामाय नमः
१४५ ॐ निर्जितेन्द्रियाय नमः

१४६ ॐ जितनिद्राय नमः
१४७ ॐ जितक्रोधाय नमः
१४८ ॐ निर्मदाय नमः
१४९ ॐ निःस्पृहाय नमः
१५० ॐ अचलाय नमः
१५१ ॐ कृच्छ्व्रतिने नमः
१५२ ॐ सत्यवादिने नमः
१५३ ॐ क्षमिणे नमः
१५४ ॐ धमनिसन्तताय नमः
१५५ ॐ जितत्र्यवस्थाय नमः
१५६ ॐ मेधाविने नमः
१५७ ॐ दम्भहीनाय नमः
१५८ ॐ तपोधनाय नमः
१५९ ॐ उपवीतिने नमः
१६० ॐ वल्कवाससे नमः
१६१ ॐ तरुमूलनिकेताय नमः
१६२ ॐ अहिंसावृत्तये नमः
१६३ ॐ तेजस्विने नमः
१६४ ॐ निर्निमेषविलोचनाय नमः
१६५ ॐ धनुर्मुक्तेषुगमनाय नमः
१६६ ॐ ब्रह्मदर्शिने नमः
१६७ ॐ महामतये नमः
१६८ ॐ अयाचिताहृताहाराय नमः
१६९ ॐ निर्द्वन्द्वाय नमः
१७० ॐ निष्परिग्रहाय नमः
१७१ ॐ वाय्वाहाराय नमः
१७२ ॐ जलाहाराय नमः
१७३ ॐ मिताहाराय नमः
१७४ ॐ अक्षताङ्गकाय नमः
१७५ ॐ ज्ञानिने नमः

१७६ ॐ ध्यानिने नमः
१७७ ॐ जितस्वादाय नमः
१७८ ॐ प्रत्याहारहठाय नमः
१७९ ॐ अस्मयाय नमः
१८० ॐ पावनाय नमः
१८१ ॐ तैर्थिकगुरवे नमः
१८२ ॐ वर्णिराजाय नमः
१८३ ॐ दयाकराय नमः
१८४ ॐ जटिने नमः
१८५ ॐ कौपीनवसनाय नमः
१८६ ॐ शालग्रामतृषाहराय नमः
१८७ ॐ शिवाप्तसक्तवे नमः
१८८ ॐ अक्षोभ्याय नमः
१८९ ॐ निःसङ्गाय नमः
१९० ॐ अध्यात्मवित्तमाय नमः
१९१ ॐ सदासमाधये नमः
१९२ ॐ आनन्दिने नमः
१९३ ॐ निर्दोषाय नमः
१९४ ॐ दोषनाशनाय नमः
१९५ ॐ कान्तारगतये नमः
१९६ ॐ एकाकिने नमः
१९७ ॐ सर्वसाधुगुणालयाय नमः
१९८ ॐ तैर्थिकाय नमः
१९९ ॐ तीर्थधर्मज्ञाय नमः
२०० ॐ तीर्थस्थाधर्मनाशनाय नमः
२०१ ॐ अनादृतवपुःसौख्याय नमः
२०२ ॐ प्राणायामपराय नमः
२०३ ॐ व्रतिने नमः
२०४ ॐ ऋषिवृत्तये नमः
२०५ ॐ मुनये नमः

२०६ ॐ मौनिने नमः
२०७ ॐ निर्विकल्पाय नमः
२०८ ॐ अल्पभाषणाय नमः
२०९ ॐ वस्त्रपूतोदकपिबाय नमः
२१० ॐ यावदर्थाङ्गचेष्टिताय नमः
२११ ॐ ब्रह्मज्ञस्वैरवर्तित्वबोधिग्रन्थ-
विवर्जनाय नमः
२१२ ॐ निरुपानहे नमः
२१३ ॐ अपृष्टाध्वने नमः
२१४ ॐ घोरारण्यचराय नमः
२१५ ॐ अभ्रमाय नमः
२१६ ॐ स्त्र्यङ्गगन्धासहाय नमः
२१७ ॐ असक्ताय नमः
२१८ ॐ जडाङ्गिरसवर्तनाय नमः
२१९ ॐ ऊर्ध्वरितसे नमः
२२० ॐ ब्रह्मचारिणे नमः
२२१ ॐ योगिने नमः
२२२ ॐ योगज्ञसन्नताय नमः
२२३ ॐ योगीन्द्रदुश्चराय नमः
२२४ ॐ सौराष्ट्रजनपावनाय नमः
२२५ ॐ लोजलोकमहानन्दाय नमः
२२६ ॐ साधवे नमः
२२७ ॐ साधुप्रपूजिताय नमः
२२८ ॐ अनुच्चारितदुर्वाक्याय नमः
२२९ ॐ मधुराक्षरभाषणाय नमः
२३० ॐ त्यागिमान्याय नमः
२३१ ॐ महायोगिने नमः
२३२ ॐ सदाश्चर्यक्रियाय नमः
२३३ ॐ स्थिराय नमः
२३४ ॐ ध्यात्रे नमः

२३५ ॐ ध्यातृमनोदर्शिने नमः
२३६ ॐ मनस्विने नमः
२३७ ॐ मानदाय नमः
२३८ ॐ मृदवे नमः
२३९ ॐ प्रश्नोत्तरपटवे नमः
२४० ॐ वेदतत्त्वज्ञाय नमः
२४१ ॐ बुद्धिमते नमः
२४२ ॐ बुधाय नमः
२४३ ॐ उद्धवेक्षोत्सुकाय नमः
२४४ ॐ अनन्ताय नमः
२४५ ॐ पत्रीलेखपटवे नमः
२४६ ॐ प्रभवे नमः
२४७ ॐ पत्र्युत्तरज्ञातनिजैश्वर्यसाध्व-
तिमानिताय नमः
२४८ ॐ रामानन्दस्वामिवीक्षानन्दाय नमः
२४९ ॐ साधुप्रियाय नमः
२५० ॐ प्रियाय नमः
२५१ ॐ बोधन्याप्तमहादीक्षाय नमः
२५२ ॐ गुरुसेवापराय नमः
२५३ ॐ यमिने नमः
२५४ ॐ भक्ताय नमः
२५५ ॐ नारायणमुनये नमः
२५६ ॐ सहजानन्दाय नमः
२५७ ॐ आत्मदृशे नमः
२५८ ॐ गुरुमान्याय नमः
२५९ ॐ गुरुप्रेष्ठाय नमः
२६० ॐ गुर्वन्तिककृताञ्जलये नमः
२६१ ॐ गुर्वाज्ञाकृततत्पार्श्वोपवेशग-
मनक्रियाय नमः
२६२ ॐ नारायणानन्यमतये नमः

२६३ ॐ एकान्तिकमुनिप्रियाय नमः
२६४ ॐ वर्णीन्द्राय नमः
२६५ ॐ नैष्ठिकप्रेष्ठाय नमः
२६६ ॐ एकान्तिकसदर्चकाय नमः
२६७ ॐ यशस्विने नमः
२६८ ॐ भूरितेजस्विने नमः
२६९ ॐ वैदिकाय नमः
२७० ॐ ब्रह्मवर्चसिने नमः
२७१ ॐ सन्न्यायवर्तिने नमः
२७२ ॐ निर्दोषाय नमः
२७३ ॐ भक्तिहर्षविवर्धनाय नमः
२७४ ॐ गृहीतहितवाचे नमः
२७५ ॐ सर्वभूततत्त्वविदे नमः
२७६ ॐ ऊहवते नमः
२७७ ॐ सत्यप्रियाय नमः
२७८ ॐ सत्यपराय नमः
२७९ ॐ निष्कामनरवल्लभाय नमः
२८० ॐ अद्रोहकाय नमः
२८१ ॐ सदोद्योगिने नमः
२८२ ॐ षडूर्मिविजयक्षमाय नमः
२८३ ॐ धर्मकार्यक्षिप्रकारिणे नमः
२८४ ॐ दीर्घदर्शिने नमः
२८५ ॐ विचारवते नमः
२८६ ॐ देशकालाद्यविहतस्वस्व–रुपाचलस्थितये नमः
२८७ ॐ सत्तमाय नमः
२८८ ॐ दमधृते नमः
२८९ ॐ दक्षाय नमः
२९० ॐ विनीताय नमः
२९१ ॐ स्मृतिने नमः

२९२ ॐ ऋजवे नमः
२९३ ॐ सच्छास्त्रव्यसनाय नमः
२९४ ॐ अव्यग्राय नमः
२९५ ॐ अभिमानिपुरुषारुचये नमः
२९६ ॐ अतिसर्वमतये नमः
२९७ ॐ वाग्मिने नमः
२९८ ॐ सत्सङ्गिजनवल्लभाय नमः
२९९ ॐ अप्रमत्ताय नमः
३०० ॐ अतिप्रगल्भाय नमः
३०१ ॐ अनलसाय नमः
३०२ ॐ अन्यगुणग्रहाय नमः
३०३ ॐ सदाचारप्रियाय नमः
३०४ ॐ शुष्कज्ञानिवादतमोरवये नमः
३०५ ॐ कृष्णार्पितान्नगन्धादि-
देवतापितृयाजकाय नमः
३०६ ॐ सद्यःप्रश्नसमाधानवि-
स्मापितसभाजनाय नमः
३०७ ॐ अजातशत्रवे नमः
३०८ ॐ समदृशे नमः
३०९ ॐ धर्मनिष्ठमहादराय नमः
३१० ॐ अनसूयाय नमः
३११ ॐ अचलप्रज्ञाय नमः
३१२ ॐ कामशास्त्रविवर्जनाय नमः
३१३ ॐ दीनाल्पविक्लवत्वेक्षा-
जाततीव्रव्यथाकुलाय नमः
३१४ ॐ स्वधर्मादिगुणोपेतहर्य-
भक्तजनारुचये नमः
३१५ ॐ सन्मण्डलावासरुचये नमः
३१६ ॐ सन्मण्डलपरायणाय नमः
३१७ ॐ सच्छास्त्रनिन्दितत्यागिने नमः

३१८ ॐ प्रशस्तार्थनिषेवकाय नमः
३१९ ॐ संपदापत्समाय नमः
३२० ॐ मोक्षधिषणाय नमः
३२१ ॐ प्रतिभानवते नमः
३२२ ॐ सुचिरश्रुतसच्छास्त्राय नमः
३२३ ॐ नापमानितसज्जनाय नमः
३२४ ॐ वाक्यार्थक्षिप्रविदे नमः
३२५ ॐ शत्रुमित्रदत्तसमोत्तराय नमः
३२६ ॐ अग्राह्यवस्त्वनाकाङ्क्षिणे नमः
३२७ ॐ नष्टवस्तुशुचोज्झिताय नमः
३२८ ॐ यथोचितसमारंभाय नमः
३२९ ॐ सफलारब्धसत्क्रियाय नमः
३३० ॐ सच्छास्त्रानुगतप्रज्ञाय नमः
३३१ ॐ दैवपित्र्यस्वकर्मकृते नमः
३३२ ॐ अपैशुन्यकृते नमः
३३३ ॐ अद्यूताय नमः
३३४ ॐ पापिसंसर्ग्यनादराय नमः
३३५ ॐ ब्रह्मनिंदाश्रवःखेदाय नमः
३३६ ॐ स्त्रीप्रसङ्गभृशारुचये नमः
३३७ ॐ अकार्याचरणह्रीताय नमः
३३८ ॐ समयोचितभाषणाय नमः
३३९ ॐ निर्लज्जानतसद्विप्रगुरु-
देवपदाम्बुजाय नमः
३४० ॐ मुक्तानन्दानुगाय नमः
३४१ ॐ तुष्टाय नमः
३४२ ॐ गुणाब्धये नमः
३४३ ॐ सन्मनोहराय नमः
३४४ ॐ गुरुदत्तजनस्वाम्याय नमः

३४५ ॐ सुरम्यविषयारुचये नमः
३४६ ॐ गुरुयाचितभक्तान्त-
दुःखस्वप्राप्तिसद्वराय नमः
३४७ ॐ अतिमानुषसत्कर्मणे नमः
३४८ ॐ सुखसेव्याय नमः
३४९ ॐ अखिलेष्टदाय नमः
३५० ॐ प्रपन्नभयदाय नमः
३५१ ॐ श्रीमते नमः
३५२ ॐ उत्तमोत्तमाय नमः
३५३ ॐ आत्मवते नमः
३५४ ॐ तापत्रितयहृद्वार्ताय नमः
३५५ ॐ सदसद्व्यक्तिवित्तमाय नमः
३५६ ॐ सत्पतये नमः
३५७ ॐ सर्वहितकृते नमः
३५८ ॐ ज्ञानदाय नमः
३५९ ॐ भवमोचकाय नमः
३६० ॐ भूरिप्रतापाय नमः
३६१ ॐ निर्मोहाय नमः
३६२ ॐ महाराजाय नमः
३६३ ॐ नृपार्चिताय नमः
३६४ ॐ अधृष्याय नमः
३६५ ॐ अविकृताय नमः
३६६ ॐ अजय्याय नमः
३६७ ॐ शरण्याय नमः
३६८ ॐ भक्तवत्सलाय नमः
३६९ ॐ अतर्क्याय नमः
३७० ॐ अनुपमाय नमः
३७१ ॐ अपाराय नमः
३७२ ॐ अप्रमादाय नमः
३७३ ॐ अव्ययाय नमः

३७४ ॐ उज्ज्वलाय नमः
३७५ ॐ धर्मसंसिने नमः
३७६ ॐ धर्महेतवे नमः
३७७ ॐ वेदगूढार्थबोधकाय नमः
३७८ ॐ कालामायाभयत्रात्रे नमः
३७९ ॐ भक्तवर्मणे नमः
३८० ॐ सुमङ्गलाय नमः
३८१ ॐ उपासनारीतिवक्त्रे नमः
३८२ ॐ ब्रह्मधामप्रदर्शकाय नमः
३८३ ॐ ब्रह्मभूतपरब्रह्मोपा–
सनास्थापकाय नमः
३८४ ॐ अक्षराय नमः
३८५ ॐ कन्दर्पदर्पदलनाय नमः
३८६ ॐ नैष्ठिकव्रतपोषकाय नमः
३८७ ॐ अदीनदिव्यचरिताय नमः
३८८ ॐ मनोनिग्रहयुक्तिदाय नमः
३८९ ॐ वरणीयाय नमः
३९० ॐ अन्यदुःखज्ञाय नमः
३९१ ॐ संसारार्णवनाविकाय नमः
३९२ ॐ स्वामिनारायणाय नमः
३९३ ॐ वाक्यसुधातर्पितसत्सभाय नमः
३९४ ॐ विधवास्पर्शदोषाति–प्रख्यात्रे नमः
३९५ ॐ उपशमस्थितये नमः
३९६ ॐ प्रतिबिम्बांशवादादि–
मततूलदवानलाय नमः
३९७ ॐ सभक्तिधर्मधर्माढ्य–
भक्तियोगप्रवर्तकाय नमः
३९८ ॐ प्रोक्तासद्देशकालादि दोषाय नमः

३९९ ॐ निष्कपटप्रियाय नमः
४०० ॐ सद्देशकालादिगुण-
ज्ञापकाय नमः
४०१ ॐ सत्प्रशंसकाय नमः
४०२ ॐ स्वधर्मशिथिलाप्रीतये नमः
४०३ ॐ भक्तकल्पमहीरुहाय नमः
४०४ ॐ धर्महीनज्ञानभक्तिदो-
षभूयस्त्वबोधकाय नमः
४०५ ॐ स्वधर्महीनपुरुषत्यागिने नमः
४०६ ॐ सत्प्रतिश्रुताय नमः
४०७ ॐ बह्वन्नसत्राय नमः
४०८ ॐ विष्ण्वादिपञ्चायतन-
माननाय नमः
४०९ ॐ विप्रापराधसहनाय नमः
४१० ॐ सत्यसङ्कल्पाय नमः
४११ ॐ आशुदाय नमः
४१२ ॐ सान्वयाधर्ममूलघ्नाय नमः
४१३ ॐ यज्ञकृते नमः
४१४ ॐ ब्राह्मणप्रियाय नमः
४१५ ॐ विष्णुस्वरुपाविष्काराय नमः
४१६ ॐ निर्मायाय नमः
४१७ ॐ सर्वदर्शनाय नमः
४१८ ॐ जनसाहस्त्रयुगपत्समा-
धिस्थितिकारकाय नमः
४१९ ॐ स्वेक्षायातनरस्त्रयोघा-
न्योन्यासंमर्दसद्यशसे नमः
४२० ॐ विप्रभोजनसंहृष्टाय नमः
४२१ ॐ विप्रात्मने नमः
४२२ ॐ विप्रपूजिताय नमः
४२३ ॐ वेदैकवेद्याय नमः

४२४ ॐ दिव्याङ्गाय नमः
४२५ ॐ मेघजिद्दर्पभञ्जनाय नमः
४२६ ॐ सर्वयोगकलोद्भासिने नमः
४२७ ॐ स्वतंत्राय नमः
४२८ ॐ सर्वविदे नमः
४२९ ॐ वशिने नमः
४३० ॐ कृष्णात्मने नमः
४३१ ॐ आकृष्टहृदयाय नमः
४३२ ॐ देशिकाय नमः
४३३ ॐ दिव्यदर्शनाय नमः
४३४ ॐ गोलोकरमणाय नमः
४३५ ॐ ब्रह्मकीडाय नमः
४३६ ॐ वैकुण्ठनायकाय नमः
४३७ ॐ अनेकमूर्तये नमः
४३८ ॐ अण्डस्थाय नमः
४३९ ॐ बहिःस्थाय नमः
४४० ॐ योगशिक्षकाय नमः
४४१ ॐ पुरःसराय नमः
४४२ ॐ मनोवेगाय नमः
४४३ ॐ स्वनेत्रे नमः
४४४ ॐ दर्शितामराय नमः
४४५ ॐ विष्णुयागसमारंभाय नमः
४४६ ॐ षण्मासाशितवाडवाय नमः
४४७ ॐ नानादेशगतये नमः
४४८ ॐ नानायज्ञकृते नमः
४४९ ॐ भूरिदक्षिणाय नमः
४५० ॐ सद्यःसमाधये नमः
४५१ ॐ सर्वात्मने नमः
४५२ ॐ नीरीशमतखण्डनाय नमः
४५३ ॐ मकारपञ्चकोच्छेत्रे नमः

४५४ ॐ धर्मसर्गप्रपोषकाय नमः
४५५ ॐ पापिकृतान्ताय नमः
४५६ ॐ परमाय नमः
४५७ ॐ पुण्यकीर्तये नमः
४५८ ॐ पृथुश्रवसे नमः
४५९ ॐ कृशोद्धवाध्वसंपोष्ट्रे नमः
४६० ॐ साध्वीधर्मप्रवर्तकाय नमः
४६१ ॐ दैत्यांशगुरुखद्योतभा-स्कराय नमः
४६२ ॐ धर्मधारकाय नमः
४६३ ॐ लोभादिदोषगदित्रे नमः
४६४ ॐ तामसव्रतवर्जनाय नमः
४६५ ॐ सुव्रताय नमः
४६६ ॐ सिद्धिदाय नमः
४६७ ॐ सिद्धाय नमः
४६८ ॐ सिद्धेशाय नमः
४६९ ॐ सिद्धिपाय नमः
४७० ॐ अच्युताय नमः
४७१ ॐ कौलाध्वशापदाय नमः
४७२ ॐ प्रोक्तासुरलक्ष्मणे नमः
४७३ ॐ असुरातिगाय नमः
४७४ ॐ भुजङ्गनगरानन्दाय नमः
४७५ ॐ निजभक्तस्तुताय नमः
४७६ ॐ महते नमः
४७७ ॐ अहिंसास्थापकाय नमः
४७८ ॐ भूरिनिजैश्वर्यप्रदर्शकाय नमः
४७९ ॐ दूरदेशस्थात्मभक्तदत्त-
साक्षात्स्वदर्शनाय नमः
४८० ॐ सच्छास्त्रोदितसत्कीर्तये नमः
४८१ ॐ आत्यन्तिकगतिप्रदाय नमः
४८२ ॐ परापकार साहस्त्र विस्मृतये नमः

४८३ ॐ कोमलान्तराय नमः
४८४ ॐ पाषण्डरक्षितात्मीयाय नमः
४८५ ॐ दैत्यमोहनचेष्टिताय नमः
४८६ ॐ अखण्डितार्षमर्यादाय नमः
४८७ ॐ परगुह्याप्रकाशकाय नमः
४८८ ॐ पात्रार्पितबहुद्रव्याय नमः
४८९ ॐ यथायुक्तोपदेशकाय नमः
४९० ॐ अविग्रहप्रियाय नमः
४९१ ॐ वाणीदण्डपारुष्यवर्जिताय नमः
४९२ ॐ ब्रह्मण्यदेवाय नमः
४९३ ॐ देवेज्याय नमः
४९४ ॐ दशरुपप्रदर्शकाय नमः
४९५ ॐ अकुण्ठितवचसे नमः
४९६ ॐ देशाचारज्ञाय नमः
४९७ ॐ अनादॉतोद्धताय नमः
४९८ ॐ शिक्षार्थक्षणरुषे नमः
४९९ ॐ नित्यमैत्राय नमः
५०० ॐ सच्छास्त्रसङ्ग्रहिणे नमः
५०१ ॐ धर्मिपक्षाय नमः
५०२ ॐ साधुसेविने नमः
५०३ ॐ पुण्यश्रवणकीर्तनाय नमः
५०४ ॐ प्रणतार्तिहराय नमः
५०५ ॐ पूज्याय नमः
५०६ ॐ विषयासक्तनिन्दकाय नमः
५०७ ॐ भक्तदेहान्तसमयद–
त्तदिव्यस्वदर्शनाय नमः
५०८ ॐ यमदूतावितस्वीयाय नमः
५०९ ॐ नरकार्तिनिवारकाय नमः
५१० ॐ सन्मार्गवर्तिताशेष स्वाश्रिताय नमः
५११ ॐ शीघ्रसिद्धिदाय नमः

५१२ ॐ अनाथरोगिवृद्धार्भ-
भिक्षुपोषणकारकाय नमः
५१३ ॐ गूढाशयाय नमः
५१४ ॐ गूढमंत्राय नमः
५१५ ॐ सर्वजीवाप्रतारकाय नमः
५१६ ॐ भक्तासद्धासनोच्छेत्रे नमः
५१७ ॐ असदाग्रहविवर्जनाय नमः
५१८ ॐ पोष्यवर्गानुविहितत-
त्समानमिताशनाय नमः
५१९ ॐ आपत्कालात्यक्तनिजाय नमः
५२० ॐ पञ्चकालार्चिताच्युताय नमः
५२१ ॐ योगेश्वराय नमः
५२२ ॐ मुनिपतये नमः
५२३ ॐ नित्यमुक्ताय नमः
५२४ ॐ महामुनये नमः
५२५ ॐ बौद्धादिनास्तिकमतखण्डनाय नमः
५२६ ॐ पण्डितार्चिताय नमः
५२७ ॐ अहिंसयज्ञप्रस्तोत्रे नमः
५२८ ॐ वैष्णवक्रतुकारकाय नमः
५२९ ॐ मद्यमांससुरागन्धाघ्राण-
शुद्धिविधापकाय नमः
५३० ॐ मत्तोन्मत्तखलावादिने नमः
५३१ ॐ पुरस्कृतगुणाधिकाय नमः
५३२ ॐ नानाभक्तजनानन्दाय नमः
५३३ ॐ सदसद्व्यक्तिदर्शकाय नमः
५३४ ॐ भृगुनन्दीशशापार्तजनरक्षकाय नमः
५३५ ॐ उत्तमाय नमः
५३६ ॐ वेदविदे नमः
५३७ ॐ शास्त्रविदे नमः
५३८ ॐ वादिदुर्जेयाय नमः

५३९ ॐ हृतसंशयाय नमः
५४० ॐ खट्वांङ्गात्मने नमः
५४१ ॐ हृदंभोजध्येयाय नमः
५४२ ॐ ध्यातृमनोहराय नमः
५४३ ॐ ज्योतिःसंस्थाय नमः
५४४ ॐ अतिरम्याङ्गाय नमः
५४५ ॐ सुरेखारुणपत्तलाय नमः
५४६ ॐ चार्वङ्गुलये नमः
५४७ ॐ नखेन्द्वालिप्रभापहृतहृत्तमसे नमः
५४८ ॐ पद्मकोशातिमृदुलचरणाय नमः
५४९ ॐ तुङ्गगुल्फकाय नमः
५५० ॐ ह्रस्वजङ्घाय नमः
५५१ ॐ वृत्तजानवे नमः
५५२ ॐ समोरवे नमः
५५३ ॐ सत्सितांशुकाय नमः
५५४ ॐ गम्भीरनाभये नमः
५५५ ॐ आजानुभुजाय नमः
५५६ ॐ ततभुजान्तराय नमः
५५७ ॐ कण्ठलम्बितहारालये नमः
५५८ ॐ कम्बुकण्ठाय नमः
५५९ ॐ अरुणाधराय नमः
५६० ॐ प्रफुल्लपद्मवदनाय नमः
५६१ ॐ कुन्ददन्ताय नमः
५६२ ॐ मितस्मिताय नमः
५६३ ॐ तिलपुष्पाभनासा–
न्तश्यामबिन्दवे नमः
५६४ ॐ समश्रवसे नमः
५६५ ॐ वामश्रवोन्तरश्यामबिन्दवे नमः
५६६ ॐ पद्मदलेक्षणाय नमः
५६७ ॐ विशालभालतिलकाय नमः

५६८ ॐ सूक्ष्मवक्रशिरोरुहाय नमः
५६९ ॐ शिरःपटलसत्पुष्पापीडराजये नमः
५७० ॐ स्वभक्तदृशे नमः
५७१ ॐ अवतारिणे नमः
५७२ ॐ भयत्रात्रे नमः
५७३ ॐ अभयराजवरप्रदाय नमः
५७४ ॐ कृतदुर्गपुरावासाय नमः
५७५ ॐ क्रोधयन्त्रे नमः
५७६ ॐ अद्भुतक्रियाय नमः
५७७ ॐ नानादेशप्रेषितस्वभक्तना-
शितदुष्क्रियाय नमः
५७८ ॐ असुरक्लिष्टसत्सङ्गसान्त्वनाय नमः
५७९ ॐ साधुवल्लभाय नमः
५८० ॐ सद्रोहिगुरुभूपालशि-
क्षकक्ष्मेशराज्यदाय नमः
५८१ ॐ गवेन्द्रार्चितपादाब्जाय नमः
५८२ ॐ गवेन्द्रवरदाय नमः
५८३ ॐ अनघाय नमः
५८४ ॐ भक्तत्रात्रे नमः
५८५ ॐ उद्धवस्वामिसम्प्रदायप्रकाशकाय नमः
५८६ ॐ विप्रप्रशंसनाय नमः
५८७ ॐ तीर्थविधिबोधकाय नमः
५८८ ॐ आर्तिहृते नमः
५८९ ॐ विप्रसन्तर्पणाय नमः
५९० ॐ नानाव्रतवक्त्रे नमः
५९१ ॐ महायशसे नमः
५९२ ॐ कौलोच्छिदे नमः
५९३ ॐ विजयाय नमः
५९४ ॐ वर्ण्यविष्णुयागमहोत्सवाय नमः
५९५ ॐ भक्तिगम्याय नमः

५९६ ॐ भक्तवशाय नमः
५९७ ॐ कृतदिग्विजयाय नमः
५९८ ॐ अक्षयाय नमः
५९९ ॐ भक्तिधर्मकृतानन्दाय नमः
६०० ॐ सर्वमङ्गलदर्शनाय नमः
६०१ ॐ उत्तमात्मने नमः
६०२ ॐ जयाप्रेष्ठाय नमः
६०३ ॐ ललितेष्टवरप्रदाय नमः
६०४ ॐ मुकुन्दसेवासन्तुष्टाय नमः
६०५ ॐ जयानीतपयःपिबाय नमः
६०६ ॐ नारायणधृतामंत्राय नमः
६०७ ॐ वासुदेवात्तचन्दनाय नमः
६०८ ॐ गोपालमञ्जितामंत्राय नमः
६०९ ॐ अखण्डाप्तार्चनसाधनाय नमः
६१० ॐ उमानाथाप्तपुष्पादये नमः
६११ ॐ जयप्रक्षालितांबराय नमः
६१२ ॐ ललितासंस्कृतान्नादये नमः
६१३ ॐ पञ्चाल्यालिप्तपाकभुवे नमः
६१४ ॐ अवरामार्जितावासाय नमः
६१५ ॐ शिवोपानीतपादुकाय नमः
६१६ ॐ दयगोविन्दाप्तवन्याय नमः
६१७ ॐ मयरामावितांबराय नमः
६१८ ॐ प्रयागोक्तपुराणादये नमः
६१९ ॐ निशानित्यकथादराय नमः
६२० ॐ मुक्तब्रह्मस्तुतयशसे नमः
६२१ ॐ प्रेमगीतगुणश्रुतये नमः
६२२ ॐ महानुभावमुदिताय नमः
६२३ ॐ शुकरक्षितपुस्तकाय नमः
६२४ ॐ आनन्दकल्पितावासाय नमः
६२५ ॐ सोमसूरादिपार्षदाय नमः

६२६ ॐ यथार्हकारितात्मीयसेवनाय नमः
६२७ ॐ भक्तकामदुहे नमः
६२८ ॐ निबद्धोत्सवपर्यायाय नमः
६२९ ॐ विजयोत्सवतोषिताय नमः
६३० ॐ अन्नकूटकृतानुज्ञाय नमः
६३१ ॐ महासंभारहारकाय नमः
६३२ ॐ पत्रदूताहूतभक्ताय नमः
६३३ ॐ पाकशालावलोकनाय नमः
६३४ ॐ प्रत्युद्गतमुनिव्राताय नमः
६३५ ॐ मानिताखिलवैष्णवाय नमः
६३६ ॐ सत्प्रीणनाय नमः
६३७ ॐ क्षणस्वापाय नमः
६३८ ॐ दीपालीमङ्गलाप्लवाय नमः
६३९ ॐ ब्राह्मक्षणाशुविहितनैत्यकाय नमः
६४० ॐ अखिलधर्मविदे नमः

६४१ ॐ चारुचक्रकपीठस्थाय नमः
६४२ ॐ उत्तमक्ष्मेशपूजिताय नमः
६४३ ॐ भक्तस्वेक्षाप्रदानोत्काय नमः
६४४ ॐ मयरामेक्षणस्मिताय नमः
६४५ ॐ भक्तसंप्रीणनधृतनू–
तनांशुकभूषणाय नमः
६४६ ॐ अनर्घ्यपीतकौशेयप–
रिधानविचक्षणाय नमः
६४७ ॐ मुकुटाकृतिसंबद्धशो–
णशीर्षपटद्युतये नमः
६४८ ॐ सस्वर्णबिन्दुकौसुम्भ–
सत्कञ्चुकधृतिप्रभाय नमः
६४९ ॐ स्कन्धोल्लसद्धैमपटाय नमः
६५० ॐ कटिबद्धारुणांशुकाय नमः
६५१ ॐ हैमाङ्गदलसद्बाहवे नमः

६५२ ॐ कर्णशोभितकुण्डलाय नमः
६५३ ॐ कण्ठलम्बितसस्वर्ण-
मुक्ताहारालिशोभनाय नमः
६५४ ॐ चञ्चत्सुवर्णकटकश्रृ-
ङ्खलाभकरद्वयाय नमः
६५५ ॐ सद्रत्नखचितस्वर्णमु-
द्रिकाशोभिताङ्गुलये नमः
६५६ ॐ सत्केसरोर्ध्वतिलकाय नमः
६५७ ॐ सरक्ताक्षतचन्द्रकाय नमः
६५८ ॐ अवतंसोल्लसत्कर्णाय नमः
६५९ ॐ चलत्कौसुमशेखराय नमः
६६० ॐ सुगन्धिपुष्पहारालि-
दर्शनीयाय नमः
६६१ ॐ मनोहराय नमः
६६२ ॐ गजेन्द्रगमनाय नमः
६६३ ॐ अर्कांशुचञ्चद्वाससे नमः
६६४ ॐ स्मिताननाय नमः
६६५ ॐ उच्चरम्यासनासीनाय नमः
६६६ ॐ मुनिमण्डलमध्यगाय नमः
६६७ ॐ सोमवर्मोद्धृतछत्राय नमः
६६८ ॐ मुकुन्दधृतनक्तकाय नमः
६६९ ॐ अलयभृगुजिद्रत्नदण्ड-
चामरवीजिताय नमः
६७० ॐ सूरनाज्ञात्तव्यजनाय नमः
६७१ ॐ जपमालालसत्कराय नमः
६७२ ॐ स्वेक्षणानन्दितस्वी याय नमः
६७३ ॐ श्रुतकीर्तये नमः
६७४ ॐ निजार्चिताय नमः
६७५ ॐ विप्रसात्कृतवित्तौघाय नमः
३७६ ॐ दानशूराय नमः

६७७ ॐ निरेषणाय नमः
६७८ ॐ उन्मत्तगङ्गाप्लवनाय नमः
६७९ ॐ दीपावलिमहोत्सवाय नमः
६८० ॐ नित्यकर्मादराय नमः
६८१ ॐ नूत्नवसनाय नमः
६८२ ॐ दीनवत्सलाय नमः
६८३ ॐ सदर्चिताय नमः
६८४ ॐ अन्नकूटेक्षाय नमः
६८५ ॐ रमारञ्जनभोजनाय नमः
६८६ ॐ सदाशनाय नमः
६८७ ॐ बद्धकटये नमः
६८८ ॐ स्वभक्तपरिवेषणाय नमः
६८९ ॐ भक्तभुक्तीक्षणानन्दाय नमः
६९० ॐ सदानन्दाय नमः
६९१ ॐ महाशयाय नमः
६९२ ॐ सत्सङ्गदीपकाय नमः
६९३ ॐ भक्तशिक्षादक्षाय नमः
६९४ ॐ उरुक्रमाय नमः
६९५ ॐ धर्मरक्षाकराय नमः
६९६ ॐ स्पर्शविवेकाय नमः
६९७ ॐ धर्मसिद्धिदाय नमः
६९८ ॐ निष्कामसिद्धिदाय नमः
६९९ ॐ त्यागिसेव्याय नमः
७०० ॐ अद्वैताय नमः
७०१ ॐ जपप्रियाय नमः
७०२ ॐ एकादशीव्रतविधिप्रवक्त्रे नमः
७०३ ॐ एकादशीश्वराय नमः
७०४ ॐ प्रबोधनीव्रताचाराय नमः
७०५ ॐ महादानप्रतोषिताय नमः
७०६ ॐ मुनिप्रतोषाय नमः

७०७ ॐ विदुरनीतिशास्त्रप्रशंसनाय नमः
७०८ ॐ अक्षरस्थाय नमः
७०९ ॐ मुनिव्रातस्तुताय नमः
७१० ॐ योषिद्गणेडिताय नमः
७११ ॐ भक्त्येकतोष्याय नमः
७१२ ॐ भक्त्यात्मने नमः
७१३ ॐ भक्तग्राममहोत्सवाय नमः
७१४ ॐ वृत्तालयपुरावासाय नमः
७१५ ॐ भक्तसङ्घसुखप्रदाय नमः
७१६ ॐ प्राप्तस्वबन्धुसन्मानाय नमः
७१७ ॐ भूरितर्पितपार्षदाय नमः
७१८ ॐ गङ्गार्पितफलाहाराय नमः
७१९ ॐ भक्तसङ्गसमर्चिताय नमः
७२० ॐ नानादेशीयभक्तौघा-
र्पितवित्तौघदानकृते नमः
७२१ ॐ भक्तभ्रातृद्वयावासप-
र्यायकृतभोजनाय नमः
७२२ ॐ दोलोत्सवविधानज्ञाय नमः
७२३ ॐ नरनारायणार्चकाय नमः
७२४ ॐ रङ्गक्रीडनकृते नमः
७२५ ॐ मुक्तकामचारनिषेधकाय नमः
७२६ ॐ स्त्रीपुंप्रसङ्गभूर्यापद्दर्शकाय नमः
७२७ ॐ धर्मदेशिकाय नमः
७२८ ॐ साष्टाङ्गब्रह्मचर्यैकस्थापकाय नमः
७२९ ॐ धर्मवित्तमाय नमः
७३० ॐ गृहीतनरस्त्रयङ्गस्प-
र्शदोषप्रकाशकाय नमः
७३१ ॐ स्त्रीपुंसान्योन्यसंस्प-
र्शव्यवस्थाकृते नमः
७३२ ॐ विदांवराय नमः

७३३ ॐ आहारशुद्धिकृते नमः
७३४ ॐ सद्यःपापनिष्कृतिकारकाय नमः
७३५ ॐ वेदान्ततत्त्वप्रथनाय नमः
७३६ ॐ साङ्ख्ययोगार्थदर्शकाय नमः
७३७ ॐ अदाम्भिकप्रियाय नमः
७३८ ॐ अतृष्णाय नमः
७३९ ॐ गुणग्राहिणे नमः
७४० ॐ गुणप्रियाय नमः
७४१ ॐ पुराणश्रवणौत्सुक्याय नमः
७४२ ॐ पुराणविधिबोधकाय नमः
७४३ ॐ श्रीमद्भागवतश्रोत्रे नमः
७४४ ॐ श्रीमद्भागवतार्चकाय नमः
७४५ ॐ श्रीमद्भागवताभिज्ञाय नमः
७४६ ॐ श्रीमद्भागवतार्पकाय नमः
७४७ ॐ श्रीमद्भागवतोत्कृष्ट–
पुरश्चरणकारकाय नमः
७४८ ॐ जन्माष्टम्युत्सवापूर्ण–
जीववर्ममनोरथाय नमः
७४९ ॐ कार्यायननरानन्दाय नमः
७५० ॐ वास्तुवेश्मनिकेतनाय नमः
७५१ ॐ सूरसंभावनाय नमः
७५२ ॐ शाकसंस्कारानन्दित–स्वकाय नमः
७५३ ॐ नागटङ्कजनप्रीताय नमः
७५४ ॐ शुकप्रश्नकृतोत्तराय नमः
७५५ ॐ चान्द्रायणव्रताराध्याय नमः
७५६ ॐ पञ्चालजनपावनाय नमः
७५७ ॐ शिवरात्रिव्रताचाराय नमः
७५८ ॐ कृतदोलामहोत्सवाय नमः
७५९ ॐ द्वैताद्वैतार्थनिगमहार्दबोधिने नमः
७६० ॐ महोदयाय नमः
७६१ ॐ दिव्याङ्गभक्तिधर्मादिरुपप्रेक्षयित्रे नमः

७६२ ॐ अमृताय नमः
७६३ ॐ हेमन्तार्चास्तुतिप्रीताय नमः
७६४ ॐ जीर्णदुर्गजनार्चिताय नमः
७६५ ॐ कृततीर्थविधये नमः
७६६ ॐ विप्रभोजनाय नमः
७६७ ॐ भूरिदाय नमः
७६८ ॐ अभवाय नमः
७६९ ॐ दुर्गभक्तातिसुखदाय नमः
७७० ॐ कृतकृत्याय नमः
७७१ ॐ जगत्पतये नमः
७७२ ॐ रहःस्थाय नमः
७७३ ॐ गूढसङ्कल्पाय नमः
७७४ ॐ हरिमन्दिरकारकाय नमः
७७५ ॐ महारम्भाय नमः
७७६ ॐ सदास्वस्थाय नमः
७७७ ॐ कलिदोषहरोद्यमाय नमः
७७८ ॐ कृतश्रीनगरवासाय नमः
८७९ ॐ महासंभारसाधकाय नमः
७८० ॐ श्रीपुरेशार्हिताय नमः
७८१ ॐ सम्याय नमः
७८२ ॐ पूर्तकर्मप्रशंसकाय नमः
७८३ ॐ नरनारायणाद्यार्चास्थापकाय नमः
७८४ ॐ पौरमानिताय नमः
७८५ ॐ क्षेत्रमाहात्म्यगदित्रे नमः
७८६ ॐ महोत्सवविधापकाय नमः
७८७ ॐ एकाहभोजिताशेषपौरविप्राय नमः
७८८ ॐ बहुप्रदाय नमः
७८९ ॐ पूजोत्सवव्यवस्थाकृते नमः
७९० ॐ गाङ्गेयप्रार्थिताय नमः
७९१ ॐ मनवे नमः

७९२ ॐ मूलीपूः स्थापितश्रीमद्रा-
धाकृष्णाय नमः
७९३ ॐ अक्षरप्रदाय नमः
७९४ ॐ निबद्धोत्सवमर्यादाय नमः
७९५ ॐ भक्ताभीष्टफलप्रदाय नमः
७९६ ॐ भुजङ्गपुरभक्तातिप्रीताय नमः
७९७ ॐ पौरप्रपूजिताय नमः
७९८ ॐ नरनारायणप्रतिष्ठापकाय नमः
७९९ ॐ विप्रपूजकाय नमः
८०० ॐ वृत्तालयाक्षिपद्मार्काय नमः
८०१ ॐ शिल्पिसन्मानकारकाय नमः
८०२ ॐ लक्ष्मीनारायणाद्यर्चास्थापकाय नमः
८०३ ॐ अर्चितभूसुराय नमः
८०४ ॐ धवलमुरलीमनोहरसंस्थापकाय नमः
८०५ ॐ अर्थदाय नमः
८०६ ॐ संस्थापितजयतल्परेवती
-बलदेवकाय नमः
८०७ ॐ मुक्तादिष्टोत्पथच्छेदाय नमः
८०८ ॐ चित्रार्चाप्रवर्तकाय नमः
८०९ ॐ द्वारिकाप्रेषितसुहृदे नमः
८१० ॐ तीर्थवास्यघदर्शकाय नमः
८११ ॐ सत्त्रात्रे नमः
८१२ ॐ द्वारिकेशात्मने नमः
८१३ ॐ भक्तापद्दर्शनाक्षमाय नमः
८१४ ॐ सच्चिदानन्दवरदाय नमः
८१५ ॐ लक्ष्मीनारायणात्म काय नमः
८१६ ॐ वर्धितक्षेत्रमाहात्म्याय नमः
८१७ ॐ तप्तमुद्राङ्कितस्वकाय नमः
८१८ ॐ मुक्तात्मने नमः
८१९ ॐ त्रियुगाय नमः

८२० ॐ वादिजेत्रे नमः
८२१ ॐ अनुयुगसंभवाय नमः
८२२ ॐ असुराविदितेशत्वाय नमः
८२३ ॐ प्रकटेश्वरलक्षणाय नमः
८२४ ॐ अन्तःसंशयहृद्धार्ताय नमः
८२५ ॐ दुराचारविमोचनाय नमः
८२६ ॐ अशस्त्राय नमः
८२७ ॐ धिषणास्त्राय नमः
८२८ ॐ आसुरावेशकर्षणाय नमः
८२९ ॐ लड्डुकादीष्टगणपाय नमः
८३० ॐ सिन्दूरादीष्टमारुतये नमः
८३१ ॐ वृत्तालयप्रियाय नमः
८३२ ॐ धर्मजन्माहाशितसद्विजाय नमः
८३३ ॐ महासभासनाय नमः
८३४ ॐ दत्तविध्युपात्तसुतद्वयाय नमः
८३५ ॐ पुत्रविन्यस्तगुरुताय नमः
८३६ ॐ पुत्रसात्कृतसंश्रिताय नमः
८३७ ॐ सदोविभक्तदेशादये नमः
८३८ ॐ समाय नमः
८३९ ॐ आचार्यशिक्षकाय नमः
८४० ॐ भक्तिजन्माहभक्तौघतर्पणाय नमः
८४१ ॐ चित्रिताधिपाय नमः
८४२ ॐ नृपामात्यार्थिताय नमः
८४३ ॐ पौरप्रीताय नमः
८४४ ॐ वटपुरागमाय नमः
८४५ ॐ मन्त्रिप्रत्युद्गताय नमः
८४६ ॐ नानावाद्यवादकसंवृताय नमः
८४७ ॐ सालङ्कारगजारुढाय नमः
८४८ ॐ चारुचामरवीजिताय नमः
८४९ ॐ दृक्पावितजनव्राताय नमः

८५० ॐ सिंहजिन्नृपपूजिताय नमः
८५१ ॐ स्वप्रतापपराभूतवि-
द्वद्वैरिकृतानतये नमः
८५२ ॐ सिंहजित्संशयच्छेत्रे नमः
८५३ ॐ भक्तिरीतिप्रदर्शकाय नमः
८५४ ॐ रघुवीरार्पितस्वीयभू-
षावित्तनवांशुकाय नमः
८५५ ॐ सर्वजीवहिताय नमः
८५६ ॐ सर्वसच्छास्त्ररसदोहनाय नमः
८५७ ॐ अनाकुलमनसे नमः
८५८ ॐ शिक्षापत्रीलेखनकृते नमः
८५९ ॐ स्वभुवे नमः
८६० ॐ सामान्यधर्मवचनाय नमः
८६१ ॐ विशेषवृषवर्णनाय नमः
८६२ ॐ निगमाद्यष्टसच्छास्त्रातिरुचये नमः
८६३ ॐ शास्त्रसारविदे नमः
८६४ ॐ विशिष्टाद्वैतमतधृते नमः
८६५ ॐ साकारब्रह्मवर्णनाय नमः
८६६ ॐ रामानुजकृतग्रन्थश्रु-
तिपाठप्रवर्तकाय नमः
८६७ ॐ गृहीतविठ्ठलेशोक्तव्र-
तोत्सवविधये नमः
८६८ ॐ सुधये नमः
८६९ ॐ यथाधिकारसद्धर्मवक्त्रे नमः
८७० ॐ वैदिकसम्मताय नमः
८७१ ॐ शिक्षापत्रीस्थापितस्वमाहात्म्याय नमः
८७२ ॐ पाठसिद्धिदाय नमः
८७३ ॐ सद्धर्मातिप्रवृत्तीच्छवे नमः
८७४ ॐ शिक्षापत्रीप्रवर्तकाय नमः
८७५ ॐ प्रमोदिताश्रितजनाय नमः

८७६ ॐ नरनारायणेक्षणाय नमः
८७७ ॐ महादोलोत्सवाय नमः
८७८ ॐ अयोध्याप्रसादार्पितसद्वसवे नमः
८७९ ॐ धौरेयस्थापितश्रीम-
द्राधामदनमोहनाय नमः
८८० ॐ पुत्रोपदिष्टश्रीकृष्णमं-
त्रदीक्षाविधिक्रमाय नमः
८८१ ॐ प्रोक्तदीक्षितसद्धर्माय नमः
८८२ ॐ कृष्णपूजाविधापकाय नमः
८८३ ॐ प्रोक्तापराधनिर्हाराय नमः
८८४ ॐ क्षमासाराय नमः
८८५ ॐ सदर्चनाय नमः
८८६ ॐ स्त्र्याचार्यपत्नीशिष्यत्वस्थापकाय नमः
८८७ ॐ शिष्यशासनाय नमः
८८८ ॐ पुत्रदत्तमहादीक्षाय नमः
८८९ ॐ पुत्रदीक्षितपुरुषाय नमः
८९० ॐ स्नुषादीक्षितयोषाय नमः
८९१ ॐ श्रीराधाकृष्णेष्टदेवताय नमः
८९२ ॐ सत्सङ्गिध्येयसन्मूर्तये नमः
८९३ ॐ एकान्तिकपरायणाय नमः
८९४ ॐ पुत्रप्रोक्ताद्विकाशेष-
व्रतोत्सवविधिक्रमाय नमः
८९५ ॐ गोपालप्रश्नसंहृष्टाय नमः
८९६ ॐ त्यागिधर्मोपदेशकाय नमः
८९७ ॐ लोभोन्मूलनधीदात्रे नमः
८९८ ॐ कामोत्खननयुक्तिदाय नमः
८९९ ॐ दुर्जेयरसजिद्बोधाय नमः
९०० ॐ निःस्नेहत्वविधापकाय नमः
९०१ ॐ मानसर्पविषत्रात्रे नमः
९०२ ॐ कृष्णैकान्तिकशंसनाय नमः

९०३ ॐ सद्धर्मज्ञानवैराग्यभ-
क्तिबोधनपाटवाय नमः
९०४ ॐ ज्ञानस्वरुपनिर्णेत्रे नमः
९०५ ॐ नियन्त्रे नमः
९०६ ॐ पुरुषात्मकाय नमः
९०७ ॐ प्रकृतीशाय नमः
९०८ ॐ महाकालाय नमः
९०९ ॐ मायेशाय नमः
९१० ॐ अव्याकृतात्मकाय नमः
९११ ॐ हिरण्यगर्भाय नमः
९१२ ॐ तत्त्वात्मने नमः
९१३ ॐ तत्त्वलक्षणलक्षकाय नमः
९१४ ॐ वैराजाय नमः
९१५ ॐ अखिलविश्वात्मने नमः
९१६ ॐ बुद्धिप्रेरकाय नमः
९१७ ॐ ईशित्रे नमः
९१८ ॐ जीवेश्वरब्रह्ममायारु-
पयाथार्थ्यबोधकाय नमः
९१९ ॐ निर्गुणाय नमः
९२० ॐ गुणवृत्तिज्ञाय नमः
९२१ ॐ बद्धजीवविमोचनाय नमः
९२२ ॐ भक्त्याराध्याय नमः
९२३ ॐ महादेवाय नमः
९२४ ॐ ज्ञेयाय नमः
९२५ ॐ ध्येयाय नमः
९२६ ॐ प्रकाशकाय नमः
९२७ ॐ शेषीकृताक्षरपरश्रीकृष्णाय नमः
९२८ ॐ कालकालनाय नमः
९२९ ॐ कृष्णसेवाहीनमुक्ति-
चतुष्केच्छापहारकाय नमः

९३० ॐ आदिष्टसाङ्ख्यसि-द्धान्ताय नमः
९३१ ॐ निजज्ञानफलप्रदाय नमः
९३२ ॐ ऋष्यात्मकाय नमः
९३३ ॐ चतुर्वर्णाश्रमधर्मनिरुपकाय नमः
९३४ ॐ षट्कर्मविधिनिर्णेत्रे नमः
९३५ ॐ गायत्रीमन्त्रदैवताय नमः
९३६ ॐ स्मार्तवक्त्रे नमः
९३७ ॐ श्रोतवक्त्रे नमः
९३८ ॐ विप्रधर्मविशेषविदे नमः
९३९ ॐ जीविकावृत्तिनिर्णेत्रे नमः
९४० ॐ हेयोपादेयबोधकाय नमः
९४१ ॐ आशौचनिर्णयाय नमः
९४२ ॐ श्राद्धविधिवक्त्रे नमः
९४३ ॐ विधिप्रियाय नमः
९४४ ॐ कलिहेयार्थनिर्णेत्रे नमः
९४५ ॐ राजधर्मनिरुपकाय नमः
९४६ ॐ पतिव्रताधर्मवक्त्रे नमः
९४७ ॐ विधवाधर्मरक्षकाय नमः
९४८ ॐ नानाव्रतसमाराध्याय नमः
९४९ ॐ पूजाविध्युपदेशकाय नमः
९५० ॐ स्पर्शनिर्णयकृते नमः
९५१ ॐ वानप्रस्थधर्मप्रदर्शकाय नमः
९५२ ॐ सन्यासधर्मगदित्रे नमः
९५३ ॐ साङ्गनिष्कृतिबोधकाय नमः
९५४ ॐ जीर्णदुर्गस्थापितश्रीद्वारिकेशादये नमः
९५५ ॐ आत्मदाय नमः
९५६ ॐ ब्रह्मचारिधर्मवक्त्रे नमः
९५७ ॐ बृहद्धर्ममहादराय नमः
९५८ ॐ दुर्गालयस्थापितश्रीगोपीनाथाय नमः
९५९ ॐ अखिलार्थदाय नमः

९६० ॐ सहाङ्ग्योगोपदेष्ट्रे नमः
९६१ ॐ पिण्डब्रह्माण्डनिर्णयाय नमः
९६२ ॐ भूतस्वरुपनिर्णेत्रे नमः
९६३ ॐ वायुमेदनिरुपकाय नमः
९६४ ॐ कालज्ञानवदाय नमः
९६५ ॐ योगसिद्धिहेतुप्रदर्शकाय नमः
९६६ ॐ शतानन्दस्तुताय नमः
९६७ ॐ स्तुत्याय नमः
९६८ ॐ भक्तवाञ्छितपूरकाय नमः
९६९ ॐ शिक्षापत्रीग्रथनकाय नमः
९७० ॐ शिक्षापत्रीविधिप्रवाचे नमः
९७१ ॐ शिक्षापत्र्यर्थसन्तुष्टाय नमः
९७२ ॐ लीलासंदर्भकारकाय नमः
९७३ ॐ निर्वासनाय नमः
९७४ ॐ तिरोधानलीलासंमोहितासुराय नमः
९७५ ॐ वैमानिकावृत्ताय नमः
९७६ ॐ हृष्टदेववृन्दसमर्चिताय नमः
९७७ ॐ स्वार्चाप्रादुष्कृतैश्वर्याय नमः
९७८ ॐ दत्तप्रत्यक्षदर्शनाय नमः
९७९ ॐ भक्तेक्षाहसिताय नमः
९८० ॐ पुष्पाद्युपाहर्न्त्रे नमः
९८१ ॐ अन्नभोजनाय नमः
९८२ ॐ क्षीरपाय नमः
९८३ ॐ नीरपाय नमः
९८४ ॐ स्वोपयाचकेष्टाशुसि द्धिदाय नमः
९८५ ॐ पुत्रदाय नमः
९८६ ॐ वित्तदाय नमः
९८७ ॐ विद्याप्रदाय नमः
९८८ ॐ वैरिभयापहाय नमः
९८९ ॐ अपमृत्युहराय नमः

९९० ॐ भुक्तिप्रदाय नमः
९९१ ॐ मुक्तिप्रदाय नमः
९९२ ॐ आश्रयाय नमः
९९३ ॐ ऐश्वर्यदाय नमः
९९४ ॐ रोगहराय नमः
९९५ ॐ ज्ञानकृते नमः
९९६ ॐ भक्तिदाय नमः
९९७ ॐ अधिपाय नमः
९९८ ॐ समाधिदाय नमः
९९९ ॐ तमोहंत्रे नमः
१००० ॐ सर्वमङ्गलमङ्गलाय नमः

*॥ इति सर्वमङ्गलोक्तश्रीहरिसहस्त्रनामावलिः समाप्ता ॥*

●

## श्रीविष्णुसहस्त्रनामावलिः

१ ॐ विश्वस्मै नमः
२ ॐ विष्णवे नमः
३ ॐ वषट्काराय नमः
४ ॐ भूतभव्यभवत्प्रभवे नमः
५ ॐ भूतकृते नमः
६ ॐ भूतभृते नमः
७ ॐ भावाय नमः
८ ॐ भूतात्मने नमः
९ ॐ भूतभावनाय नमः
१० ॐ पूतात्मने नमः
११ ॐ परमात्मने नमः
१२ ॐ मुक्तानां परमगतये नमः ।
१३ ॐ अव्ययाय नमः
१४ ॐ पुरुषाय नमः

| | | | |
|---|---|---|---|
| १५ | ॐ साक्षिणे नमः | ३० | ॐ निधयेऽव्ययाय नमः |
| १६ | ॐ क्षेत्रज्ञाय नमः | ३१ | ॐ सम्भवाय नमः |
| १७ | ॐ अक्षराय नमः | ३२ | ॐ भावनाय नमः |
| १८ | ॐ योगाय नमः | ३३ | ॐ भर्त्रे नमः |
| १९ | ॐ योगविदां नेत्रे नमः | ३४ | ॐ प्रभवाय नमः |
| २० | ॐ प्रधानपुरुषेश्वराय नमः | ३५ | ॐ प्रभवे नमः |
| २१ | ॐ नारसिंहवपुषे नमः | ३६ | ॐ ईश्वराय नमः |
| २२ | ॐ श्रीमते नमः | ३७ | ॐ स्वयम्भुवे नमः |
| २३ | ॐ केशवाय नमः | ३८ | ॐ शम्भवे नमः |
| २४ | ॐ पुरुषोत्तमाय नमः | ३९ | ॐ आदित्याय नमः |
| २५ | ॐ सर्वस्मै नमः | ४० | ॐ पुष्कराक्षाय नमः |
| २६ | ॐ शर्वाय नमः | ४१ | ॐ महास्वनाय नमः |
| २७ | ॐ शिवाय नमः | ४२ | ॐ अनादिनिधनाय नमः |
| २८ | ॐ स्थाणवे नमः | ४३ | ॐ धात्रे नमः |
| २९ | ॐ भूतादये नमः | ४४ | ॐ विधात्रे नमः |

४५ ॐ धातुरुत्तमाय नमः
४६ ॐ अप्रमेयाय नमः
४७ ॐ हृषीकेशाय नमः
४८ ॐ पद्मनाभाय नमः
४९ ॐ अमरप्रभवे नमः
५० ॐ विश्वकर्मणे नमः
५१ ॐ मनवे नमः
५२ ॐ त्वष्ट्रे नमः
५३ ॐ स्थविष्ठाय नमः
५४ ॐ स्थविराय ध्रुवाय नमः
५५ ॐ अग्राह्याय नमः
५६ ॐ शाश्वताय नमः
५७ ॐ कृष्णाय नमः
५८ ॐ लोहिताक्षाय नमः
५९ ॐ प्रतर्दनाय नमः
६० ॐ प्रभूताय नमः
६१ ॐ त्रिककुब्धाम्ने नमः
६२ ॐ पवित्राय नमः
६३ ॐ मंगलायपरस्मै नमः
६४ ॐ ईशानाय नमः
६५ ॐ प्राणदाय नमः
६६ ॐ प्राणाय नमः
६७ ॐ ज्येष्ठाय नमः
६८ ॐ श्रेष्ठाय नमः
६९ ॐ प्रजापतये नमः
७० ॐ हिरण्यगर्भाय नमः
७१ ॐ भूगर्भाय नमः
७२ ॐ माधवाय नमः
७३ ॐ मधुसूदनाय नमः
७४ ॐ ईश्वराय नमः

७५ ॐ विक्रमिणे नमः
७६ ॐ धन्विने नमः
७७ ॐ मेधाविने नमः
७८ ॐ विक्रमाय नमः
७९ ॐ क्रमाय नमः
८० ॐ अनुत्तमाय नमः
८१ ॐ दुराधर्षाय नमः
८२ ॐ कृतज्ञाय नमः
८३ ॐ कृतये नमः
८४ ॐ आत्मवते नमः
८५ ॐ सुरेशाय नमः
८६ ॐ शरणाय नमः
८७ ॐ शर्मणे नमः
८८ ॐ विश्वरेतसे नमः
८९ ॐ प्रजाभवाय नमः
९० ॐ अह्ने नमः
९१ ॐ संवत्सराय नमः
९२ ॐ व्यालाय नमः
९३ ॐ प्रत्ययाय नमः
९४ ॐ सर्वदर्शनाय नमः
९५ ॐ अजाय नमः
९६ ॐ सर्वेश्वराय नमः
९७ ॐ सिद्धाय नमः
९८ ॐ सिद्धये नमः
९९ ॐ सर्वादये नमः
१०० ॐ अच्युताय नमः
१०१ ॐ वृषाकपये नमः
१०२ ॐ अमेयात्मने नमः
१०३ ॐ सर्वयोगविनिः सृताय नमः
१०४ ॐ वसवे नमः

१०५ ॐ वसुमनसे नमः
१०६ ॐ सत्याय नमः
१०७ ॐ समात्मने नमः
१०८ ॐ असम्मिताय नमः
१०९ ॐ समाय नमः
११० ॐ अमोघाय नमः
१११ ॐ पुण्डरीकाक्षाय नमः
११२ ॐ वृषकर्मणे नमः
११३ ॐ वृषाकृते नमः
११४ ॐ रुद्राय नमः
११५ ॐ बहुशिरसे नमः
११६ ॐ बभ्रवे नमः
११७ ॐ विश्वयोनये नमः
११८ ॐ शुचिश्रवसे नमः
११९ ॐ अमृताय नमः
१२० ॐ शाश्वतस्थाणवे नमः
१२१ ॐ वरारोहाय नमः
१२२ ॐ महातपसे नमः
१२३ ॐ सर्वगाय नमः
१२४ ॐ सर्वविद्भानवे नमः
१२५ ॐ विष्वक्सेनाय नमः
१२६ ॐ जनार्दनाय नमः
१२७ ॐ वेदाय नमः
१२८ ॐ वेदविदे नमः
१२९ ॐ अव्यङ्गाय नमः
१३० ॐ वेदाङ्गाय नमः
१३१ ॐ वेदविदे नमः
१३२ ॐ कवये नमः
१३३ ॐ लोकाध्याक्षाय नमः
१३४ ॐ सुराध्यक्षाय नमः

१३५ ॐ धर्माध्यक्षाय नमः
१३६ ॐ कृताकृताय नमः
१३७ ॐ चतुरात्मने नमः
१३८ ॐ चतुर्व्यूहाय नमः
१३९ ॐ चतुर्दंष्ट्राय नमः
१४० ॐ चतुर्भुजाय नमः
१४१ ॐ भ्राजिष्णवे नमः
१४२ ॐ भोजनाय नमः
१४३ ॐ भोक्त्रे नमः
१४४ ॐ सहिष्णवे नमः
१४५ ॐ जगदादिजाय नमः
१४६ ॐ अनघाय नमः
१४७ ॐ विजयाय नमः
१४८ ॐ जेत्रे नमः
१४९ ॐ विश्वयोनये नमः
१५० ॐ पुनर्वसवे नमः
१५१ ॐ उपेन्द्राय नमः
१५२ ॐ वामनाय नमः
१५३ ॐ प्रांशवे नमः
१५४ ॐ अमोधाय नमः
१५५ ॐ शुचये नमः
१५६ ॐ ऊर्जिताय नमः
१५७ ॐ अतीन्द्राय नमः
१५८ ॐ संग्रहाय नमः
१५९ ॐ सर्गाय नमः
१६० ॐ धृतात्मने नमः
१६१ ॐ नियमाय नमः
१६२ ॐ यमाय नमः
१६३ ॐ वेद्याय नमः
१६४ ॐ वैद्याय नमः

१६५ ॐ सदायोगिने नमः
१६६ ॐ वीरघ्ने नमः
१६७ ॐ माधवाय नमः
१६८ ॐ मधवे नमः
१६९ ॐ अतीन्द्रियाय नमः
१७० ॐ महामायाय नमः
१७१ ॐ महोत्सहाय नमः
१७२ ॐ महाबलाय नमः
१७३ ॐ महाबुद्धये नमः
१७४ ॐ महावीर्याय नमः
१७५ ॐ महाशक्तये नमः
१७६ ॐ महाद्युतये नमः
१७७ ॐ अनिर्देश्यवपुषे नमः
१७८ ॐ श्रीमते नमः
१७९ ॐ अमेयात्मने नमः
१८० ॐ महाद्रिधृषे नमः
१८१ ॐ महेष्वासाय नमः
१८२ ॐ महीभर्त्रे नमः
१८३ ॐ श्रीनिवासाय नमः
१८४ ॐ सतां गतये नमः
१८५ ॐ अनिरुद्धाय नमः
१८६ ॐ सुरानन्दाय नमः
१८७ ॐ गोविन्दाय नमः
१८८ ॐ गोविदां पतये नमः
१८९ ॐ मरीचये नमः
१९० ॐ दमनाय नमः
१९१ ॐ हंसाय नमः
१९२ ॐ सुपर्णाय नमः
१९३ ॐ भुजगोत्तमाय नमः
१९४ ॐ हिरण्यनाभाय नमः

१९५ ॐ सुतपसे नमः
१९६ ॐ पद्मनाभाय नमः
१९७ ॐ प्रजापतये नमः
१९८ ॐ अमृत्यवे नमः
१९९ ॐ सर्वदृशे नमः
२०० ॐ सिंहाय नमः
२०१ ॐ संधात्रे नमः
२०२ ॐ संधिमते नमः
२०३ ॐ स्थिराय नमः
२०४ ॐ अजाय नमः
२०५ ॐ दुर्मर्षणाय नमः
२०६ ॐ शास्त्रे नमः
२०७ ॐ विश्रुतात्मने नमः
२०८ ॐ सुरारिघ्ने नमः
२०९ ॐ गुरवे नमः
२१० ॐ गुरुतमाय नमः
२११ ॐ धाम्ने नमः
२१२ ॐ सत्याय नमः
२१३ ॐ सत्यपराक्रमाय नमः
२१४ ॐ निमिषाय नमः
२१५ ॐ अनिमिषाय नमः
२१६ ॐ स्रग्विणे नमः
२१७ ॐ वाचस्पतये उदारधिये नमः
२१८ ॐ अग्रण्ये नमः
२१९ ॐ ग्रामण्ये नमः
२२० ॐ श्रीमते नमः
२२१ ॐ न्यायाय नमः
२२२ ॐ नेत्रे नमः
२२३ ॐ समीरणाय नमः
२२४ ॐ सहस्रमूर्ध्ने नमः

२२५ ॐ विश्वात्मने नमः
२२६ ॐ सहस्राक्षाय नमः
२२७ ॐ सहस्रपदे नमः
२२८ ॐ आवर्तनाय नमः
२२९ ॐ निवृत्तात्मने नमः
२३० ॐ संवृताय नमः
२३१ ॐ सम्प्रमर्दनाय नमः
२३२ ॐ अहःसंवर्तकाय नमः
२३३ ॐ वह्नये नमः
२३४ ॐ अनिलाय नमः
२३५ ॐ धरणीधराय नमः
२३६ ॐ सुप्रसादाय नमः
२३७ ॐ प्रसन्नात्मने नमः
२३८ ॐ विश्वधृषे नमः
२३९ ॐ विश्वभुजे नमः
२४० ॐ विभवे नमः
२४१ ॐ सत्कर्त्रे नमः
२४२ ॐ सत्कृताय नमः
२४३ ॐ साधवे नमः
२४४ ॐ जह्नवे नमः
२४५ ॐ नारायणाय नमः
२४६ ॐ नराय नमः
२४७ ॐ असंख्येयाय नमः
२४८ ॐ अप्रमेयात्मने नमः
२४९ ॐ विशिष्टाय नमः
२५० ॐ शिष्टकृते नमः
२५१ ॐ शुचये नमः
२५२ ॐ सिद्धार्थाय नमः
२५३ ॐ सिद्धसंकल्पाय नमः
२५४ ॐ सिद्धिदाय नमः

२५५ ॐ सिद्धिसाधनाय नमः
२५६ ॐ वृषाहिने नमः
२५७ ॐ वृषभाय नमः
२५८ ॐ विष्णवे नमः
२५९ ॐ वृषपर्वणे नमः
२६० ॐ वृषोदराय नमः
२६१ ॐ वर्धनाय नमः
२६२ ॐ वर्धमानाय नमः
२६३ ॐ विविक्ताय नमः
२६४ ॐ श्रुतिसागराय नमः
२६५ ॐ सुभुजाय नमः
२६६ ॐ दुर्धराय नमः
२६७ ॐ वाग्मिने नमः
२६८ ॐ महेन्द्राय नमः
२६९ ॐ वसुदाय नमः
२७० ॐ वसवे नमः
२७१ ॐ नैकरूपाय नमः
२७२ ॐ बृहद्रूपाय नमः
२७३ ॐ शिपिविष्टाय नमः
२७४ ॐ प्रकाशनाय नमः
२७५ ॐ ओजस्तेजोद्युतिधराय नमः
२७६ ॐ प्रकाशात्मने नमः
२७७ ॐ प्रतापनाय नमः
२७८ ॐ ऋद्धाय नमः
२७९ ॐ स्पष्टाक्षराय नमः
२८० ॐ मन्त्राय नमः
२८१ ॐ चन्द्रांशवे नमः
२८२ ॐ भास्करद्युतये नमः
२८३ ॐ अमृतांशूद्भवाय नमः
२८४ ॐ भानवे नमः

२८५ ॐ शशबिन्दवे नमः
२८६ ॐ सुरेश्वराय नमः
२८७ ॐ औषधाय नमः
२८८ ॐ जगतः सेतवे नमः
२८९ ॐ सत्यधर्मपराक्रमाय नमः
२९० ॐ भूतभव्यभवन्नाथाय नमः
२९१ ॐ पवनाय नमः
२९२ ॐ पावनाय नमः
२९३ ॐ अनलाय नमः
२९४ ॐ कामघ्ने नमः
२९५ ॐ कामकृते नमः
२९६ ॐ कान्ताय नमः
२९७ ॐ कामाय नमः
२९८ ॐ कामप्रदाय नमः
२९९ ॐ प्रभवे नमः
३०० ॐ युगादिकृते नमः
३०१ ॐ युगावर्ताय नमः
३०२ ॐ नैकमायाय नमः
३०३ ॐ महाशनाय नमः
३०४ ॐ अदृश्याय नमः
३०५ ॐ अव्यक्तरूपाय नमः
३०६ ॐ सहस्त्रजिते नमः
३०७ ॐ अनन्तजिते नमः
३०८ ॐ इष्टाय नमः
३०९ ॐ अविशिष्टाय नमः
३१० ॐ शिष्टेष्टाय नमः
३११ ॐ शिण्डिने नमः
३१२ ॐ नहुषाय नमः
३१३ ॐ वृषाय नमः
३१४ ॐ क्रोधघ्ने नमः

३१५ ॐ क्रोधकृत्कर्त्रे नमः
३१६ ॐ विश्वबाहवे नमः
३१७ ॐ महीधराय नमः
३१८ ॐ अच्युता नमः
३१९ ॐ प्रथिताय नमः
३२० ॐ प्राणाय नमः
३२१ ॐ प्राणदाय नमः
३२२ ॐ वासवानुजाय नमः
३२३ ॐ अपां निधये नमः
३२४ ॐ अधिष्ठानाय नमः
३२५ ॐ अप्रमत्ताय नमः
३२६ ॐ प्रतिष्ठिताय नमः
३२७ ॐ स्कन्दाय नमः
३२८ ॐ स्कन्दधराय नमः
३२९ ॐ धुर्याय नमः
३३० ॐ वरदाय नमः
३३१ ॐ वायुवाहनाय नमः
३३२ ॐ वासुदेवाय नमः
३३३ ॐ बृहद्भानवे नमः
३३४ ॐ आदिदेवाय नमः
३३५ ॐ पुरन्दराय नमः
३३६ ॐ अशोकाय नमः
३३७ ॐ तारणाय नमः
३३८ ॐ ताराय नमः
३३९ ॐ शूराय नमः
३४० ॐ शौरये नमः
३४१ ॐ जनेश्वराय नमः
३४२ ॐ अनुकूलाय नमः
३४३ ॐ शतावर्ताय नमः
३४४ ॐ पद्मिने नमः

३४५ ॐ पद्मनिभेक्षणाय नमः
३४६ ॐ पद्मनाभाय नमः
३४७ ॐ अरविन्दाक्षाय नमः
३४८ ॐ पद्मगर्भाय नमः
३४९ ॐ शरीरभृते नमः
३५० ॐ महर्द्धये नमः
३५१ ॐ ऋद्धाय नमः
३५२ ॐ वृद्धात्मने नमः
३५३ ॐ महाक्षाय नमः
३५४ ॐ गरुडध्वजाय नमः
३५५ ॐ अतुलाय नमः
३५६ ॐ शरभाय नमः
३५७ ॐ भीमाय नमः
३५८ ॐ समयज्ञाय नमः
३५९ ॐ हविर्हराय नमः
३६० ॐ सर्वलक्षणलक्षण्याय नमः
३६१ ॐ लक्ष्मीवते नमः
३६२ ॐ समितिञ्जयाय नमः
३६३ ॐ विक्षराय नमः
३६४ ॐ रोहिताय नमः
३६५ ॐ मार्गाय नमः
३६६ ॐ हेतवे नमः
३६७ ॐ दामोदराय नमः
३६८ ॐ सहाय नमः
३६९ ॐ महीधराय नमः
३७० ॐ महाभागाय नमः
३७१ ॐ वेगवते नमः
३७२ ॐ अमिताशनाय नमः
३७३ ॐ उद्भवाय नमः
३७४ ॐ क्षोभणाय नमः

३७५ ॐ देवाय नमः
३७६ ॐ श्रीगर्भाय नमः
३७७ ॐ परमेश्वराय नमः
३७८ ॐ करणाय नमः
३७९ ॐ कारणाय नमः
३८० ॐ कर्त्रे नमः
३८१ ॐ विकर्त्रे नमः
३८२ ॐ गहनाय नमः
३८३ ॐ गुहाय नमः
३८४ ॐ व्यवसायाय नमः
३८५ ॐ व्यवस्थानाय नमः
३८६ ॐ संस्थानाय नमः
३८७ ॐ स्थानदाय नमः
३८८ ॐ ध्रुवाय नमः
३८९ ॐ परर्द्धये नमः
३९० ॐ परमस्पष्टाय नमः
३९१ ॐ तुष्टाय नमः
३९२ ॐ पुष्टाय नमः
३९३ ॐ शुभेक्षणाय नमः
३९४ ॐ रामाय नमः
३९५ ॐ विरामाय नमः
३९६ ॐ विरजसे नमः
३९७ ॐ मार्गाय नमः
३९८ ॐ नेयाय नमः
३९९ ॐ नयाय नमः
४०० ॐ अनयाय नमः
४०१ ॐ वीराय नमः
४०२ ॐ शक्तिमतां श्रेष्ठाय नमः
४०३ ॐ धर्माय नमः
४०४ ॐ धर्मविदुत्तमाय नमः

४०५ ॐ वैकुण्ठाय नमः
४०६ ॐ पुरुषाय नमः
४०७ ॐ प्राणाय नमः
४०८ ॐ प्राणदाय नमः
४०९ ॐ प्रणवाय नमः
४१० ॐ पृथवे नमः
४११ ॐ हिरण्यगर्भाय नमः
४१२ ॐ शत्रुघ्नाय नमः
४१३ ॐ व्याप्ताय नमः
४१४ ॐ वायवे नमः
४१५ ॐ अधोक्षजाय नमः
४१६ ॐ सतवे नमः
४१७ ॐ सुदर्शनाय नमः
४१८ ॐ कालाय नमः
४१९ ॐ परमेष्ठिने नमः
४२० ॐ परिग्रहाय नमः
४२१ ॐ उग्राय नमः
४२२ ॐ संवत्सराय नमः
४२३ ॐ दक्षाय नमः
४२४ ॐ विश्रामाय नमः
४२५ ॐ विश्वदक्षिणाय नमः
४२६ ॐ विस्ताराय नमः
४२७ ॐ स्थावरस्थाणवे नमः
४२८ ॐ प्रमाणाय नमः
४२९ ॐ बीजायाव्ययाय नमः
४३० ॐ अर्थाय नमः
४३१ ॐ अनर्थाय नमः
४३२ ॐ महाकोशाय नमः
४३३ ॐ महाभोगाय नमः
४३४ ॐ महाधनाय नमः

४३५ ॐ अनिर्विण्णाय नमः
४३६ ॐ स्थविष्ठाय नमः
४३७ ॐ अभुवे नमः
४३८ ॐ धर्मयूपाय नमः
४३९ ॐ महामखाय नमः
४४० ॐ नक्षत्रनेमये नमः
४४१ ॐ नक्षत्रिणे नमः
४४२ ॐ क्षमाय नमः
४४३ ॐ क्षामाय नमः
४४४ ॐ समीहनाय नमः
४४५ ॐ यज्ञाय नमः
४४६ ॐ इज्याय नमः
४४७ ॐ महेज्याय नमः
४४८ ॐ क्रतवे नमः
४४९ ॐ सत्राय नमः
४५० ॐ सतां गतये नमः
४५१ ॐ सर्वदर्शिने नमः
४५२ ॐ विमुक्तात्मने नमः
४५३ ॐ सर्वज्ञाय नमः
४५४ ॐ ज्ञानामुत्तमाय नमः
४५५ ॐ सुव्रताय नमः
४५६ ॐ सुमुखाय नमः
४५७ ॐ सूक्ष्माय नमः
४५८ ॐ सुघोषाय नमः
४५९ ॐ सुदाय नमः
४६० ॐ सुहृदे नमः
४६१ ॐ मनोहराय नमः
४६२ ॐ जितक्रोधाय नमः
४६३ ॐ वीरबाहवे नमः
४६४ ॐ विदाहरणाय नमः

४६५ ॐ स्वपनाय नमः
४६६ ॐ स्ववशाय नमः
४६७ ॐ व्यापिने नमः
४६८ ॐ नैकात्मने नमः
४६९ ॐ नैककर्मकृते नमः
४७० ॐ वत्सराय नमः
४७१ ॐ वत्सलाय नमः
४७२ ॐ वत्सिने नमः
४७३ ॐ रत्नगर्भाय नमः
४७४ ॐ धनेश्वराय नमः
४७५ ॐ धर्मगुपे नमः
४७६ ॐ धर्मकृते नमः
४७७ ॐ धर्मिणे नमः
४७८ ॐ सते नमः
४७९ ॐ असते नमः
४८० ॐ क्षराय नमः
४८१ ॐ अक्षराय नमः
४८२ ॐ अविज्ञात्रे नमः
४८३ ॐ सहस्त्रांशवे नमः
४८४ ॐ विधात्रे नमः
४८५ ॐ कृतलक्षणाय नमः
४८६ ॐ गभिस्तिनेमये नमः
४८७ ॐ सत्त्वस्थाय नमः
४८८ ॐ सिंहाय नमः
४८९ ॐ भूतमहेश्वराय नमः
४९० ॐ आदिदेवाय नमः
४९१ ॐ महादेवाय नमः
४९२ ॐ देवेशाय नमः
४९३ ॐ देवभृद्गुरवे नमः
४९४ ॐ उत्तराय नमः

४९५ ॐ गोपतये नमः
४९६ ॐ गौप्त्रे नमः
४९७ ॐ ज्ञानगम्याय नमः
४९८ ॐ पुरातनाय नमः
४९९ ॐ शरीरभूतभृते नमः
५०० ॐ भक्त्रे नमः
५०१ ॐ कपीन्द्राय नमः
५०२ ॐ भूरिदक्षणिया नमः
५०३ ॐ सोमपाय नमः
५०४ ॐ अमृतपाय नमः
५०५ ॐ सोमाय नमः
५०६ ॐ पुरुजिते नमः
५०७ ॐ पुरुसत्तमाय नमः
५०८ ॐ विनयाय नमः
५०९ ॐ जयाय नमः
५१० ॐ सत्यसंधाय नमः
५११ ॐ दाशार्हाय नमः
५१२ ॐ सात्वतां पत्ये नमः
५१३ ॐ जीवाय नमः
५१४ ॐ विनयितासाक्षिणे नमः
५१५ ॐ मुकुन्दाय नमः
५१६ ॐ अमितविक्रमाय नमः
५१७ ॐ अम्भोनिधये नमः
५१८ ॐ अनन्तात्मने नमः
५१९ ॐ महोदधिशयाय नमः
५२० ॐ अन्तकाय नमः
५२१ ॐ अजाय नमः
५२२ ॐ महार्हाय नमः
५२३ ॐ स्वाभाव्याय नमः
५२४ ॐ जितामित्राय नमः

५२५ ॐ प्रमोदनाय नमः
५२६ ॐ आनन्दाय नमः
५२७ ॐ नन्दनाय नमः
५२८ ॐ नन्दाय नमः
५२९ ॐ सत्यधर्माय नमः
५३० ॐ त्रिविक्रमाय नमः
५३१ ॐ महर्षये कपिलाचार्याय नमः
५३२ ॐ कृतज्ञाय नमः
५३३ ॐ मेदिनीपतये नमः
५३४ ॐ त्रिपदाय नमः
५३५ ॐ त्रिदशाध्यक्षाय नमः
५३६ ॐ महाशृङ्गाय नमः
५३७ ॐ कृतान्तकृते नमः
५३८ ॐ महावराहाय नमः
५३९ ॐ गोविन्दाय नमः
५४० ॐ सुषेणाय नमः
५४१ ॐ कनकाङ्गदिने नमः
५४२ ॐ गुह्याय नमः
५४३ ॐ गभीराय नमः
५४४ ॐ गहनाय नमः
५४५ ॐ गुप्ताय नमः
५४६ ॐ चक्रगदाधराय नमः
५४७ ॐ वेधसे नमः
५४८ ॐ स्वाङ्गाय नमः
५४९ ॐ अजिताय नमः
५५० ॐ कृष्णाय नमः
५५१ ॐ दृढाय नमः
५५२ ॐ सङ्कर्षणायाच्युताय नमः
५५३ ॐ वरुणाय नमः
५५४ ॐ वारुणाय नमः

५५५ ॐ वृक्षाय नमः
५५६ ॐ पुष्कराक्षाय नमः
५५७ ॐ महामनसे नमः
५५८ ॐ भगवते नमः
५५९ ॐ भगघ्ने नमः
५६० ॐ आनन्दिने नमः
५६१ ॐ वनमालिने नमः
५६२ ॐ हलायुधाय नमः
५६३ ॐ आदित्याय नमः
५६४ ॐ ज्योतिरादित्याय नमः
५६५ ॐ सहिष्णवे नमः
५६६ ॐ गतिसत्तमाय नमः
५६७ ॐ सुधन्वने नमः
५६८ ॐ खण्डपरशवे नमः
५६९ ॐ दारुणाय नमः
५७० ॐ द्रविणप्रदाय नमः
५७१ ॐ दिविस्पृशे नमः
५७२ ॐ सर्वदृग्व्यासाय नमः
५७३ ॐ वाचस्पतये अयोनिजाय नमः
५७४ ॐ त्रिसाम्ने नमः
५७५ ॐ सामगाय नमः
५७६ ॐ साम्ने नमः
५७७ ॐ निर्वाणाय नमः
५७८ ॐ भेषजाय नमः
५७९ ॐ भिषजे नमः
५८० ॐ संन्यासकृते नमः
५८१ ॐ शमाय नमः
५८२ ॐ शान्ताय नमः
५८३ ॐ निष्ठायै नमः
५८४ ॐ शान्त्यै नमः

५८५ ॐ परायणाय नमः
५८६ ॐ शुभाङ्गाय नमः
५८७ ॐ शान्तिदाय नमः
५८८ ॐ स्त्रष्ट्रे नमः
५८९ ॐ कुमुदाय नमः
५९० ॐ कुवलेशाय नमः
५९१ ॐ गोहिताय नमः
५९२ ॐ गोपतये नमः
५९३ ॐ गोप्त्रे नमः
५९४ ॐ वृषभाक्षाय नमः
५९५ ॐ वृषप्रियाय नमः
५९६ ॐ अनिवर्तिने नमः
५९७ ॐ निवृत्तात्मने नमः
५९८ ॐ संक्षेप्त्रे नमः
५९९ ॐ क्षेमकृते नमः
६०० ॐ शिवाय नमः
६०१ ॐ श्रीवत्सवक्षसे नमः
६०२ ॐ श्रीवासाय नमः
६०३ ॐ श्रीपतये नमः
६०४ ॐ श्रीमतां वराय नमः
६०५ ॐ श्रीदाय नमः
६०६ ॐ श्रीशाय नमः
६०७ ॐ श्रीनिवासाय नमः
६०८ ॐ श्रीनिधये नमः
६०९ ॐ श्रिविभावनाय नमः
६१० ॐ श्रीदराय नमः
६११ ॐ श्रीकराय नमः
६१२ ॐ श्रेयसे नमः
६१३ ॐ श्रीमते नमः
६१४ ॐ लोकत्रयाश्रयाय नमः

६१५ ॐ स्वक्षाय नमः
६१६ ॐ स्वङ्गाय नमः
६१७ ॐ शतानन्दाय नमः
६१८ ॐ नन्दिने नमः
६१९ ॐ ज्योतिर्गणेश्वराय नमः
६२० ॐ विजितात्मने नमः
६२१ ॐ अविधेयात्मने नमः
६२२ ॐ सत्कीर्तये नमः
६२३ ॐ छिन्नसंशयाय नमः
६२४ ॐ उदीर्णाय नमः
६२५ ॐ सर्वतश्चक्षुषे नमः
६२६ ॐ अनीशाय नमः
६२७ ॐ शाश्वतस्थिराय नमः
६२८ ॐ भूशयाय नमः
६२९ ॐ भूषणाय नमः
६३० ॐ भूतये नमः
६३१ ॐ विशोकाय नमः
६३२ ॐ शोकनाशनाय नमः
६३३ ॐ अर्चिष्मते नमः
६३४ ॐ अर्चिताय नमः
६३५ ॐ कुम्भाय नमः
६३६ ॐ विशुद्धात्मने नमः
६३७ ॐ विशोधनाय नमः
६३८ ॐ अनिरुद्धाय नमः
६३९ ॐ अप्रतिरथाय नमः
६४० ॐ प्रद्युम्नाय नमः
६४१ ॐ अमितविक्रमाय नमः
६४२ ॐ कालनेमिनिघ्ने नमः
६४३ ॐ वीराय नमः
६४४ ॐ शौरये नमः

६४५ ॐ शूरजनेश्वराय नमः
६४६ ॐ त्रिलोकात्मने नमः
६४७ ॐ त्रिलोकेशाय नमः
६४८ ॐ केशवाय नमः
६४९ ॐ केशिघ्ने नमः
६५० ॐ हरये नमः
६५१ ॐ कामदेवाय नमः
६५२ ॐ कामपालाय नमः
६५३ ॐ कामिने नमः
६५४ ॐ कान्ताय नमः
६५५ ॐ कृतागमाय नमः
६५६ ॐ अनिर्देश्यवपुषे नमः
६५७ ॐ विष्णवे नमः
६५८ ॐ वीराय नमः
६५९ ॐ अनन्ताय नमः
६६० ॐ धनञ्जयाय नमः
६६१ ॐ ब्रह्मण्याय नमः
६६२ ॐ ब्रह्मकृते नमः
६६३ ॐ ब्रह्मणे नमः
६६४ ॐ ब्राह्मणे नमः
६६५ ॐ ब्रह्मविवर्धनाय नमः
६६६ ॐ ब्रह्मविदे नमः
६६७ ॐ ब्राह्मणाय नमः
६६८ ॐ ब्रह्मिणे नमः
६६९ ॐ ब्रह्मज्ञाय नमः
६७० ॐ ब्राह्मणिप्रियाय नमः
६७१ ॐ महाक्रमाय नमः
६७२ ॐ महाकर्मणे नमः
६७३ ॐ महातेजसे नमः
६७४ ॐ महोरगाय नमः

६७५ ॐ महाक्रतवे नमः
६७६ ॐ महायज्वने नमः
६७७ ॐ महायज्ञाय नमः
६७८ ॐ महाहविषे नमः
६७९ ॐ स्तव्याय नमः
६८० ॐ स्तवप्रियाय नमः
६८१ ॐ स्तोत्राय नमः
६८२ ॐ स्तुतये नमः
६८३ ॐ स्तोत्रे नमः
६८४ ॐ रणप्रियाय नमः
६८५ ॐ पूर्णाय नमः
६८६ ॐ पूरयित्रे नमः
६८७ ॐ पुण्याय नमः
६८८ ॐ पुण्यकीर्तये नमः
६८९ ॐ अनामयाय नमः
६९० ॐ मनोजवाय नमः
६९१ ॐ तीर्थकराय नमः
६९२ ॐ वसुरेतसे नमः
६९३ ॐ वसुप्रदाय नमः
६९४ ॐ वासुदेवाय नमः
६९५ ॐ वासवे नमः
६९६ ॐ वसुमनसे नमः
६९७ ॐ हविषे नमः
६९८ ॐ हावषे नमः
६९९ ॐ सद्गतये नमः
७०० ॐ सत्कृतये नमः
७०१ ॐ सत्तायै नमः
७०२ ॐ सद्भूतये नमः
७०३ ॐ सत्परायणाय नमः
७०४ ॐ शूरसेनाय नमः

७०५ ॐ यदुश्रेष्ठाय नमः
७०६ ॐ सन्निवासाय नमः
७०७ ॐ सुयामुनाय नमः
७०८ ॐ भूतावासाय नमः
७०९ ॐ वासुदेवाय नमः
७१० ॐ सर्वासुनिलयाय नमः
७११ ॐ अनलाय नमः
७१२ ॐ दर्पघ्ने नमः
७१३ ॐ दर्पदाय नमः
७१४ ॐ दृप्ताय नमः
७१५ ॐ दुर्धराय नमः
७१६ ॐ अपराजिताय नमः
७१७ ॐ विश्वमूर्तये नमः
७१८ ॐ महामूर्तये नमः
७१९ ॐ दीप्तमूर्तये नमः
७२० ॐ अमूर्तिमते नमः
७२१ ॐ अनेकमूर्तये नमः
७२२ ॐ अव्यक्ताय नमः
७२३ ॐ शतमूर्तये नमः
७२४ ॐ शताननाय नमः
७२५ ॐ एकस्मै नमः
७२६ ॐ नैकस्मै नमः
७२७ ॐ सवाय नमः
७२८ ॐ काय नमः
७२९ ॐ कस्मै नमः
७३० ॐ यस्मै नमः
७३१ ॐ तस्मै नमः
७३२ ॐ पदमानुत्तमाय नमः
७३३ ॐ लोकबन्धवे नमः
७३४ ॐ लोकनाथाय नमः

७३५ ॐ माधवाय नमः
७३६ ॐ भक्तवत्सलाय नमः
७३७ ॐ सुवर्णवर्णाय नमः
७३८ ॐ हेमाङ्गाय नमः
७३९ ॐ वराङ्गाय नमः
७४० ॐ चन्दनाङ्गदिने नमः
७४१ ॐ वीरघ्ने नमः
७४२ ॐ विषमाय नमः
७४३ ॐ शून्याय नमः
७४४ ॐ घृताशिषे नमः
७४५ ॐ अचलाय नमः
७४६ ॐ चलाय नमः
७४७ ॐ अमानिने नमः
७४८ ॐ मानदाय नमः
७४९ ॐ मान्याय नमः
७५० ॐ लोकस्वामिने नमः
७५१ ॐ त्रिलोकधृषे नमः
७५२ ॐ सुमेधसे नमः
७५३ ॐ मेधजाय नमः
७५४ ॐ धन्याय नमः
७५५ ॐ सत्यमेधसे नमः
७५६ ॐ धराधराय नमः
७५७ ॐ तेजोवृषाय नमः
७५८ ॐ द्युतिधराय नमः
७५९ ॐ सर्वशस्त्रभृतां वराय नमः
७६० ॐ प्रग्रहाय नमः
७६१ ॐ निग्रहाय नमः
७६२ ॐ व्यग्राय नमः
७६३ ॐ नैकश्रृङ्गाय नमः
७६४ ॐ गदाग्रजाय नमः

७६५ ॐ चतुर्मूर्तये नमः
७६६ ॐ चतुर्बाहवे नमः
७६७ ॐ चतुर्व्यूहाय नमः
७६८ ॐ चतुर्गतये नमः
७६९ ॐ चतुरात्मने नमः
७७० ॐ चतुर्भावाय नमः
७७१ ॐ चतुर्वेदविदे नमः
७७२ ॐ एकपदे नमः
७७३ ॐ समावर्ताय नमः
७७४ ॐ अनिवृत्तात्मने नमः
७७५ ॐ दुर्जयाय नमः
७७६ ॐ दुरतिक्रमाय नमः
७७७ ॐ दुर्लभाय नमः
७७८ ॐ दुर्गमाय नमः
७७९ ॐ दुर्गाय नमः
७८० ॐ दुरावासाय नमः
७८१ ॐ दुरारिघ्ने नमः
७८२ ॐ शुभाङ्गाय नमः
७८३ ॐ लोकसारङ्गाय नमः
७८४ ॐ सुतन्तवे नमः
७८५ ॐ तन्तुवर्धनाय नमः
७८६ ॐ इन्द्रकर्मणे नमः
७८७ ॐ महाकर्मणे नमः
७८८ ॐ कृतकर्मणे नमः
७८९ ॐ कृतागमाय नमः
७९० ॐ उद्भवाय नमः
७९१ ॐ सुन्दराय नमः
७९२ ॐ सुन्दाय नमः
७९३ ॐ रत्ननाभाय नमः
७९४ ॐ सुलोचनाय नमः

७९५ ॐ अर्काय नमः
७९६ ॐ वाजसनाय नमः
७९७ ॐ श्रृंगिने नमः
७९८ ॐ जयन्ताय नमः
७९९ ॐ सर्वविज्जयिने नमः
८०० ॐ उद्भवाय नमः
८००-१ ॐ सुवर्णबिन्दवे नमः
८००-२ ॐ अक्षोभ्याय नमः
८०१ ॐ अधोक्षजाय नमः
८०२ ॐ सर्ववागीश्वरेश्वराय नमः
८०३ ॐ महाह्रदाय नमः
८०४ ॐ महागर्ताय नमः
८०५ ॐ महाभूताय नमः
८०६ ॐ महानिधये नमः
८०७ ॐ कुमुदाय नमः
८०८ ॐ कुन्दराय नमः
८०९ ॐ कुन्दाय नमः
८१० ॐ पर्जन्याय नमः
८११ ॐ पावनाय नमः
८१२ ॐ अनिलाय नमः
८१३ ॐ अमृताशाय नमः
८१४ ॐ अमृतवपुषे नमः
८१५ ॐ सर्वज्ञाय नमः
८१६ ॐ सर्वतोमुखाय नमः
८१७ ॐ सुलभाय नमः
८१८ ॐ सुव्रताय नमः
८१९ ॐ सिद्धाय नमः
८२० ॐ शुत्रजिते नमः
८२१ ॐ शत्रुतापनाय नमः
८२२ ॐ न्यग्रोधाय नमः

८२३ ॐ उदुम्बराय नमः
८२४ ॐ अश्वत्थाय नमः
८२५ ॐ चाणूरान्ध्रनिषूदनाय नमः
८२६ ॐ सहस्त्रार्चिषे नमः
८२७ ॐ सप्तजिह्वाय नमः
८२८ ॐ सप्तैधसे नमः
८२९ ॐ सप्तवाहनाय नमः
८३० ॐ अमूर्तये नमः
८३१ ॐ अनघाय नमः
८३२ ॐ अचिन्त्याय नमः
८३३ ॐ भयकृते नमः
८३४ ॐ भयनाशनाय नमः
८३५ ॐ अणवे नमः
८३६ ॐ बृहते नमः
८३७ ॐ कृशाय नमः
८३८ ॐ स्थूलाय नमः
८३९ ॐ गुणभृते नमः
८४० ॐ निर्गुणाय नमः
८४१ ॐ महते नमः
८४२ ॐ अधृताय नमः
८४३ ॐ स्वधृताय नमः
८४४ ॐ स्वास्याय नमः
८४५ ॐ प्राग्वंशाय नमः
८४६ ॐ वंशवर्धनाय नमः
८४७ ॐ भारभृते नमः
८४८ ॐ कथिताय नमः
८४९ ॐ योगिने नमः
८५० ॐ योगीशाय नमः
८५१ ॐ सर्वाकामदाय नमः
८५२ ॐ आश्रमाय नमः

८५३ ॐ श्रमणाय नमः
८५४ ॐ क्षामाय नमः
८५५ ॐ सुपर्णाय नमः
८५६ ॐ वायुवाहनाय नमः
८५७ ॐ धनुर्धराय नमः
८५८ ॐ धनुर्वेदाय नमः
८५९ ॐ दण्डाय नमः
८६० ॐ दमयित्रे नमः
८६१ ॐ दमाय नमः
८६२ ॐ अपराजिताय नमः
८६३ ॐ सर्वसहाय नमः
८६४ ॐ नियन्त्रे नमः
८६५ ॐ नियमाय नमः
८६६ ॐ यमाय नमः
८६७ ॐ सत्त्ववते नमः
८६८ ॐ सात्त्विकाय नमः
८६९ ॐ सत्याय नमः
८७० ॐ सत्यधर्मपरायणाय नमः
८७१ ॐ अभिप्रायाय नमः
८७२ ॐ प्रियार्हाय नमः
८७३ ॐ अर्हाय नमः
८७४ ॐ प्रियकृते नमः
८७५ ॐ प्रीतिवर्धनाय नमः
८७६ ॐ विहासगतये नमः
८७७ ॐ ज्योतिषे नमः
८७८ ॐ सुरुचये नमः
८७९ ॐ हुतभूजे नमः
८८० ॐ विभवे नमः
८८१ ॐ रवये नमः
८८२ ॐ विरोचनाय नमः

| | | | |
|---|---|---|---|
| ८८३ | ॐ सूर्याय नमः | ८९८ | ॐ कपिलाय नमः |
| ८८४ | ॐ सवित्रे नमः | ८९९ | ॐ कपये नमः |
| ८८५ | ॐ रविलोचनाय नमः | ९०० | ॐ अव्ययाय नमः |
| ८८६ | ॐ अनन्ताय नमः | ९०१ | ॐ स्वस्तिदाय नमः |
| ८८७ | ॐ हुतभुजे नमः | ९०२ | ॐ स्वस्तिकृते नमः |
| ८८८ | ॐ भोक्त्रे नमः | ९०३ | ॐ स्वस्तये नमः |
| ८८९ | ॐ सुखदाय नमः | ९०४ | ॐ स्वस्तिभुजे नमः |
| ८९० | ॐ नैकजाय नमः | ९०५ | ॐ स्वस्तिदक्षिणाय नमः |
| ८९१ | ॐ अग्रजाय नमः | ९०६ | ॐ अरौद्राय नमः |
| ८९२ | ॐ अनिर्विण्णाय नमः | ९०७ | ॐ कुण्डलिने नमः |
| ८९३ | ॐ सदामर्षिणे नमः | ९०८ | ॐ चक्रिणे नमः |
| ८९४ | ॐ लोकाधिष्ठानाय नमः | ९०९ | ॐ विक्रमिणे नमः |
| ८९५ | ॐ अद्भुताय नमः | ९१० | ॐ ऊर्जितशासनाय नमः |
| ८९६ | ॐ सनाते नमः | ९११ | ॐ शब्दतिगाय नमः |
| ८९७ | ॐ सनातनतमाय नमः | ९१२ | ॐ शब्दसहाय नमः |

९१३ ॐ शिशिराय नमः
९१४ ॐ शर्वरीकराय नमः
९१५ ॐ अक्रूराय नमः
९१६ ॐ पेशलाय नमः
९१७ ॐ दक्षाय नमः
९१८ ॐ दक्षिणाय नमः
९१९ ॐ क्षमिणां वराय नमः
९२० ॐ विद्वत्तमाय नमः
९२१ ॐ वीतभयाय नमः
९२२ ॐ पुण्यश्रवणकीर्तनाय नमः
९२३ ॐ उत्तारणाय नमः
९२४ ॐ दुष्कृतिघ्ने नमः
९२५ ॐ पुण्याय नमः
९२६ ॐ दुःस्वप्ननाशनाय नमः
९२७ ॐ वीरघ्ने नमः
९२८ ॐ रक्षणाय नमः
९२९ ॐ सद्भ्यो नमः
९३० ॐ जीवा नमः
९३१ ॐ पर्यवस्थिताय नमः
९३२ ॐ अनन्तरूपाय नमः
९३३ ॐ अनन्तश्रिये नमः
९३४ ॐ जितमन्यवे नमः
९३५ ॐ भयापहाय नमः
९३६ ॐ चतुरस्त्राय नमः
९३७ ॐ गभीरात्मने नमः
९३८ ॐ विदिशाय नमः
९३९ ॐ व्यादिशाय नमः
९४० ॐ दिशाय नमः
९४१ ॐ अनादये नमः
९४२ ॐ भूर्भुवे नमः

९४३ ॐ लक्ष्म्यै नमः
९४४ ॐ सुवीराय नमः
९४५ ॐ रुचिराङ्गदाय नमः
९४६ ॐ जननाय नमः
९४७ ॐ जनजन्मादये नमः
९४८ ॐ भीमाय नमः
९४९ ॐ भीमपराक्रमाय नमः
९५० ॐ आधारनिलयाय नमः
९५१ ॐ धात्रे नमः
९५२ ॐ पुष्पहासाय नमः
९५३ ॐ प्रजागराय नमः
९५४ ॐ ऊर्ध्वगाय नमः
९५५ ॐ सत्पथाचाराय नमः
९५६ ॐ प्राणदाय नमः
९५७ ॐ प्रणवाय नमः
९५८ ॐ पणाय नमः
९५९ ॐ प्रमाणाय नमः
९६० ॐ प्राणनिलयाय नमः
९६१ ॐ प्राणभृते नमः
९६२ ॐ प्राणजीवनाय नमः
९६३ ॐ तत्त्वाय नमः
९६४ ॐ तत्त्वविदे नमः
९६५ ॐ एकात्मने नमः
९६६ ॐ जन्ममृत्युजरातिगाय नमः
९६७ ॐ भूर्भवःस्वस्तरवे नमः
९६८ ॐ ताराय नमः
९६९ ॐ सवित्रे नमः
९७० ॐ प्रपितामहाय नमः
९७१ ॐ यज्ञाय नमः
९७२ ॐ यज्ञपतये नमः

९७३ ॐ यज्वने नमः
९७४ ॐ यज्ञाङ्गाय नमः
९७५ ॐ यज्ञवाहनाय नमः
९७६ ॐ यज्ञभृते नमः
९७७ ॐ यज्ञकृते नमः
९७८ ॐ यज्ञिने नमः
९७९ ॐ यज्ञभुजे नमः
९८० ॐ यज्ञसाधनाय नमः
९८१ ॐ यज्ञान्तकृते नमः
९८२ ॐ यज्ञगुह्याय नमः
९८३ ॐ अन्नाय नमः
९८४ ॐ अन्नादाय नमः
९८५ ॐ आत्मयोनवे नमः
९८६ ॐ स्वयंजाताय नमः
९८७ ॐ वैखानसाय नमः
९८८ ॐ सामगायनाय नमः
९८९ ॐ देवकीनन्दनाय नमः
९९० ॐ स्त्रष्ट्रे नमः
९९१ ॐ क्षितीशाय नमः
९९२ ॐ पापनाशनाय नमः
९९३ ॐ शङ्खभृते नमः
९९४ ॐ नन्दकिने नमः
९९५ ॐ चक्रिणे नमः
९९६ ॐ शार्ङ्गधन्वने नमः
९९७ ॐ गदाधराय नमः
९९८ ॐ रथांगपाणये नमः
९९९ ॐ अक्षोभ्याय नमः
१००० ॐ सर्वप्रहरणायुधाय नमः

●

## श्री शिक्षापत्री

वामे यस्य स्थिता राधा श्रीश्च यस्यास्ति वक्षसि । वृन्दावनविहारं तं श्रीकृष्णं हृदि चिन्तये ॥१॥
लिखामि सहजानन्दस्वामी सर्वान्निजाश्रितान् । नानादेश स्थितान् शिक्षापत्रीं वृत्तालयस्थितः ॥२॥
भ्रात्रो रामप्रतापेच्छारामयोर्धर्मजन्मनोः । यावयोध्याप्रसादाख्यरघुवीराभिधौ सुतौ ॥३॥
मुकुन्दानन्दमुख्याश्च नैष्ठिका ब्रह्मचारिणः । गृहस्थाश्च मयारामभट्टाद्या ये मदाश्रयाः ॥४॥
सधवा विधवा योषा याश्च मच्छिष्यतां गताः । मुक्तानन्दादयो ये स्युः साधवश्चाखिला अपि ॥५॥
स्वधर्मरक्षिका मे तैः सर्वैर्वाच्या सदाशिषः । श्रीमन्नारायणस्मृत्या सहिताः शास्त्रसम्मताः ॥६॥
एकाग्रेणैव मनसा पत्रीलेखः सहेतुकः । अवधार्योऽयमखिलैः सर्वजीवहितावहः ॥७॥
ये पालयन्ति मनुजाः सच्छास्त्रप्रतिपादितान् । सदाचारान् सदा तेऽत्र परत्र च महासुखाः ॥८॥
तानुल्लङ्घ्यात्र वर्तन्ते ये तु स्वैरं कुबुद्धयः । त इहामुत्र च महल्लभन्ते कष्टमेव हि ॥९॥
अतो भवद्भिर्मच्छिस्यैः सावधानतयाऽखिलैः । प्रीत्यैतामनुसृत्यैव वर्तितव्यं निरन्तरम् ॥१०॥
कस्यापि प्राणिनो हिंसा नैव कार्याऽत्र मामकैः । सूक्ष्मयूकामत्कुणादेरपि बुद्ध्या कदाचन ॥११॥
देवतापितृयागार्थमप्यजादेश्च हिंसनम् । न कर्तव्यमहिंसैव धर्मः प्रोक्तोऽस्ति यन्महान् ॥१२॥
स्त्रिया धनस्य वा प्राप्त्यै साम्राज्यस्य च वा क्वचिद् । मनुष्यस्य तु कस्यापि हिंसा कार्या न सर्वथा ॥१३॥
आत्मघातस्तु तीर्थेऽपि न कर्तव्यश्च न क्रुधा । अयोग्याचणात् क्वापि न विषोद्बन्धनादिना ॥१४॥

न भक्ष्य सर्वथा मांसं यज्ञशिष्टमपि क्वचिद् । न पेयं च सुरामद्यमपि देवनिवेदितम् ॥१५॥
अकार्याचरणे क्वापि जाते स्वस्य परस्य वा । अङ्गच्छेदो न कर्तव्यः शस्त्राद्यैश्च क्रुधापि वा ॥१६॥
स्तेनकर्म न कर्तव्यं धर्मार्थमपि केनचित् । सस्वामिकाष्ठपुष्पादि न ग्राह्यं तदनाज्ञया ॥१७॥
व्यभिचारो न कर्तव्यः पुम्भिः स्त्रीभिश्च मां श्रितैः । धूतादि व्यसनं त्याज्यं नाद्यं भङ्गादि मादकम् ॥१८॥
अग्राह्यान्नेन पक्वं यदन्नं तदुदकं च न । जगन्नाथपुरोऽन्यत्र ग्राह्यं कृष्णप्रसाद्यपि ॥१९॥
मिथ्यापवादः कस्मिंश्चिदपि स्वार्थस्य सिद्धये । नारोप्यो नापशब्दाश्च भाषणीयाः कदाचन ॥२०॥
देवतातीर्थविप्राणां साध्वीनां च सतामपि । वेदानां च न कर्तव्या निन्दा श्रव्या न च क्वचित् ॥२१॥
देवतायै भवेद्यस्यै सुरामांसनिवेदनम् । यत्पुरोऽजादि हिंसा च न भक्ष्यं तन्निवेदितम् ॥२२॥
दृष्ट्वा शिवालयादीनि देवागाराणि वर्त्मनि । प्रणम्य तानि तद्देवदर्शनं कार्यमादरात् ॥२३॥
स्ववर्णाश्रमधर्मो यः स हातव्यो न केनचित् । परधर्मो न चाचर्यो न च पाषण्डकल्पितः ॥२४॥
कृष्णभक्तेः स्वधर्माद्वा पतनं यस्य वाक्यतः । स्यात्तन्मुखान्न वै श्रव्याः कथावार्ताश्च वा प्रभोः ॥२५॥
स्वपरद्रोहजननं सत्यं भाष्यं न कर्हिचित् । कृतघ्नसङ्गस्त्यक्तव्यो लुञ्चा ग्राह्या न कस्यचित् ॥२६॥
चोरपापिव्यनिनां सङ्गः पाखण्डिनां तथा । कामिनां च न कर्तव्यो जनवञ्चनकर्मणाम् ॥२७॥
भक्तिं वा ज्ञानमालम्ब्य स्त्रीद्रव्यरसलोलुभाः । पापे प्रवर्तमानाः स्युः कार्यस्तेषां न सङ्गमः ॥२८॥
कृष्णकृष्णावताराणां खण्डनं यत्र युक्तिभिः । कृतं स्यात्तानि शास्त्राणि न मान्यानि कदाचन ॥२९॥

अगालितं न पातव्यं पानीयं च पयस्तथा । स्नानादि नैव कर्तव्यं सूक्ष्मजन्तुमयाम्भसा ॥३०॥
यदौषधं च सुरया सम्पृक्तं पललेन वा । अज्ञातवृत्तवैद्येन दत्तं चाद्यं न तत् क्वचित् ॥३१॥
स्थानेषु लोकशास्त्राभ्यां निषिद्धेषु कदाचन । मलमूत्रोत्सर्जनं च न कार्य ष्ठीवनं तथा ॥३२॥
अद्वारेण न निर्गम्यं प्रवेष्टव्यं न तेन च । स्थाने सस्वामिके वासः कार्योऽपृष्ट्वानतत्पतिम् ॥३३॥
ज्ञानवार्ताश्रुतिर्नार्या मुखात् कार्या न पूरुषैः । न विवादः स्त्रिया कार्यो न राज्ञा न च तज्जनैः ॥३४॥
अपमानो न कर्तव्यो गुरुणां च वरीयसाम् । लोके प्रतिष्ठितानां च विदुषां शस्त्रधारिणाम् ॥३५॥
कार्यं न सहसा किञ्चित्कार्यो धर्मस्तु सत्वरम् । पाठनीयाऽधीतविद्या कार्यः सङ्गोऽन्वहं सताम् ॥३६॥
गुरुदेवनृपेक्षार्थं न गम्यं रिक्तपाणिभिः । विश्वासघातो नो कार्यः स्वश्लाघा स्वमुखेन च ॥३७॥
यस्मिन् परिहितेऽपि स्युर्दृश्यान्यङ्गानि चात्मनः । तद्दूष्यं वसनं नैव परिधार्यं मदाश्रितैः ॥३८॥
धर्मेण रहिता कृष्णभक्तिः कार्या न सर्वथा । अज्ञनिन्दाभयान्नैव त्याज्यं श्रीकृणसेवनम् ॥३९॥
उत्सवाहेषु नित्यं च कृष्णमन्दिरमागतैः । पुम्भिः स्पृश्या न वनितास्तत्र ताभिश्च पुरुषाः ॥४०॥
कृष्णदीक्षां गुरोः प्राप्तैस्तुलसीमालिके गले । धार्ये नित्यं चोर्ध्वपुण्ड्रं ललाटादौ द्विजातिभिः ॥४१॥
तत्तु गोपीचन्दनेन चन्दनेनाथवा हरेः । कार्यं पूजावशिष्टेन केशरादियुतेन च ॥४२॥
तन्मध्य एव कर्तव्यः पुण्ड्रद्रव्येण चन्द्रकः । कुङ्कुमेनाथवा वृत्तो राधालक्ष्मीप्रसादिना ॥४३॥
सच्छूद्राः कृष्णभक्ता ये तैस्तु मालोर्ध्वपुण्ड्रके । द्विजातिवद्धारणीये निजधर्मेषु संस्थितैः ॥४४॥

भक्तैस्तदितरैर्माले चन्दनादीन्धनोद्भवे । धार्ये कन्ठे ललाटेऽथ कार्यः केवलचन्द्रकः ॥४५॥
त्रिपुण्ड्ररुद्राक्षधृतिर्येषां स्यात्स्वकुलागता । तैस्तु विप्रादिभिः क्वापि न त्याज्या सा मदाश्रितैः ॥४६॥
ऐकात्म्यमेव विज्ञेयं नारायणमहेशयोः । उमयोर्ब्रह्मरूपेण वेदेषु प्रतिपादनात् ॥४७॥
शास्त्रोक्त आपद्धर्मो यः स त्वल्पापदि कर्हिचित् । मदाश्रितैर्मुख्यतया ग्रहीतव्यो न मानवैः ॥४८॥
प्रत्यहं तु प्रबोद्धव्यं पूर्वमेवोदयाद्रवेः । विधाय कृष्णस्मरणं कार्यं शौचविधिस्ततः ॥४९॥
उपविश्यैव चैकत्र कर्तव्यं दन्तधावनम् । स्नात्वा शुच्यम्बुना धौते परिधार्ये च वाससी ॥५०॥
उपविश्य ततः शुद्ध आसने शुचिभूतले । असङ्कीर्ण उपस्पृश्यं प्राङ्मुखं वोत्तरामुखम् ॥५१॥
कर्तव्यमूर्ध्वपुण्ड्रं च पुम्भिरेव सचन्द्रकम् । कार्यः सधवनारीभिर्भाले कुङ्कुमचन्द्रकः ॥५२॥
पुण्ड्रं वा चन्द्रको भाले न कार्यो मृतनाथया । मनसा पूजनं कार्यं ततः कृष्णस्य चाखिलैः ॥५३॥
प्रणम्य राधाकृष्णस्य लेख्यारर्चां तत आदरात् । शक्त्या जपित्वा तन्मन्त्रं कर्तव्यं व्यावहारिकम् ॥५४॥
ये त्वम्बरीषवद्भक्ताः स्युरिहात्मनिवेदिनः । तैश्च मानसपूजान्तं कार्यमुक्तक्रमेण वै ॥५५॥
शैली वा धातुजा मूर्तिः शालग्रामोऽर्च्य एव तैः । द्रव्यैर्यथाप्तैः कृष्णस्य जप्योऽथाष्टाक्षरो मनुः ॥५६॥
स्तोत्रादेरथ कृष्णस्य पाठः कार्यः स्वशक्तितः । तथाऽनधीतगीर्वाणैः कार्यं तन्नामकीर्तनम् ॥५७॥
हरेर्विधाय नैवेद्यं भोज्यं प्रासादिकं ततः । कृष्णसेवापरैः प्रीत्या भवितव्यं च तैः सदा ॥५८॥
प्रोक्तास्ते निर्गुणा भक्ता निर्गुणस्य हरेर्यतः । संबन्धात्तत्क्रियाः सर्वा भवन्त्येव हि निर्गुणाः ॥५९॥

भक्तैरेतैस्तु कृष्णायानर्पितं वार्यपि क्वचित् । न पेयं नैव भक्ष्यं च पत्रकन्दफलाद्यपि ॥६०॥
सर्वैरशक्तौ वार्धक्याद्गरीयस्यापदाऽथवा । भक्ताय कृष्णमन्यस्मै दत्त्वा वृत्त्यं यथाबलम् ॥६१॥
आचार्येणैव दत्तं यद्यच्च तेन प्रतिष्ठितम् । कृष्णस्वरूपं तत्सेव्यं वन्द्यमेवेतरत्तु यत् ॥६२॥
भगवन्मन्दिरं सर्वैः सायं गन्तव्यमन्वहम् । नामसङ्कीर्तनं कार्यं तत्रोच्चैः राधिकापतेः ॥६३॥
कार्यास्तस्य कथावार्ताः श्रव्याश्च परमादरात् । वादित्रसहितं कार्यं कृष्णकीर्तनमुत्सवे ॥६४॥
प्रत्यहं कार्यमित्थं हि सर्वैरपि मदाश्रितैः । संस्कृतप्राकृतग्रन्थाभ्यासश्चापि यथामति ॥६५॥
यादृशैर्यो गुणैर्युक्तस्तादृशे स तु कर्मणि । योजनीयो विचार्यैव नान्यथा तु कदाचन ॥६६॥
अन्नवस्त्रादिभिः सर्वे स्वकीयाः परिचारकाः । सम्भावनीयाः सततं यथायोग्यं यथाधनम् ॥६७॥
यादृग्गुणो यः पुरुषस्तादृशा वचनेन सः । देशकालानुसारेण भाषणीयो न चान्यथा ॥६८॥
गुरुभूपालवर्षिष्ठत्यागिविद्वत्तपस्विनाम् । अभ्युत्थानादिना कार्यः सम्मानो विनयान्वितैः ॥६९॥
नोरौ कृत्वा पादमेकं गुरुदेवनृपान्तिके । उपवेश्यं सभायां च जानू बध्वा न वाससा ॥७०॥
विवादो नैव कर्तव्यः स्वाचार्येण सह क्वचित् । पूज्योऽन्नधनवस्त्राद्यैर्यथाशक्ति स चाखिलैः ॥७१॥
तमायान्तं निशम्याशु प्रत्युद्गन्तव्यमादरात् । तस्मिन् यात्यनुगम्यं च ग्रामान्तावधि मच्छ्रितैः ॥७२॥
अपि भूरिफलं कर्म धर्मापेतं भवेद्यदि । आचार्यं तर्हि तन्नैव धर्मः सर्वार्थदोऽस्ति हि ॥७३॥
पूर्वैर्महद्भिरपि यदधर्माचरणं क्वचित् । कृतं स्यात्तत्तु न ग्राह्यं ग्राह्यो धर्मस्तु तत्कृतः ॥७४॥

गुह्यवार्ता तु कस्यापि प्रकाश्या नैव कुत्रचित् । समदृष्ट्या न कार्यश्च यथार्हार्चाव्यतिक्रमः ॥७५॥
विशेषनियमो धार्यश्चातुर्मास्येऽखिलैरपि । एकस्मिन् श्रावणे मासि स त्वशक्तैस्तु मानवैः ॥७६॥
विष्णोः कथायाः श्रवणं वाचनं गुणकीर्तनम् । महापूजा मन्त्रजपः स्तोत्रपाठः प्रदक्षिणाः ॥७७॥
साष्टाङ्गप्रणतिश्चेति नियमा उत्तमा मताः । एतेष्वेकतमो भक्त्या धारणीयो विशेषतः ॥७८॥
एकादशीनां सर्वासां कर्तव्यं व्रतमादरात् । कृष्णजन्मदिनानां च शिवरात्रेश्च सोत्सवम् ॥७९॥
उपवासदिने त्याज्या दिवानिद्रा प्रयत्नतः । उपवासस्तया नश्येन्मैथुनेनेव यन्नृणाम् ॥८०॥
सर्ववैष्णवराजश्रीवल्लभाचार्यनन्दनः । श्री विठ्ठलेशः कृतवान् यं व्रतोत्सवनिर्णयम् ॥८१॥
कार्यास्तमनुसृत्यैव सर्व एव व्रतोत्सवाः । सेवारीतिश्च कृष्णस्य ग्राह्या तदुदितैव हि ॥८२॥
कर्तव्या द्वारिकामुख्यतीर्थयात्रा यथाविधि । सर्वैरपि यथाशक्ति भाव्यं दीनेषु वत्सलैः ॥८३॥
विष्णुः शिवो गणपतिः पार्वती च दिवाकरः । एताः पूज्यतया मान्या देवताः पञ्च मामकैः ॥८४॥
भूताद्युपद्रवे क्वापि वर्म नारायणात्मकम् । जप्यं च हनुमन्मन्त्रो जप्यो न क्षुद्रदैवतः ॥८५॥
रवेरिन्दोश्चोपरागे जायमानेऽपराः क्रियाः । हित्वाशु शुचिभिः सर्वैः कार्यः कृष्णमनोर्जपः ॥८६॥
जातायामथ तन्मुक्तौ कृत्वा स्नानं सचेलकम् । देयं दानं गृहिजनैः शक्त्याऽन्यैस्त्वर्च्य ईश्वरः ॥८७॥
जन्माशौचं मृताशौचं स्वसम्बन्धानुसारतः । पालनीयं यथाशास्त्रं चातुर्वर्ण्यजनैर्मम ॥८८॥
भाव्यं शमदमक्षान्तिसन्तोषादिगुणान्वितैः । ब्राह्मणैः शौर्यधैर्यादिगुणोपेतैश्च बाहुजैः ॥८९॥

वैश्यैश्च कृषिवाणिज्यकुसीदमुखवृत्तिभिः । भवितव्यं तथा शूद्रैर्द्विजसेवादिवृत्तिभिः ॥९०॥
संस्काराश्चाह्निकं श्राद्धं यथाकालं यथाधनम् । स्वस्वगृह्यानुसारणे कर्तव्यं च द्विजन्मभिः ॥९१॥
अज्ञानाज्ज्ञानतो वापि गुरु वा लघु पातकम् । क्वापि स्यात्तर्हि तत्प्रायश्चित्तं कार्यं स्वशक्तितः ॥९२॥
वेदाश्च व्याससूत्राणि श्रीमद्भागवताभिधम् । पुराणं भारते तु श्रीविष्णोर्नामसहस्रकम् ॥९३॥
तथा श्रीभगवद्गीता नीतिश्च विदुरोदिता । श्रीवासुदेवमाहात्म्यं स्कान्दवैष्णवखण्डगम् ॥९४॥
धर्मशास्त्रान्तर्गता च याज्ञवल्क्यऋषेः स्मृतिः । एतान्यष्ट ममेष्टानि सच्छास्त्राणि भवन्ति हि ॥९५॥
स्वहितेच्छुभिरेतानि मच्छिष्यैः सकलैरपि । श्रोतव्यान्यथ पाठ्यानि कथनीयानि च द्विजैः ॥९६॥
तत्राचारव्यवहृतिनिष्कृतानां च निर्णये । ग्राह्या मिताक्षरोपेता याज्ञवल्क्यस्य तु स्मृतिः ॥९७॥
श्रीमद्भागवतस्यैषु स्कन्धौ दशमपञ्चमौ । सर्वाधिकतया ज्ञेयौ कृष्णमाहात्म्यबुद्धये ॥९८॥
दशमः पञ्चमः स्कन्धौ याज्ञवल्क्यस्य च स्मृतिः । भक्तिशास्त्रं योगशास्त्रं धर्मशास्त्रं क्रमेण मे ॥९९॥
शारीरकाणां भगवद्गीतायाश्चावगम्यताम् । रामानुजाचार्यकृतं भाष्यमाध्यात्मिकं मम ॥१००॥
एतेषु यानि वाक्यानि श्रीकृष्णस्य वृषस्य च अत्युत्कर्षपराणि स्युस्तथा भक्तिविरागयोः ॥१०१॥
मन्तव्यानि प्रधानानि तान्येवेतरवाक्यतः । धर्मेण सहिता कृष्णभक्तिः कार्येति तद्रहः ॥१०२॥
धर्मो ज्ञेयः सदाचारः श्रुतिस्मृत्युपपादितः । माहात्म्यज्ञानयुग्भूरिस्नेहो भक्तिश्च माधवे ॥१०३॥
वैराग्यं ज्ञेयमप्रीतिः श्रीकृष्णेतरवस्तुषु । ज्ञानं च जीवमायेशरुपाणां सुष्ठु वेदनम् ॥१०४॥

हृत्स्थोऽणुसूक्ष्मश्चिद्रूपो ज्ञाता व्याप्याखिलां तनुम् । ज्ञानशक्त्या स्थितो जीवो ज्ञेयोऽच्छेद्यादिलक्षणः ॥१०५॥
त्रिगुणात्मा तमः कृष्णशक्तिर्देहतदीययोः । जीवस्य चाहं ममताहेतुर्मायावगम्यताम् ॥१०६॥
हृदये जीववज्जीवे योऽन्तर्यामितया स्थितः । ज्ञेयः स्वतन्त्र ईशोऽसौ सर्वकर्म फलप्रदः ॥१०७॥
स श्रीकृष्णः परंब्रह्म भगवान् पुरुषोत्तमः । उपास्य इष्टदेवो नः सर्वाविर्भावकारणम् ॥१०८॥
स राधया युतो ज्ञेयो राधाकृष्ण इति प्रभुः । रुक्मिण्या रमयोपेतो लक्ष्मीनारायणः सहि ॥१०९॥
ज्ञेयोऽर्जुनेन युक्तोऽसौ नरनारायणाभिधः । बलभद्रादियोगेन तत्तन्नामोच्यते स च ॥११०॥
एते राधादयो भक्तास्तस्य स्युः पार्श्वतः क्वचित् । क्वचित्तदङ्गेऽतिस्नेहात्स तु ज्ञेयस्तदैकलः ॥१११॥
अतश्चास्य स्वरूपेषु भेदो ज्ञेयो न सर्वथा । चतुरादिभुजत्वं तु द्विबाहोस्तस्य चैच्छिकम् ॥११२॥
तस्यैव सर्वथा भक्तिः कर्तव्या मनुजैर्भुवि । निःश्रेयसकरं किञ्चित्ततोऽन्यन्नेति दृश्यताम् ॥११३॥
गुणिनां गुणवत्ताया ज्ञेयं ह्येतत् परं फलम् । कृष्णे भक्तिश्च सत्सङ्गोऽन्यथा यान्ति विदोऽप्यधः ॥११४॥
कृष्णस्तदवताराश्च ध्येयास्तत्प्रतिमापि च । तु जीवा नृदेवाद्या भक्ता ब्रह्मविदोऽपि च ॥११५॥
निजात्मानं ब्रह्मरुपं देहत्रयविलक्षणम् । विभाव्य तेन कर्तव्या भक्तिः कृष्णस्य सर्वदा ॥११६॥
श्रव्यः श्रीमद्भागवतदशमस्कन्ध आदरात् । प्रत्यहं वा सकृद्वर्षे वर्षे वाच्योऽथ पण्डितैः ॥११७॥
कारणीया पुरश्चर्या पुण्यस्थानेऽस्य शक्तितः । विष्णुनामसहस्त्रादेश्चापि कार्येप्सितप्रदा ॥११८॥
दैव्यामापदि कष्टायां मानुष्यां वा गदादिषु । यथा स्वपररक्षा स्यात्तथा वृत्यं न चान्यथा ॥११९॥

देशकालवयोवित्जातिशक्त्यनुसारतः । आचारो व्यवहारश्च निष्कृतं चावधार्यताम् ॥१२०॥
मतं विशिष्टाद्वैतं मे गोलोको धाम चेप्सितम् । तत्र ब्रह्मात्मना कृष्णसेवा मुक्तिश्च गम्यताम् ॥१२१॥
एते साधारणा धर्माः पुंसां स्त्रीणां च सर्वतः । मदाश्रितानां कथिता विशेषानथ कीर्तये ॥१२२॥
मज्ज्येष्ठावरजभ्रातृसुताभ्यां तु कदाचन । स्वासन्नसम्बन्धहीना नोपदेश्या हि योषितः ॥१२३॥
न स्प्रष्टव्याश्च ताः क्वापि भाषणीयाश्च ता नहि । क्रौर्यं कार्यं न कस्मिंश्चिन्न्यासो रक्ष्यो न कस्यचित् ॥१२४॥
प्रतिभूत्वं न कस्यापि कार्यं च व्यावहारिके । भिक्षायापदतिक्रम्या न तु कार्यमृणं क्वचित् ॥१२५॥
स्वशिष्यार्पितधान्यस्य कर्तव्यो विक्रयो न च । जीर्णं दत्वा नवीनं तु ग्राह्यं तन्नैष विक्रयः ॥१२६॥
भाद्रशुक्लचतुर्थ्यां च कार्यं विघ्नेशपूजनम् । इषकृष्णचतुर्दश्यां कार्याऽर्चा च हनूमतः ॥१२७॥
मदाश्रितानां सर्वेषां धर्मरक्षणहेतवे । गुरुत्वे स्थापिताभ्यां च ताभ्यां दीक्ष्या मुमुक्षवः ॥१२८॥
यथाधिकारं संस्थाप्याः स्वे स्वे धर्मे निजाश्रिताः । मान्याः सन्तश्च कर्तव्यः सच्छास्त्राभ्यास आदरात् ॥१२९॥
मया प्रतिष्ठापितानां मन्दिरेषु महत्सु च । लक्ष्मीनारायणादीनां सेवा कार्या यथाविधि ॥१३०॥
भगवन्मन्दिरं प्राप्तो योऽन्नार्थी कोऽपि मानवः । आदरात्स तु सम्भाव्यो दानेनान्नस्य शक्तितः ॥१३१॥
संस्थाप्य विप्रं विद्वांसं पाठशालां विधाप्य च । प्रवर्तनीया सद्विद्या भुवि यत्सुकृतं महत् ॥१३२॥
अथैतयोस्तु भार्याभ्यामाज्ञया पत्युरात्मनः । कृष्णमन्त्रोपदेशश्च कर्तव्यः स्त्रीभ्य एव हि ॥१३३॥

स्वासन्नसम्बन्धहीना नरास्ताभ्यां तु कर्हिचित् । न स्प्रष्टव्या न भाष्याश्च तेभ्यो दर्श्यं मुखं न च ॥१३४॥
गृहाख्याश्रमिणो ये स्युः पुरुषा मदुपाश्रिताः । स्वासन्नसम्बन्धहीना न स्पृश्या विधवाश्च तैः ॥१३५॥
मात्रा स्वस्रा दुहित्रा वा विजने तु वयः स्थया । अनापदि न तैः स्थेयं कार्यः दानम् न योषितः ॥१३६॥
प्रसङ्गो व्यवहारेण यस्याः केनापि भूपतेः । भवेत्तस्याः स्त्रियाः कार्यः प्रसङ्गो नैव सर्वथा ॥१३७॥
अन्नाद्यैः शक्तितोऽभ्यर्च्यो ह्यतिथिस्तैर्गृहागतः । दैवं पैत्र्यं यथाशक्ति कर्तव्यं च यथोचितम् ॥१३८॥
यावज्जीवं च शुश्रूषा कार्या मातुः पितुर्गुरोः । रोगार्तस्य मनुष्यस्य यथाशक्ति च मामकैः ॥१३९॥
यथाशक्त्युद्यमः कार्यो निजवर्णाश्रमोचितः । मुष्कच्छेदो न कर्तव्यो वृषस्य कृषिवृत्तिभिः ॥१४०॥
यथाशक्ति यथाकालं सङ्ग्रहोऽन्नधनस्य तैः । यावद्व्ययं च कर्तव्यः पशुमद्भिस्तृणस्य च ॥१४१॥
गवादीनां पशूनां च तृणतोयादिभिर्यदि । सम्भावनं भवेत्स्वेन रक्ष्यास्ते तर्हि नान्यथा ॥१४२॥
ससाक्ष्यमन्तरा लेखं पुत्रमित्रादिनाऽपि च । भूवित्तदानादानाभ्यां व्यवहार्यं न कर्हिचित् ॥१४३॥
कार्ये वैवाहिके स्वस्यान्यस्य वाऽर्प्यधनस्य तु । भाषाबन्धो न कर्तव्यः ससाक्ष्यं लेखमन्तरा ॥१४४॥
आयद्रव्यानुसारेण व्ययः कार्यो हि सर्वदा । अन्यथा तु महद्दुःखं भवेदित्यवधार्यताम् ॥१४५॥
द्रव्यस्यायो भवेद्यावान् व्ययो वा व्यावहारिके । तौ संस्मृत्य स्वयं लेख्यौ स्वक्षरैः प्रतिवासरम् ॥१४६॥
निजवृत्त्युद्यमप्राप्तधनधान्यादितश्च तैः । अर्प्यो दशांशः कृष्णाय विंशोंऽशस्त्विह दुर्बलैः ॥१४७॥

एकादशीमुखानां च व्रतानां निजशक्तितः । उद्यापनं यथाशास्त्रं कर्तव्यं चिन्तितार्थदम् ॥१४८॥
कर्तव्यं कारणीयं वा श्रावणे मासि सर्वथा । बिल्वपत्रादिभिः प्रीत्या श्रीमहादेवपूजनम् ॥१४९॥
स्वाचार्यान्न ऋणं ग्राह्यं श्रीकृष्णस्य च मन्दिरात् । ताभ्यां स्वव्यवहारार्थं पात्रभूषांशुकादि च ॥१५०॥
श्रीकृष्णगुरुसाधूनां दर्शनार्थं गतौ पथि । तत्स्थानेषु च न ग्राह्यं परान्नं निजपुण्यहृत् ॥१५१॥
प्रतिज्ञातं धनं देयं यत्स्यात्तत् कर्मकारिणे । न गोप्यमृणशुद्ध्यादि व्यवहार्यं न दुर्जनैः ॥१५२॥
दुष्कालस्य रिपूणां वा नृपस्योपद्रवेण वा । लज्जाधनप्राणनाशः प्राप्तः स्याद्यत्र सर्वथा ॥१५३॥
मूलदेशोऽपि स स्वेषां सद्य एव विचक्षणैः । त्याज्यो मदाश्रितैः स्थेयं गत्वा देशान्तरं सुखम् ॥१५४॥
आढ्यैस्तु गृहिभिः कार्या अहिंसा वैष्णवा मखाः । तीर्थेषु पर्वसु तथा भोज्या विप्राश्च साधवः ॥१५५॥
महोत्सवा भगवतः कर्तव्या मन्दिरेषु तैः । देयानि पात्रविप्रेभ्यो दानानि विविधानि च ॥१५६॥
मदाश्रितैर्नृपैर्धर्मशास्त्रमाश्रित्य चाखिलाः । प्रजाः स्वाः पुत्रवत्पाल्या धर्मः स्थाप्यो धरातले ॥१५७॥
राज्याङ्गोपायषड्वर्गा ज्ञेयास्तीर्थानि चाञ्जसा । व्यवहारविदः सभ्या, दण्डयादण्डयाश्च लक्षणः ॥१५८॥
सभर्तृकाभिर्नारीभिः सेव्यः स्वपतिरीशवत् । अन्धो रोगी दरिद्रो वा षण्ढो वाच्यं न दुर्वचः ॥१५९॥
रूपयौवनयुक्तस्य गुणिनोऽन्यनरस्य तु । प्रसङ्गो नैव कर्तव्यस्ताभिः साहजिकोऽपि च ॥१६०॥
नरेक्ष्यनाभ्यूरुकुचाऽनुत्तरीया च नो भवेत् । साध्वी स्त्री न च भण्डेक्षा न निर्लज्जादिसङ्गिनी ॥१६१॥

भूषासदंशुकधृतिः परगेहोपवेशनम् । त्याज्यं हास्यादि च स्त्रीभिः पत्यौ देशान्तरं गते ॥१६२॥
विधवाभिस्तु योषाभिः सेव्यः पतिधिया हरिः । आज्ञायां पितृपुत्रादेर्वृत्यं स्वातन्त्र्यतो न तु ॥१६३॥
स्वासन्नसम्बन्धहीना नराः स्पृस्या न कर्हिचित् । तरुणैस्तैश्च तारुण्ये भाष्यं नावश्यकं विना ॥१६४॥
स्तनन्धयस्य नुः स्पर्शे न दोषोऽस्ति पशोरिवः । आवश्यके च वृद्धस्य स्पर्शे तेन च भाषणे ॥१६५॥
विद्याऽनासन्नसम्बन्धात्ताभिः पाठ्या न काऽपि नुः। व्रतोपवासैः कर्तव्यो मुहुर्देहदमस्तथा ॥१६६॥
धनं च धर्मकार्येऽपि स्वनिर्वाहोपयोगि यत् । देयं ताभिर्न तत् क्वापि देयं चेदधिकं तदा ॥१६७॥
कार्यश्च सकृदाहारस्ताभिः स्वापस्तु भूतले । मैथुनासक्तयोर्वीक्षा क्वापि कार्या न देहिनोः ॥१६८॥
वेषो न धार्यस्ताभिश्च सुवासिन्याः स्त्रियास्तथा । न्यासिन्या वीतरागाया विकृतश्च न कर्हिचित् ॥१६९॥
सङ्गो न गर्भपातिन्याः स्पर्शः कार्यश्च योषितः । शृङ्गारवार्ता न नृणां कार्याः श्रव्या नवैक्कचित् ॥१७०॥
निजसम्बन्धिभिरपि तारुण्ये तरुणैर्नरैः । साकं रहसि न स्थेयं ताभिरापदमन्तरा ॥१७१॥
न होलाखेलनं कार्यं न भूषादेश्च धारणम् । न धातुसूत्रयुक्सूक्ष्मवस्त्रादेरपि कर्हिचित् ॥१७२॥
सधवाविधवाभिश्च न स्नातव्यं निरम्बरम् । स्वरजोदर्शनं स्त्रीभिर्गोपनीयं न सर्वथा ॥१७३॥
मनुष्यं चांशुकादीनि नारी क्वापि रजस्वला । दिनत्रयं स्पृशेन्नैव स्नात्वा तुर्येऽह्नि सा स्पृशेत् ॥१७४॥
नैष्ठिकव्रतवन्तो ये वर्णिनो मदुपाश्रयाः । तैः स्पृश्यान स्त्रियो भाष्या न च वीक्ष्याश्च ता धिया ॥१७५॥

तासां वार्ता न कर्तव्या न श्रव्याश्च कदाचन । तत्पादचारस्थानेषु न च स्नानादिकाः क्रियाः ॥१७६॥
देवताप्रतिमां हित्वा लेख्या काष्ठादिजापि वा । न योषित्प्रतिमा स्पृश्या न वीक्ष्या बुद्धिपूर्वकम् ॥१७७॥
न स्त्रीप्रतिकृतिः कार्या स्पृश्यं योषितोंऽशुकम् । न वीक्ष्यं मैथुनपरं प्राणिमात्रं च तैर्धिया ॥१७८॥
न स्पृश्यो नेक्षणीयश्च नारीवेषधरः पुमान् । न कार्यं स्त्रीः समुद्दिश्य भगवद्गुणकीर्तनम् ॥१७९॥
ब्रह्मचर्यव्रतत्यागपरं वाक्यं गुरोरपि । तैर्न मान्यं सदा स्थेयं धीरैस्तुष्टैरमानिभिः ॥१८०॥
स्वातिनैकट्यमायान्ती प्रसभं वनिता तु या । निवारणीया साभाष्यतिरस्कृत्यापि वा द्रुतम् ॥१८१॥
प्राणापद्युपपन्नायां स्त्रीणां स्वेषां च वा क्वचित् । तदा स्पृष्ट्वापि तद्रक्षा कार्या सम्भाष्य ताश्च वा ॥१८२॥
तैलाभ्यङ्गो न कर्तव्यो न धार्यं चायुधं तथा । वेषो न विकृतो धार्यो जेतव्या रसना च तैः ॥१८३॥
परिवेषणकर्त्री स्याद्यत्र स्त्री विप्रवेश्मनि । न गम्यं तत्र भिक्षार्थं गन्तव्यमितरत्र तु ॥१८४॥
अभ्यासो वेदशास्त्राणां कार्यश्च गुरुसेवनम् । वर्ज्यः स्त्रीणामिव स्त्रैणपुंसां सङ्गश्च तैः सदा ॥१८५॥
चर्मवारि न वै पेयं जात्या विप्रेण केनचित् । पलाण्डुलशुनाद्यं च तेन भक्ष्यं न सर्वथा ॥१८६॥
स्नानं सन्ध्यां च गायत्रीजपं श्रीविष्णुपूजनम् । अकृत्वा वैश्वदेवं च कर्तव्यं नैव भोजनम् ॥१८७॥
साधवो येऽथ तैः सर्वैर्नैष्ठिकब्रह्मचारिवत् । स्त्रीस्त्रैणसङ्गादि वर्ज्यं जेतव्याश्चान्तरारयः ॥१८८॥
सर्वेन्द्रियाणि जेयानि रसना तु विशेषतः । न द्रव्यसङ्ग्रहः कार्यः कारणीयो न केनचित् ॥१८९॥

न्यासो रक्ष्यो न कस्यापि धैर्यं त्याज्यं न कर्हिचित् । न प्रवेशयितव्या च स्वावासे स्त्री कदाचन ॥१९०॥
न च सङ्गं विना रात्रौ चलितव्यमनापदि । एकाकिभिर्न गन्तव्यं तथा क्वापि विनापदम् ॥१९१॥
अनर्घ्यं चित्रितं वासः कुसुम्भाद्यैश्च रञ्जितम् । न धार्यं च महावस्त्रं प्राप्तमन्येच्छयापि तत् ॥१९२॥
भिक्षां सभां विना नैव गन्तव्यं गृहिणो गृहम् । व्यर्थः कालो न नेतव्यो भक्तिं भगवतो विना ॥१९३॥
पुमानेव भवेद्यत्र पक्वान्नपरिवेषणः । ईक्षणादि भवेन्नैव यत्र स्त्रीणां च सर्वथा ॥१९४॥
तत्र गृहिगृहे भोक्तुं गन्तव्यं साधुभिर्मम । अन्यथामान्नमर्थित्वा पाकः कार्यः स्वयं च तैः ॥१९५॥
आर्षभो भरतः पूर्वं जडविप्रो यथा भुवि । अवर्ततात्र परमहंसैर्वृत्यं तथैव तैः ॥१९६॥
वर्णिभिः साधुभिश्चैतैर्वर्जनीयं प्रयत्नतः । ताम्बूलस्याहिफेनस्य तमालादेश्च भक्षणम् ॥१९७॥
संस्कारेषु न भोक्तव्यं गर्भाधानमुखेषु तैः । प्रेतश्राद्धेषु सर्वेषु श्राद्धे च द्वादशाह्निके ॥१९८॥
दिवास्वापो न कर्तव्यो रोगाद्यापदमन्तरा । ग्राम्यवार्ता न कार्या च न श्रव्या बुद्धिपूर्वकम् ॥१९९॥
स्वप्यं न तैश्च खट्वायां विना रोगादिमापदम् । निच्छद्म वर्तितव्यं च साधूनामग्रतः सदा ॥२००॥
गालिदानं ताडनं च कृतं कुमतिभिर्जनैः । क्षन्तव्यमेव सर्वेषां चिन्तनीयं हितं च तैः ॥२०१॥
दूतकर्म न कर्तव्यं पैशुनं चारकर्म च । देहेऽहन्ता च ममता न कार्या स्वजनादिषु ॥२०२॥
इति सङ्क्षेपतो धर्माः सर्वेषां लिखिता मया । साम्प्रदायिकग्रन्थेभ्यो ज्ञेय एषां तु विस्तरः ॥२०३॥

सच्छास्त्राणां समुद्धृत्य सर्वेषां सारमात्मना । पत्रीयं लिखिता नृणामभीष्टफलदायिनी ॥२०४॥
इमामेव ततो नित्यमनुसृत्य ममाश्रितैः । यतात्मभिर्वर्तितव्यं न तु स्वैरं कदाचन ॥२०५॥
वर्तिष्यन्ते य इत्थं हि पुरुषा योषितस्तथा । ते धर्मादिचतुर्वर्गसिद्धिं प्राप्स्यन्ति निश्चितम् ॥२०६॥
नेत्थं य आचरिष्यन्ति ते त्वस्मत्सम्प्रदायतः । बहिर्भूता इति ज्ञेयं स्त्रीपुंसैः साम्प्रदायिकैः ॥२०७॥
शिक्षापत्र्याः प्रतिदिनं पाठोऽस्या मदुपाश्रितैः । कर्तव्योऽनक्षरज्ञैस्तु श्रवणं कार्यमादरात् ॥२०८॥
वक्त्रभावे तु पूजेव कार्याऽस्यां प्रतिवासरम् । मद्रूपमिति मद्वाणी मान्येयं परमादरात् ॥२०९॥
युक्ताय सम्पदा दैव्या दातव्येयं तु पत्रिका । आसुर्या सम्पदाढ्याय पुंसे देया न कर्हिचित् ॥२१०॥
विक्रमार्कशकस्याब्दे नेत्राष्टवसुभूमिते । वसन्ताद्यदिने शिक्षापत्रीयं लिखिता शुभा ॥२११॥
निजाश्रितानां सकलार्तिहन्ता सद्धर्मभक्तेरवनं विधाता । दाता सुखानां मनसेप्सितानां तनोतु कृष्णोऽखिलमङ्गलं नः ॥२१२॥

*इति श्रीसहजानन्दस्वामिलिखिता शिक्षापत्री समाप्ता*

●

# श्रीमद् भगवद्गीता

## अथ प्रथमोऽध्यायः

॥ धृतराष्ट्र उवाच ॥

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः । मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥१॥

॥ सञ्जय उवाच ॥

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा । आचार्यमुपसङ्गम्य राजा वचनमब्रवीत् ॥२॥
पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् । व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥३॥
अत्र शूरा महेष्वासा भीमार्जुनसमा युधि । युयुधानो विराटश्च द्रुपदश्च महारथः ॥४॥
धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् । पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः ॥५॥
युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् । सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥६॥
अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम् । नायका मम सैन्यस्य सञ्ज्ञार्थं तान्ब्रवीमि ते ॥७॥
भवान्भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः । अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥८॥
अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः । नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥९॥
अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् । पर्याप्तं त्वितदमेतेषां बलं भीमाभिरक्षितम् ॥१०॥

अयनेषु च सर्वेषु यथाभागमवस्थिताः । भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥११॥
तस्य सञ्जनयन्हर्षं कुरुवृद्धः पितामहः । सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥१२॥
ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः । सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥१३॥
ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ । माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥१४॥
पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः । पौण्ड्रं दध्मौ महाशुङ्खं भीमकर्मा वृकोदरः ॥१५॥
अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः । नकुल सहदेवश्च सुघोषमणिपुष्पकौः ॥१६॥
काश्यश्च परमेष्वासः शिखण्डी च महारथः । धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥१७॥
द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते । सौभद्रश्च महाबाहुः शङ्खान्दध्मुः पृथक् पृथक् ॥१८॥
स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् । नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥१९॥
अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान कपिध्वजः । प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः ॥२०॥
हृषीकेशं तदा वाक्यमिदमाह महीपते ।

॥ अर्जुन उवाच ॥

सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥२१॥
यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् । कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥२२॥
योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः । धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥२३॥

॥ सञ्जय उवाच ॥

एवमुक्तो हृषीकेशो गुडाकेशेन भारत । सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥२४॥
भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् । उवाच पार्थ पश्यैतान् समवेतान्कुरुनिति ॥२५॥
तत्रापश्यत्स्थितान् पार्थः पितृनथ पितामहान् । आचार्यान्मातुलाभ्रातृन्पुत्रान्पौत्रान्सखींस्तथा ॥२६॥
श्वशुरान् सुहृदश्चैव सेनयोरुभयोरपि । तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् ॥२७॥
कृपया परयाविष्टो विषीदन्निदमब्रवीत् ।

॥ अर्जुन उवाच ॥

दुष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ॥२८॥
सीदन्ति मम गात्राणि मुखं च परिशुष्यति । वेषथुश्च शरीरे मे रोमहर्षश्च जायते ॥२९॥
गाण्डीवं स्त्रंसते हस्तात्त्वकक्चैव परिदह्यते । न च शक्रोम्यवस्थातुं भ्रमतीव च मे मनः ॥३०॥
निमित्तानि च पश्यामि विपरीतानि केशव । न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥३१॥
न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च । किं नो राज्येन गोविन्द किं भोगैजीवितेन वा ॥३२॥
येषामर्थे काङ्क्षित्तं नो राज्यं भोगाः सुखानि च । त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥३३॥
आचार्याः पितरः पुत्रास्तथैव च पितामहाः । मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा ॥३४॥
एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन । अपि त्रैलोक्यराज्यस्य हेतोः किं न महीकृते ॥३५॥

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन । पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥३६॥
तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान् स्वबान्धवान् । स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥३७॥
यद्यप्येते न पश्यन्ति लोभोपहतचेतसः । कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥३८॥
कथं ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् । कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥३९॥
कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः । धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ॥४०॥
अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः । स्त्रीषुं दुष्टासु वार्ष्णेय जायते वर्णसङ्करः ॥४१॥
सङ्करो नरकायैव कुलघ्नानां कुलस्य च । पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥४२॥
दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः । उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥४३॥
उत्सन्नकुलधर्माणां मनुष्याणां जानार्दन । नरकेऽनियतं वासो भवतीत्यनुशुश्रुम् ॥४४॥
अहो बत महत्पापं कर्तुं व्यवसिता वयम् । यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥४५॥
यदि मामप्रतीकारमशस्त्र शस्त्रपाणयः । धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥४६॥

॥ सञ्जय उवाच ॥

एवमुक्त्वार्जुनः सङ्ख्ये रथोपस्थ उपाविशत् । विसृज्य सशरं चापं शोकसंविग्नमानसः ॥४७॥

*॥ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णर्जुनसंवादेऽर्जुनविषादयोगो नाम प्रथमोऽध्यायः ॥१॥*

## अथ द्वीतीयोऽध्यायः

॥ सञ्जय उवाच ॥

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् । विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥१॥

॥ श्रीभगवानुवाच ॥

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् । अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥२॥

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते । क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥३॥

॥ अर्जुन उवाच ॥

कथं भीष्ममहं सङ्ख्ये द्रोणं च मधुसूदन । इषुभिः प्रति योत्स्यामि पूजार्हावरिसूदन ॥४॥

गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।

हत्वार्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान् रुधिरप्रदिग्धान् ॥५॥

न चैतद्विद्मः कतरन्नो गरीयोयद्वा जयेय यदि वा नो जयेयुः ।

यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥६॥

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसम्मूढचेताः ।

यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥७॥

न हि प्रपश्यामि ममापनुद्याद् यच्छोकमुच्छोषणमिन्द्रियाणाम् ।

अवाप्य भूमावसपत्नमृद्धंराज्यं सुराणामपि चाधिपत्यम् ॥८॥

॥ सञ्जय उवाच ॥

एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तप । न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥९॥
तमुवाच हृषीकेशः प्रहसन्निव भारतः । सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥१०॥

॥ श्री भगवानुवाच ॥

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे । गतासूनगतासूंश्च नानुसोचन्ति पण्डिताः ॥११॥
न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः । न चैव न भविष्यामः सर्वे वयमतः परम् ॥१२॥
देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा । तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥१३॥
मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः । आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥१४॥
यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ । समदुःस्वसुखं धीरं सोऽमृतत्वाय कल्पते ॥१५॥
नासतो विद्यते भावो नाभावो विद्यते सतः । उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥१६॥
अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् । विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥१७॥
अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः । अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥१८॥
य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् । उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥१९॥
न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः ।

अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥२०॥
वेदाविनाशिनं नित्यं य एनमजमव्ययम् । कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥२१॥
वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥२२॥
नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः । न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥२३॥
अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च । नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥२४॥
अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते । तस्मादेवं विदित्वैनं नानुसोचितुमर्हसि ॥२५॥
अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् । तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ॥२६॥
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च । तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥२७॥
अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत । अव्यक्तनिधान्येव तत्र का परिदेवना ॥२८॥
आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः श्रृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् ॥२९॥
देही नित्यमवध्योऽयं देहे सर्वस्य भारत । तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥३०॥
स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि । धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥३१॥
यद्वच्छया चोपपन्नं स्वर्गद्वारमपावृत्तम् । सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥३२॥

अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि । ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥३३॥
अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् । सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥३४॥
भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः । येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥३५॥
अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः । निन्दन्तस्व सामर्थ्यं ततो दुःखतरं नु किम् ॥३६॥
हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् । तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥३७॥
सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ । ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥३८॥
एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां श्रृणु । बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥३९॥
नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते । स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥४०॥
व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन । बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥४१॥
यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः । वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥४२॥
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् । क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥४३॥
भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् । व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥४४॥
त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन । निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥४५॥
यावानर्थ उदपाने सर्वतः सम्प्लुतोदके । तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥४६॥
कर्मण्येवाधिकारस्ते मा फलेषु कदाचन । माकर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥४७॥

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय । सिद्ध्यसिद्ध्योः समो भूत्वा सामत्वं योग उच्यते ॥४८॥
दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय । बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥४९॥
बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते । तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥५०॥
कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः । जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥५१॥
यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति । तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥५२॥
श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला । समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥५३॥

॥ अर्जुन उवाच ॥

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव । स्तितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥५४॥

॥ श्री भगवानुवाच ॥

प्रजहयति यदा कामान्सर्वान्पार्थ मनोगतान् । आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥५५॥
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥५६॥
यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् । नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥५७॥
यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः । इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥५८॥
विषया विनिवर्तन्ते निराहारस्य देहिनः । रसवर्जं रसोऽप्यस्य परं द्रुष्ट्वा निवर्तते ॥५९॥
यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः । इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥६०॥

तानि सर्वाणि संयम्य युक्त यासीत मत्परः । वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥६१॥
ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते । सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ॥६२॥
क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः । स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥६३॥
रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् । आत्मवश्यैर्विधेयात्मा प्रसादमधिगत्छति ॥६४॥
प्रसादे सर्वदुःखानां हानिरस्योपजायते । प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥६५॥
नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना । न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥६६॥
इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते । तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥६७॥
तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः । इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥६८॥
या निसा सर्वभूतानां तस्यां जागर्ति संयमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥६९॥
आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥७०॥
विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः । निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥७१॥
एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति । स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥७२॥

*॥ ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णर्जुनसंवादे साङ्ख्ययोगो नाम द्वितीयोऽध्यायः ॥२॥*

## अथ तृतीयोऽध्यायः

॥ अर्जुन उवाच ॥

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन । तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥१॥
व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे । तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥२॥

॥ श्री भगवानुवाच ॥

लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ । ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥३॥
न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते । न च सन्न्यसनादेव सिद्धिं समधिगच्छति ॥४॥
न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत । कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥५॥
कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् । इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥६॥
यस्तित्वन्द्रियाणि मनसा नियम्यारभतेऽर्जुन । कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥७॥
नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः । शरीरयात्रापि च ते न प्रसिद्धयेदकर्मणः ॥८॥
यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः । तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥९॥
सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः । अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक ॥१०॥
देवान्भावयतानेन ते देवा भावयन्तु वः । परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥११॥
इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः । तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥१२॥

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः । भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥१३॥
अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः । यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥१४॥
कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् । तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥१५॥
एवं प्रवर्तितं चक्र् नानुवर्तयतीह यः । अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥१६॥
यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानव । आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्ये ॥१७॥
नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन । न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥१८॥
तस्मादसक्तः सततं कार्य कर्म समाचर । असक्तो ह्याचरन्कर्म परमाप्नोति पुरुषः ॥१९॥
कर्मणैव हि संसिद्धिमास्थिता जनकादयः । लोकसङ्ग्रहमेवापि सम्पश्यन्कर्तुमर्हसि ॥२०॥
यद्यदायचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥२१॥
न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन । नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥२२॥
यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः । मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥२३॥
उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् । सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥२४॥
सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत । कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसङ्ग्रहम् ॥२५॥
न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् । जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥२६॥
प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः । अहङ्कारविमूढात्मा कर्ताहमिति मन्यते ॥२७॥

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः । गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥२८॥
प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु । तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् ॥२९॥
मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा । निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥३०॥
ये मे मतिमिदं नित्यमनुतिष्ठन्ति मानवाः । श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥३१॥
ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् । सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥३२॥
सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि । प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥३३॥
इन्द्रियस्येन्द्रियस्वार्थे रागद्वेषौ व्यवस्थितौ । तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥३४॥
श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् । स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥३५॥

॥ अर्जुन उवाच ॥

अथ केन प्रयुक्तोऽयं पापं चरति पुरुषः । अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥३६॥

॥ श्री भगवानुवाच ॥

काम एष क्रोध एष रजोगुणसमुद्भवः । महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥३७॥
धूमेनाव्रियते वह्निर्यथादर्शो मलेन च । यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥३८॥
आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा । कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥३९॥
इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते । एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥४०॥

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ । पाम्मानं प्रजहि ह्येनं ज्ञानविज्ञाननासनम् ॥४१॥
इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः । मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥४२॥
एवं बूद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मनः । जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥४३॥

*ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णर्जुनसंवादे कर्मयोगो नाम तृतीयोऽध्यायः ॥३॥*

## अथ चतुर्थोऽध्यायः

॥ श्री भगवानुवाच ॥

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् । विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥१॥
एवं परम्पराप्राप्तमिमं राजर्षयो विदुः । स कालेनेह महता योगो नष्टः परन्तप ॥२॥
स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः । भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥३॥

॥ अर्जुन उवाच ॥

अपरं भवतो जन्म परं जन्म विवस्वतः । कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥४॥

॥ श्री भगवानुवाच ॥

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन । तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥५॥
अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् । प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥६॥

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥७॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥८॥
जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः । त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥९॥
वीतरागभयक्रोधा मन्मया मामुपाश्रिताः । बहवो ज्ञानतपसा पूता मद्भावमागताः ॥१०॥
ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् । मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥११॥
कांक्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः । क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥१२॥
चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः । तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥१३॥
न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा । इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥१४॥
एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः । कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥१५॥
किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः । तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥१६॥
कर्मणो ह्यपि बोद्धव्यं च विकर्मणः । अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥१७॥
कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः । स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥१८॥
यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः । ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥१९॥
त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः । कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः ॥२०॥
निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः । शारीरं केवलं कर्म कुर्वान्नाप्नोति किल्बिषम् ॥२१॥

यदृच्छालाभसन्तुष्टो द्वन्दातीतो विमत्सरः । समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥२२॥
गतसङ्गस्य मुक्तस्य ज्ञानावस्थितंचेतसः । यज्ञायाचरतः कर्म समग्र प्रविलीयते ॥२३॥
ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥२४॥
दैवमैवापरे यज्ञं योगिनः पर्युवासते । ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥२५॥
श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति । शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ॥२६॥
सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे । आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥२७॥
द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे । स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥२८॥
अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे । प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥२९॥
अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति । सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥३०॥
यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् । नायं लोकोऽस्त्ययज्ञस्य कुलोऽन्यः कुरुसत्तम ॥३१॥
एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे । कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥३२॥
श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप । सर्व कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥३३॥
तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥३४॥
यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव । येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥३५॥
अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः । सर्व ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥३६॥

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन । ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥३७॥
न हि ज्ञानेन सदृशं पवित्रमिह विद्यते । तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥३८॥
श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः । ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥३९॥
अज्ञश्चाश्रद्धधानश्च संशयात्मा विनश्यति । नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥४०॥
योगसन्न्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम् । आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ॥४१॥
तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः । छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥४२॥

*ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णर्जुनसंवादे ज्ञानकर्मसन्न्यासयोगो नाम चतुर्थोऽध्यायः ॥४॥*

## अथ पञ्चमोऽध्यायः

॥ अर्जुन उवाच ॥

सन्न्यासं कर्मणां कृष्ण पुनर्योगं च शंससि । यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥१॥

॥ श्रीभगवानुवाच ॥

सन्न्यासः कर्मयोगश्च निःश्रेयसकरावुभौ । तयोस्तु कर्मसन्न्यासात्कर्मयोगो विशिष्यते ॥२॥
ज्ञेयः स नित्यसन्न्यासी यो न द्वेष्टि न काङ्क्षति । निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥३॥
साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः । एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥४॥

यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते । एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥५॥
सन्न्यासस्तु महाबाहो दुःखमाप्तुमयोगतः । योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥६॥
योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः । सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥७॥
नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित् । पश्यञ्श्रृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन् ॥८॥
प्रलयन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि । इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥९॥
ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः । लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥१०॥
कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि । योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥११॥
युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् । अयुक्तः कामकारेण फले सक्तो निबध्यते ॥१२॥
सर्वकर्माणि मनसा सन्न्यस्यास्ते सुखं वशी । नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥१३॥
न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः । न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥१४॥
नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः । अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥१५॥
ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः । तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥१६॥
तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः । गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥१७॥
विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥१८॥
इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः । निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥१९॥

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् । स्थिरबुद्धिरसम्मूढो ब्रह्मविद् ब्रह्मणि स्थितः ॥२०॥
बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् । सब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥२१॥
ये हि संस्पर्शजा भोगा दुःखयोनय एव ते । आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥२२॥
शकनोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् । कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥२३॥
योऽन्तः सुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः । स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥२४॥
लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः । छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥२५॥
कामक्रोधवियुक्तानां यतीनां यतचेतसाम् । अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥२६॥
स्पर्शन्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः । प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥२७॥
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः । विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥२८॥
भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् । सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥२९॥

*ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णर्जुनसंवादे*
*कर्मसन्न्यासयोगो नाम पञ्चमोऽध्यायः ॥५॥*

## अथ षष्ठोऽध्यायः

॥ श्री भगवानुवाच ॥

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः । स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः ॥१॥

यं सन्न्यासमिति प्राहुर्योगं तं विद्धि पाण्डव । न ह्यसभ्यस्तसङ्कल्पो योगी भवति कश्चन ॥२॥
आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते ॥३॥
यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते । सर्वसङ्कल्पसन्न्यासी योगारुढस्तदोच्यते ॥४॥
उद्धरेदात्मनात्मानं नात्मानमवसादयेत् । आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥५॥
बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः । अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥६॥
जितात्मनः प्रशान्तस्य परमात्मा समाहितः । शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥७॥
ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः । युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥८॥
सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु । साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥९॥
योगी युञ्जीत सततमात्मानं रहसि स्थितः । एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥१०॥
शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः । नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥११॥
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः । उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥१२॥
समं कायशिरोग्रीवं धारयन्नचलं स्थिरः । सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥१३॥
प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः । मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥१४॥
युञ्जन्नेवं सदात्मानं योगी नियतमानसः । शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥१५॥
नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः । न चाति स्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥१६॥

युक्ताहारविहारस्य युक्तचेष्टस्ट कर्मसु । युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥१७॥
यदा विनियतं चित्तमात्मन्येवावतिष्ठते । निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥१८॥
यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता । योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥१९॥
यत्रोपरमते चित्तं निरुद्धं योगसेवया । यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥२०॥
सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् । वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥२१॥
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः । यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते ॥२२॥
तं विद्याद् दुःखसंयोगवियोगं योगसञ्ज्ञितम् । स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥२३॥
सङ्कल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः । मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥२४॥
शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया । आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥२५॥
यतो यतो निश्चरति मनशुञ्चलमस्थिरम् । ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥२६॥
प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् । उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥२७॥
युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः । सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥२८॥
सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥२९॥
यो मां पश्यति सर्वत्र सर्वं च मयि पश्यन्ति । तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥३०॥
सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः । सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥३१॥

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन । सुखं वा यदि वा दुःखं स योगी परमो मतः ॥३२॥

॥ अर्जुन उवाच ॥

योऽयं योगस्त्वा प्रोक्तः साम्येन मधुसूदन । एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम् ॥३३॥

चञ्चलं हिं मनः कृष्ण प्रमाथि बलवद्दृढम् । तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥३४॥

॥ भीगवानुवाच ॥

असंशयं महाबाहो मनो दुर्निग्रहं चलम् । अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥३५॥

असंयतात्मना योगो दुष्प्राप इति मे मतिः । वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥३६॥

॥ अर्जुन उवाच ॥

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः । अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥३७॥

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति । अप्रतिष्टो महाबाहो विमूढो ब्रह्मणः पथि ॥३८॥

एतन्मे संशयं कृष्णं छेत्तुमर्हस्यशेषतः । त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥३९॥

॥ श्रीभगवानुवाच ॥

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते । न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥४०॥

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः । शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥४१॥

अथवा योगिनामेव कुले भवति धीमताम् । एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥४२॥

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् । यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥४३॥
पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः । जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥४४॥
प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः । अनेक जन्मसंसिद्धस्ततो याति परां गतिम् ॥४५॥
तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः । कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥४६॥
योगिनामपि सर्वेषां मद्गतेनान्तरात्मना । श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥४७॥

*ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णर्जुनसंवादे आत्मसंयमयोगो नाम षष्ठोऽध्यायः ॥६॥*

## अथ सप्तमोऽध्यायः

॥ श्रीभगवानुवाच ॥

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः । असंशयं समग्र मां यथा ज्ञास्यसि तच्छृणु ॥१॥
ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः । यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥२॥
मनुष्याणां सहस्त्रेषु कश्चिद्यतति सिद्धये । यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥३॥
भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥४॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥५॥
एतद्योनीनि भूतानि सर्वाणीत्युपधारय । अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥६॥

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय । मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥७॥
रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः । प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥८॥
पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ । जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥९॥
बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् । बुद्धिर्बुद्धिमतामस्मि तेजस्ते जस्विनामहम् ॥१०॥
बलं बलवतां चाहं कामरागविवर्जितम् । धर्माविरुद्धो भूतेषु कामोऽस्मि भरतवर्षभ ॥११॥
ये चैव सात्त्विका भावा राजसास्तामसाश्च ये । मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥१२॥
त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् । मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥१३॥
दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरतन्ति ते ॥१४॥
न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः । माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥१५॥
चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन । आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥१६॥
तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते । प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥१७॥
उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् । आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥१८॥
बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते । वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥१९॥
कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः । तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥२०॥
यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥२१॥

स तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान्मयैव विहितान्हि तान् ॥२२॥
अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् । देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥२३॥
अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः । परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥२४॥
नाहं प्रकाशः सर्वस्य योगमायासमावृतः । मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥२५॥
वेदाहं समतीतानि वर्तमानानि चार्जुन । भविष्याणि च भूतानि मां तु वेद न कश्चन ॥२६॥
इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत । सर्वभूतानि सम्मोहं सर्गे यान्ति परन्तप ॥२७॥
येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् । ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥२८॥
जरामरणमोक्षाय मामाश्रित्य यतन्ति ये । ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥२९॥
साधिभूताधिदैवं मां साधियज्ञं च ये विदुः । प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥३०॥

*ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णर्जुनसंवादे ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः ॥७॥*

## अथाष्टमोऽध्यायः

॥ अर्जुन उवाच ॥

किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम् । अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥१॥
अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसुदन । प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥२॥

॥ श्री भगवानुवाच ॥

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते । भूतभावोद्भवकरो विसर्गः कर्मसञ्ज्ञितः ॥३॥
अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् । अधियज्ञोऽहमेवात्र देहे देहभूतां वर ॥४॥
अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम् । यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥५॥
यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥६॥
तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च । मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयम् ॥७॥
अभ्यासयोगयुक्तेन चेतसा नान्यगामिना । परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥८॥
कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः । सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात् ॥९॥
प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्स तं परं पुरुषमुपैति दिव्यम् ॥१०॥
यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये ॥११॥
सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च । मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥१२॥
ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् । यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥१३॥
अनन्यचेताः सततं यो मां स्मरति नित्यशः । तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥१४॥
मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् । नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥१५॥

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन । मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥१६॥
सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः । रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥१७॥
अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे । रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसञ्ज्ञके ॥१८॥
भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते । रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥१९॥
परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः । यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥२०॥
अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् । यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥२१॥
पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनयन्यया । यस्यान्तः स्थानि भूतानि येन सर्वमिदं ततम् ॥२२॥
यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः । प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥२३॥
अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् । तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥२४॥
धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् । तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥२५॥
शुक्लकृष्णे गति ह्येते जगतः शाश्वते मते । एकया यात्यनावृत्तिमन्ययावर्तते पुनः ॥२६॥
नैते सृती पार्थ जानन्योगी मुह्यति कश्चन । तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥२७॥
वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टम् ।
अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम् ॥२८॥

*ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णर्जुनसंवादे अक्षरब्रह्मयोगो नामाष्टमयोऽध्यायः ॥८॥*

## अथ नवमोऽध्यायः

॥ श्री भगवानुवाच ॥

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे । ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥१॥
राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् । प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तमव्ययम् ॥२॥
अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप । अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥३॥
मया ततमिदं सर्वं जगदव्यक्तमूर्तिना । मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥४॥
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् । भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥५॥
यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् । तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥६॥
सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् । कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥७॥
प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः । भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥८॥
न च मां तानि कर्माणि निबन्धन्ति धनञ्जय । उदासीनवदासीनमसक्तं तेषु कर्मसु ॥९॥
मयाध्याक्षेण प्रकृतिः सूयते सचराचरम् । हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥१०॥
अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानन्तो मम भूतमहेश्वरम् ॥११॥
मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः । राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥१२॥
महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः । भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥१३॥

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः । नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥१४॥
ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते । एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥१५॥
अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् । मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥१६॥
पिताहमस्य जगतो माता धाता पितामहः । वेद्यं पवित्रमोङ्कार ऋक्साम यजुरेव च ॥१७॥
गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् । प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥१८॥
तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च । अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥१९॥
त्रैविद्या मां सोमपाः पूतपापा-यज्ञैरिष्ट्व स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान् ॥२०॥
ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयीधर्ममनुप्रपन्नागतागतं कामकामा लभन्ते ॥२१॥
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥२२॥
येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धायान्विताः । तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥२३॥
अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च । न तु मामभिजानन्ति तत्त्वेनातश्चयवन्ति ते ॥२४॥
यान्ति देवव्रता देवान्पितृन्यान्ति पितृव्रताः । भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥२५॥
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ।.२६॥

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥२७॥
शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः । सन्न्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥२८॥
समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥२९॥
अपि चेत्सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥३०॥
क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति । कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥३१॥
मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः । स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥३२॥
किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा । अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥३३॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥३४॥

*ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः ॥९॥*

## अथ दशमोऽध्यायः

॥ श्रीभगवानुवाच ॥

भूय एव महाबाहो श्रृणु मे परमं वचः । यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥१॥
न मे विदुः सुरगणाः प्रभवं न महर्षयः । अहमादिर्हि देवानं महर्षीणां च सर्वशः ॥२॥
यो मामजमनादिं च वेत्ति लोकमहेश्वरम् । असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥३॥

बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः । सुखं दुःखं भवोऽभावो भयं चाभयमेव च ॥४॥
अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः । भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥५॥
महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा । मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥६॥
एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः । सोऽविकम्प्येन योगेन युज्यते नात्र संशयः ॥७॥
अहं सर्वस्व प्रभवो मत्तः सर्व प्रवर्तते । इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥८॥
मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् । कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥९॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥१०॥
तेषामेवानुकम्पार्थमहमज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥११॥

॥ अर्जुन उवाच ॥

परं ब्रह्म परं धाम पवित्रं परमं भवान् । पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम ॥१२॥
आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा । असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥१३॥
सर्वमेतदृतं मन्ये यन्मां वदसि केशव । न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥१४॥
स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम । भूतभावन भूतेश देवदेव जगत्पते ॥१५॥
वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः । याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥१६॥
कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन् । केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया ॥१७॥
विस्तरेणात्मनो योगं विभूतिं च जनार्दन । भूयः कथय तृप्तिर्हि श्रृण्वतो नास्ति मेऽमृतम् ॥१८॥

॥ श्रीभगवानुवाच ॥

हन्त के कथयिष्यामि दिव्या ह्यात्मविभूतयः । प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥१९॥
अहमात्मा गुडाकेश सर्वभूताशयस्थितः । अहमादिश्च मध्यं च भूतानामन्त एव च ॥२०॥
आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् । मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥२१॥
वेदानां सामवेदोऽस्मि देवानामस्मि वासवः । इन्द्रियाणां मनश्चास्मि भूतनामस्मि चेतना ॥२२॥
रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम् । वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ॥२३॥
पुरोधसां च मुख्यं मां विधि पार्थ बृहस्पतिम् । सेनानीनामहं स्कन्दः सरसामस्मि सागरः ॥२४॥
महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् । यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥२५॥
अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः । गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥२६॥
उच्चैः श्रवसमश्वानां विद्धि माममृतोद्भवम् । ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ॥२७॥
आयुधानामहं वज्रं धेनूनामस्मि कामधुक । प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ॥२८॥
अनन्तश्चास्मि नागानां वरुणो यादसामहम् । पितृणामर्यमा चास्मि यमः संयमतामहम् ॥२९॥
प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् । मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ॥३०॥
पवनः पवतामस्मि रामः शस्त्रभृतामहम् । झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥३१॥
सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन । अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥३२॥

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च । अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ॥३३॥
मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् । कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥३४॥
बृहत्साम तथा साम्नां गायत्री छन्दसामहम् । मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥३५॥
द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् । जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥३६॥
वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः । मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥३७॥
दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् । मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥३८॥
यच्चापि सर्वभूतानां बीजं तदहमर्जुन । न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥३९॥
नान्तोऽस्मि मम दिव्यानां विभूतीनां परन्तप । एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥४०॥
यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा । तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् ॥४१॥
अथवा बहुनैतेन किं ज्ञातेन तवार्जुन । विष्टभ्याहमिदं कृत्स्नमेकांशन स्थितो जगत् ॥४२॥

*ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णर्जुनसंवादे विभूतियोगो नाम दशमोऽध्यायः ॥१०॥*

**अथैकादशोऽध्यायः**

॥ अर्जुन उवाच ॥

मदनुग्रहाय परमं गुह्यमध्यातमसञ्ज्ञितम् । यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥१॥
भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया । त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥२॥

एवमेतद्यथात्थ त्वमात्मानं परमेश्वर । द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥३॥
मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो । योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥४॥

॥ श्री भगवानुवाच ॥

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः । नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥५॥
पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा । बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥६॥
इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम् । मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥७॥
न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा । दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥८॥

॥ सञ्जय उवाय ॥

एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः । दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥९॥
अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् । अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥१०॥
दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् । सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥११॥
दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता । यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥१२॥
तत्रैकस्थं जगत्कृत्स्न प्रविभक्तमनेकधा । अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥१३॥
ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः । प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥१४॥

॥ अर्जुन उवाच ॥

पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसङ्घान् ।
ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान् ॥१५॥
अनेकबाहूदरवक्त्रनेत्रंपश्यामि त्वां सर्वतोऽनन्तरूपम् ।
नान्तं न मध्यं न पुनस्तवादिंपश्यामि विश्वेश्वर विश्वरुप ॥१६॥
किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम् ॥१७॥
त्वमक्षरं परमं वेदितव्यंत्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥१८॥
अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रंस्वतेजसा विश्वमिदं तपन्तम् ॥१९॥
द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
द्दाष्ट्वद्भुतं रूपमुग्रं तवेदंलोकत्रयं प्रव्यथितं महात्मन् ॥२०॥
अमी हि त्वां सुरसङ्घा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ॥२१॥

रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गन्धर्वयक्षासुरसिद्धसङ्घावीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥२२॥
रूपं महत्ते बहुवक्त्रनेत्रंमहाबाहो बाहुबाहुरूपादम् ।
बहूदरं बहुदंष्ट्राकरालंद्दृष्ट्व लोकाः प्रव्यथितास्तथाहम् ॥२३॥
नभःस्पृशं दीप्तमनेकवर्णव्यात्ताननं दीप्तविशालनेत्रम् ।
द्दृष्ट्व हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो ॥२४॥
दंष्ट्वाकरालानि च ते मुखानि द्दृष्ट्वैव कालानसन्निभानि ।
दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥२५॥
अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसङ्घैः ।
भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥२६॥
वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु सन्दृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥२७॥
यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीराविशन्ति वक्त्राण्यभिविज्वलन्ति ॥२८॥
यथा प्रदीप्तं ज्वलनं पतङ्गाविशन्ति नाशाय समृद्धवेगाः ।

तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः ॥२९॥
लेलिह्यसे ग्रसमानः समन्ताल्लोकान्समग्रान्वदनैर्ग्वजद्भिः ।
तेजोभिरापूर्व जगत्समग्रंभासस्तवोग्राः प्रतपन्ति विष्णो ॥३०॥
आख्याहि मे को भवानुग्ररुपोनमोऽस्तु ते देववर प्रसीद ।
विज्ञातुमिच्छामि भवन्तमाद्यंन हि प्रजानामि तव प्रवृत्तिम् ॥३१॥

॥ श्रीभगवानुवाच ॥

कालोऽस्मि लोकक्षयकृत्प्रवृद्धोलोकान् समाहर्तुमिह प्रवृत्तः ।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः ॥३२॥
तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ॥३३॥
द्रोणं च भीष्मं च जयद्रथं च कर्णं ततान्यानपि योधवीरान् ।
मयाहतांस्त्वं जहि मा व्यथिष्ठायुध्यस्व जेतासि रणे सपत्नान् ॥३४॥

॥ सञ्जय उवाच ॥

एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी ।
नमस्कृत्वा भूय एवाह कृष्णंसगद्गदं भीतभीतः प्रणम्य ॥३५॥

॥ अर्जुन उवाच ॥

स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च ।

रक्षांसि भीतानि दिसो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसङ्घाः ॥३६॥

कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।

अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥३७॥

त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम् ।

वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप ॥३८॥

वायुर्यमोऽग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च ।

नमो नमस्तेऽस्तु सहस्त्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते ॥३९॥

नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व ।

अनन्तवीर्यामितविक्रमस्त्वंसर्व समाप्नोषि ततोऽसि सर्वः ॥४०॥

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ।

अजानता महिमानं तवेदंमया प्रमादात्प्रणयेन वापि ॥४१॥

यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु ।

एकोऽथवाप्यच्युत तत्समक्षंतत्क्षामये त्वामहमप्रमेयम् ॥४२॥

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्योलोकत्रयेऽप्यप्रतिमप्रभाव ॥४३॥
तस्मात्प्रणम्य प्रणिधाय कायंप्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम् ॥४४॥
अदृष्टपूर्वं हृषितोषऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देवरूपंप्रसीद देवेश जगन्निवास ॥४५॥
किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं ततैव ।
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥४६॥

॥ श्रीभगवानुवाच ॥

मया प्रसन्नेन तवार्जुनेदंरूपं पदं दर्शितमात्मयोगात् ।
तेजोमयं विश्वमनन्तमाद्यंयन्मे त्वदन्येन न दृष्टपूर्वम् ॥४७॥
न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरूग्रैः ।
एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ॥४८।.
मा ते व्यथा मा च विमूढभावोदृष्ट्वा रूपं घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वंतदेव मे रूपमिदं प्रपश्य ॥४९॥

॥ सञ्जय उवाच ॥

इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः ।
आश्वासयामास च भीतमेनंभूत्वा पुनः सौम्यवपुर्महात्मा ॥५०॥

॥ अर्जुन उवाच ॥

द्रुष्ट्वेदं मानुषां रूपं तव सौम्यं जनार्दन इदानीमस्मि संवृत्तः सचेताः प्रकृति गतः ॥५१॥

॥ श्री भगवानुवाच ॥

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम । देवा अप्यस्य रूपस्य नित्यं दर्शनकाङिक्षणः ॥५२॥
नाहं वेदैर्न तपसा न दानेन न चेज्यया । शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥५३॥
भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥५४॥
मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः । निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥५५॥

*ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णर्जुनसंवादे विश्वरूपदर्शनयोगो नैमैकादशोऽध्यायः ॥११॥*

## अथ द्वादशोऽध्यायः

॥ अर्जुन उवाच ॥

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते । ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥१॥

॥ श्री भगवानुवाच ॥

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते । श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥२॥
ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते । सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥३॥
सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः । ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥४॥
क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् । अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥५॥
ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः । अनन्येनैव योगेन मां ध्यायन्त उपासते ॥६॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात् । भवामि नचिरात्पार्थ मय्यावेशितचेतसाम् ॥७॥
मय्येव मन आधत्स्व मयि बुद्धिं निवेशय । निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥८॥
अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् । अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥९॥
अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव । मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥१०॥
अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः । सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥११॥
श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते । ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥१२॥
अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च । निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥१३॥
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः । मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥१४॥
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः । हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥१५॥
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः । सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥१६॥

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति । शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥१७॥
समः शत्रौ च मित्रे च तथा मानापमानयोः । शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥१८॥
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् । अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥१९॥
ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते । श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥२०॥

*ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगो नाम द्वादशोऽध्यायः ॥१२॥*

## अथ त्रयोदशोऽध्यायः

॥ श्रीभगवानुवाच ॥

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते । एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥१॥
क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत । क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥२॥
तत्क्षेत्रं यच्च यादृक्च यद्विकारि तवश्च यत् । स च यो यत्प्रभावश्च तत्समासेन मे श्रृणु ॥३॥
ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् । ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चतैः ॥४॥
महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च । इन्द्राणि दशैकं च पञ्च चेन्द्रियगोचराः ॥५॥
इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः । एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥६॥
अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् । आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥७॥
इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च । जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥८॥

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु । नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥९॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी । विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥१०॥
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् । एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥११॥
ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते । अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥१२॥
सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् । सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥१३॥
सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् । असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥१४॥
बहिरन्तश्च भूतानामचरं चरमेव च । सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥१५॥
अविभक्तं च भूतेषु विभक्तमिव च स्थितम् । भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥१६॥
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते । ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥१७॥
इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः । मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥१८॥
प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि । विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान् ॥१९॥
कार्यकरणकर्तृत्वे हेतुः प्रकृतिरुच्यते । पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥२०॥
पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान् । कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥२१॥
उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥२२॥
य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह । सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥२३॥
ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना । अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे ॥२४॥

अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते । तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥२५॥
यावत्सञ्जायते किञ्चित्सत्त्वं स्थावरजङ्गमम् । क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥२६॥
समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् । विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥२७॥
समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम् । न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥२८॥
प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः । यः पश्यति तथात्मानमकर्तारं स पश्यति ॥२९॥
यदा भूतपृथग्भावमेकस्थमनुपस्यति । तत एव च विस्तारं ब्रह्म सम्पद्यते तदा ॥३०॥
अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः । शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥३१॥
यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते । सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥३२॥
यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः । क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥३३॥
क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा । भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥३४॥

*ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णर्जुनसंवादे क्षेत्रक्षेत्रज्ञविभागयोगो नाम नाम त्रयोदशोऽध्यायः ॥१३॥*

## अथ चतुर्दशोऽध्यायः

॥ श्रीभगवानुवाच ॥

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् । यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥१॥
इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥२॥

मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् । सम्भवः सर्वभूतानां ततो भवति भारत ॥३॥
सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः । तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥४॥
सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः । निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥५॥
तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् । सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥६॥
रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् । तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥७॥
तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् । प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥८॥
सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत । ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥९॥
रजस्तमश्चाभिभूय सत्त्वं भवति भारत । रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥१०॥
सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते । ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ॥११॥
लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा । रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥१२॥
अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च । तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥१३॥
यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् । तदोत्तमविदां लोकानमलान्प्रतिपद्यते ॥१४॥
रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते । तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥१५॥
कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् । रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥१६॥
सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च । प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥१७॥
ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः । जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥१८॥
नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति । गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥१९॥

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् । जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥२०॥

॥ अर्जुन उवाच ॥

कैर्लिङ्गैस्त्रीन्गुणानेतानतीतो भवति प्रभो । किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ॥२१॥

॥ श्री भगवानुवाच ॥

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव । न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति ॥२२॥

उदासीनवदासीनो गुणैर्यो न विचाल्यते । गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ॥२३॥

समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः । तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥२४॥

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः । सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥२५॥

मां च योऽव्यभिचारेण भक्तियोगेन सेवते । स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥२६॥

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च । शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥२७॥

*ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णर्जुनसंवादे गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः ॥१४॥*

ॐ श्रीपरमात्मने नमः

**अथ पञ्चदशोऽध्यायः**

॥ श्रीभगवानुवाच ॥

ऊर्ध्वमूलमधः शाखमश्वत्थं प्राहुरव्ययम् । छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥१॥

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके ॥२॥
न रुपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा ।
अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा ॥३॥
ततः पदं तत्परिमार्गितव्यंयस्मिन्गाता न निवर्तन्ति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥४॥
निर्मानमोहा जितसङ्गदोषाअध्यात्मनित्या विनिवृत्तकामाः ।
द्वन्द्वैर्विमुक्ताः सुखदुःखसञ्ज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ॥५॥
न तद्भासयते सूर्यो न शशाङ्को न पावकः । यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥६॥
ममैवांशो जीवलोके जीवभूतः सनातनः । मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥७॥
शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥८॥
श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च । अधिष्ठाय मनश्चायं विषयानुपसेवत् ॥९॥
उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् । विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥१०॥
यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् । यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥११॥
यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥१२॥
गामाविश्य च भूतानि धारयाम्यहमोजसा । पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥१३॥

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥१४॥
सर्वस्य चाहं हृदि सन्निविष्टोमत्तः स्मृतिर्ज्ञानमपोहनं च । वेदैश्च सर्वैरहमेव वेद्योवेदान्तकृद्वेदविदेव चाहम् ॥१५॥
द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥१६॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥१७॥
यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥१८॥
यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् । स सर्वविद्भजति मां सर्वभावेन भारत ॥१९॥
इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ । एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥२०॥

*ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णर्जुनसंवादे पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः ॥१५॥*

## अथ षोडशोऽध्यायः

॥ श्रीभगवानुवाच ॥

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः । दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥१॥
अहिंसा सत्यमक्रोधस्त्यागःः शान्तिरपैशुनम् । दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥२॥
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता । भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥३॥
दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च । अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ॥४॥
दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता । मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव ॥५॥

द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च । दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे श्रृणु ॥६॥
प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः । न सौचं नापि चाचारो न सत्यं तेषु विद्यते ॥७॥
असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ॥८॥
एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः । प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥९॥
काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः । मोहाद्गृहीत्वासद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः ॥१०॥
चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः । कामोपभोगपरमा एवावदिति निश्चिताः ॥११॥
आशापाशशतैर्बद्धाः कामक्रोधपरायणः । ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥१२॥
इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् । इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥१३॥
असौ मया हतः शत्रुर्हनिष्ये चापरानपि । ईश्वरोऽमहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥१४॥
आढ्यऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया । यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥१५॥
अनेकचित्तविभ्रान्ता मोहजालसमावृताः प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥१६॥
आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः । यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥१७॥
अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः । मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥१८॥
तानहं द्विषतः क्रूरान्संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥१९॥
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥२०॥
त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः । कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥२१॥

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः । आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥२२॥
यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः । न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥२३॥
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ । ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥२४॥

*ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णर्जुनसंवादे दैवासुरसम्पद्विभागयोगो नाम षोडशोऽध्यायः ॥१६॥*

## अथ सप्तदशोऽध्यायः

॥ अर्जुन उवाच ॥

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः । तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥१॥

॥ श्रीभगवानुवाच ॥

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा । सात्त्विकी राजसी चैव तामसी चेति तां श्रृणु ॥२॥
सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत । श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥३॥
यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः । प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥४॥
अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः । दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ॥५॥
कर्शयन्तः शरीरस्थं भूतग्राममचेतसः । मां चैवान्तः शरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥६॥
आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः । यज्ञस्तपस्तथा दानं तेषां भेदमिमं श्रुणु ॥७॥
आयुः सत्त्वबलारोग्यसुखप्रीतिविधर्धनाः । रस्याः स्निग्धाः स्थिरा हृद्याआहाराः सात्त्विकप्रियः ॥८॥

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः । आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥९॥
यातयामं गतरसं पूति पर्युषितं च यत् । उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥१०॥
अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते । यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥११॥
अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् । इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥१२॥
विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् । श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥१३॥
देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् । ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥१४॥
अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् । स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥१५॥
मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः । भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥१६॥
श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः । अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥१७॥
सत्कारमानपूजार्थं तपो दम्भेन चैव यत् । क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥१८॥
मूढग्राहेणात्मनो यत्पीडया क्रियते तपः । परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥१९॥
दातव्यमिति यद्दानं दीयतेऽनुपकारिणे । देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥२०॥
यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः । दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥२१॥
अदेशकाले यद्दानमपात्रेभ्यश्च दीयते । असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥२२॥
ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः । ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥२३॥
तस्मादोमित्युदाहृत्य यज्ञदानतपः क्रियाः । प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥२४॥

तदित्यनभिसन्धाय फलं यज्ञतपः क्रियाः । दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥२५॥
सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते । प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥२६॥
यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते । कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥२७॥
अश्रद्धया हुतं दत्तं तपस्तप्तं च यत् । असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥२८॥

*ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः ॥१७॥*

## अथाष्टादशोऽध्यायः

॥ अर्जुन उवाच ॥

सन्न्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् । त्यागस्य च हृषीकेश पृथक्केनिषूदन् ॥१॥

॥ श्री भगवानुवाच ॥

काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदुः । सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥२॥
त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः । यज्ञदानतपः कर्म न त्याज्यमिति चापरे ॥३॥
निश्चयं श्रृणु मे तत्र त्यागे भरतसत्तम । त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्तितः ॥४॥
यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् । यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥५॥
एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च । कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥६॥
नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते । मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥७॥

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् । स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥८॥
कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन । सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥९॥
न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते । त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥१०॥
न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः । यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥११॥
अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् । भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित् ॥१२॥
पञ्चैतानि महाबाहो कारणानि निबोध मे । साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥१३॥
अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् । विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥१४॥
शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः । न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥१५॥
तत्रैवं सति कर्तारमात्मानं केवलं तु यः । पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥१६॥
यस्य नाहंकृत्तो भावो बुद्धिर्यस्य न लिप्यते । हत्वापि स इमाँ ल्लोकान्न हन्ति न निबध्यते ॥१७॥
ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना । करणं कर्म कर्तेति त्रिविधः कर्मसङ्ग्रहः ॥१८॥
ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः । प्रोच्यते गुणसङ्ख्याने यथावच्छृणु तान्यपि ॥१९॥
सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥२०॥
पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् । वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥२१॥
यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् । अतत्त्वार्थवदल्पं च तत्तामसमुदाहृत् ॥२२॥
नियतं सङ्गरहितमरागद्वेषतः कृतम् । अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥२३॥

यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः । क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥२४॥
अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषम् । मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥२५॥
मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः । सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥२६॥
रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः । हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥२७॥
अयुक्तः प्राकृतः स्तब्धः शठोऽनैष्कृतिकोऽलसः । विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥२८॥
बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं श्रृणु । प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय ॥२९॥
प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये । बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥३०॥
यया धर्ममधर्मं च कार्यं चाकार्यमेव च । अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥३१॥
अधर्मं धर्ममिति या मन्यते तमसावृता । सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥३२॥
धृत्या यया धारयते मनः प्राणेन्द्रियक्रियाः । योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥३३॥
यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन । प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥३४॥
यया स्वप्नं भयं शोकं विषादं मदमेव च । न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी ॥३५॥
सुखं त्विदानीं त्रिविधं श्रृणु मे भरतर्षभ । अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ॥३६॥
यत्तदग्रे विषमिव परिणामेऽमृतोपमम् । तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥३७॥
विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् । परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥३८॥
यदग्रे चानुबन्धे च सुखं मोहनमात्मनः । निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥३९॥

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः । सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥४०॥
ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप । कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥४१॥
शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च । ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥४२॥
शौर्य तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् । दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥४३॥
कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् । परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥४४॥
स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः । स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥४५॥
यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥४६॥
श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् । स्वभावनियंत कर्म कुर्वन्नाप्नोति किल्बिषम् ॥४७॥
सहजं कर्मं कौन्तेय सदोषमपि न त्यजेत् । सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥४८॥
अशक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः । नैष्कर्म्यसिद्धिं परमां सन्न्यासेनाधिगच्छति ॥४९॥
सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे । समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥५०॥
बुद्धया विशुद्धया युक्तो धृत्यात्मानं नियम्य च । शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥५१॥
विविक्तसेवी लघ्वाशी यतवाक्कायमानसः । ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥५२॥
अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् । विमुच्ये निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥५३॥
ब्रह्मभूतः प्रसन्नात्मा न शोचि न काङ्क्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥५४॥
भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥५५॥

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः । मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥५६॥
चेतसा सर्वकर्माणि मयि सन्न्यस्य मत्परः । बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥५७॥
मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि । अथ चेत्त्वमहङ्कारान्न श्रोष्यसि विनङक्ष्यसि ॥५८॥
यदहङ्कारमाश्रित्य न योत्स्य इति मन्यसे । मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥५९॥
स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा । कर्तुनेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत् ॥६०॥
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥६१॥
तमेव शरणं गच्छ सर्वभावेन भारत । तत्प्रसादात्परां शान्तिं स्थानं प्रप्स्यसि शाश्वतम् ॥६२॥
इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया । विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥६३॥
सर्वगुह्यतमं भूयः श्रृणु मे परमं वचः । इष्ठोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥६४॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥६५॥
सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥६६॥
इदं ते नातपस्काय नाभक्ताय कदाचन । न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥६७॥
य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति । भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥६८॥
न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तम्ः । भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥६९॥
अध्येष्यते च य इमं धर्म्यं संवादमावयोः । ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥७०॥
श्रद्धावाननसूयश्च श्रृणुयादपि यो नरः । सोऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ॥७१॥

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा । कच्चिदज्ञानसम्मोहः प्रनष्टस्ते धनञ्जय ॥७२॥

॥ अर्जुन उवाच ॥

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत । स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥७३॥

॥ सञ्जय उवाच ॥

इत्यहं वासुदेवस्य पार्थस्य च महात्मनः । संवादमिममश्रौषमद्भुतं रोमहर्षणम् ॥७४॥

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम् । योगं योगेश्वरात्कृष्णात्साक्षात्कथयः स्वयम् ॥७५॥

राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम् । केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥७६॥

तच्च संस्मृत्य संस्मृत्य रुपमत्यद्भुतं हरेः । विस्मयो मे महान्राजन्हृष्यामि च पुनः पुनः ॥७७॥

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥७८॥

*ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णर्जुनसंवादे मोक्षसन्न्यासयोगो नामाष्ठादशोऽध्यायः ॥१८॥*

●

## आरती ( सत्संगिजीवन ३/५७ - २६ )

जय देव ! जय देव ! जय मङ्गलधामन् (२) नारायण ! पुरुषोत्तम ! (२) नरसख ! सकलात्मन् ! जय देव ! (२) (ध्रुवपदम्)

भास्करचारुरुचौ च प्रसरद्बहुकिरणे (२) नानारत्नसमुचित (२) मणिनिकराभरणे ॥
मण्डपमध्यविराजितदोलासनसारे (२) वन्दे त्वां स्थितमीशं (२) सुरनरपरिवारे जय देव० ॥१॥

हीरकवरपरिकान्तं दधतं द्युति विमलं (२) वन्दे त्वां मकराकृति (२) कुण्डलवरयुगलम् ॥
रत्नोज्ज्वलतरमुकुट शिरसा च दधानं (२) चञ्चललोचनवीक्षण (२) कृतबहुसुखदानं जय देव० ॥२॥

चञ्चद्वस्त्रनिवीते विद्युद्द्युतिवलये (२) केयूरे च कराभ्यां (२) दधति त्वयि निलये ॥
नानाहार विराजितहृदये मम चित्तं (२) रमतां सुखदे नित्यं (२) त्वदनुस्मृतिवित्तं जय देव० ॥३॥

नूपुरशोभितचरणं करधृतवरकमलं (२) ईषद्धास्यविसर्पित (२) दशनद्युतिपटलम् ॥
ध्यायामि प्रभुमेकं सततं हृदये ऽहं (२) त्वामिति पाहि सदा मां (२) निजजनमतिगेहं जय देव० ॥४॥

सर्वेशः सकलात्मा सुरनरमुनिपाता (२) स्वामी सम्मत एकः (२) स्त्वम तो ऽ खिलधाता ॥
मामिति शरणायातं ह्युद्धर भवसिन्धो (२) नारायण ! बदरीश्वर ! (२) देव ! दयासिन्धो ! जय देव० ॥५॥

## आरती ( सत्संगिजीवन ४/२३ - २९ )

जयदेव जयदेव जयमंगल कर्त्ता (२) नारायण ऋषि भर्ता (२) कलिमल भयहर्ता। (ध्रुवपदम्) तेजः संचयराजत्सिततरतनुकांते (२)
नानामुक्त समर्चित (२) सुखकर ब्रह्म शांते सुरगण वंदित चरणः करुणानिधिरात्मा
(२) परमंब्रह्मपरात्पर (२) निर्गुण परमात्मा...जयदेव ॥१॥
भूमौदेव सपत्नैः शातित तनुगेहं, (२) पातुसात्त्वत धर्मं (२) प्रकटित नरदेहम् ॥
धर्मात्मज निज नंदननंदित वृषसर्गं, (२) वंदेनैष्ठिकवर्य्यं (२) त्वामितमुनिवर्गम्...जयदेव ॥२॥
मद्यामिष पर वनिता निरता सुरवारं, (२) महसास्वेन निरस्य (२) स्तम इव सविताऽरम् ॥
पाषंडाध्व सुरक्षित निजजन भवहारी (२) मनसिज दर्प विमोचन (२) कुपथक्षयकारी...जयदेव ॥३॥
वरमभयं च कराभ्यां ददतं सित वसनं (२) श्यामंसितमुपवीतं (२) दधतं मितहसनम् ॥
शारद पूर्णसुधाकर बिंबद्युतिवदनं (२) हृदिकुर्वे च भवंतं (२) शुभगुणगणसदनम्...जयदेव ॥४॥
तिलकं कैसर मलिके दधतंदृशिलोभं (२) साक्षत कुंकुम चंद्रक (२) रुचिरं बहुशोभम् ॥
चंदनकौसुमशेखर बहुविध शुभहारै (२) स्त्वामहमार्चितमीडे (२) निजजनपरिवारैः...जयदेव ॥५॥
प्रेमवती तनुजेत्वयि जलरुहदलनयने (२) रमतां ममधीरनिशं (२) निजनिजपदनयनें ॥
पाहिसदापुरुषोत्तमधार्मिकवर विष्णो (२) त्वच्छरणागतजीवं (२) कृष्ण हरे जिष्णो...जयदेव ॥६॥



shree swaminarayan mandir
amdavad - [illegible]